CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

ए वा० ६ श्रीसीतारामचरणसरोजेभ्यो नमः ॥ नंदद्वंदारकाणि क्षपितकुपितहृत्ताटकानाटकानि कंदलुंदात्म
१ जानि तत्त्वात्कृतवल्लवहालिकेलिक्षपाणि तु भ्यस्तधार्मिकानि तत निशिरणटंकेठकोइच्छेदानि शस्तूहव्यूहमंगं
य दद्युरघुपतेः पत्रिशोणानतेनानि १ एवमतिदूरपारं पारावारं गोष्पदवत्समुत्तीर्य नितान्तकं लंकां प्रविश्य समाश्वास्य वैदेही
मप्रोक्तवनभंगा... तिमानुषपराक्रमं हत्वा समागतो हनुमतः प्रेयसीव तां तमुपलभ्यानंदभरेण जाधिराजो रामभद्रः
शस्य हेगुरवः तुल्याः परोहेमिव्र बांधवाः कर्मतेदासम स्वाम्यं न कदाचन पुत्रका इति नीति शास्त्रसंमतं हृत कार्य

श्रुत्वा हनुमतो वाक्यं यथावदभिभाषितम् रामः प्रीतिसमायुक्तो वाक्यमुत्तरमब्रवीत् १

कृतं हनुमता कार्यं सुमहद्भुवि दुर्लभम् मनसापि यदन्येन न शक्यं धरणीतले २ २ २ २

स्व. सज्जने स्वामिन्येवं वर्तित व्यमिति सदाचारमुपदेष्टुं सुग्रीवादिहरिवीराणामुत्साहमुत्पादयितुं च सभा हूतजा
नकी वर्तां तं हनूमन्तमस्तौ षीदित्याह श्रुत्वेति यथावस्थितप्रकारेणाभिभाषितं हनुमतो वाक्यं श्रुत्वा तदा करी
नमुदितमना रामः उत्तरं प्रियवाक्य... तोत्तरं कालीनं हैवा क्यमब्रवीदित्यर्थः १ तदाह कृतमिति यत्र महो दि
सनेन सागरतारणमुच्यते सुमहत्सनेन ... लंकाधर्षणं प्राद... र्लभमित्येनेन लंकाधर्षणं मनसापि न शक्यमि
त्यनेन नयनैर्गमः प्रथमं सागरतरणमवनतत्तु शक्यः तीर्थ्वापि न लंकां प्रवेष्टुं विधर्षापि न धर्षयितुं नत
प ... पितुं धर्ष

नि
श्रि
राम० १

१ अन्या प्राकाव्यमेवाहनहीति अन्यत्रापि अन्यस्त्य सर्पस्य स्वार्थे त्रल् ३ देवदानवयक्षाणामिति करणे शेषत्वेन विवक्षिते षष्ठी देवादिभिर् दुर्धर्षां लंकां सत्त्वं बलमाश्रित्य प्रविष्टो हनूमतोऽन्यो जीवन् को नाम निष्क्रामेन् नि कोपि सर्वः ४ शत्रुशोपि दुर्लभ रत्नाह कस्तीति यो हनूमतः समो न स्यात् को विप्रादिरन्वयः ५ हनूमता सुग्रीवस्य महदन्य १

न हि तं परिपश्यामि यस्तरेत महार्णवम् १ अन्यत्र गरुडाद्वायोरन्यत्र च हनूमतः २ देवदान
वयक्षाणां गन्धर्वोरगरक्षसाम् अप्रधृष्यां पुरीं लंकां रावणेन सुरक्षिताम् प्रविष्टः सत्त्वमा
श्रित्य जीवन् को नाम निष्क्रमेत् ४ को विशेत् सुदुराधर्षां एतां सेन्द्रैः सुरक्षिताम् यो वीर्य
बलसंपन्नो न समः स्याद्धनूमतः ५ भृत्यकार्यं हनुमता सुग्रीवस्य कृतं महत् एवं विधाय
स्वबलं सदृशं विक्रमस्य च ६ यो हि भृत्यो नियुक्तः सन् भर्त्रा कर्मणि दुष्करे कुर्यात्तदनुरागेण

साध्यं भृत्यकार्यं सुग्रीवभृत्यस्त्वोचितं कार्यं समुद्रलंघनं लंकाप्रवेशसीतादर्शनरूपं कृतम् एवं विधाय पदुक्तप्रकारेण भृत्यकार्यं कृत्वा ऽतिक्रमस्य सदृशं स्वबलं च कृतं विक्रमानुरूपमक्षवनभंगादिरूपं स्वबलं कार्यं च कृतमित्यर्थः ६ हनूमतो भृत्यस्योत्तमत्वं दर्शयितुमुत्तममध्यमाधमभृत्यानां लक्षणान्याह यो हीत्यादि त्रिभिः कत्रेयेण यो हि भृत्यो भर्त्रा दुष्करे कर्मणि नियुक्तस्तत्कार्यं कृत्वा तदनुरागेण कार्याविरोधेन कार्यान्तरमपि कुर्यात् तं भृत्यं पुरुषोत्तममाहुः

रा० वा० यु०
२

यस्तु नियुक्तो बुध्या समर्थश्च सन् परं स्वामिनिर्दिष्टादधिकं नृपतेः प्रियं न कुर्यात् किंतु संदिष्टमेव कुर्यात्तं मध्यममाहुः ८ समा
हितः कार्यान्तरा व्यग्रो युक्तः समर्थश्च यो नृपतेर्नियुक्तो नृपतेरुक्तमपि कार्यं न कुर्यात्तं पुरुषाधममाहुः ९ उक्तेषु त्रिविधपु
रुषेषूत्तमो मध्यमस्साहतदिति नियोगे सीतान्वेषणमात्रे नियुक्तेन हनूमता तत् अनियुक्तमपि कृतं स उत्तम एवेत्युक्तं तदेव
प्याह न चात्मेति आत्मा स्वकुलं लघुत्वं न नीतः राक्षसैरपराजितत्वात् सुग्रीवश्चापि तोषितः अधिककार्यकरणादित्यर्थः १० वि
र्मतः परिरक्षिताः सप्तम्यर्थे तसिः धर्मे स्थापिताः अधर्मान्निवर्तिता इति यावत् यदि हनुमान्वैदेहीं नाद्रक्ष्यत्तदाहं जीवि

यो नियुक्तः परं कार्यं न कुर्यान्नृपतेः प्रियम् । स योक्तः समर्थश्च तमाहुर्मध्यमं नरम् ॥ ८ ॥ नियुक्तो
नृपतेः कार्यं न कुर्याद्यः समाहितः । स योक्तः समर्थश्च तमाहुः पुरुषाधमम् ॥ ९ ॥ तन्नियोगे नि
युक्तेन कृतं कृत्यं हनूमता । न चात्मा लघुतां नीतः सुग्रीवश्चापि तोषितः ॥ १० ॥ अहं च रघुवंशश्च लक्ष्मण
श्च महाबलः । वैदेह्या दर्शनेनाद्य धर्मतः परिरक्षिताः ॥ ११ ॥ इदं तु मम दीनस्य मनो भूयः प्रकर्षति । यदिहा
स्य प्रियाख्यातुर्न कुर्मि सदृशं प्रियम् ॥ १२ ॥

तुं न शक्यामित्यधियोगात्सर्वे हि स्ववंशोत्पन्नस्मरणादयश्च तथा कुर्युः तथा चास्य हनूमतो
पाधर्मः सर्वेषामस्मे वदितिभावः एवं हनुमत्कर्म प्रशस्य स्वेपसेवं किंतु तस्यास्य सुपकारकरणाजनितो विषादः सीता च तां तच्च वाणीतेद
मपि चिरेण ध्यायमाना पयन्ती साहरदयिस्यादि यदस्य प्रियाख्यातुर्हि हेवस्य सदृशं योग्यं प्रियं न कुर्मि न करोमि इदं तु दीनो प्रियाविरहदु राम०
खी यस्ता मम मनो भूयः प्रकर्षति व्यथयति न प्रत्युपकारे वचनैः कस्यचिद्धस्तुनोऽप्यतया प्रीयतु तुल्यो केनतस्य सदृशं पिपवस्तु नाभीने १२

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

एवंलोके कुत्रापि सदृशं प्रियमप्रपन्नस्वस्वरूपं पर्यालोच्याह एष इति तस्य तथा कृतमहदुपकारस्य महात्मनः महति भूमानंदे रमंते योगिनोनेत
इत्यादिश्रुतिसिद्धे मय्येव आत्मानमनोपमत स्य हनूमत इमं कालं प्राप्य योग्यमवसरं लब्ध्वा एष सर्वस्वभूतः परिष्वंगो मया दत्तोऽस्तीति शेषः १३ प्री
तिहृष्टांगः प्रीत्या पुलकितगात्रः कृतात्मानमित्यादि विशेषणानि परिष्वंगहेतवः १४ ध्यात्वा पुनरुदुत्तरश्लोकस्यादि त्रिभिःश्लोकैः सुग्रीव

एष सर्वस्वभूतस्तु परिष्वंगो हनूमतः मया कालमिमं प्राप्य दत्तस्तस्य महात्मनः १३ इत्युक्त्वा प्रीतिहृष्टांगो
रामस्तं परिषस्वजे हनूमंतं कृतात्मानं कृतकार्यमुपागतम् १४ ध्यात्वा पुनरुवाचेदं वचनं रघुसत्तमः
हरीणामीश्वरस्यैव सुग्रीवस्योपशृण्वतः १५ सर्वथा सुकृतं तावत्सीतायाः परिमार्गणम् सागरं तु स
मासाद्य पुनर्नष्टं मनो मम १६ कथं नाम समुद्रस्य दुष्पारस्य महांभसः हरयो दक्षिणं पारं गमिष्यं
ति समागताः १७ यद्यप्येष तु वृत्तांतो वैदेह्या गदितो मम समुद्रपारगमने हरीणां किमिवोत्तरम् १८

समित्युक्तमर्थं वदन् सुग्रीवेणोपशृण्वति सत्युवाचेत्यन्वयः १५ सुकृतं अधिकस्यापि कारणादि शेषः सागरं तु समासाद्य तत्स्य दुस्त
रत्वमालोच्य पुनर्नष्टं सीतावृत्तांतश्रवणोत्पन्नहर्षमपि पुनर्विषादं प्राप्तं १६ विषादमेव प्रकटयति कथमिति दुष्पारस्य दुःप्राप्यतीरस्य म
हांभसः अगाधजलस्य समागता मिलिताः १७ किंचैष वृत्तांतो न ममैव किंतु सीताया अपीत्याह यद्यपीति एष वृत्तांतो मम
वैदेह्या गदितः अतो हरीणां पारगमने किंतु मिवोत्तरं उत्तरकालोचितं कर्म इति शेषः १८

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

ध्यात्वा समुद्रतरणे कथं स्यादिति संचिंत्य स्वर्पः सुग्रीवेति सप्तम्यर्थे षष्ठी सुग्रीवे भरत ति तस्य वाचेस

ध्यात्वा पुनरुवाचेदं वचनं घृसत्तमः हरीणामीश्वरस्यैव सुग्रीवस्योपशृण्वतः १५
स र्वैष्यामुह्लं तेता व त्सीतायाः परिमार्गणात् सागरं तु समासाद्य पुनर्नष्टं मनोमम १६
कथं नाम समुद्रस्य दुष्पारस्य महांभसः हरयोदक्षिणं पारं गमिष्यंति समागताः १७

न्वयः १५ सर्व्वतं स्वधिकस्यापि करणादि त्यर्थः सागरं तु समासाद्य तस्य दुस्तिरत्वमालोच्य पुनर्नष्टं सीतान्वेषणं तत्र व
लोन हृष्टमपि पुनर्विषादेषा प्तं १६ विषादमेव प्रकटयति कथमिति दुःपारस्य दुःप्राप्तीरस्य महांभसः ग्रगाधजल
स्य समागता मिलिताः १७

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

किं चैषवितर्केनिममैवकिंतुसीतायाः प्रपीलाहयद्यपीति प्रयस्यैर्थं एवतु वक्तोनः ममवैदेह्यापिगदितः अप्रतोहृतिरांपारगम
नेकिमिवोत्तरं उत्तरकाले चिंतिकर्मकिमिति सर्थः १८ शोकसंभ्रांतः विदितेपिसीतावृत्तांते तत्प्राप्तिविषये उपायालोचनपाक
लुषितांतःकरणइसर्थः ध्यानमुपागमत् सागरतरणोपायचिंतामकरोदिसर्थः १९ इतिश्रीमद्रामायणीयविषमप

यद्यप्येवतु वृत्तांतो वैदेह्यागतोमम॥ समुद्रपारगमने हरीणांकिमिवोत्तरम्॥१८॥ इत्युक्त्वा शोकसंभ्रां
तो रामः शत्रुनिबर्हणः॥ हनूमंतं महात्मानं ततो ध्यानमुपागमत्॥१९॥ इत्यार्षे रामायणे वाल्मीकीये
युद्धकांडे प्रथमः सर्गः॥१॥ तं तु शोकपरिद्यूनं रामं दशरथात्मजम्‌ उवाच वचनं श्रीमान्सुग्रीवः
शोकनाशनम् १ किं त्वं संतप्यसे वीर यथान्यः प्राकृतस्तथा मैवं भूस्त्यज संतापं कृतघ्न इव सौहृदम्
२ संतापस्य च ते स्थानं न हि पश्यामि राघव प्रवृत्तावुपलब्धायां ज्ञाते च निलये रिपोः ३ ३ ३ ३

द्व्याख्याने युद्धकांडे प्रथमः सर्गः १ एवं शोकसंभ्रांतं रामं वक्ष्यमाणसमुद्रः खेतयानं शोकमसहमानः सुग्रीवः शोकनिवारकं
वचनमुवाचेत्याह तं त्विति शोकपरिद्यूनं शोकसंतप्तं १ प्राकृतोयथा तप्यति तथा त्वं किं परितप्यसे हे वीर एवं संतप्तो मा भूः कृतघ्नो

व्याख्यासमेतं युद्धकाण्डं पत्र ८
व्याख्यासमेतं युद्धकाण्डं पत्र ५

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

ए०पु० त्वदुःखापयोलोचनयापित्तशोकावकाश इत्याह मतिमानित्यादि शास्त्रवित्नीत्यादिशास्त्रज्ञः मतिमान् शास्त्रामिगोचरार्थज्ञः प्राज्ञो विचा
४ र कुशलः पंडितः विचारपूर्वं सिद्धांतप्रतिष्ठापनसमर्थः सत्वमिमां पापिकां पश्चत्त्वात्तिकां कलुषितां बुद्धिं सज कृतात्मा योगीयथायोग्य
पीसस्त्विषस्य योगस्य दूषिणीं कामादिविषमां बुद्धिं सजतित त्वं सजेत्यर्थः ४ समुद्भ्रान्तरो पिचिंतानका र्येत्याह समुद्भ्रमिति वक्ष्यमाणो

मतिमान्शास्त्रवित्प्राज्ञः पंडितश्चासिराघव सृजेमां पापिकां बुद्धिं कृतात्मेवार्थदूषिणीम् ४ समु
द्भ्रान्तं घयित्वा तु महानक्रसमाकुलम् त्वं कामारोहपिश्यामोहनिष्यामश्चतेरिपुम् ५ निरु
त्साहस्य दीनस्य शोकपर्याकुलात्मनः सर्वार्था व्यवसीदंति व्यसनं चाधिगच्छति ६ इमेशूराः
समर्थाश्च सर्वतो हरियूथपाः त्वत्प्रियार्थं कृतोत्साहाः प्रवेष्टुमपि पावकम् ७ ७७७७

पायेनेतिशेषः आरोहयिष्यामः आरोहयामः ५ शोकस्यानर्थमूलत्वं दर्शयतिनिरुत्साहेति शोकपर्याकुलात्मनः शोकपर्या
कुलमनसः अत एव निरुत्साहस्य दीनस्य सर्वेर्थाः सर्वप्रयोजनानि व्यवसीदंति नश्यंति व्यसने दुःखपरंपरां चाधिगच्छतिशा एम०
न्तोति शोकादनुत्साहः अनुत्साहाद्दैन्यं दैन्यादर्थनाशः ज्ञातापत्ताप्यतरस्त्यर्थः ६ ननु किं बलादस्माकमुत्साहः स्यादत आह इमे इति ५
सर्वतः समर्था इत्यन्वयः ७

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

श्रप

कुतो यन्नैरत्य त्राह एषामिति हर्षेणाह हर्षकार्यमुखविकासादिना ममाप्यस्मिन् ६ ८ तर्कः समुद्रतरण एव रण हननादिविषये ६ ८ निश्चयस्त
र्यः ८ यदेवमतः यथारिपुं हत्वा सीतां विक्रमेणासमानेष्येत यथा तदुचितमुक्ता हं त्वं कर्तुमर्हसीत्यर्थः ९ किं मया कार्यं तत्राह सेतुरिति

एषां हर्षेण जानामि तर्कश्चास्मिन् दृढो मम ८ विक्रमेण समानेष्ये सीतां हत्वा यथा रिपुम् रावणं पापक
र्माणं त्वं तथा कर्तुमर्हसि ९ सेतुरत्र यथा बध्येद्यथा पश्येम तां पुरीम् तस्य राक्षसराजस्य तथा त्वं कुरु रा
घव १० दृष्ट्वा तां हि पुरीं लङ्कां त्रिकूटशिखरे स्थिताम् हतं च रावणं युद्धे दर्शनादवधारय ११ अ
बध्वा सागरे सेतुं घोरे तु वरुणालये लङ्का नासादितुं शक्या सेन्द्रैरपि सुरासुरैः १२ सीताराम राम

ति अत्र समुद्रे यथा तस्य राक्षसराजस्य तां पुरीं पश्येम तथा त्वं कुरु दिव्यास्त्रास्त्रं येनेनेति शेषः १० त्रिकूटशिखरे स्थितां तां पुरीं दृष्ट्वा
दर्शनात् दर्शनसमनंतरमेव युद्धे रावणं हतं जानीहि ११ सेतुबंधनस्यावश्यकरणीयत्वमन्वयव्यतिरेकाभ्यामाह अबध्वेत्यादि

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०यु०वा० लंकासमीपतः लंकासमीपमभिव्याप्य समुद्रे सेतुर्यावद्बद्धो भवति तावदेव सर्वं सैन्यं तीर्णं वै तीर्णमिवास्माभिर्जितं चेत्युपधारयेति
५ श्चिन्तु सैन्यस्य जेतृत्वोपयोगि प्राक्रमाह इमे हीति हि यतस्तादृशा शौर्यवन्तो हरय इमे दृश्यन्ते यतस्ते कामरूपिणः १३ उक्तमर्थमुपसंहर

सेतुबंधः समुद्रे च यावल्लंकासमीपतः सर्वं तीर्णं च वै सैन्यं जितमित्युपधारय इमे हि समरे शूरा हरयः
कामरूपिणः १३ तदलं विक्लवा बुद्धी राजन्सर्वार्थनाशिनीम् पुरुषस्य हि लोकेस्मिञ्छोकः शौर्या
पकर्षणः १४ यत्तु कार्यं मनुष्येण शौण्डीर्यमवलंबता अस्मिन्काले महाप्राज्ञ सत्त्वमातिष्ठ तेजसा
१५ शूराणां हि मनुष्याणां त्वद्विधानां महात्मनाम् विनष्टे वा प्रनष्टे वा शोकः सर्वार्थनाशनः
१६ त्वं तु बुद्धिमतां श्रेष्ठः सर्वशास्त्रार्थकोविदः मद्विधैः सचिवैः सार्धमरीन्जेतुमिहार्हसि १७

तितदलमिति तत्तस्माद्विक्लवां शोकपरवशां यत एव सर्वार्थनाशिनीं बुद्धिमलं व्याप्नुं तत्र हेतुमाह पुरुषस्येति शौर्यापकर्षणः
शौर्यनाशकः १४ न केवलं शोकत्यागः सत्त्वावलंबनं च कार्यमित्याह यत्त्विति शौण्डीर्यं शौर्यमवलंबता मनुष्येण यत्सत्त्वं धैर्यं क
र्तुं योग्यं तत्तेजसा पराक्रमेण सहास्मिन्काले आतिष्ठ स्वन्वयः १५ विनष्टे विरोहिते प्रनष्टे प्रध्वस्ते वा वस्तुनि १६ उपसंहरति रा०म०

५

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

त्वं च क्रोधं विपर्यालोचनयापि तवाव्यस्यं जयरत्ना हनहीति निश्चेतस्यात्तु शत्रुयात् १८ सहायसंपत्त्यापि जयं निश्चिन्विस्याह वानरेत्युभ हाव
त्वेष्वस्मादृशो पुरसमासक्तं कर्तव्यत्वेन सेवतुं कार्यं न विपत्स्यते तेन नंक्ष्यति १९ शोकमालं त्यक्त्वा त्वं शोकं मालं वत्स सर्पः क्रोधमालं वेति

न हि पश्याम्यहं कंचित्त्रिषु लोकेषु राघव । गृहीतधनुषो यस्ते तिष्ठेदभिमुखो रणे १८ वानरेषु समा
सक्तं न ते कार्यं विपत्स्यते । अचिराद्द्रक्ष्यसि सीतां तीर्त्वा सागरमव्ययम् १९ तदलं शोकमालं व्यक्रोध
मालं च भूपते । निश्चेष्टाः क्षत्रिया मंदाः सर्वे चंडस्य बिभ्यति २० लंघनार्थं च घोरस्य समुद्रस्य नदीपते
सहास्माभिरिहोपेतः सूक्ष्मबुद्धिर्विचारय २१ सर्वं तीर्णं च मे सैन्यं जितमित्युपधारय । त्वं धितितत्र
तैः सैन्यैर्जितमिसे व निश्चिनु २२ इमे हि शूराः समरे हरयः कामरूपिणः । तानरीन्विधमिष्यंति शिलापा
दपवृष्टिभिः २३ शत्रुविषयकमित्यर्थः अन्वयव्यतिरेकाभ्यां शत्रुविषये कोपाभावं स्पष्टयत्याह निश्चेष्टा इति निश्चेष्टा
निरुद्योगाः क्षत्रियाः मंदाः मंदभाग्याः सर्वे जनाः चंडस्य चंडात् अतीव कोपनाद्बिभ्यति २० अस्माभिः सह नदीपते लंघनहेतुरस्माभि
रुपेतः सन् सूक्ष्मबुद्धिस्त्वं विचारय २१ सर्वं तीर्णं जितमिति चोपधारय तत्र सागरे लंघिते सति तैर्मदीयैः सैन्यैर्जितमिति निश्चिनु २२
तेषु जेतृत्वशक्तिमाह इमे हीति २३

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा० वा० यु० कथंचित्संतरिष्यामः येन केनाप्युपायेनेत्यर्थः नंदतीति नंदनः समितिः युद्धे नंदन प्रहृष्टोस्तु कृत्यप्रर्थः २४ निमित्तमेवाह मन इति २५
६ इति द्वितीयः सर्गः २ एवं मानुषभावानुसारेण समुद्रस्य दुस्तरत्वे प्रोक्ते तन्निरसनेन सुहृदुपदेशेन प्रतिष्ठापितधैर्यो रामो नीतिशास्त्रा
नुसारेण संहार्यशत्रुदुर्गस्वरूपप्रश्नपूर्वकं वृत्तिसुग्रीवस्येत्यादिना परमार्थवित्सारग्राही काकुत्स्थः सुग्रीवस्य हेतुमत् युक्ति

कथंचित्संतरिष्यामस्त्वं वयं वरुणालयम्॥ हतमित्येव तं मन्ये रावणं युद्धे समितिनंदन॥२४॥ किमुक्त्वा
बहुधा चापि सर्वथा विजयी भवान्॥ निमित्तानि च पश्यामि मनो मे संप्रहृष्यति॥२५॥ इत्यार्षे युद्ध
काण्डे द्वितीयः सर्गः॥२॥ सुग्रीवस्य वचः श्रुत्वा हेतुमत्परमार्थवित् प्रतिजग्राह काकुत्स्थो हनू
मंतमथाब्रवीत् १ तपसा सेतुबंधेन सागरोच्छोषणेन च सर्वथापि समर्थोस्मि सागरस्यास्य लंघ
ने २ कति दुर्गाणि दुर्गायाः लंकायास्तद्ब्रवीहि मे ज्ञातुमिच्छामि तत्सर्वं दर्शनादिव वानर ३

युक्तं वचः श्रुत्वा प्रतिजग्राह अंगीचकार पश्चात्तदंगीकारानंतरं हनूमंतमब्रवीत् १ तपसा तपःफलसंकल्पसिद्ध्या सेतुबंधेन शरैरिति शेषः
सागरोच्छोषणेन दिव्यास्त्रबलादिति शेषः सर्वथा [illegible] सर्वप्रकारस्य लंघनोपायस्य विद्यमानत्वादित्याशयः २ एवमुपा
यचिंतनेन समुद्रदुस्तरत्वमपनीय शत्रुदुर्गस्वरूपं पृच्छति कतीति दुर्गायाः गंतुमशक्यायाः लंकायाः कति दुर्गाणि जलगि
रिवनादिनानाप्रकारदुर्गेषु कतिप्रकाराणि दुर्गाणि संतीत्यर्थः दर्शनादिव स्वयं दृष्टानीवेत्यर्थः ३ सीतारामाभ्यां नमः राम रामा०
६

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

परिमाणं संख्यापरिच्छेदं द्वारदुर्गक्रियां द्वारागारदुर्गं प्रवेशात्वसंपादनं गुप्तिकर्म शाकाटादियन्त्रादिस्थापनरूपं सदनानि गृहाणि ४ य
थासुखं निःशंकं यथावद्दृष्टवान् असि तत्त्वेनाचक्ष्व सर्वथा कुशलो ह्यसि यथावद्दृष्ट इति पादनेरसि शेषः ५ श्रुत्वा इत्या

बलस्य परिमाणं च द्वारदुर्गक्रियामपि गुप्तिकर्म च लंकायाः रक्षसां सदनानि च ४ यथासुखं यथाव
च्च लंकायामसि दृष्टवान् सर्वमाचक्ष्व तत्त्वेन सर्वथा कुशलो ह्यसि ५ श्रुत्वा रामस्य वचनं हनूमान्मा
रुतात्मजः वाक्यं वाक्यविदां श्रेष्ठो रामं पुनरथाब्रवीत् ६ श्रूयतां सर्वमाख्यास्ये दुर्गकर्मविधान
तः गुप्ता पुरी यथा लंका रक्षिता च यथा बलैः ७ एवं ता स्निग्धा यथा पौरा रावणस्य च तेजसा परां सम
द्धिं लंकायाः सागरस्य च भीमताम् ८ विभागं च बलौघस्य निर्देशं वाहनस्य च एवमुक्त्वा हरिश्रेष्ठः
कथयामास तत्त्ववित् ९ हृष्टप्रमुदिता लंका मत्तद्विपसमाकुला महती रथसंपूर्णा रक्षोगणनिषे

८ हि लि

ब्रवीदित्यन्वयः ६ दुर्गकर्मविधानतः दुर्गत्वसंपादककर्मविधानेन यथा पुरी लंका बलैर्यथा रक्षिता च तथाख्यास्ये ७ स्निग्धाः स्वामिनि भ
क्ताः रावणस्य तेजसा संपादितां परां समृद्धिमाख्यास्य इत्येवं क्रमेणान्वयः ८ बलौघस्य चतुरंगबलस्य व्यूहस्य विभागं तत्र तत्र विभ
ज्य स्थापनं वाहनस्य गजाश्वरथादेः तस्य निर्देशं संख्यापरिच्छेदं ९ हृष्टप्रमुदिता उद्धतरा हृष्टेत्यर्थः १०

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

१० वा०७० महापरिघवंतिमहार्गलवंति परिघोयोगलेदेस्यान्मुद्गरे ऽर्गलस्यानयोरिति विश्वः ६ दृश्यानि द्वाराणिसंतीतिअन्वयः ११ तत्रतेषुद्वा
७ रेषुरक्षयं ध्वस्यपत्ताध्वतत्स्वक्षेपक यंत्राणिवल्लवंति दृढानिमहांतिविपुलानिसंतीतिशेषः तैर्द्वारागतंपरसैन्यं तत्रतेषुप्रतिनि
वार्यते १२ द्वारेषुद्वारप्रदेशेषु संस्कृताः उत्कृष्टयंत्रैः सज्जीकृताः कार्त्त्यायसमयाः ग्रयः सारमयाः शतघ्न्येकप्रयोगेन घ्नंतीतिशत

दृढबद्धकपाटानिमहापरिघवंतिच चत्वारिविपुलान्यस्याद्वाराणिसुमहांतिच ११ तत्रेषूपलयंत्रा
णिवल्लवंतिमहांतिच आगतंपरसैन्यंतैस्तत्रप्रतिनिवार्यते १२ द्वारेषुसंस्कृताभीमाः कार्त्त्यायसम
याःशिताः शतशोरचितावीरैःशतघ्न्योरक्षसांगणैः १३ सौवर्णश्चमहांस्तस्याःप्राकारोदुष्प्रधर्ष
णः मणिविद्रुमवैडूर्यमुक्ताविरचितांतरः १४ सर्वतश्चमहाभीमाःशीततोयामहाशुभाः अगा
धाग्राहसंपूर्णाःपरिखामीनसेविताः १५ द्वारेषुतासांचत्वारःसंक्रमाःपरमायताः यंत्रैरु
पेताबहुभिर्महद्भिर्गृहपंक्तिभिः १६

अयश्चर्तुर्हस्तप्रमाणालोहकंटकयुतामुद्गरविशेषाश्चतांगणैः
रचिताः शतघ्न्यःसंतीतिशेषः १३ तस्याःप्राकारः दुःप्रधर्षणः दुःखेनाप्यहस्त्यश्चमणीयः प्रशस्यणाः १४ परिखाःपुरोपांतखाताः
१५ द्वारेषुचतुर्षुतासांपरिखाणांमध्येसंक्रमामंचरूपेणबद्धाः परमायताः अतिविस्तृतमार्गाः गृहपंक्तिभिःप्राकारश्रेणीगृह

३८ कुंडलसमालिकाकीर्णं (?) एक०
७

का २

तत्रतेषुसंक्रमेषुपरसैन्यागमेसतितेसंक्रमास्तैर्यंत्रैः प्राकारोपरिप्रतिष्ठापितैर्यंत्रैः त्रायंतेरक्ष्यंते तैर्यंत्रैस्ताः परिखासुतत्समीपं
प्राप्तानिपरसैन्यानिसमंततोवकीर्यंतेक्षिप्यंते १७ एकोमुख्यः संक्रमः प्राकारमध्यवर्तीसौ स्तोतपुरप्रवेशप्रसाधनभूतोऽकंप्यः
दुर्भेदः तत्रहेतुर्बलवान्वहुबलकृतरक्षः दृढोदृढशतिष्ठानः तदेवदर्शयतिकांचनैरिति १८ एवंपुरस्वरूपमुक्त्वापुरप

त्रायंतेसंक्रमात्तत्रपरसैन्यागमेसति यंत्रैस्तैरवकीर्यंतेपरिखासुसमंततः १७ एकस्त्वकंप्योव
लवान्संक्रमःसुमहादृढः कांचनैर्वहुभिस्तंभैर्वेदिकाभिश्चशोभितः १८ स्वयंप्रकृतिमाप
न्नोयुयुत्सूरामरावणः उत्थितश्चाप्रमत्तश्चबलानामनुदर्शने १९ लंकापुननिरालंबा
देवदुर्गाभयावहा नादेयंपार्वतंवान्यंकृत्रिमंचचतुर्विधम् १२० २०

तेः स्वरूपमाहस्वयमिति युयुत्सुरपिप्रकृतिमापन्नः शब्दध्वांतकरणोनितिधीरस्तस्य पः बलानामनुदर्शनेउत्थितउद्युक्तः अ
प्रमत्तः सावधानश्च १९ निरालंबाप्रतिष्ठानस्थितोत्तुंगत्रिकूटशिखरेस्थितत्वादारोहणालंबनरहिता देवदुर्गादेवैरपिदुष्प्रा
प्या एतत्एवभयावहा चतुर्विधंदुर्गमत्रास्तीत्याह नादेयमिति नादेयंदुर्गंतत्पर्वतसंभूतनद्याचतुर्दिक्ष्वावरणात् पार्वतं
त्रिकूटरूपं वनानोसमूहोवन्यातत्संबंधिवान्यं कृत्रिमंचतुः प्राकारबलेनप्राकाररूपम् २०

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०वा०यु० तत्रान्यदप्याह स्थितेति दूरपारस्य दूरे पारं परतीरं यस्य स दूरपारस्तस्य विस्तीर्णस्य समुद्रस्य पारे दक्षिणतीरे स्थिता अत्र समुद्रे नौ
८ पथः नौसंचारमार्गोपि नास्ति अतएव सर्वशो निरादेशश्च सर्वदिग्वार्तासंचाररहितप्रदेश इत्यर्थः २१ २२ २३ शूलहस्ता एव

स्थिता पारे समुद्रस्य दूरपारस्य राघव नौपथश्चापि नास्त्यत्र निरादेशश्च सर्वशः २१ शैलाग्रे र
चिता दुर्गा सा पूर्देवपुरोपमा वाजिवारणसंपूर्णा लंका परमदुर्जया २२ परिघाश्च शतघ्न्यश्च
यंत्राणि विविधानि च शोभयंति पुरीं लंकां रावणस्य दुरात्मनः २३ अयुतं रक्षसामत्र पूर्वद्वा
रं समाश्रितम् शूलहस्ता दुराधर्षाः सर्वे खड्गाग्रयोधिनः २४ नियुतं रक्षसामत्र दक्षिणद्वा
रमाश्रितम् चतुरंगेण सैन्येन योधास्तत्राप्यनुत्तमाः २५ प्रयुतं रक्षसामत्र पश्चिमद्वारमा
श्रितं चर्मखड्गधराः सर्वे तथा सर्वास्त्रकोविदाः २६ न्यर्बुदं रक्षसामत्र उत्तरद्वारमाश्रितम् रथि
नश्चाश्ववाहाश्च कुलपुत्राः सुपूजिताः २७

न केवलमपि तु खड्गाग्रयोधिनः खड्गैरग्रे युध्यंतीति तादृशाः २४ नियु रा०यु०
तं लक्षं चतुरंगेण सैन्येनोपलक्षिता योधास्तत्रापि दक्षिणद्वारेपि संति अनुत्तमाः प्रशस्ताः २५ प्रयुतं दशलक्षं २६ न्यर्बुदं दश ८
कोटयः कुलपुत्राः योधसत्कुलेषु प्रसूताः २७

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

प्रागद्वारः सहस्त्राणि त्रिशने कसहस्त्राणि मध्यमे स्कंधे परमध्यसेनानि वेशस्थाने सर्वसंख्यामाह सप्तकोटिः २८ यद्येवं दुर्गो
लंकाकथमस्माभिस्त्वया साध्येति शंकां निराचष्टे बलेति बलैकदेशः सेनाचतुर्थांशः क्षपितः महात्मनो महाकायानां तेषां संक्रमाः
परिखा मार्गा मया भग्नाः परिखाश्च वपूरिताः शिलावृक्षादिभिरिति शेषः २९ येन केन त्वा समुद्रे कपभ्यन्यतमेन समुद्रं तरा

प्रागद्वारेऽप्य सहस्त्राणि मध्यमे स्कंधमाश्रिताः यातुधाना दुराधर्षाः साग्रकोटिश्च रक्षसाम् २८
बलैकदेशः क्षपितो राक्षसानां महात्मनाम् तेमयासंक्रमा भग्नाः परिखाश्चावपूरिताः दग्धा
च नगरी लंका प्राकाराश्चावसादिताः २९ येन केन तु मार्गेण तराम वरुणालयम् हतेति नगरी लं
का वानरैरुपधार्यताम् ३० अंगदो द्विविदो मैंदो जांबवान्पनसो नलः नीलः सेनापतिश्चैव बले
शेषेण किं तव ३१ प्लवमाना हि गत्वा तां रावणस्य महापुरीं सपर्वतवनां भित्त्वा सखातां सप्रतो
रणाम् सप्राकारां सभवनामानयिष्यंति राघव ३२

म तत्रैवं सति वानरैः स्वयमेव लंका हतेत्युपधार्यतां निश्चीयतां ३० किं चाशेषतरलोपायचिंतावैयर्थ्यं वशबलैरंगदादिभिरेव कार्यसि
द्धिरित्याह अंगदइत्यादिसार्द्धद्वयेन एतेषां द्वादशप्लवमानाः समुद्रं लंघितवंतः सखातां सपरिखां सप्रतोरणां सबहिर्द्वारां
लंकां भित्त्वा सीतामानेष्यंति किं बलशेषेणेति शेषेणान्वयः ३१ ३२

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

ए० वा० यु० ए वृत्तिति एवं प्रधानैरेव कार्यसाधनमिच्छेत् क्षिप्रमिदानीमेवानयतेत्याज्ञापय यदि बलानां सर्वसंग्रहं बलसमेलनम् क्षिप्र
९ बलानामपि प्रयाणं यदि इच्छसि तदा युक्तेन यात्रोचितेन मुहूर्तेन प्रस्थानमभिरोचय ॥ २३ ॥ इति तृतीयः सर्गः ॥ ३ ॥ अनुपूर्वशः आनुक्र
मेणा श्रुत्वा १ तत्रोगदादिसचिवेन काममेनि र्वहेणमशक्यमत्वा स्वमतमाह यामिति ॥ २ ॥ तदेवाह अस्मिन्निति कुत इत्यत्राह युक्तः यात्रा

एवमाज्ञापय क्षिप्रं बलानां सर्वसंग्रहम् ॥ मुहूर्तेन तु युक्तेन प्रस्थानमभिरोचय ॥ २३ ॥ इत्यार्षे श्रीमद्रा
मायणे युद्धकाण्डे तृतीयः सर्गः ॥ ३ ॥ श्रुत्वा हनुमतो वाक्यं यथावदनुपूर्वशः तत्तोऽब्रवीन्महातेजा रा
मः सत्यपराक्रमः १ यां निवेदयसे लंकां पुरीं भीमस्य रक्षसः क्षिप्रमेनां वधिष्यामि सत्यमेतद् ब्रवीमि ते
२ अस्मिन्मुहूर्ते सुग्रीव प्रयाणमभिरोचय युक्तो मुहूर्तो विजयः प्राप्तो मध्यं दिवाकरः सीतां
हृत्वा तु मे जातु क्वासौ यास्यति जीवितः ३

हि तत्र हेतुः विजयः विजययावहत्वे हेतुमाह दिवाकरः मध्यं दिनमध्यं
प्राप्तः अभिजिन्मुहूर्तः इत्यर्थः तदुक्तं प्राप्ते दूरगमित्रम घावसुजन्त्वविम्बाभिजिद्धि रचीं द्वाः ऐन्द्राग्निमूलवरुणार्यमतादिवा
मुहूर्ताः स्मृताः इति एतन्मुहूर्तं प्रस्थितस्य ध्रुवो विजय इत्याह सीतामिति अप्रैसौ रावणः सीतां हृत्वा जीवितः सन् जातु कदाचिदपि ता० म०
क्व यास्यति यत्र कुत्रापि यातं तं हनिष्यामीत्यर्थः ३ तथा ९

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

स्ववि[ले]वितपात्राश्रयोजनमाह सीतेति मेऽभियानं सीतां श्रुत्वा जीविते ऽशा प्राप्स्यति कथमिव विषं पीत्वा ऽऽतुरः पीडितः पुरुषो
जीवितान्ते प्राप्तात्स्वये प्राप्ते ऽमृतं स्पृष्ट्वेव ४ पुनर्वसौ जातस्य ममाद्य साधनतारा श्वस्तु निधननारा ऽतो द्यैव प्रयाणं कर्तव्य
मित्याशयेनाह उत्तरेत्यादि ऽद्य दिने उत्तराफाल्गुनीनक्षत्रं वर्तते श्वस्तु हस्तेन योक्ष्यते चंद्र इति शेषः हस्तो रामस्य निधनता

सीता श्रुत्वाभियानं मे ऽशा प्राप्स्यति जीविते जीवितान्तेऽमृतं स्पृष्ट्वा पीत्वा विषमिवातुरः ४ उत्त
राफाल्गुनी ह्यद्य श्वस्तु हस्तेन योक्ष्यते ऽभिप्रयाम सुग्रीव सर्वानीकसमन्विताः ५ निमित्तानि
च धन्यानि यानि प्रादुर्भवंति मे निहत्य रावणं सीतामानयिष्यामि जानकीम् ६ उपरिष्टाद्धि न
यनं स्फुरमाणमिदं मम विजयं समनुप्राप्तं शंसतीव मनोरथम् ७ ततो वानरराजेन लक्ष्मणेन
च पूजितः उवाच रामो धर्मात्मा पुनरप्यर्थकोविदः ८

रा उत्तराफाल्गुनी तु साधकतारा ऽतो द्यैव सर्वानीकसम
न्विताः संतोऽभिप्रयामेति प्रश्ने लोट् ५ यानि निमित्तानि धन्यानि शुभसूचकानि तानि प्रादुर्भवंति ऽतो रावणं निहत्य सीतामानयि
ष्यामि ऽऽनेष्यामि ६ नयनं दक्षिणमिति शेषः मनोरथं मनोरथविषयं विजयं समनुप्रा[प्त]मिव शंसतीत्यन्वयः ७ ऽर्थकोविदः

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०या०यु० मार्गम वेदितुं यात्वित्यन्वयः ९ सुग्रीवप्रयुक्तमार्गेणासन्निहितं नीलं प्रत्याह फलेति शीतानि काननवारीणि यस्मिन् तादृशेन प
१० था सेनापते नील सेनां नयेति संबंधः १० मार्गरक्षणप्रकारमाह दूषयेयुरिति दूषयेयुर्विषादिनेति शेषः नित्यमुद्यतः सदाव
धानः सन् ११ प्रोत्साहनांतरमाह निम्नेष्विति वनदुर्गेषु वनात्मकेषु दुर्गेषु वनेषु ग्रहदुर्गवनेषु च निम्नभूमौ निहितं प्रच्छन्नहारार्थं

ग्रग्ने यातु बलस्यास्य नीलो मार्गम वेदितुम् ॥ ततः शतसहस्रेण वानराणां तरस्विनाम् ९ फल
मूलवता नील शीतकाननवारिणा ॥ पथा मधुमता चाशु सेनां सेनापते नय १० दूषयेयुर्दु
रात्मानः पथि मूलफलोदकम् ॥ राक्षसाः परिरक्षेथास्तेभ्यस्त्वं नित्यमुद्यतः ११ निम्नेषु वन
दुर्गेषु वनेषु च वनौकसः ॥ अभिप्लुत्याभिपश्येयुः परेषां निहितं बलम् १२ यच्च फल्गु
बले किंचित्तदत्रैवोपपद्यताम् ॥ एतद्धि घोरं कृत्स्नेनो विक्रमेण प्रयुज्यताम् १३

नीनतया स्थापितं परेषां बलं वनौकसः अभिप्लुत्याभित उत्प्लुत्याभिपश्येयुः १२ प्रोत्साहनांतरमाह यदिति यच्च फल्गु निःसारं बलं वा
लं बलादिकं तत्सर्वं युष्मानं हंतदत्रैव किंचित्कार्यार्थे वोपपद्यतां तिष्ठतु हि यस्मादेतन्नः कृत्स्नं युद्धरूपं घोरमतो विक्रमोपपन्नबले रामा०
नप्रयुज्यतामित्रेतिशेषः १३ १०

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

सागरौघनिभं सागरप्रवाहो यद्वत्तत्तुल्यमित्यर्थः प्रान प्रो पसहस्रप्राग्र्य संघीभूय सर्वः १४ कपिसिंहा मेवाह गजश्चेति गवा
मग्रेद्दप्ता वृषभा इवेति संबंधः १५ १६ यस्य गंधादन्ये गजाः पलायंते स गंधहस्ती स यथा मं १७ ईश्वरः इंद्रः १८ अंगदेन

सागरौघनिभं भीमं महानीकं महाबलाः । कपिसिंहाश्च कर्षन्तु शतशोऽथ सहस्रशः १४ गजश्च गि
रिसंकाशो गवयश्च महाबलः । गवाक्षश्चाग्रतो यान्तु गवां दृप्ता इवर्षभाः १५ यातु वानरवाहिन्या
वानरौघवतां पतिः । पालयन् दक्षिणं पार्श्वम् ऋषभो वानरर्षभः १६ गंधहस्तीव दुर्द्धर्षस्तरस्वी गं
धमादनः । यातु वानरवाहिन्याः सव्यं पार्श्वमधिष्ठितः १७ यास्यामि बलमध्येऽहं बलौघमभिह
र्षयन् । अधिरुह्य हनूमन्तमैरावतमिवेश्वरः १८ अंगदेनैव संयातु लक्ष्मणोऽन्तकोपमः । सार्व
भौमेन भूतेशो द्रविणाधिपतिर्यथा १९ जांबवांश्च सुषेणश्च वेगदर्शी च वानरः । ऋक्षराजो महा
बाहुः कुक्षिं रक्षन्तु ते त्रयः २० राघवस्य वचः श्रुत्वा सुग्रीवो वाहिनीपतिः । व्यादिदेश महावीर्यो वान

वाहनभूतेन सार्वभौमः कुबेरदिग्गजः भूतेशः कुबेरः यक्षेशत्वात् १९ ऋक्षराजो जांबवान् तिसृन्वयः कुक्षिं कुक्ष्युपलक्षितं सेनापृष्ठं भागं २०

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

श्री

रा० वा० यु० गुहाभ्यः शिखरेभ्यः पूर्वस्वस्थितिप्रदेशेभ्यः २२ २३ २४ हृष्टप्रमोदयोर्बाह्याभ्यंतरकृतो भेदः २५ आप्लवंतः समंताद्गच्छंतोपि प्लवमा
११ नाः प्लवंतः प्रागेव गत्वा धनार्थं गच्छंतः क्ष्वेलंतः सिंहनादं कुर्वंतः गर्जंतः मेघादिशब्दसदृशं शब्दं कुर्वंतः निनदंतः सामान्यशब्दं

ते वानरगणाः सर्वे समुत्पेतुर्महौजसः गुहाभ्यः शिखरेभ्यश्च आशु प्रपुप्लुविरे तदा २२ ततो
वानरराजेन लक्ष्मणेन सुपूजितः जगाम रामो धर्मात्मा ससैन्यो दक्षिणां दिशम् २३ शतैः सहस्रै
श्च कोटिभिश्चायुतैरपि वारणाभैश्च हरिभिर्ययौ परिवृतस्तदा २४ तं यांतमनुयाति स्म मह
ती हरिवाहिनी हृष्टाः प्रमुदिताः सर्वे सुग्रीवेणाभिपालिताः २५ आप्लवंतः प्लवंतश्च गर्जंतश्च
प्लवंगमाः क्ष्वेलंतो निनदंतश्च जग्मुर्वै दक्षिणां दिशम् २६ भक्षयंतः सुगंधीनि मधूनि च फला
नि च उद्वहंतो महावृक्षान्मंजरीपुंजधारिणः २७ अन्योन्यं सहसा दृप्ता निर्वहंति क्षिपंति च प
तंतश्चोत्पतंत्यन्ये पातयंत्यपरे परान् २८ रावणो नो निहंतव्यः सर्वे च रजनीचराः इति गर्जंति
हरयो राघवस्य समीपतः २९

कुर्वंतः २६ नीलार्थमंजरीपुंजधारिणो महावृक्षान् उद्वहंतो जग्मुरित्यनुकर्षः २७
निर्वहंति विनोदार्थमेकमेके वहंति तथा क्षिपंति च स्वमारूढं भूमौ पातयंति पतंतश्च भवंति केचन गच्छंतो ऽपि उत्पत्य
उत्पतंति आकाशमार्गेण गच्छंति अपरे शक्ताः परान्पातयंति आपातयंति २ नोस्माकं शत्रुरस्माभिर्हिंस्यः पूर्वः कृत्स्नानां कर्तरि वे राम० ११

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

पुरस्तादृषभ इति ऋषभनामो दक्षिणपार्श्वविनियुक्तादन्यो नीलसहकारी ३० ३१ सर्वां वाहिनीमवष्टभ्य कारररक्ष समंततो भ्रमन्र
दतीति शेषः ३२ केसर्यादीनां चतुर्णां द्वौ द्वौ तस्य बलस्य दक्षिणं वामं चैकैकं पार्श्वमभिरक्षतीत्यर्थः एषगजः पूर्वभागनि

पुरस्तादृषभो वीरो नीलः कुमुद एव च पंथानं शोधयंति स्म वानरै र्बहुभिः सह ३० मध्ये तु राजा
सुग्रीवो रामो लक्ष्मण एव च वलिभि र्बहुभि र्भीमै र्वृतः शत्रुनिर्हणः ३१ हरिः शतवलि र्वीरः को
टिभि र्दशभि र्वृतः सर्वामेको ह्यवष्टभ्य ररक्ष हरिवाहिनीम् ३२ कोटीशतपरीवारः केसरी पन
सो गजः अर्कश्चातिवलः पार्श्वमेकं तस्याभिरक्षति ३३ सुषेणो जांववांश्चैव ऋक्षै र्बहुभिरावृतौ
सुग्रीवं पुरतः कृत्वा जघनं संररक्षतुः ३४ तेषां सेनापति र्वीरो नीलो वानरपुंगवः समंतात्प
ततां श्रेष्ठस्त द्वलं पर्यवारयत् ३५ दरीमुखः प्रजंघ रंभोथ रभसः कपिः सर्वतश्च ययु र्वी
रास्त्वरयंतः प्लवंगमान् ३६
श्च

नियुक्तादन्यः ३३ सुषेणजांबवंतौ प्रायः सेनामध्ये वर्तमानं सुग्रीवं पुरतः कृत्वा जघने
सेनापश्चाद्भागं ररक्षतुः ३४ नीलः पुरोमार्गशोधकः सन्नपि स्ववेगातिशयवत्तया तद्बलं पर्यवारयत् नगरादि पीडा
राहित्येन पाभवतित यथा परिवार्य नयदित्यर्थः ३५ सर्वतः वेगातिशयादिति भावः ३६

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०वा०कु० गच्छंतिगच्छंतश्चसह्यमपश्यंत महोत्सितटाकानिचापश्यंत अप्रव्रव्यमवासोल्लन्यते ३७ भीतवत्भीताःसंतः नगराभ्याशान्जन
१२ पदानपिवर्जयंतवर्जयित्वा ऽगच्छन् ३८ भीमघोषमर्णावमिवनिः ससर्पससर्पयोनिः सृतःमित्यर्थः अपर्तिवशान्द्रःशर्धचोदित्वा
न्नपुंसकः ३९ दाशरथेः पार्श्वेतन्मुख्योद्दिष्टासायेतिभावः ४० कपिभ्यां हनुमदंगदाभ्यामूह्यमानौरामलक्ष्मणौमहाग्रहा

एवंतेहरिपुङ्गवा दृष्ट्वा गच्छंतिवरदर्पिताः अपतंतगिरिश्रेष्ठं महाद्रुमलतावृतम् शाखांसिचपुष्पितानि
तटाकानिसरांसिच ३७ रामस्याग्नमंज्ञात्वाभीमकोपस्यभीतवत् वर्जंतः नगराभ्याशान्तयाजनप
दानिच ३८ सागरौघनिभंभीमंतद्वानरबलंमहत् निःससर्पमहाघोरंभीमघोषमिवार्णवम् ३९ तस्य
दाशरथेःपार्श्वेशूरास्तेकपिकुंजराः तूर्णमापुप्लुवुःसर्वेसदश्वाइवचोदिताः ४० कपिभ्यामुह्यमानौतौशु
शुभातेनरर्षभौ महद्भ्यामिवसंस्पृष्टौग्रहाभ्यांचंद्रभास्करौ ४१ ततोवानरराजेनलक्ष्मणेनचपूजितः ज
गामरामोधर्मात्मासमैन्योद्दिशांदिशम् ४२ तमंगदगतोरामंलक्ष्मणःशुभयागिरा उवाचपरिपूर्णार्थ ४३

भ्यांशुक्रबृहस्पतिभ्यांसंस्पृष्टौसंयुक्तौचंद्रसूर्याविवशुशुभाते अपशोपमानेचतुर्ग्रहस्यबहुजनविनाशहेतुत्वाद्धनुमदंगदाभ्यां
राम लक्ष्मणायोगस्यमहासेनाविनाशकत्वंगम्यतइतिवस्तुध्वनिः ४१ ४२ स्मृतिमान् अनुभूतार्थाविस्मरणशीलः प्रतिभान रामा०
वान् तत्कालोचितप्रतिभो लक्ष्मणः परिपूर्णार्थंराममुवाच ४३ १२

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

एवं तोहत्वा वैदेहीम वाप्येति क्रमः ४४ कुतो यं निश्चय इत्यत्राह महांतीति महांति दुर्लभानि ४५ निमित्तान्येवाह अनुवातीति
शिवः शुभसूचकः अध्वश्रांतिहरणाद्धितश्च सुखः स्पर्शो वायुः मंदमंदं पश्चात् तथा सेनामनुवाति सः दुहितः सुख

हत्वा मवाप्य वैदेहीं क्षिप्रं हत्वा च रावणम् समरसार्थाम योध्यां प्रतिपास्यसि ४४ महांति च निमि
त्तानि दिवि भूमौ च राघव शुभानि तव पश्यामि सर्वार्थस्य च सिद्धये ४५ अनुवाति शिवो वायुः
सेनां सुहितः सुखः पूर्णा वल्गुस्वराश्चामी प्रवदंति मृगद्विजाः ४६ प्रसन्नाश्च दिशः सर्वा विम
लश्च दिवाकरः उशना च प्रसन्नार्चिरनु त्वां भार्गवो गतः ४७

पदैः क्रमेणामां घ्राणसौरभ्यादुच्यते पूर्णा विच्छेदरहिताः वल्गवः श्रोत्रसुखाः स्वराः येषां ते ४६ भौमानि निमित्तान्युक्त्वा
दिव्यान्याह प्रसन्ना इत्यादि भार्गवो भृगुपुत्र उशनाः शुक्रोऽपि प्रसन्नार्चिः त्वामनुयातः त्वत्पश्चाद्भागं गतोऽस्ति ४७

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा० वा० यु० ब्रह्मराशिर्ध्रुवः ब्रह्मराशिः पुंजीभावो यस्मिन्सतथा तस्मात् विशुद्धो ग्रहादिमालिन्यरहितः तत्पुंजीभा
९३ वेदस्थीयतिविशुद्धा इति विशुद्धाः शुक्रादिहीनाः शुद्धं ध्रुवं प्रदक्षिणं कुर्वाणा अर्चिष्मंतः प्रशस्तार्चिषो भूत्वा प्रकाशंते ४८
सपुरोहितः विश्वामित्रसहचरत्वसमीपवर्तिसप्तर्षिमंडलमध्यवर्तिवसिष्ठसहित इत्यर्थः ४९ इक्ष्वाकूणां परं नक्षत्रं विमले

ब्रह्मराशिर्विशुद्धश्च विशुद्धाः परमर्षयः । अर्चिष्मंतः प्रकाशंते ध्रुवं सर्वे प्रदक्षिणम् ४८ त्रिशंकुर्वि
मलो भाति राजर्षिः सपुरोहितः पितामहो वो ऽस्माकमिक्ष्वाकूणां महात्मनाम् ४९ विमले च प्रका
शेते विशाखे निरुपद्रवे नक्षत्रं परमस्माकमिक्ष्वाकूणां महात्मनाम् ५० नैर्ऋतं नैर्ऋतानां च न
क्षत्रमतिपीड्यते मूलो मूलवता स्पृष्टो धूप्यते धूमकेतुना ५१ सर्वं चैतद्विनाशाय राक्षसाना
मुपस्थितम् काले कालगृहीतानां नक्षत्रं ग्रहपीडितम् ५२

उग्रमहाक्रमणरहिते विशाखे प्रकाशेते
द्विवचनं नक्षत्रद्वयात्मकत्वात् ५० परस्परातिकूल्यमाह नैर्ऋतमिति निर्ऋतिर्देवता यस्य तं नैर्ऋतं नैर्ऋतानां राक्षसानां नक्षत्रं मूलो
मूलं सर्वपुरुत्वं प्रतिपीड्यते केन तत्राह मूलवत्तेति उच्चैर्दृश्यमानतयोत्थितेन धूमकेतुना स्पृष्टो धूप्यते संतप्यते ५१
ततः किं तत्राह सर्वमिति एतन्नक्षत्रपीडनमेव राक्षसानां विनाशाय सर्वमशुभसूचकनिमित्तं जातं समुपस्थितमित्यर्थः तदेव रा० मा०
व्यापादयति काल इति कालगृहीतानां नक्षत्रं कालेऽन्तकाले ग्रहपीडितं भवति ५२ ९३

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

पुनरपिविजयसूचकान्याह प्रसन्नाइति सुरसाश्शापः सरसीष्वपि प्रोषःगंधाः गंधवंतो वायवो ऽभ्यधिकान प्रवांतिमंदं वांतीत्यर्थः द्रुमाःय
थर्तुकुसुमाः ऋतुमनतिक्रम्यजातानि कुसुमानियेषांते अकालकुसुमोत्पत्तिर्हि उत्पातः स इदानीं नास्तीत्यर्थः ५३ तारकस्तार
कासुरस्यग्रामयोविनाशोयस्मिन्नत्ताद्दृशे संग्रामे व्यूढानि कृतव्यूहानि देवानां सैन्यानीव कपिसैन्यान्यधिकं प्रकाशंत इति संबं

प्रसन्नाः सुरसा आपो वनानि फलवंति च प्रवांत्यभ्यधिकागंधा यथर्तुकुसुमा द्रुमाः ५३ व्यू
ढानि कपिसैन्यानि प्रकाशंतेधिकं प्रभो देवानामिव सैन्यानि संग्रामे तारकामये ५४ एवमार्य
समीक्ष्यैतान्प्रीतो भवितुमर्हसि इति भ्रातरमाश्वास्य हृष्टः सौमित्रिरब्रवीत् ५५ अथावृत्य महीं
कृत्स्नां जगाम महती चमूः ऋक्षवानरशार्दूलैर्नखदंष्ट्रायुधैर्वृता ५६ कराग्रैश्चरणाग्रै
श्च वानरैरुद्धतं रजः भीममंतर्दधे लोकं निवार्य सवितुः प्रभाम् ५७ ५७ ५७ ५७

ध्यः ५४ एवमुक्तप्रकारेण भ्रातरमाश्वास्यहे आर्य एतान् समीक्ष्य प्रीतो भवितुमर्हसीति सौमित्रिरब्रवीदित्यन्वयः ५५ पुनरपि सेनायाद्
रागमनमाह अथावृत्येति अवृत्ता दिग्भिर्वृता महती चमूः कृत्स्नां महीं मावृत्य जगाम इति संबंधः ५६ उद्धतं भीमं रजो लोकमंतर्दधे अंतर्हितमकरोत्
५७

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

हरिवाहिनी दक्षिणां महीमाक्रम्य आच्छादयंती घामाच्छादयंतीम् अंबुदसंततिरिवेत्यादिरिति संबंधः ५८ सततं निरंतरं यथा तथा उ-
त्तरं स्थाः सेनायाः सर्वाणि नदीस्रोतांसि बहुयोजनं यथा तथा विपरीतवत् वैपरीत्येन तस्थुः वानराणां प्रवाहाभिमुख्ये-
न स्रोतसा हतानि जलानि विपरीतप्रवाहानीत्यर्थः ५९ सरांसि विमलांसि सार्द्धश्लोकमेकान्वयं यथायोग्यं च संबंधः सरांसि प्रीत्त

सपर्वतवनाकाशां दक्षिणां हरिवाहिनी छादयंती महीं भीमा द्यामिवांबुदसंततिः ५८ उत्तरं
स्रोतस्तु सेनायाः संततं बहुयोजनम् नदीस्रोतांसि सर्वाणि तस्थुर्विपरीतवत् ५९ सरांसि विमलाम्भांसि द्रुमाकीर्णांश्च पर्वतान् समभूमिप्रदेशांश्च वनानि फलवंति च ६० मध्येन च समेनाथ तिर्यक्चाधश्च साविशत् समावृत्य महीं कृत्स्नां जगाम महती चमूः ६१ ते हृष्टवदनाः सर्वे जग्मुर्मारु-
तरंहसः हरयो राघवस्यार्थे समारोपितविक्रमाः ६२ हर्षवीर्यबलोद्रेकान्दर्शयंतः परस्परम्
यौवनोत्सेकजान्दर्पान्विविधांश्चक्रुरध्वनि ६३

नसलिलानि यामध्येनाविशत् पर्वतान् द्रुमाकीर्णान् तिर्यगविशत्
समान् भूमिप्रदेशान् समंतादाविशत् वनानि फलवंति यान्यधः अधस्ताद्विशत् एवं द्वितीयो वा मस्तिगम्यते समावृत्य सर्वमेकं वा कां ६० ६१ मारु-
तरंहसः वायुवेगाः प्रसाध्यमपि साधयिष्याम इति समारोपितविक्रमाः चिंतसंक्रामितविक्रमप्रकाराः ६२ विविधान् प्रकारान् ६३ ३३

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

तानेवाहृतत्रेति वानराणांहर्षोद्भिजनितशब्दःकिलकिला ६४ आस्फोटयन्पुच्छानिभूमावताडयन् विक्षिप्यप्रसार्य ६५

तत्रकेचिद्द्रुतंजग्मुरुत्सेतुस्तथापरे केचित्किलकिलांचक्रुर्वानरावारणोपमाः ६४ आस्फोटयंश्चपु
च्छानितस्मिन्निजघ्नुःपदान्यपि भुजान्विक्षिप्यशैलांश्चद्रुमानन्येबभंजिरे ६५ आरोहंतश्चशृंगाणि
गिरीणांगिरिगोचराः महानादान्प्रमुंचंतःक्ष्वेडामन्येप्रचक्रिरे ६६ ऊरुवेगैश्चममृदुर्लताजालान्यनेक
शः जृंभमाणाश्चविक्रांताविचिक्रीडुःशिलाद्रुमैः ६७ शतैःशतसहस्रैश्चकोटीभिश्चसहस्रशः
वानराणांसुघोराणांपूर्वैःपरिवृतामही ६८ सास्मयातिदिवारात्रंमहतीहरिवाहिनीहृष्टाः प्रमुदिताः
सेनाःसुग्रीवेणाभिपालिताः ६९ वानरास्त्वरितायांतिसर्वेयुद्धाभिनंदिनः मुमोक्षयिषवःसीतांमुहू
र्तंक्वापिनासत ७० ततःपादपसंबाधंनानानगसमायुतम् सह्यपर्वतमासेदुर्मलयंचमहीधरम् ७१

६६ ममृदुःमर्दितवंतः ६७ अयंतृतीयोवासः ६८ दिवारात्रंमध्याह्नेएवयाममात्रंवासरस्याशयः सेनाःरक्षणेनस्वामिनासहिताः
६९ मुमोक्षयिषवःमोचयितुमिच्छावंतः नासतदिवेतिशेषः ७० ७१

ए० वा० पु० ७२ ७३ ७४ प्रस्तरेषु पाषाणेष्वित्यर्थः स्थितानि तिरोधः तान [illegible] प्लवंगमान् ७५ षट्पदैरनुकूजद्भिरुपलक्षितो मारुतो वाति ७५ पर्वतस्य
१५

काननानि विचित्राणि नदीप्रस्रवणानि च पक्षपन्नगयोगमैः सहस्रसमलंकृतस्य च ७२ चंपका
न्तिलकांश्चूतान् शोकान्सिंदुवारकान् तिमिशान्करवीरांश्च भंजे तिस्मप्लवंगमाः ७३ खे
कोलांश्च करंजांश्च वटन्यग्रोधतिंदुकान् जंबुकामलकान्नागान्भंजे तिस्मप्लवंगमाः ७४
प्रस्तरेषु च रम्येषु विविधाः कानन द्रुमाः वायुवेगप्रचलिताः पुष्पैरवकिरंति तान् ७५ मारुतः
सुखसंस्पर्शो वाति चंदनशीतलः षट्पदैरनुकूजद्भिर्वनेषु मधुगंधिषु ७६ अधिकं शैल
राजस्तु धातुभिः सुविभूषितः धातुभ्यः प्रसृतो रेणुर्वायुवेगेन घट्टितः सुमहद्वानरानीकं छा
दयामास सर्वतः ७७ गिरिप्रस्थेषु रम्येषु सर्वतः संप्रपुष्पिताः केतकाः सिंदुवाराश्च वासंत
श्च [illegible] मनोरमाः माधव्यो गंधपूर्णाश्च स्रक्जीः कुंदाश्च पुष्पिताम ७८

धातुमतां वानराणां धातुरेणुरूषितत्वं चाह अधिकमिति सार्धेन शैलराजः महाद्रिः धातुभ्यो गैरिकादिभ्यः प्रसृतो रेणुर्वायुवे
गेन विघट्टितः उत्थापितः सन् वानरानीकमाच्छादयामास ७७ के पुष्पितास्तत्राह केतकस्त्यादि गंधपूर्णाः गंधाढ्याः रदेस ए० म०
१५

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

चिरिबिल्वान् क्रमालाः मधूकाः गुडपुष्पाः वंजुलाः नीवाराः ८० कोविदाराः पीतकुरंटकाः ८१ ८२ प्लवमानैरित्यर्द्धमि

चिरिबिल्वा मधूकाश्च वंजुला वकुलास्तथा रंजकास्तिलकाश्चैव नागवृक्षाश्च पुष्पिताः ८०
चूताः पाटलिकाश्चैव कोविदाराश्च पुष्पिताः मुचुकुंदार्जुनाश्चैव शिंशपाः कुटजास्तथा ८१
हिंतालास्तिमिशाश्चैव चूर्णकानीपकास्तथा नीलाशोकाश्च वरणाश्चंकोलाः पद्मकास्तथा
८२ प्लवमानैः प्लवंगैश्च सर्वे पर्याकुलीकृताः वाप्यस्तस्मिन्गिरौ शीताः पल्वलानि तथैव च ८३
चक्रवाकानुचरिताः कारंडवनिषेविताः प्लवैः क्रौंचैश्च संकीर्णा वराहमृगसेविताः ८४
ऋक्षैस्तरक्षुभिः सिंहैः शार्दूलैश्च भयावहैः व्यालैश्च बहुभिर्भीमैः सेव्यमानास्ततस्ततः ८५
पद्मैः सौगंधिकैः फुल्लैः कुमुदैश्चोत्पलैस्तथा वारिजैर्विविधैः पुष्पैरम्यास्तत्र जलाशयाः ८६

न्नगाके एवंभूता वृक्षाः प्लवमानैः प्लवंगमैः पर्याकुलीकृता इत्यन्वयः वाप्य इत्यादि जलाशया इत्यंतमेकं वाक्यं तस्मि
न्गिरौ सह्यपर्वते ८३ कारंडवाः जलकुक्कुटाः प्लवो बकविशेषः ८४ तरक्षुर्मृगादनः ८५ तत्र सह्यगिरिप्रांते ८६

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० वा० कु० तस्सहद्यस्मिन्नत्यस्य चसानुषु कूजंतित्तु कूजुरित्सर्द्धं पर्यथवाक्यं अत्रजलेवापीजले ८७ प्लावयंतिसिंचेति शै
१६

तस्यसानुषुकूजंतिनानाद्विजगणास्तथा स्नात्वावापीषुतोदकान्यत्रजलेक्रीडंतिवानराः ८७
अन्योन्यंप्लावयंतिस्मशैलमारुह्यवानराः फलान्यमृतगंधीनिमूलानिकुसुमानिच ८८
बभंजुर्वानरास्तत्रपादपानांमदोत्कटाः द्रोणमात्रप्रमाणानिलंबमानानिवानराः ८९
ययुःपिबंतोहृष्टास्तेमधूनिमधुपिंगलाः पादपानबभंजेतोविकर्षतस्तथालताः ९० वि
धमंतोगिरिवरान्प्रययुःप्लवगर्षभाः वृक्षेभ्योन्येतुकपयोनर्दंतोमधुतर्पिताः ९१ अ
न्येवृक्षान्प्रपद्यंतेप्रपतंत्यपिचापरे बभूववसुधातैस्तुसंपूर्णाहरिपुंगवैः यथाकल
मकेदारैःपक्वैरिववसुंधरा ९२

लमारुह्यास्तत्तरप्रोथः अमृतगंधीनि अमृतोपमानि अद्रयंचतुर्थीवासः
८८ ८९ ९० वृक्षेभ्यइत्यत्रापिययुरितितुबध्यते ९१ पीतमधुभिर्हरिभिर्वृक्षेभ्यउपमायर्यैति रवप्राब्दस्तथा राम०
यैः पक्वैः पक्वफलैः कलमकेदारैः शोभिता वसुंधराभाति तथा तैर्हरिपुंगवैः पूर्णा वसुंधरा बभूवेत्यर्थः ९२ १६

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

९३ ९४ ते सर्वे वानराः आनुपूर्व्येण सेनासन्निवेशक्रमेण समुद्रमासेदुरिति संबंधः ९५ अवरुह्य महेंद्रादित्यर्थः ९६ सहसो

महेद्रुमवंतं प्राप्य रामो राजीवलोचनः आरुरोह महाबाहुः शिखरं द्रुमभूषितम् ९३ ततः शिखरमा
रुह्य रामो दशरथात्मजः कूर्ममीनसमाकीर्णमपश्यत्सलिलाशयम् ९४ ते सह्यं समतिक्रम्य मल
यं च महागिरिम् आसेदुरानुपूर्व्येण समुद्रं भीमनिस्वनम् ९५ अवरुह्य जगामाशु वेलावनमनु
त्तमम् रामो रमयतां श्रेष्ठः सुग्रीवः सचलक्ष्मणः ९६ अथ धौतोपलतलां तोयौघैः सहसोत्थितैः
वेलामासाद्य विपुलां रामो वचनमब्रवीत् ९७ एते वयमनुप्राप्ताः सुग्रीव वरुणालयम् इहेदानीं
विचिंता सा यानः पूर्वमुपस्थिता ९८ अतः परमतीरोयं सागरः सरितांपतिः न चायमनुपायेन श
क्यस्तरितुमर्णवः ९९

त्थितैः उहसोरुपतागतैः तोयौघैः धौतं क्षालितमुपलतलं यस्यां तां वेलामासाद्येत्यर्थः ९७
यापूर्वमुपस्थिता चिंता समुद्रतरणविषया सेदानीमपि वर्तत इति शेषः ९८ अतीरः अप्रत्यक्षपरतीरः अनुपायेन उपायाभा
वेन उपायो विनेत्यर्थः ९९

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

मंत्रो विचारः प्रस्तूयतामारभ्यतां १०० इतीवेति इतिहेतोरित्यर्थः १०१ १०२ स्वां स्वां सेनामुत्सृज्य कश्चिदपि कुतो हेतोर्न्यो व्रजेत् य

तदिहैव निवेश्योस्तु मंत्रः प्रस्तूयतामिह यथेदं वानरबलं पारं पारमवाप्नुयात् १०० इतीव स महाबाहुः
सीताहरणकर्षितः रामः सागरमासाद्य वासमाज्ञापयत्तदा १०१ सर्वाः सेना निवेश्यन्तां वेलायां
हरिपुंगवाः संप्राप्तो मंत्रकालो नः सागरस्येह लंघने १०२ स्वां स्वां सेनां समुत्सृज्य मा च कश्चित्कु
तो व्रजेत् गच्छंतु वानराः शूरा ज्ञेयं छन्नं भयं च नः १०३ रामस्य वचनं श्रुत्वा सुग्रीवः सहलक्ष्मणः
सेनां न्यवेशयत्तीरे सागरस्य द्रुमायुते १०४ विरराज समीपस्थं सागरस्य तु तद्बलम् मधुपांडुजलः
श्रीमान् द्वितीय इव सागरः १०५ वेलावनमुपागम्य ततस्ते हरिपुंगवाः निविष्टाः परं पारं कां
क्षमाणा महोदधेः १०६

तो नोस्मा के छन्नं रक्षो मायाकृतं त्वा कूटं भयमस्तीति ज्ञेयं शूरा योद्धारः सर्वे वानराः सेनारक्षार्थं
गच्छंतु सेनायाः चतुर्दिक्षु गत्वा तत्र स्थित्वा तां रक्षंत्वित्यर्थः ३।४ सागरस्य समीपस्थं तद्बलं मधुपांडुजलः मधुपोऽडवो मधुपिंग
लो वानरा एव जलं यस्य सः द्वितीयः सागर इव विरराजेत्युत्प्रेक्षा १०५ १०६

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

ग्णोर्णवस्य महानादस्तं धीयं सैन्यसन्नाहस्य सैन्यसंचारस्य शब्दः शुश्रुवे १०७ वानराणां ध्वजिनी ऋक्षाद्गोलाङ्गूलानामपि वान
रांतरजातीयत्वात्सर्वेषामपि वानरत्वोक्तिः त्रिधा त्रिप्रकारेण बलत्रयाकारेण निविष्टा रामप्रयोजनैकपरा अभवदित्यर्थः १०८
पश्यमाना पश्यंती हृष्टाभूदिति शेषः १०९ दूरपारमित्यादि सार्धचतुष्टयमेकं वाक्यं रक्षोगणाध्युषितं वरुणालयमिति संतस्य पश्यंतो विशे

तेषां निविश्यमानानां सैन्यसन्नाहनिस्वनः श्वेतधीयमहानादमार्णवस्य प्रशुश्रुवे १०७ सा वान
राणां ध्वजिनी सुग्रीवेणाभिपालिता त्रिधा निविष्टा महती रामस्यार्थपराभवत् १०८ सा महा
र्णवमासाद्य हृष्टा वानरवाहिनी वायुवेगसमाधूतं पश्यमाना महार्णवम् १०९ दूरपारमसं
बाधं रक्षोगणनिषेवितम् पश्यंतो वरुणावासं निषेदुर्हरियूथपाः ११० चंडनक्रग्राहं घो
रं क्षपादौ दिवसक्षये हसंतमिव फेनौघैर्नृत्यंतमिव चोर्मिभिः १११ सीतारामाभ्यां नमः ॥

दूरपारमनेनान्वयः दूरे पारं यस्य स दूरपारस्तं विश्रान्तमित्यर्थः असंबाधं बाधरहितं गम्भीरमित्यर्थः ११० चंडनक्रैः करालैर्ग्रा
हैर्युक्तं स्फीतदीर्घजलौघवृद्धे स्वर्भानौ चन्द्रे हासमुत्तरति निघेटः दिवसक्षये तत्क्षपादौ निशामुखे घोरं वर्द्धमानत्वाद्भयकरमि
त्यर्थः तदा प्रवृद्धफेनौघैर्हसंतमिव स्थितं ऊर्मिभिर्नृत्यंतमिव स्थितं १११

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

समुद्धूतं प्रवृद्धं उर्मिरूपप्रतिचंद्रैः समाकुलं व्याप्तं चंडानिलवत् उग्रवेगैर्महाग्राहैः तिमिभिस्तिमिंगिलैश्च कीर्णं व्याप्तं तदुक्तं पुराणे अस्ति
रा० वा० यु० मत्स्यास्तिमिर्नाम शतयोजनविस्तरः तिमिंगिलगिलोप्यस्ति तद्गिलोप्यस्ति राघव इति ११२ दीप्तभोगैरुज्ज्वलदेहैर्भुजंगैराकीर्णं
१८ वरुणालयं [illegible] नयं पानानेमिश्च महासत्वैर्गजशिरःप्रभृमाणादिभिरवगाढं संकुलं ११३ सुदुर्गं शोभनानि लंकादीनि दुर्गाणि यस्मिन् दुर्गमार्गं

चंद्रोदयसमुद्धूतंप्रतिचंद्रसमाकुलम् चंडानिलमहाग्राहैः कीर्णंतिमितिमिंगिलैः ११२
दीप्तभोगैरिवाकीर्णंभुजंगैर्वरुणालयम् अवगाढंमहासत्वैर्नानाशैलसमाकुलम् ११३
सुदुर्गंदुर्गमार्गंतमगाधमसुरालयम् ११४ मकरैर्नागभोगैश्चविगाढावाततोलिताः उ
त्पेतुश्चनिपेतुश्च [illegible] प्रवृद्धाजलराशयः ११५ सीताराम सीताराम सीताराम सीता

दुष्प्रापमार्गं दुष्प्रापपरपारं प्राप्तुमुपायमित्यर्थः ११४ तदानीं सागरमुत्प्रेक्षते मकरैरिति नागभोगैः सर्पकायैः विगाढाः प्रविष्टा वा
ततोलिताः वायुचलिताः अतएव प्रवृद्धा जलराशयस्तरंगा उत्पेतुश्चनिपेतुश्च [illegible] उत्पतंतितुरिति भावः ११५ ११५

रामा०
१८

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

॥अथाग्निचूर्णमित्यादिश्लोकद्वयेन सागरांबरयोः साम्यं वर्णयति ॥अग्नीति रात्रौ सागरस्य सलिलं स्फटिकरण ॥अग्निचूर्णा इव दृश्यंते इ
ति प्रसिद्धिः ॥अतो भास्वरांबु चंद्रकिरणसंपर्कोन्मदास्वराणि प्रतीकरूपाणि एवं भूतिर्यस्य तत् ॥अत एवाविद्धमाकीर्णमिवाग्निकण
समूह इव स्थितं ॥अंबरं तु नक्षत्रगणैस्तथा दृश्यते महोरगं महांत उरगा यस्मिन् तत् एतदप्युभयत्र समानं ॥आकाशेऽ
पि दीप्तनागानामपि संचारसंभवात् सुरारयः सुराणामरयस्तेषां निलयभावात् भूतं इदमप्युभयत्रापि समानं

॥अग्निचूर्णमिवाविद्धं भास्वरांबुमहोरगम् सुरारिनिलयं घोरं पातालविषयं सदा १५ सागरं चांबर
प्रख्यमंबरं सागरोपमम् सागरं चांबरं चेति निर्विशेषमदृश्यत १६ संपृक्तं नभसाप्यंभः संपृक्तं
च नभोंऽभसा ताद्रूप्येण दृश्येते तारारत्नसमाकुले १७ सीतारामाभ्यां नमः सीताराम

सदा पातालविषयं पातालस्य विषय इव विषयो यस्य तत् पातालवदतिगंभीरमित्यर्थः इदमप्युभयत्र तुल्यं १५ एवमु
क्तविशेषणविशिष्टं सागरमंबरं च उक्तविशेषणविशिष्टमंबरं च सागरोपमं ॥अत सागरं चांबरं च निर्विशेषं नि
र्भेदमदृश्यत सागरमिति लिंगव्यत्ययश्छांदसः १६ निर्विशेषत्वमेव प्रकारांतरेणाह संपृक्तमित्यादि द्वाभ्यां संपृक्तं संश्लिष्टं तुल्य
मित्यर्थः हि हेतौ हि यस्मान्नभसा तुल्यवर्णमंभः ॥अंभसा तुल्यवर्णं नभश्च तस्मात्तारारत्नसमाकुले मुक्ताप्रेषितेन दवप्र
वेश्य समाकुले समुद्रनभसी ताद्रूप्येण परस्पररूपेण दृश्येते १७

समुत्पतितमेघस्याम्बरस्य वीचिमालाकुलस्य च द्वयोर्विशेषो नासीदित्यन्वयः ११८ सिंधुराजस्योर्मयः सक्ताः निरंतराः अन्योन्यैः परस्प
रमाहताः सस्वनुः ११९ रत्नौघेत्यादिश्लोकद्वयमेकं वाक्यं वायुना विषक्तं संवद्धं अत एव रत्नौघदीपकोर्मिमय जलसन्नादवं

समुत्पतितमेघस्य वीचिमालाकुलस्य च विशेषो न द्वयोरासीत्सागरस्यांबरस्य च ११८ अन्यो
न्यैराहताः सक्ताः सस्वनुर्भीमनिस्वनाः ऊर्मयः सिंधुराजस्य महाभेर्य इवाहवे ११९ रत्नौघजल
सन्नादं विषक्तमिव वायुना उत्पतंतमिव क्रुद्धं यादोगणसमाकुलम् २० ददृशुस्ते महात्मा
नो वाताहतजलाशयम् अनिलोद्धूतमाकाशे प्रवल्गंतमिवोर्मिभिः २१ ततो विस्मयमाप
न्ना हरयो ददृशुः स्थिताः भ्रांतोर्मिजलसंनादं प्रलोलमिव सागरम् ॥२२॥ इत्यार्षे रामायणे
वाल्मीकीये युद्धकांडे चतुर्थः सर्गः ॥४॥

तं अत एव क्रुद्धमुत्पतंतमिव स्थितं १२० वाताहतजलाशयं जलाशयः समु
द्रः वाताहतश्चासौ जलाशयश्चेति कर्मधारयः ऊर्मिभिराकाशे प्रवल्गंतमिव स्थितं ददृशुः अनिलोद्धूतमिति पुनरुक्तिः १२१
ततरति विशेषविधानार्थेत्यनुपुनरुक्तिः भ्रांतानां घूर्णितानामूर्मिजालानां संनादो यस्मिन् तं अत एव प्रलोलं प्रचलमिव स्थितं १२२
इति चतुर्थः सर्गः ४

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

स्वारक्षा प्राप्समंताद्रक्षितीत्यारक्षा शोभनाऽऽरक्षा यस्याः सा नीलेन विधिवन्नीतिशास्त्रोक्त रीत्या सुसमाहिता सम्यगवस्थिता सेना सागरस्योत्तरे तीरे साधु विनिवेशितेति संबंधः १ दिशमिति जात्यैकवचनं षष्ठ्यर्थे द्वितीया दिशां सर्वप्रदेशमित्यर्थः २ ३ मम

सा तु नीलेन विधिवत्स्वारक्षा सुसमाहिता सागरस्योत्तरे तीरे साधु सेना निवेशिता १ मैंदश्च द्विविदश्चोभौ तत्र वानरपुंगवौ विचेरतुश्च तां सेनां रक्षार्थं सर्वतो दिशम् २ निविष्टायां तु सेनायां तीरे नदनदीपतेः पार्श्वस्थं लक्ष्मणं दृष्ट्वा रामो वचनमब्रवीत् ३ शोकश्च किल कालेन गच्छता ह्यपगच्छति मम चापश्यतः कांतामहन्यहनि वर्द्धते ४

दुर्वेलावलावनाद्युद्दीपकवस्तुदर्शनादहृदयविरहवेगं सोढुमशक्नुवन्वा चाविष्करोति शोकश्चेत्यादि गच्छता कालेन इष्टवियोगजः शोकोऽपि गच्छतीति प्रसिद्धिः कांतामपश्यतो मम तु शोकः अहन्यहनि वर्द्धते लौकिकशोकविलक्षणो मच्छोक इति भावः ४

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

 ननु शत्रुहृताया दूरे स्थिताया अपि तस्याः प्रत्याहरणसमर्थस्त्वं वकिं तु भोः शोकेनेत्याशंक्य न तद्विषयोऽयं शोकः किं तूपभोगयो
 ग्यस्य प्रियाया वयसो वैफल्यानुस्मरणादित्याह नमे दुःखमिति प्रिया दूरे स्थितेति मे दुःखं नास्ति उपायागमनेन तन्निवृत्तेः
हृतेति च न मे दुःखं हर्तुः शिरश्छेत्तनेन निश्चयात् किं त्वस्या वयोऽतिवर्तते व्यर्थमेव यातीत्येतदेव शोकनिमित्तमित्यर्थः

न मे दुःखं प्रिया दूरे न मे दुःखं हृतेति च । तदेवानुशोचामि वयोऽस्या ह्यतिवर्तते ॥ ५ ॥
वाहि वात यतः कान्ता तां स्पृष्ट्वा मामपि स्पृश । त्वयि मे गात्रसंस्पर्शश्चन्द्रे दृष्टिसमागमः ॥ ६ ॥

प्रियायाः स्पर्शस्य विनोदहेतुत्वात् तत्संपादनार्थं वायुं प्रार्थयते वाहीति हे वात मे कान्ता यतः यत्र वसति तत्र वाहि गच्छ
तत्र गत्वा किं करणीयमित्यत्राह तां स्पृष्ट्वेति तत्र स्थितां तां स्पृष्ट्वा मामपि स्पृश किमेतावता तवेत्यत्राह त्व
यीति दृष्टिसमागमश्चन्द्रे चन्द्राधीनो यथा तथा मे तद्गात्रसंस्पर्शोऽपि त्वदधीनः यथा चन्द्रं पश्यन् तत्स्थानालिकया
तां दृष्ट्वा नास्मि तद्वत्त्वां स्पृशन् तामेव स्पृष्टवान् भवेयमित्यर्थः ॥ ६ ॥

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

न केवलेव योतिवर्त्तनस्मरणमेव व्यथाहेतुः किंतु कारणांतरमप्यस्तीत्याह तन्मेदहतीति तद्वचनमेवाशाप्राये हृदयेस्थितं सत्पीतं विषमिवमेगात्राणिदहति किंतद्वचनंतत्राह हा नाथेति साप्रियाहृियमाणासती हा नाथेतिमांयदवोचत् ७ रात्रिंदिवमितिनि पातः रात्रौचादिवाचेत्यर्थः ८ सौमित्रेत्वमत्रैवतिष्ठेतिप्रोषः भवत्ताविना हमेकएवार्णावमवगाह्यस्वप्स्येप्रज्वलत्कामोजन्तेह

तन्मेदहतिगात्राणिविषंपीतमिवाशये हा नाथेतिप्रियासामांहृियमाणायदब्रवीत् ७ तदिंसो ऽंधनवतातच्चिंताविपुलार्चिषा रात्रिंदिवंशरीरंमेदह्यतेमदनाग्निना ८ अवगाह्यार्णा वंस्वप्स्येसौमित्रेभवताविना कथंचित्प्रज्वलन्कामः समासुप्तंजलेदहेत् ९ बह्वेतत्कामसा नस्यशक्यमेतेनजीवितुम् यदहंसाचवामोरूरेकांधरणिमाश्रितौ १० सीतारमाय

प्तंमां कथंचिद्दहेत्तमंदीभवेत् जलस्याग्निविरोधित्वात् मनोमूलकामस्यसुप्तौमनस उपरमेणोपरमाच्चेतिभावः भवताविने त्यक्तिरेकाकित्वेननिद्राप्राप्त्यै ९ सावामोरूरहंचएकांधरणिमाश्रितावितियत्एतद्बहुभुरिजीवनसाधनं यस्त एवतत्कामयानस्य कामिनोममैतेनजीवितुंशक्यंकामिन्यःकामिनैकप्राप्य्याभ्यपणावदेकधरण्याश्रयणमपिजीवनमा

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

जीवने हेत्वंतरमाह केदारस्येति यथा सोदकस्य केदारस्योपश्लेषसंबंधेन निरुदकोपि केदारस्तास्थं धान्यं जीवति न शुष्य

केदारस्येव केदारः सोदकस्य निरूदकः उपश्लेहेन जीवामि जीवंतीं यत्र कुत्र तामितां ११ कदा
नु खलु सुश्रोणीं पद्मपत्रनिभेक्षणाम् विजित्य शत्रून्द्रक्ष्यामि सीता स्फीतामिव श्रियम् १२ कदा नु
चारुबिंबोष्ठं तस्याः पद्मामिवाननम् ईषदुन्नम्य पास्यामि रसायनमिवातुरः १३ तौ तस्याः
संहितौ पीनौ स्तनौ तालफलोपमौ कदा नु खलु सोत्कंपौ हसंत्या मां भजिष्यतः १४ सा नून
मसितापांगी रक्षोमध्यगता सती मन्नाथा नाथहीनेव त्रातारं नाधिगच्छति १५ कथं जनकरा
जस्य दुहिता मम च प्रिया राक्षसीमध्यगा शेते स्नुषा दशरथस्य च १६ कदा विक्षोभ्य रक्षांसि सा
विधूयोत्पतिष्यति विधूय जलदान्नीलान् शशिरेखेव शारदी १७ सीता ममसीता

तितरूतस्या जीवनवार्ता श्रवणान्नाहमपि जीवामि ११ स्फीतां श्रियमिव समृद्धां राज्यलक्ष्मीमिव १२ रसायनं पारदभस्म ग्धातु
रो रोगी १३ संहितौ मिलितौ १४ १५ १६ शविक्षोभ्य रक्षांसि सीता संकंपदेश विक्षोभ्यात्मानं कुत्र धर्षयित्वा रक्षांसि विधूय मद्गताते यो विधून

[illegible]

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

स्वभावतनुका पश्चात्तनुशरीरा देशकालविपर्ययात् देशकालयोर्व्यत्यासात् सुखसाधनदेशकालयोरभावादित्यर्थः १८ सीतां
प्रत्याहरिष्यामि शोकमुत्सृज्यमानसमिति सीतांप्रत्यानीय कदानु शोकमुत्सृज्यामीत्यर्थः मुखंव्यादाय स्वपितीतिवत् पूर्वकालेपि

स्वभावतनुका नूनं शोकेनानशनेन च भूयस्तनुतरा सीता देशकालविपर्ययात् १८ कदानु रा
क्षसेंद्रस्य निधायोरसि सायकान् सीतां प्रत्याहरिष्यामि शोकमुत्सृज्यमानसम् १९ कदानु ख
लु मां साध्वी सीतामरसुतोपमा सोत्कंठा कंठमालंब्य मोक्ष्यत्यानंदजं जलम् २० कदा शोकमि
मं घोरं मैथिलीविप्रयोगजं सहसा विप्रमोक्ष्यामि वासः शुक्लेतरं यथा २१ एवं विलपतस्तस्य तत्र रामस्य
धीमतः दिनक्षयान्मंदवपुर्भास्करोस्तमुपागतः २२ आश्वासितो लक्ष्मणेन रामः संध्यामुपासत
स्मरन्कमलपत्राक्षीं सीतां शोकाकुलीकृतः २३

त्वाप्रत्ययः साधुः १९ मे कंठमालंब्येत्यन्वयः २० शुक्लेतरं मलिनं २१ विलपतो रामस्य विलापं शृण्वेत्यर्थः २२ सीतां स्मरन्निति हेतौ श
तृप्रत्ययः सीतास्मरणहेतोः शोकाकुलीकृतो रामो लक्ष्मणेनाश्वासितः संध्यामुपासत २३ सीतारामाभ्यां नमः ॥

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

 इतिपंचमःसर्गः ५ अथ हनुमत्प्रतिनिवृत्तिसागरतटेरामानयनपर्यंतामुपवर्णयितन्नि ऊसनंतरकालिकः समयएववर्णाव्या
 पारउपवर्ण्यत्तेवाचः क्रमिकत्वात् लंकायांहनुमताशक्रेणेवकृतेघोरंकर्मदृष्ट्वाराक्षसानब्रवीत् १ ह्रीवीजमाह धर्षितेति
आक्रांत्तेसर्थः वानरमात्रेणएकेननिरायुधेनेत्सर्थः २ चैत्यप्रासादःनगरप्रधानभूतःप्रासादः आकुलादुन्मिता ३ वो

इत्यार्षेरामायणेयुद्धकांडेपंचमःसर्गः॥५॥ लंकायांतुकृतेसर्वे घोरंदृष्ट्वाभयावहम् राक्षसेंद्रोहनुम
ताशक्रेणेवमहात्मना अब्रवीद्राक्षसान्सर्वान् ह्रियाकिंचिदवाङ्मुखः १ धर्षिताचप्रविष्टा
चलंकादुष्प्रसहापुरीतेनवानरमात्रेणदृष्टासीताचजानकी २ प्रासादोधर्षितश्चैत्यःप्रवरा
राक्षसाहताः आकुलाचपुरीलंकासर्वाहनुमताकृता ३ किंकरिष्यामिभद्रंवःकिंवायुक्त
मनंतरम् ३ उच्यतांनःसमर्थंयत्कृतंचसुकृतंभवेत् ४ मंत्रमूलंचविजयंप्रवदंतिमनस्विनः
तस्माद्वैरोचयेमंत्रंरामंप्रतिमहावलाः ५

भद्रमस्तुकिंकरिष्यामिअनंतरंवायुक्तमाकंकिंयुक्तंयोग्यमनुष्ठानंकिंरोचतइतिशेषः यत्कर्मअनुष्ठितंसत्तन्नःसमर्थंहितं
भवेत् यच्चकृतंसुकृतंसम्यगनुष्ठितंश्लाघनीयंभवेत्तदुच्यतां ४ बलवतस्तवकामंत्रापेदेसत्रराजनीतिरियमित्याहमंत्रमूल

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

स्वेषोत्तमश्च भुल्लक्ष्यायनशेषतयामंत्रत्रैविध्यमाह त्रिविधा इति पुरुषाः मंत्रापेक्षिणः प्रभुपुरुषाः लोके उत्तममध्यमाधम
भेदेन त्रिविधाः समवेतानां संकीर्णरूपाणां तेषां त्वनन्तानां ज्ञानं विना विवेक्तुमशक्यानां गुणदोषौ उत्तमानां गुणान् मध्य
मानां गुणदोषौ अधमानां दोषश्च वदामीत्यर्थः ६ मंत्रनिर्णयसमर्थैर्हितैस्तत्संयुक्तैर्हितपरैर्मंत्रिभिः समानार्थैः समान

त्रिविधाः पुरुषा लोके उत्तमाधममध्यमाः तेषां तु समवेतानां गुणदोषौ वदाम्यहम् ६ मंत्रिभि
र्हितसंयुक्तैः समर्थैर्मंत्रनिर्णये मित्रैर्वापि समानार्थैर्बांधवैर्वा समाहितैः ७ सहितो मंत्रयित्वा
यः कर्मारंभान्प्रवर्तयेत् दैवे च कुरुते यत्नं तमाहुः पुरुषोत्तमम् ८ एकोऽर्थं विमृशेदेको धर्मे प्रकु
रुते मनः एकः कार्याणि कुरुते तमाहुर्मध्यमं नरम् ९ गुणदोषावनिश्चित्य त्यक्त्वा दैवव्यपा
श्रयम् करिष्यामीति यः कार्यमुपेक्षेत्स नराधमः १०

सुहृद्भिः वै मित्रैर्वा समाहितो मंत्रयित्वा यः कर्मारंभान्प्रवर्तयेत् दैवे देवतहापेच यत्नं कुरुते तमुत्तमं पुरुषमाहुः ७ ८ एको
ऽर्थमिति विचारोऽस्य गुणः इतरनिरपेक्षता दोषः ९ गुणदोषौ युक्तायुक्तत्वहिताहितादिकमिश्रौः सहानिश्चित्य दैव
व्यपाश्रयं च त्यक्त्वा दैवापेक्षां च कृत्वा कार्यं करिष्यामीत्युपक्रम्य तदनन्तरे उपेक्षेत्स नराधमः १० १०

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

स्वेषामुत्तमत्वमध्यमत्वख्यापनशेषतया मंत्रे त्रैविध्यमाह त्रिविधा इति पुरुषाः मंत्रापेक्षिताः प्रभुपुरुषाः लोके उत्तममध्यमाधम
भेदेन त्रिविधाः समवेतानां संकीर्णरूपाणां तेषां त्वं तु गणशः तानं विना विवेकः मश्नक्यानां गुणदोषौ उत्तमानां गुणान् मध्य
मानां गुणदोषौ अधमानां दोषश्च वदामीत्यर्थः ६ मंत्रनिर्णये समर्थैः हितसंयुक्तैः हितपरैर्मंत्रिभिः समानार्थैः समान

त्रिविधाः पुरुषा लोके उत्तमाधममध्यमाः तेषां तु समवेतानां गुणदोषौ वदाम्यहम् ६ मंत्रिभि
र्हितसंयुक्तैः समर्थैर्मंत्रनिर्णये मित्रैर्वापि समानार्थैर्बांधवैर्वा समाहितैः ७ सहितो मंत्रयित्वा
यः कर्मारंभान्प्रवर्तयेत् दैवे च कुरुते यत्नं तमाहुः पुरुषोत्तमम् ८ एकोर्थं विमृशेदेको धर्मे प्रकु
रुते मनः एकः कार्याणि कुरुते तमाहुर्मध्यमं नरम् ९ गुणदोषावनिश्चित्य त्यक्त्वा दैवव्यपा
श्रयम् करिष्यामीति यः कार्यमुपेक्षेत्स नराधमः १०

सुखदुःखैर्मित्रैर्वा समाहिताः मंत्रयित्वा यः कर्मारंभान्प्रवर्तयेत् दैवे दैवसहाये च यत्नं कुरुते तमुत्तमं पुरुषमाहुः ७ ८ एको
र्थमिति विचारोऽस्य गुणः स्वतरनिरपेक्षता दोषः ९ गुणदोषौ युक्तायुक्तत्वहिताहितादिकमनिश्चित्य हानिं त्यक्त्वा दैव
व्यपाश्रयं च सहकारिदैवापेक्षां च त्यक्त्वा कार्यं करिष्यामीत्युपक्रम्य तदनंतरं उपेक्षेत् नष्टमाप्येत्स नराधमः १० १०

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

हि० बा० पु०
२३

यद्यप्यात्मन्त्रैविध्यमुक्तं तत्समं त्रस्यापीदानीं त्रैविध्यमाह यथेति ११ तानेव मंत्रप्रकारानाह एकमत्यमिति शास्त्रदृष्टेन स्वदृ
ष्ट्या शास्त्ररीत्या तद्रूपेण चक्षुषा उपलक्षितानां मंत्रिणां यत्र मंत्रे एकमत्यमुपागम्य निरताः प्रतिष्ठिताः तन्मंत्रं मुत्तममाहुः १२
बह्वीर्मतीर्गत्वा विहुविरुद्धमतिविषयतां प्राप्य पुनर्वैमत्यानंतरं राजभीत्या ह्युपाधितो यत्र मंत्रे एकतामैकमत्यं प्राप्तः समं त्रो

पृथगेव पुरुषा नित्यमुत्तमाधममध्यमाः एवं मंत्रोपि विज्ञेय उत्तमाधममध्यमः ११ ऐकमत्यमु
पागम्य शास्त्रदृष्टेन चक्षुषा मंत्रिणो यत्र निरतास्तमाहुर्मंत्रमुत्तमम् १२ बह्वीरपि मतीर्ग
त्वा मंत्रिणामर्थनिर्णयः पुनर्यत्रैकतां प्राप्तः स मंत्रो मध्यमः स्मृतः १३ अन्योन्यमतिमास्था
य यत्र संप्रतिभाष्यते न चैकमत्ये श्रेयोस्ति मंत्रः सोधम उच्यते १४ तस्मात्सुमंत्रितं साधु भवे
तो मंत्रि सत्तमाः कार्यं संप्रतिपद्यंतामेतन्मतं मम १५

मध्यमः १३ यत्र मंत्रे अन्योन्यमतिमास्थाय परस्परं
भिन्नमविलंबं प्राप्य संप्रतिभाष्यते विरुद्धभाषणं क्रियते कथंचित्केषुचिन्नैकमत्येपि श्रेयश्च नास्ति स मंत्रोधमः १४ उपसंहरति
तस्मादिति यत्कार्यं सुमंत्रितं भवति तदेव साधु भवतीभवेत अथ मंत्रे सत्तमाः श्रेष्ठा अतो यत्कार्यं सुमंत्रितं साधु भवतीति
त्कार्यं संप्रतिपद्यतां एकमत्येन निश्चिन्वंतु यदेवमवन्मद्भिर्निश्चितं तदेव मम मतं कर्तुं योग्यमत्तमिदम् १५ १५

विचारप्रयोजिकाशत्रुभीतिश्च निश्चितास्माकमित्याह वानराणामिति । प्रभ्येतीति वर्तमानसामीप्ये लट् २ । चिरादागमिष्यतीत्यवेत्य
र्थः १६ ननु दुस्तरे सागरे स्थिते कथं रामागमनशंकेत्यत आह तरिष्यतीति सुग्रीवः स्वबलं तरिष्यति को वा तरणोपाय इत्यत आह तर
सेति वलेन दिव्यास्त्रबलेन वेत्यर्थः १७ तदेवाह समुद्रमिति । प्रत्यासेतुबंधनं १८ अस्मिन्नित्यंकानिरोधरूपे कार्ये एवं

वानराणां हि वीराणां सहस्रैः परिवारितः । रामोऽभ्येति पुरीं लंकामस्माकमुपरोधकः १६ तरिष्यति च
सुग्रीवं राघवः सागरं स्वबलम् तरसा युक्तरूपेतासानुजः सबलानुगः १७ समुद्रं स्नक्ष्यति वीर्ये
णान्यत्करोति वा १८ अस्मिन्नेवं गते कार्ये विरुद्धे वानरैः सह । हितं पुरस्य सैन्यस्य च सर्वं संमन्त्र्यतां
मम ॥ १९ ॥ इत्यार्षे रामायणे पुरकाण्डे षष्ठः सर्गः ॥ ६ ॥ इत्युक्ता राक्षसेंद्रेण दानवास्ते महाबलाः ऊचुः
प्रांजलयः सर्वे रावणं दानवेश्वरम् १

तेषु दुष्कृतीत्याप्रवृत्ते वानरैः सह विरुद्धे विरोधे च प्राप्ते मम पुरादिषु हितं यत्तत्सर्वं संमंत्र्यतामित्यन्वयः १९ इति षष्ठः सर्गः ६ तत्रा
दौ दुर्मंत्रितत्वं दुर्मंत्रमाह इत्युक्ता इति सार्धमेकान्वयं यतो नीतिवाह्या अतएवाबुद्धयस्ते एव राक्षसादिपक्षक्षेपिदिव दुर्लभवि
त्वायत्तास्ता अपि मोहादविगणय्यैव प्रांजलयः सन्तो रावणमूचुः तदेवाह राजन्निति परिघः परितो हननं यस्मात् योगादावित्प्रोक्षः ऋषि
रतिः १

रा० वा० पु० २ ३ उच्यमानं गुणौघं धनदस्तेन त्वया सुमहत्कदनं युद्धं कृत्वा वशगः कृतः ४ तदेव स्पष्टं च्यते स इति स धनदः महेश्वरस
२४

द्विषत्पक्षमविक्षापनीति वा ह्यात्मबुद्धयः राजन्परिघप्रांशुः पिशितरूपदिष्ट्या संकुलम् २
सुमहन्नो वलेकस्माद्विषादं भजते भवान् त्वया भोगवतीं गत्वा निर्जिताः पन्नगा युधि ३ कै
लासशिखरावासी यक्षैर्वहुभिरावृतः सुमहत्कदनं कृत्वा वशपत्ते धनदः कृतः ४ स महेश्वर
सख्येन श्लाघमानस्त्वया विभो निर्जितः समरे रोषाल्लोकपालो महावलः ५ विनिपात्य
च यक्षौघान्विक्षोभ्य विनिगृह्य च त्वया कैलासशिखराद्विमानमिदमाहृतम् ६ मयेन
दानवेंद्रेण त्वद्भयात्सख्यमिच्छता दुहिता तव भार्यार्थे दत्ता राक्षसपुंगव ७ दानवेंद्रो म
हावाहो वीर्योत्सिक्तो दुरासदः विगृह्य वशमानीतः कुंभीनस्याः सुखावहः ८ निर्जिता
स्ते महावाहो नागा गत्वा रसातलम् वासुकिस्तक्षकः शंखो जटी च वशमाहृताः ९

सख्येन हेतुना सख्यं श्लाघमानोपि लोकपालोपि त्वया समरे रोषान्निर्जितः ५ न जयमात्रमपितु सर्वस्वापहारोपीत्याह विनिपात्ये रा०म०
ति दद्दं विमानं पुष्पकं ६ दुहिता मंदोदरी ७ कुंभीनसी रावणस्वसा तस्याः सुखावहो भर्ता ८ जटी नागविशेषः ९ २४

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

अक्षयेसादिश्लोकद्वयमेकान्वयं दानवाः कालकेयाः १० तत्रैतैः सहवासान्मायाश्चाधिगताः प्राप्ताः ११ चतुर्विधबलं रथग
जतुरगपादातरूपं प्रत्युतं येषां ते १२ मलुदंडरूपो महाग्राहो यस्मिन् तेषु शाल्मली द्रुमैर्यातना वृक्षैर्मंडितं सागरोपि द्वी

अक्षयाबलवंतश्च वरप्राप्तालब्धवराः पुनः त्वया संवत्सरं युद्ध्वा समरे दानवा विभो १० स्वबलेनस
मुपाश्रित्य नीता वयमरिंदम मायाश्चाधिगतास्तत्र वह्नो वै राक्षसाधिप ११ शरणाश्च बलवंतश्च
वरुणस्य सुतारणे निर्जितास्ते महाराज चतुर्विधबलान्विताः १२ मलुदंडमहाग्राहं शाल्मली
द्रुमभूषितम् कालपाशमहावीचि यमकिंकरपन्नगम् १३ महाज्वरेण दुर्धर्षं यमलोकम
हार्णवम् रथवाहास्त्वयाराजन् यमस्य बलसागरम् १४ जयश्च विपुलः प्राप्तो महत्सुमुख्यप्रति
घोषितः सुयुद्धेन च ते सर्वे लोकास्तत्र सुतोषिताः १५ क्षत्रियैर्बहुभिर्वीरैः शक्रतुल्यपरा
क्रमैः आसीद्वसुमती पूर्णा महद्भिरिव पर्वतैः १६

यत्र वृक्षमंडितो भवति कालपाश एव महत्सो वीचयो
यस्य तं यमस्य बलसागरम् रणे हत्वा यावि पुलो जयश्च प्राप्तो महत् सुमुख्यप्रति घोषितः पराङ्मुखः कृतः तेन पार्श्वे राक्षसाः सु
तोषितः प्रीणिताः १३ १४ १५ एवं दिग्विजयमत्र भौमं जयमाहुः क्षत्रियैरिति उच्यमानस्य तेः क्षत्रियैर्वसुमती

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा० वा० पु० २५ तेपिप्रसह्यत्वयाहताः राघववत्तुरणेतेषांवीर्यादिभिर्नसमोऽतस्त्वद्वचेकाचिंतेतिभावः १७ एवंरावणंप्रप्रास्यतत्रैस्तुवंतितिष्ठत्वमि
ति हेमहाराजत्तवमनुष्योऽनर्थयेकिंतस्मात्वंतूष्णींमेवतिष्ठतवश्रमेणाकिंफलंएकएवेंद्रजिद्दानरान्क्षपयिष्यतिमहाराजेतिहिरु

तेषांवीर्यगुणोत्साहैर्नसमोराघवोरणेप्रसह्यतेत्वयाराजन्हताःसमरदुर्जयाः १७ तिष्ठत्वंकिंमहा
राजश्रमेणतववानरान् अयमेकोमहाराजइंद्रजित्क्षपयिष्यति १८ अनेनहिमहाराजमाहेश्वरमनु
त्तमम् इष्ट्वायज्ञंवरोलब्धोलोकेपरमदुर्लभः १९ शक्तितोमरमीनंचाविनिकीर्णास्त्रशैवलम् गा
जेकच्छपसंबाधमश्वमंडूकसंकुलम् २० रुद्रादित्यमहाग्राहंमरुद्वसुमहोरगम् रथाश्वगजतोयौघं
पदातिपुलिनंमहत् २१ अनेनहिसमासाद्यदेवानांबलसागरम् गृहीतोदैवतपतिर्लंकायांचप्रवेशि
तः २२ पितामहनियोगाच्चमुक्तःशंबरवृत्रहा गतस्त्रिविष्टपंराजन्सर्वदेवनमस्कृतः २३ तमेव
त्वंमहाराजविसृजेंद्रजितंसुतम् यावद्वानरसेनांतांसरामांनयतिक्षयम् २४ सोतारामाभ्यांनमः [illegible]

क्तिरादरात् १८ कथमस्यैवसामर्थ्यंतत्राहुःअनेनेति माहेश्वरंमहेश्वरप्रीतिकरंयज्ञमिष्ट्वाकृत्वा १९ देवबलंसागरत्वेननिरू रा० म० २५
पयंतिशक्तीत्यादि विनिकीर्णानिव्याप्तानि २० महत्महांतं २१ दैवतपतिरिंद्रः २२ शंबरवृत्रेहंतिसः २३ क्षयंयावन्नयतिन

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

प्रीकृतान्नखानरहपाञ्जनादागतासंभाविताशमनाउयमापत्तच्चिंतातेकर्त्तुमयोग्या सर्वथैषाचिंतात्वयाहृदिनैवकार्यायतस्त्वंराघवेव
धिष्ण्यस्येव २५ इतिसप्तमःसर्गः॥७।१।२ हनुमतः पौरुषंप्रत्यक्षतोदृष्ट्वापिकथमेवंब्रूथइत्यत्राहसर्व इत्यादि प्रमत्ताः भोगादिपर

एजन्नापद्युक्तेयमागतापाकृताज्जनात्॥ हृदिनैवत्वयाकार्यात्वेवधिष्ण्यमिराघवम्॥२५॥इत्यार्षेश्री
मद्रामायणे युद्धकांडेसप्तमः सर्गः॥७॥ ततोनीलो बुद्ध्वा प्रहस्तोनामराक्षसः १ ब्रवीत्प्रांजलि
वीक्यं शूरःसेनापतिस्ततः १ देवदानवगंधर्वाःपिशाचाःपन्नगास्तथा नत्वांधर्षयितुंशक्ताः
किंपुनर्वानरारणे २ सर्वेप्रमत्ताविश्वस्तावंचितास्महनूमता नहिमेजीवतोगच्छेज्जीवन्सवनगो
चरः ३ सर्वांसागरपर्य्यंतांसशैलवनकाननाम् करोम्यवानरांभूमिमाज्ञापयतुमांभवान् ४४

वश्चाः विश्वस्ताः अस्मान्पराभवितुंकोपिनशक्तिमानितिविप्रलब्धाः अतःएवहनूमतावंचितास्म प्रामादिकः परिभवोन
न्यूनत्तामायादयतीतिभावः मेजीवत इतिसप्तम्यर्थेषष्ठी प्रमादाद्यभावविशिष्टजीवनवतिमयिसतिसवनगोचरोजीवन्न

॥ गच्छेदि सर्पः ३ करोमि करिष्यामि ४

टी० वा० सु० आत्मापराधजं सीतापहरणरूपापराधजं ५ न क्षमणीयं क्षमितुं न युक्तं प्रतिक्रियैव कर्तव्येति भावः ६ इदं पदार्थमाह सर्वेषामिति ६ भूयः
२६ पुनः पुरस्यांतःपुरस्य चापं परिभवो दाहरूपो न क्षमणीयः राक्षसपुंगवाः वानरेण प्रधर्षणं तज्जं राक्षसेंद्रस्य दुःखमहमेक एव गत्वा भीत्या सागरं

रक्षांचैव विधास्यामि वानराद्रजनीचर नागमिष्यति ते दुःखं किंचिदात्मापराधजम् ५ अब्रवीत्तु सुसंक्रुद्धो दुर्मुखो नाम राक्षसः इदं न क्षमणीयं हि सर्वेषां नः प्रधर्षणम् ६ अयं परिभवो भूयः पुरस्यांतःपुरस्य च श्रीमतो राक्षसेंद्रस्य वानरेण प्रधर्षणम् ७ अस्मिन्मुहूर्ते हत्वैको निवर्तिष्यामि वानरान् प्रविष्टान्सागरं भीममंबरं वा रसातलम् ८ ततोऽब्रवीत्सुसंक्रुद्धो वज्रदंष्ट्रो महाबलः प्रगृह्य परिघं घोरं मांसशोणितदूषितम् ९ किं वो हनुमता कार्यं कृपणेन तपस्विना रामे तिष्ठति दुर्धर्षे सुग्रीवे च सलक्ष्मणे १०

तद्दीनपि प्रविष्टान्वानरान्हत्वा निवर्त्तिष्यामि ७ ८ मांसशोणिताभ्यां समं वसाभ्यां दूषितं भयजनकं ९ कृपणेन मूढसंचारप्रक
टितमयेन तपस्विना शोच्येन हनूमता किं तर्हि को हंतव्यस्तत्राह रामे तिष्ठतिसति किमनेन हतेनेत्यर्थः ११ राम० २६

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

यद्ववमितिघातममिति ११ इदंपदार्थमाह उपायेति १२ तमुपायमाह कामेति पंक्तिमार्यैर्निश्चिताः निश्चितवंतः १३ ततोपि किंत
त्राह काकुत्स्थमिति विवर्त्तस्पृष्टवपुः धत्वेति प्रोषः १४ भरतप्रेषितत्ववचनेनापि किं तत्राह सहीति सेनां वानरसेनां स

अद्य रामं ससुग्रीवं परिघेण सलक्ष्मणम् आगमिष्यामि हत्वैकां विक्षोभ्य हरिवाहिनीम् ११
इदं ममापरं वाक्यं शृणु राजन्य[illegible]दीच्छसि उपायकुशलो ह्येव जयेच्छत्रूनतंद्रितः १२ कामरू
पधराः शूराः सुभीमा भीमदर्शनाः राक्षसा नो सहस्राणि राक्षसाधिपनिश्चिताः १३ काकुत्स्थ
मुपसंगम्य विवृत्तं मानुषं वपुः सर्वे ह्यसंभ्रमा भूत्वा ब्रुवंतु रघुसत्तमम् १४ प्रेषिता भरतेनैव भ्रा
त्रा तव यवीयसा सहि सेनां समुत्थाप्य क्षिप्रमेवोपयास्यति १५ ततो वयमितस्तूर्णं शूलशक्तिग
दाधराः चापबाणासिहस्ताश्च त्वरितास्तत्र यामते १६ आकाशे शातः शाः स्थित्वा हत्वा तां हरि
वाहिनीम् अश्मशस्त्रमहावृष्ट्या प्रापयाम यमक्षयम् १७

मुत्थाप्य सत्कात्वीय उद्याक्षिप्रमेवोप
यास्यति आस्मानिति प्रोषः १५ तत[illegible]किमिति प्रश्ने मध्ये मार्गं प्राह यामेति निबधकारणामंत्रमाह तत इति यामेति नोऽनुत्तमपुरुषबहुवचनम् १६

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०वा०यु० उक्तमेवार्थात्कार्यसिद्धिमाह एवंचेदिति एवमस्मदुक्तमुपक्रम्य यद्यसौ नानुजानातितदा सर्वथास्मदीयमन्त्रं एकैतवमुपसर्पता प्राप्नुयात्तांतम
२७

एवंचेदुपसर्पेतामन्यद्येन लक्ष्मणौ अथ वक्रपमपनीतेनजहतामेवजीवितम् १८ कौम्भकर्णिस्त
तोवीरोनिकुम्भोनामवीर्यवान् अब्रवीत्परमक्रुद्धो रावणंलोकरावणम् १९ सर्वेभवन्तस्तिष्ठ
न्तुमहाराजेनसंगताः अहमेकोहनिष्यामिराघवंसहलक्ष्मणम् २० सुग्रीवंसहनूमन्तंसर्वा
श्चैवात्रवानरान् ततोवज्रहनुर्नामराक्षसःपर्वतोपमः २१ क्रुद्धःपरिलिहन्वक्त्रंजिह्वयावा
क्यमब्रवीत् स्वैरंकुर्वन्तुकार्याणिभवन्तोविगतज्वराः २३ एकोहंभक्षयिष्यामितान्सर्वान्ह
रिवाहिनीम् ततोमहोदरःक्रुद्धोरावणंवाक्यमब्रवीत् २४ स्वस्थाःक्रीडन्तुनिश्चिन्ताःपिब
न्तुमधुवारुणीम् अहमेकोहनिष्यामिसुग्रीवंसहलक्ष्मणम् साङ्गदंचहनूमन्तंरामंचरण
कुञ्जरम् ॥ २५ ॥ इत्यार्षे श्रीमद्रामायणे युद्धकाण्डेऽष्टमः सर्गः ॥ ८ ॥

ख्यापनीतेनकैतवकृतप्रहारेणवक्रपमेवजीवितंजहतांजहेतामित्यर्थः १८ कौम्भकर्णिः कुम्भकर्णापत्यं १९ २० अत्रवानरानप्र
संहत्यापांस्थितान्वानरानित्यर्थः २१ २२ २३ मधुवारुणींमधुरूपांवारुणीम् २४ इत्यष्टमःसर्गः ॥ ८ ॥

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

तत इत्यादिश्लोकषट्कमेकं वाक्यं तस्य अद्य रामं वधिष्याम इत्यब्रुवन्निति क्रियया संबंधः १ २ ३ सुबाणानीति बहुव्रीहिः ४ विपु
लांश्छुमान् निर्मलजलकान् तीक्ष्णान् समुत्पत्योत्थाय ५ ६ विभीषणस्तान्सर्वान्वारयित्वा पुनः प्रत्युपवेश्योपवेश्य पुनस्तान् रावणं प्रति प्रां

ततो निकुंभो रभसः सूर्यशत्रुर्महाबलः सुप्तघ्नो यज्ञकोपश्च महापार्श्वमहोदरौ १ अग्निकेतु
श्च दुर्द्धर्षो रश्मिकेतुश्च राक्षसः इंद्रजिच्च महातेजा बलवान् रावणात्मजः २ प्रहस्तोथ विरू
पाक्षो वज्रदंष्ट्रो महाबलः धूम्राक्षोथ निकुंभश्च दुर्मुखश्चैव राक्षसः ३ परिघान्पट्टिशान्
प्रासान्प्रासान् शक्तिपरश्वधान् चापानि च सुबाणानि खड्गांश्च विपुलान् छुमान् ४ प्रगृह्य
परमक्रुद्धाः समुत्पत्य च राक्षसाः अब्रुवन् रावणं सर्वे प्रदीप्ता इव तेजसा ५ अद्य रामं वधिष्यामः
सुग्रीवं च सलक्ष्मणम् कृपणं च हनूमंतं लंका येन प्रधर्षिता ६ तान्गृहीतायुधान्सर्वान्वार
यित्वा विभीषणः अब्रवीत्प्रांजलिर्वाक्यं पुनः प्रत्युपवेश्य तान् ७ अप्युपायैस्त्रिभिस्तात योर्थः
प्राप्तुं न शक्यते तस्य विक्रमकालांस्तान्युक्तानाहुर्मनीषिणः ८

जलिर्भूत्वा वाक्यमब्रवीत् ७ त्रिभिरुपायैः
सामदानभेदरूपैरपि योर्थः लब्धुं न शक्यते तस्य सिद्धये तान् नीतिशास्त्रप्रसिद्धान् विक्रमकालानाहुः मनीषिणः नीतिशास्त्रज्ञाः ८

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० बा० सु० तानेव कालेनाहप्रमत्तेष्वप्रमावधानेष्वभियुक्तेषु प्राप्तान्तराक्रांतेषु दैवेन भाग्येन प्रहृतेषु क्षीयमाणसंपत्तिषु विधिना नीतिशास्त्रोक्तरी
२८ त्या परीक्ष्य मंत्रिभिर्विचार्य कृता विक्रमा विग्रहाः सिध्यंति नान्यत्रेत्यर्थः ९ प्रहृते विक्रमान्हि एव काले रत्याहाप्रमत्तमिति सावधान
मित्यर्थः विजिगीषुमनेन शत्र्वंतरराहित्यं बलेस्थितं स्थिरबलमित्यर्थः जितरोषमकालेरोषरहितं दुष्प्रधर्षत्वेन दिव्यास्त्रसंपत्तिर

प्रमत्तेष्वभियुक्तेषु दैवेन प्रहृतेषु च विक्रमास्तेतु सिध्यंति परीक्ष्य विधिना कृताः ९ ऽप्रमत्तंच
यंतंतु विजीगिषुं बलेस्थितम् जितरोषं दुराधर्षं प्रधर्षयितुमिच्छथ १० समुद्रं लंघयित्वा तु घोरं न
दनदीपतिं गतिं हनुमतो लोके को विद्यात्तर्कयेत वा ११ बलान्यपरिमेयानि वीर्याणि च निशाच
राः परेषां सहसावज्ञा न कर्तव्या कथंचन १२ किं च राक्षसराजस्य रामेण प्रकृतं पुरा आजहार जन
स्थानात्तस्य भार्यां यशस्विनः १३

क्रा १० घोरं समुद्रं लंघयित्वा हनूमतो गतिं लोके को विद्यात् मनसापि कः प्राप्नुयात्
तर्कयेत् हनूमति एवं चेष्टां संभावयेत् ११ एवमेव हनूमदादिवत् बलान्यपरिमेयानि वीर्याणि पराक्रमाश्च सर्वलोकातिगा इति जानी
थ निशाचराः अतो हे निशाचराः परेषां रामादीनां सहसावज्ञा निष्कारणवैरकरणमनुचितमित्यर्थः १२ किं चास्मात्स्ववान्यायेन रामे रामा०
रत्याह किं चेति यशस्विनो यस्य भार्यां जनस्थानात् आजहार तेन रामेण राक्षसराजस्य पुरा पूर्वं किमपकृतं कोऽपकारः कृतः न कोपि १३ २८

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

ननु खरादिहननरूपोऽपकारः कृत इति चेत्तत्राह खरेति खरो रामेणानिहत इति यदि उच्यते तदा भ्रष्टा तु अपितु तत्तु सदिति स्वस्या
नमतिक्रम्य तद्दृष्टांगत्वात्तस्मी ड्डायेप्रवृत्त इति तेन हतः तौ दुष्टस्य हननं च न्याय्यमेवेत्याह अपैरूपमिति १५ एतन्निमित्तं खरादिवधनिमि
त्तं आहृता वैदेही यदि तदा एतन्निमित्तमेव वैदेह्याहरणनिमित्तमेव नः सुमहद्भयं भवेत् भावि अतो भयहेतुः सा परित्याज्या कलहा

खरो यद्यपि वृत्तस्तु रामेणानिहतो रणे अवश्यं प्राणिनां प्राणा रक्षितव्या यथा बलम् १४ एतन्निमित्तं
वैदेही भयं नः सुमहद्भवेत् आहृता सा परित्याज्या कलहार्थे कृतेन किम् १५ न नः क्षमं वीर्यवता
तेन धर्मानुवर्तिना वैरं निरर्थकं कर्तुं दीयतामस्यमैथिली १६ यावन्न सगजां साश्वां बहुरत्नसमा
कुलाम् पुरीं दारयते बाणैर्दीयतामस्यमैथिली १७ यावत्सुघोरा महती दुर्धर्षा हरिवाहिनी नाव
स्कंदति नो लंकां दीयतामस्यमैथिली १८ विनश्येद्धि पुरी लंका शूराः सर्वे च राक्षसाः रामस्य दयिता
पत्नी स्वयं यदि न दीयते प्रसादये त्वां बंधुत्वात्कुरुष्व वचनं मम हितं तथ्यमहं ब्रूमि दीयतामस्यमै

र्थे कलहफलके कस्मिंश्चित्कर्मणि कृते किन्तु फलमिति शेषः अनर्थमेवेत्यर्थः एतन्निमित्तमित्यत्र तत्रैवोध्यं १५ अस्य दीयतां अस्मै दी
यतामित्यर्थः १६ यावद्दारयति दारयिष्यति तावद्दीयतां यावत्पुरे इत्यादिना भविष्यदर्थे लट् १७ नावस्कंदति नाक्रोक्ष्यति १८ १९ बंध

[illegible] २०

[illegible] १०

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० वा० यु० २९ नवाग्रपुंखान् नवानि पुंखानि अग्राणि फलभागाः पुंखभागाश्च येषां पुरा सृजति त्यक्ष्यति ततः प्रागेव मैथिली प्रदीयताम् २१
२२ तान् सर्वान् प्रहस्तादीन् दुर्मंत्रिणो विभीषणश्च २३ इति नवमः सर्गः ९ ततः प्रत्युषसि प्राप्ते काले प्राप्तः प्राप्तो धर्मार्थयोर्निश्चयो येन
स विभीषणो राक्षसाधिपते रावणस्य वेश्म वाक्यमुक्तं वक्ष्यमाणं विज्ञाप्य तमनुजस्यालयं प्रविवेशेति सप्तमश्लोकस्थेनान्वयः शैलाग्रे

पुरा शरान्सूर्यमरीचिसन्निभान्नवाग्रपुंखान्सुदृढान्नृपात्मजः सृजत्यमोघान्विशिखान्वधाय ते
प्रदीयतां दाशरथाय मैथिली २१ त्यजस्व कोपं कुलवंशनाशनं भजस्व धर्मं रतिकीर्तिवर्धनं प्रसी
द जीवेम सपुत्रबांधवाः प्रदीयतां दाशरथाय मैथिली २२ विभीषणवचः श्रुत्वा रावणो राक्षसेश्व
रः विसर्जयित्वा तान्सर्वान्प्रविवेश गृहं स्वकम् ॥ २३ ॥ इत्यार्षे श्रीमद्रामायणे युद्धकांडे नवमः सर्गः ॥
९ ततः प्रत्युषसि प्राप्ते प्राप्तधर्मार्थनिश्चयः राक्षसाधिपतेर्वेश्म भीमकर्मा विभीषणः १ शैलाग्र
चयसंकाशं शैलशृंगमिवोन्नतम् सुविभक्तमहाकक्ष्यं महाजनपरिग्रहम् २ २२ २२ २२

शैलाग्रहणान्मित्रमहितेभ्यो निवार्येदितिन्यायेन सर्वोन्नतात्मना हितमेव वक्तव्यमिति सभिप्रेत्य रावणानभिमतहितोपदेशप्रवृत्तत्वाद् भीमकर्मे
त्युक्तिः १ शैलाग्राणां शैलशृंगाणां च यः समूहस्तत्सदृशम् बहुप्रासादवत्वादिति भावः शैलशृंगमिवोन्नतमित्युन्नत्ये दृष्टान्तः रामा० २९
सुविभक्तमहाकक्ष्यं सुविभक्तमहाकोष्ठं कक्षाः प्रकोष्ठहर्म्यादा विस्मरः महाजनैर्वृद्धैः परिगृहीत इति महाजनपरिग्रहं तदधि

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

महमात्रैः प्रधानैः ध्यासैर्हितैः परीभिः कार्यकरणदक्षैः ३ व्याकुलीकृतमारुतम् मिश्रीकरणेन वात्यारूपमापादितो वा ह्यमारुतो यत्र तं
शंखघोषेणमहाघोषायस्य तं तूर्याणां सन्नादेन संजातप्रतिध्वनिं ४ प्रजल्पितमहापथं प्रादिकर्मणि क्तः प्रातःकालत्वात्प्रा
रं ध्वजल्पमहामार्गं तप्तकांचनमयानि निर्यूहाद्वाराणि यस्मिन् निर्यूहः शिखरे द्वारे इति विश्वः यद्वा तप्तकनकमयमत्तवा

मतिमद्भिर्महामात्रैरनुरक्तैरधिष्ठितम् आप्तैरिभ्यासपर्षाद्यैः सर्वतः परिरक्षितम् ३ मत्तमातं
गनिश्वासैर्व्याकुलीकृतमारुतम् शंखघोषमहाघोषं तूर्यसन्नादनादितम् ४ प्रमदाजन
संबाधं प्रजल्पितमहापथम् तप्तकांचननिर्यूहं भूषणोत्तमभूषितम् ५ गंधर्वाणामिवावास
मालयं मरुतामिव रत्नसंचयसंबाधं भवनं भोगिनामिव ६ तं महाभ्रमिवादित्यस्तेजोविस्त
तरश्मिवान् प्रगजस्यालयं वीरः प्रविवेश महाद्युतिः ७

रत्नं निर्यूहो मत्तवारणाः ३ स्यमरः भूषणोत्तमैस्तो
रणवितानप्रभृतिभिर्भूषिते ५ गंधर्वाणामिवावासे तौर्यत्रिकसुखरितत्वादिति भावः मरुतां देवानामालयमिव निरवधिकै
श्वर्यसंपन्नत्वादिति भावः रत्नसंचयसंबाधं रत्ननिचयसंपूर्णमतएव भोगिनां सर्पाणां भवनमिव स्थितं ६ तेजोभिर्विस्तृतारश्मयो ये

विजयसंश्रितान् विजयमुद्दिश्य प्रवृत्तान् ८ सुमनोक्षतैः पुष्पाक्षतैः पूजितान् दधिपात्रैः सर्पिर्भिश्च युक्तहस्तानिति शेषः मंत्रान् वेदं ब्राह्मणांश्च विदंतितान् ९ पूज्यमानः श्लाघ्यमानः १० राजदृष्टिसंपन्नैः राजदृष्ट्येव स्थितमासनं जगाम प्राप्य तत्रो विजनेमंत्रिव्यतिरिक्तजनरहिते विविक्तेति यावत् समुदाचारं विजयी भवेत्यादिविनयप्रकाशकसमाचारं प्रयुज्य कृत्वा ११

पुरोत्पन्युत्याहर्घोषांश्च वेदविन्दिरुदाहृतान् शुश्राव सुमहातेजा भ्रातुर्विजयसंश्रितान् ८
स पूजितान्तिलपात्रैश्च सर्पिभिः सुमनोक्षतैः मंत्रवेदविदो विप्रान्ददर्श सुमहाबलः ९
स पूज्यमानो रक्षोभिर्दीप्यमानः स्वतेजसा आसनस्थं महाबाहुर्ववंदे धनदानुजम् १०
स राजदृष्टि [illegible] संपन्नमासनं हेमभूषितम् जगाम समुदाचारं प्रयुज्याचारकोविदः ११
स राघवं महात्मानं विजने मंत्रिसन्निधौ उवाच हितमत्यर्थं वचनं हेतुनिश्चितम् १२
प्रसाद्य भ्रातरं ज्येष्ठं सान्त्वेनोपस्थितक्रमः देशकालार्थसंवादि दृष्टलोकपरावरः १३

सीतारामहितहेतुनिश्चितं युक्तिभिर्निश्चितार्थं १२ सान्त्वेन भ्रातरं प्रसाद्य स्तुतिवचनेन प्रसन्नं कृत्वा उपस्थितक्रमः उपस्थितः प्रवृत्तः क्रमो वचनादिक्रिया क्रमः दृष्टलोकपरावरः भावप्रधानो यं निर्देशः दृष्टलोकस्य परत्वमपकृष्टत्वं येन सः देशकालार्थसंवादि देशकालोचित

तत्र स्थितान्सहितम् क्रमस्य विवेकः १३

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

प्रथमं रावणं संवादाय दुर्निमित्तानि दर्शयति यदाप्रभृतीति यत्कालमारभ्येह वैदेही संप्राप्ता तत्कालमारभ्याशुभसूचकानि निमि-
त्तानि दृश्यंत इति संबंधः १४ अग्निर्मथनादिनोत्पत्तिकाले सधूमकलुषोदयः धूमकलुषो योऽयं उदयस्तत्सहितः उत्प-
त्त्यनंतरं प्रणयनकाले सस्फुलिंगः साग्निकणः सधूमार्चिर्धूमाकुलज्वालासहितो मंत्रसंधुक्षितोपि मंत्रवह्निर्हविर्नियो-

यदाप्रभृति वैदेही संप्राप्तेह परंतप तदाप्रभृति दृश्यंते निमित्तान्यशुभानि नः १४ सस्फु-
लिंगः सधूमार्चिः सधूमकलुषोदयः मंत्रसंधुक्षितोप्यग्निर्न सम्यगभिवर्द्धते १५
अग्निष्ठेष्वग्निशालासु तथा ब्रह्मस्थलीषु च सरीसृपाणि दृश्यंते हव्येषु च पिपीलिकाः
१६ गवां पयांसि स्कन्नानि विमदा वरकुंजराः दीनमश्वाः प्रहेषंते न च ग्रासाभिनंदिनः १७

जितोपि न सम्यगभिवर्द्धते १५ अग्निष्ठेषु महानसादिषु अग्निशालासु अग्निहोत्रगृहेषु ब्रह्मस्थलीषु वेदाध्ययनस्थानेषु
सरीसृपाणि सर्पाः लिंगव्यत्यय आर्षः हव्येषु देवताभ्यो देयेषु आज्यपुरोडाशादिषु १६ स्कन्नानि शुष्कानि स्कंदिर्गतिशो-
षणयोरिति धातोर्निष्ठा न च ग्रासाभिनंदिनः अनेन कृतभोजना अपि बुभुक्षिता इति सूच्यंते १७

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० वा० यु० भिन्नरोमाः ऊर्ध्वरोमाणः स्रवन्तीत्यत्र मांसं स्रवन्ति च अश्रूणीति शेषः विधानैः शान्तिकर्मभिश्चिन्तिताः पर्यालोच्यमाना
३१ अपि स्वभावप्रकृतौ नावतिष्ठन्ति नावतिष्ठन्ते १८ वायसाः संघशो व्याहरन्ति संघशः समवेताश्च दृश्यन्त इति संबन्धः १९ ग
ध्राः पुरीमुपरि पुर्या उपरि पिण्डिताः मण्डलीभूताः परिलीयन्ते द्वे संध्ये द्वयोः संध्ययोः उपपन्नाः नगरीसमीपं प्राप्ताः शिवाः

खरोष्ट्राश्वतरा राजन् भिन्नरोमाः स्रवन्ति च नस्वभावेनतिष्ठन्ति विधानैरपि चिन्तिताः १८
वायसाः संघशः क्रूरा व्याहरन्ति समन्ततः समवेताश्च दृश्यन्ते विमानाग्रेषु संघशः १९ ग
ध्राश्च परिलीयन्ते पुरीमुपरिपिण्डिताः उपपन्नाश्च संध्ये द्वे व्याहरन्त्यशिवं शिवाः २० क्र
२ व्यादानां मृगाणां च पुरद्वारेषु सर्वशः श्रूयन्ते विपुला घोषाः सविस्फूर्जितनिस्वनाः २१
तदेवं प्रस्तुते कार्ये प्रायश्चित्तमिदं क्षमम् रोचते वीर वैदेही राघवाय प्रदीयताम् २२ २२

जंबुकाः अशिवं व्याहरन्ति २० क्रव्यादानां मांसभक्षकाणां मृगाणां वस्त्वर्थे सविस्फूर्जितनिस्वनाः अशनिसदृशानि
स्वनाः विपुलघोषाः श्रूयन्ते २१ एवमुपस्थितदुर्निमित्तजातप्रायश्चित्तं सीताप्रदानमेवेत्याह तदिति एवं प्रस्तुते संप्रा
प्ते अकार्ये अनर्थसूचक निमित्तजाते इदं वक्ष्यमाणं क्षमं प्रायश्चित्तं मह्यं रोचते प्रायश्चित्तमेवाह वैदेहीति २२ रा० म०
३१

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

एवणस्यातिक्रूरत्वादुक्तु तोहितस्यापितेनानि छ वङ्क हरणसंभवात्कोयं क्षमाय प्रतिहृदं चेति मोहात्कार्यतत्वापरिज्ञानात् लोभात् जीव
लोभात् न दोषं मयि त्वबुद्धिम् २३ एवं दोषः सीतापहारदोषस्तन्मूलदुर्निमित्तदोषश्चेत्यर्थः सर्वस्यजनस्येत्येतद्धि वक्तोतिर
क्षतामिति २४ एवं दोषस्तघ्नैर्न्यैर्मंत्रिभिः किमितिन निवेदितस्तत्राह कार्यत्वमद्यानन्श्चावयंती त्याह आवयोश्चेति अस्य मंत्रस्य

इदं च यदि वा मोहाल्लोभाद्वा व्याहृतं मया तत्रापि च महाराज न दोषं कर्तुमर्हसि २३ एवं हि
दोषः सर्वस्य जनस्यास्योपलक्षये रक्षसां क्षणदानां च शरस्यांतःपुरस्य च २४ आवयोश्चास्य मे
वृत्तस्य निवृत्ताः सर्वमंत्रिणः एवं रूपं च मया वाच्यं यदृष्टमपि वा श्रुतम् २५ संप्रधार्य यथान्या
येतन्द्भवान्कर्तुमर्हति २६ इति स्म मंत्रिणां मध्ये भ्राता भ्रातरमूचिवान् एवं तोरक्षसो
श्रेष्ठं पथ्यमेतद्विभीषणः

आवयोर्यद्यपि त्वमद्यात्सर्वमंत्रिणो निवृत्तास्तथापि मया भ्रात्रा यद्दृष्टं श्रुतं वा तत्सर्वं हि
तमेव रूपं वाच्यमेव समानसुखभागित्वादित्यर्थः २५ यथान्यायं यथा योग्यं संप्रधार्य मनसैव निश्चित्य तत्संप्रधारितं वा कार्यं भवा
न्कर्तुमर्हति २६ मंत्रिणां स्वभ्रातरं मंत्रिणां मध्ये इत्येतत्पथ्यमूचिवानुक्त्वा नित्यर्थः २७

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

हितमिति महार्थं महाप्रयोजनव्याप्तं मृदु शांतिपूर्वं हेतुसंहितं युक्तियुक्तं व्यतीतकाले प्राप्तौ उत्तरकाले संप्रति वर्त्तमानकाले
चक्षमं हितं तद्वाक्यं विभीषणवाक्यानि शम्य उपस्थित[illegible]ज्वरः प्राप्तक्रोधः प्रसंगवान् स्वग्रहीतार्थाभिनिवेशवान् रावण एत
द्वक्ष्यमाणमुत्तरमब्रवीदित्यर्थः २८ कुतश्चित् दुर्निमित्तात्तन्सूचितशत्रोश्चेत्यर्थः कथंस्थास्यतिस्थास्यत्येवनयुक्तः कुतोयोऽस्य

हितं महार्थं मृदु हेतुसंहितं व्यतीतकालायतिसंप्रतिक्षमम् निशम्य तद्वाक्यमुपस्थितज्वरः
प्रसंगवानुत्तरमेतदब्रवीत् २८ भयं न पश्यामि कुतश्चिदप्यहं न राघवः प्राप्स्यति जातु मैथि
लीं सुरैः सहेन्द्रैरपि संगतः कथं ममाग्रतः स्थास्यति लक्ष्मणाग्रजः २९ इत्येवमुक्त्वा सुरसै
न्यनाशनो महाबलः संप्रति चंडविक्रमः दशाननो भ्रातरमाप्तवादिनं विसर्जयामास गृहाद्वि
भीषणम् ॥ ३० ॥ इत्यार्षे रामायणे युद्धकांडे दशमः सर्गः ॥ १० ॥ स बभूव कृशो राजा मैथिलीका
ममोहितः असन्मानाच्च सुहृदां पापः पापेन कर्मणा १

ति कुतस्तु सीतां प्राप्स्यतीति भावः २९ चंडवि
क्रमः उग्रविक्रमः आप्तवादिनं युक्तवादिनं ३० इति दशमः सर्गः ॥ १० ॥ स पापः पापीगुणान्वितेन्यो मत्तु योलुसिद्धः राजा मैथि
ली विषय कामितावेशमोहितः सुहृदां विभीषणादीनाम् असन्मानाज्जुगुप्सनात्सायहे तु सीतापहार कर्मणा गोप्रश्रः चिंता कुलो वभूवेत्यर्थः १
च

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

तस्मिन्काले एवात्तो युधिष्ठिरः १ तीतसमये विभीषणोक्ता रीत्या ॥ न वसरइत्यपि ॥ श्मासा सादिभिर्विभीषणो तिरिक्तैः सह युद्धमेव श्राग्न कालं वै
देहीमनुचिंतयन्काममोहितत्वादमन्यत २ ॥ एवमेव निश्चयायसभाप्रस्थानं सहेमेत्यादि हेमजालविततं सुवर्णमयगवाक्षव्याप्तं वि

॥ अतीवकामसंपन्नो वैदेहीमनुचिंतयन् ॥ अतीतसमये काले तस्मिन्नेव युधि रावणः ॥ अमात्यै-
श्च सुहृद्भिश्च प्राप्तकालममन्यत २ स हेमजालविततं मणिविद्रुमभूषितम् उपगम्य विनी-
ताश्वमारुरोह महारथम् तमास्थाय रथश्रेष्ठं महामेघसमस्वनम् प्रययौ रक्षसां श्रेष्ठो दशग्री-
वः सभां प्रति ४ असिचर्मधरा योधाः सर्वायुधधरास्ततः राक्षसा राक्षसेंद्रस्य पुरस्तात्संप्रत-
स्थिरे ५ नानाविकृतवेषाश्च नानाभूषणभूषिताः पार्श्वतः पृष्ठतश्चैनं परिवार्य प्रययुस्त-
दा ६ रथैश्चातिरथाः शीघ्रं मत्तैश्च वरवारणैः अनूत्पेतुर्दशग्रीवमाक्रीडद्भिश्च वाजि-
भिः ७ गदापरिघहस्ताश्च शक्तितोमरपाणयः परश्वधधराश्चान्ये तथान्ये शूलपाणयः ८

नीताश्वं शिक्षिताश्वयुक्तं ३ सभां मंत्रशालां ४ नानाविकृतवेषाः नानाविधतया विशिष्य कृतालंकाराः राक्षसा इति शेषः ६
आक्रीडद्भिः गतिभेदेन क्रीडां कुर्वद्भिः ७ ततः प्रस्थानोत्तरं ८

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

९ १० श्वातपत्राणां श्वातपत्रं ११ खलंकाणपहेमनिर्मितामंजर्योगर्भयोस्ते शुद्धस्फटिकसदृशाकारे चामरव्यजने चमरवाल निर्मिते व्यजने च चामरव्यजने तस्य सव्यदक्षिणे सव्यदक्षिणपार्श्वयो रेजतुरित्यर्थः १२ १३ विरचितां विश्वकर्मणा तिष्ठ

ततस्तूर्यसहस्राणां संजज्ञे निस्वनो महान् तुमुलः शंखशब्दैश्च सभां गच्छति राघवे ९ सनेमिघोषेण महान्सहसाभिनिनादयन् राजमार्गं श्रिया जुष्टं प्रतिपेदे महारथः १० विमलं चातपत्राणां प्रगृहीतमशोभत पांडुरं राजहंसेंदुसंपूर्णचंद्राधिपो यथा ११ हेममंजरिगर्भे च शुद्धस्फटिकवि ग्रहे चामरव्यजने तस्य रेजतुः सव्यदक्षिणे १२ ते कृतांजलयः सर्वे रथस्थं पृथिवीस्थिताः राक्षसा राक्षसश्रेष्ठं शिरोभिस्तं ववंदिरे १३ राक्षसैः स्तूयमानः सन् जयाशीर्भिररिंदमः श्वास सादमहातेजाः सभां विरचितां शुभाम् १४ सुवर्णरजताकीर्णां विशुद्धस्फटिकोत्तराम् वि राजमानो वपुषा रुक्मपट्टोत्तरच्छदाम् १५

षः १४ सुवर्णरजताकीर्णां तैः कृतकुट्टिमामित्यर्थः विशुद्धः स्फटिकाग्रंतरे मध्ये शोभार्थं यस्यास्तां विराजमानो वपुषेति पूर्वेणान्वयो विशेषणं रुक्मा लंकृतपट्टवस्त्रसुकरच्छदो

स्थिताम् २५

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

षड्भिः पिशाचप्रेतैः ४८ प्रेत पिशाचैरभिगुप्तां रक्षितां सदा प्रभां रत्नप्रभ येति प्रोषः १६ तस्यां सभायां गवाग्नो वैडूर्यमयं वैडूर्यरत्ननिर्मितं प्रियकाख्यमृगसंबंधिना परममृदुनाजिनेन संवृतं सोपाश्रयं सोपधानं महार्हं परमासनं भेजे १७ ततः प्रशशासेत्यादि सार्ध

तो पिशाचप्रेतैः षड्भिरभिगुप्तां सदा प्रभाम् प्रविवेश महातेजाः सुकृतां विश्वकर्मणा १६ तस्यां सवैडूर्यमयं प्रियकाजिनसंवृतम् महार्हं सोपाश्रयं भेजे रावणः परमासनम् १७ ततः प्रशशासे श्वरवद्दूतान्शुभपराक्रमान् १८ समानयत मे क्षिप्रमिहैतान् राक्षसानिति कृत्स्नमत्ति महज्ज्ञा तं सामर्थ्यमिति नो महत् १९ राक्षसास्ते वचः श्रुत्वा लंकायां परिचक्रमुः प्रनुगेहमवस्था यविहारशयनेषु च उद्यानेषु चरक्षांसि चोदयन्तो ह्यभीतवत् २० २० २० २०

श्लोकमेकवाक्यं एकोमहच्छब्दः क्रियाविशेषणं महद्यथा तथा सामर्थ्यं शक्तेन निर्वीर्यं जातं प्रशस्तं महत्कृत्स्नमत्ति प्रतोरा क्षसान् समानयतेति राक्षसानीश्वरवदीश्वरी हं प्रशशासेति योजना १८ १९ राक्षसा इति सार्धश्लोकमेकं वाक्यं राक्षसादूतरूपाः प्रनुगेहमवस्था यत्र विश्रयविहारादिषु व्यासक्तान्यपि राक्षसांसि राक्षसा अभीतवत्तदर्थं चोदयन्तः संतो लंकायां परि

बुद्धचरितसन्दर्भः २०

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

तेऽप्राहूताराक्षसाः रथांतरचराः रथपत्रेष्वसंचारिणोजग्मुरितिशेषः हयानित्यत्राधिरुरुहुरित्यपकर्षः २१ परेगणकीर्णा २२ वाहना
निशिविकादीनि यानानि अश्वादीनि अवस्थाप्य वहिर्निक्षिप्य २३ वृसीषु दर्भमयासनेषु २४ ते राक्षसाः राजशासनात् सभायां

तेरथान्रुचिरानेके दृप्तानेके प्वपन्थ्यान् नागानेकेऽधिरुरुहुर्जग्मुश्चैकेपदातयः २१ सा
पुरीपरमाकीर्णारथकुंजरवाजिभिः संपतद्भिर्विरुरुचेगरुत्मद्भिरिवांवरम् २२ तेवाहना
न्यवस्थाप्ययानानिविविधानिचसर्वशः पद्भिःप्रविविशुःसिंहागिरिगुहामिव २३ राज्ञःपा
दौगृहीत्वातुराज्ञातेप्रतिपूजिताः पीठेष्वन्येवृसीष्वन्येभूमौकेचिदुपाविशन् २४ ते
समेत्यसभायांवैराक्षसाराजशासनात् यथार्हमुपतस्थुस्तेरावणंराक्षसाधिपम् २५ मंत्रिणा
श्चयथामुख्यानिश्चयार्थेषुपंडिताः अमात्याश्चगुणोपेताःसर्वज्ञाबुद्धिदर्शनाः २६

समेत्य राक्षसास्ते यथार्हं यथाक्रमम् उपतस्थुः समीपे तस्थुः क्रियाभेदाच्छन्दवंयं २५ मंत्रिणस्त्यादि सपादश्लोकमेकं वाक्यं यथामु
ख्याः यथायोग्यं ततन्मंत्रविषये मुख्याः निश्चयार्थेषु भावे निष्ठा श्वाहितान्यादिः अर्थनिश्चयेषु पंडिता मंत्रिणो बुद्धिसहायाः अमात्या
उपमंत्रिणः कर्मणि सहायाः सर्वज्ञाः सर्वशास्त्रज्ञाः बुद्धिदर्शनं च तेषां ततत्र प्रातःशः समेयुरित्यन्वयः २६

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

शुद्धोदनश्च वहवस्तत्र समेयुः स वीर्यसन्निश्रयापेति शोषः सुखाय क्षेमाय क्षेमं विचारयितुं २७ ततो महात्मा विभीषणाः सुपुण्यं शोभनो युग्पाश्व
स्थाय स्मिन् तं रथं समास्थाय अग्रजस्य तस्य सदेसभां ययौ २८ नामग्रहणपूर्वकमभिवादनं कार्यमिति सदाचारः पद्मासनानि ददौ तत्व

समेयुस्तत्र शातशः शुद्धोदनश्च वहवस्तथा समायां हेमवर्णायां स वीर्यस्य सुखाय च रम्यायां राक्षसेंद्रस्य समी
युस्तत्र संघशः २७ ततो महात्मा विपुलं सुपुण्यं वराहं जांबूनदचित्रितांगं रथं समास्थाय ययौ स शास्त्रीवि
भीषणाः संसदमग्रजस्य २८ स पूर्वजायावरजः प्रशंसन्नामाथ पश्चाच्चरणौ ववंदे शुद्धोदनहस्तौ च तत्
वेवतीभ्यो ददौ यथार्हं पद्मासनानि २९ सुवर्णनानामणिभूषणानां सुवासितानां सदिशां सा
नाम् तेषां परार्ध्यागरुचंदनानां स्रजश्च गंधाः प्रववुः समंतात् ३० न चुक्रुशुश्चन्योन्य तमाह क
श्चित्सभासदो नापि जजल्पुरुच्चैः स सिद्धार्थाः सर्व एवोग्रवीर्या भर्तुः सर्वे ददृशुश्चाननं ते
३१

विनयं सूचयितुं पद्मासनानि ददौ तत्तदासनस्थानं बोधितवान् २९ तेषां राक्षसानां यानि परार्ध्यागरुचंदनानि स्रजश्च तेषां गंधा वा
युसेवं धाव ववुः ३० अत्र सिद्धार्थाः संपूर्णमनोरथाः ३१

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

 समितौ समागमे समिति सागरे साम्ये सभायामपि संग्रामे इति कोशः ३२ इत्येकादशः सर्गः ॥ ११ ॥ अथ सर्वमेलनानन्तरं नगररक्षावि
 धानपूर्वकं स्वामिमतानुसारेण वक्तोमंत्रमर्थयति तता मिति समितौ संग्रामे जयतीति समितिंजयः १ कृतविद्याः चतुर्विधाः

स रावणः प्रहृष्टात्मा तां मनस्विनीं महाबलानां समितौ मनस्वी तस्यां सभायां प्रभया चकाशे मध्ये वसू
नामिव वज्रहस्तः ॥ ३२ ॥ इत्यार्षे श्रीमद्रामायणे युद्धकाण्डे एकादशः सर्गः ॥ ११ ॥ ततां परिष
दं कृत्स्नां समीक्ष्य समितिंजयः प्रबोधयामास तदा प्रहस्तं वाहिनीपतिम् १ सेनापते यथा ते स्युः
कृतविद्याश्चतुर्विधाः योधा नगररक्षायां तथा व्यादेष्टुमर्हसि २ स प्रहस्तः प्रणीतात्मा चि
कीर्षन् राजशासनम् विनिक्षिप्य बलं सर्वं बहिरन्तश्च मन्दिरे ३ ततो विनिक्षिप्य बलं पृ
थङ्नगरगुप्तये प्रहस्तः प्रमुखे राज्ञो निषसाद जगाद च ४

रथिकहस्तिपत्त्यादिपदातिरूपेण चतुर्विधा ये योधाः सन्ति तेन
गररक्षायां सावधानाः स्युस्तथा तान्व्यादेष्टुमर्हसि २ प्रणीतात्मा सावधानचित्तः प्रहस्तः राजशासनं चिकीर्षन् सर्वबलं मन्दिरे वहि
रन्तश्च विनिक्षिप्य ततो नगरगुप्तये बलं पृथङ्क्षिप्य आगतः प्रहस्तो राज्ञः प्रमुखे निषसाद उपविशेत् कुरुध्वेति जगाद चेति श्लोकद्वयान्वयः ३ ४

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

५ सुखेप्सुः कामपुरुषार्थेप्सुः न तु रिपुविजयेप्सुः ६ धर्मकामार्थकृच्छ्रेषु धर्मकामार्थसंकटेषु विषये धर्मादिर्विदानीं को वा ते
व्य इति संदेहे तत्तत्र तदनुकूलमुक्तं प्रियाप्रिये प्रियाप्रियसाधने सुखे दुःखे सुखकरोपाये दुःखकरोपाये लाभालाभे इ ध्या

विहितं वहिरंतस्थ वलं चैव त्वया तत्तव कुरुष्वाविमना कार्यं यदभिप्रेतमस्ति ते ५ प्रहस्तस्य वचः
श्रुत्वा राजा राज्यहितैषिणः सुखेप्सुः सुहृदां मध्ये व्याजहार स रावणः ६ प्रियाप्रिये सुखे दुः
खे लाभालाभे हिताहिते धर्मकामार्थकृच्छ्रेषु यूयमर्हथ वेदितुम् ७ सर्वकृत्यानि युष्माभिः
समारब्धानि सर्वदा मंत्रकर्मनियुक्तानि न जातु विफलानि मे ८ ससोमग्रहनक्षत्रैर्मरुद्भिरि
व वासवः भवद्भिरहमत्यर्थं वृतः श्रियमवाप्नुयाम् ९

श्रोतव्या श्रोतव्यस्मिन् हिताहितमुदर्के सुखकरम् अ
हितमुदर्के दुःखकरं तस्मिन् वेदितुमर्हथ उक्तमेतत्सर्वं ज्ञातुं यूयमर्हथेत्यर्थः प्रियाप्रिये लाभालाभे हिताहित इत्यत्र द्वंद्वैकवद्भावः
७ मंत्रकर्मनियुक्तानि मंत्रकरणपूर्वं नियुक्तानि प्रेरितानि युष्माभिः समारब्धानि मे सर्वकृत्यानि सर्वदा सफलान्येव न जातु कदाचिद
पि विफलानि न ८ इदानीमपि तद्वेवास्त्वित्याह स इति ९

रा० वा० पु०
३६

पूर्वेद्युः कथितार्थस्येदानीं कथने हेतुं दर्शयति अहमिति तुरवधारणे अहं सर्वान् समर्थयितुं ज्ञापयितुमुद्यतः एव पूर्वमेव निवे
दितवानित्यर्थः किंतु त्वया द्वेषेण इमम् अर्थं कुंभकर्णस्य नाचोदयः इदानीमुपस्थितस्य तस्यापि बाधनार्थं पुनरुक्तिरित्यर्थः १० कुंभ
कर्णस्त्वया दितु क्रमे वस्य वर्षयति अयमिति उपस्थितः समुत्थितः अतः पूर्वं नाचोदयमित्यर्थः ११ सीता समर्थलांविना रा घ

अहं तु खलु सर्वान्नः समर्थयितुमुद्यतः कुंभकर्णस्य तु त्वया नैनमर्थमचोदयम् १० अयं हि सु
प्तः षण्मासान् कुंभकर्णो महाबलः सर्वशस्त्रभृतां मुख्यः स इदानीमुपस्थितः ११ इयं च दंडका
रण्यात् रामस्य महिषी प्रिया रक्षोभिश्चरितो देशात् आनीता जनकात्मजा १२ सा मे न शय्यामा
रोढुमिच्छत्यलसगामिनी त्रिषु लोकेषु चान्यामे न सीता सदृशी तथा १३ तनुमध्या पृथुश्रो
णी शारदेंदुनिभानना हेमबिंबनिभा सौम्या मायेव मयनिर्मिता १४ सुलोहिततलौ श्लक्ष्णौ
चरणौ सुप्रतिष्ठितौ दृष्ट्वा ताम्रनखौ तस्या दीप्यते मे शरीरजः १५ सीता रामाभ्यां नमः राम [illegible] ४८

वजयोपायो विचार्यतामिति बोधयितुं तस्याद्युत्सजत्वमाह इयं चेति रक्षोभिश्चरितः सेवितोपदंडकादेशो जनस्थानलक्षणस्तस्
मात् १२ सीता सदृशी अन्या सेति यानमनोहरेत्यर्थः १३ हेम्ना निर्मितं यद्बिंबं प्रतिमा तत्तत्सदृशी मयनिर्मिता माया इव प्रतिदानम पूर्वाश्चर्या

राम०
३६

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

पूर्वैर्द्युः कथितार्थमिदानीं कथनेहेतुं दर्शयतिअहमिति तुरवधारणे अहं सर्वान् समर्पयितुं ज्ञापयितुमुद्यत एव पूर्वमेव निवेदितवानित्यर्थः किंतु स्वप्नाद्धेतोरिमम् अर्थं कुंभकर्णास्मिन्नाचोदयं इदानीमुपस्थितस्य तस्यापि बाधनार्थं पुनरुक्तिरित्यर्थः १० कुंभकर्णो स्वप्नादि तु क्रमेव स्यापयति अयमिति उपस्थितः समुत्थितः अतः पूर्वं नाचोदयमित्यर्थः ११ सीतासमर्थनं विना राघ

अहं तु खलु सर्वान्नः समर्पयितुमुद्यतः कुंभकर्णस्तु स्वप्नान्नेमम् अर्थमचोदयम् १० अयं हि सुप्तः षण्मासान् कुंभकर्णो महाबलः सर्वशस्त्रभृतां मुख्यः स इदानीमुपस्थितः ११ इयं च दंडकारण्यात् रामस्य महिषी प्रिया रक्षोभिश्चरितो देशादानीता जनकात्मजा १२ सा मे न शय्यामारोढुमिच्छत्यलसगामिनी त्रिषु लोकेषु चान्या मे न सीता सदृशी तथा १३ तनुमध्या पृथुश्रोणी शारदेंदुनिभानना हेमबिंबनिभा सौम्या मायेव मयनिर्मिता १४ सुलोहिततलौ श्लक्ष्णौ चरणौ सुप्रतिष्ठितौ दृष्ट्वा ताम्रनखौ तस्या दीप्यते मे शरीरजः १५ सीतारामाभ्यां नमः राम

वजयोपायो विचार्यतामिति बोधयितुं तस्या दुस्त्यजत्वमाह इयं चेति रक्षोभिश्चरितः सेवितो यः दंडकदेशो देशो जनस्थानं तस्मात् १२ सीता सदृशी अन्या मे तथा न मनोहरेत्यर्थः १३ हेम्ना निर्मितं यद्बिंबं प्रतिमा तत्सदृशी मयनिर्मितामायेव प्रतिदानं न पूर्वा अत्रापि

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

हुताग्निरित्यर्द्धमेकं वाक्यं ॥ त्वामपि दृष्ट्वा दीप्यते मे शरीरं ज्वरस्त्वनुपश्यते हुताग्नेरर्चिः संकाशामेनांसौरीं प्रभामिव दृष्ट्वा मे शरीरं ज्वरो दीप्य
तइति संबंधः हुताग्निरित्यत्र डः सः सुपदे शः छांदसः १६ तस्या वदनं पश्यन् स्ववशः विवशः सन् कामस्य वशमेयिवानिति संबंधः १७
कामवशत्वमेव विवृणोति क्रोधेति क्रोधहर्षयोः समानेन क्रोधे हर्षे चैक रूपेणादुर्वर्णीकरणेन वैवर्ण्यकरणेन वैवर्ण्यकारिणा

हुताग्निरर्चिःसंकाशामेनांसौरीमिवप्रभाम् १६ उन्नसंवदनेवल्गुविमलंचारुलोचनम्
पश्यंस्तदवशस्तस्याः कामस्यवशमेयिवान् १७ क्रोधहर्षसमानेनदुर्वर्णीकरणेनच शोक
संतापनित्येनकामेनकलुषीकृतः १८ सातुसंवत्सरेकालेमामयाचतभामिनी प्रतीक्षमाणा
भर्तारंराममायतलोचना १९ तन्मयाचारुनेत्रायाःप्रतिज्ञातंवचःशुभम् श्रांतोहंसततं
कामाद्यातोहयरवाध्वनि २०

शोकसंतापनित्येन शोके मनोव्यथायां संतापे शरीरपीडायां च नित्येन स्थनयायेन कामेन कलुषीकृतः व्याकुलचित्तोस्मि १८ ननु
स्वनगरे स्थिताया तस्याः किमित्येवं दुःखभोगो तत्राह सात्विति सातु संवत्सरे कालेतत्समाप्तिपर्यंतं रामं प्रतीक्ष्यमाणा मामस्पर्शम
याचत मयापि तत्पालित्वमिति प्रतिज्ञातं स्पर्धनिदीर्घमार्गे बलात्कारेण शापान्मरणाभियापालिनेव हृतं समयं त घातित्वेन भूतेन हि भ
वतीएवं याचितुमर्हतीति वोध्यम् १९

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

प

नन्वेवं संवत्सरानंतरं त्व द्रक्ष्यसि विष्यत्येवरामस्त्वि हा प्रसक्तिरेवेति कातैश्चिंतेत्याशंक्य कथंस्योपि रिपुर्नोपद्य इति नीतिशास्त्र
रा०वा०५० ३७ पर्यालोचनयामंत्र्येवरयामीत्याह कथमिति नकथमपीत्यर्थः २१ अथापि संभावनास्तीत्याह अथवेति एकेनापि कपिना महत्क
दनं कृतं अतः कार्यगतयोर्द्वयोरपि तस्माद्यस्य यामति यन्द्रातित यावृत्त नन्वेक कपित्तो भीतं तस्मान्मा दधि कमेवते भयमिति म

कथं सागरमक्षोभ्यं तरिष्यन्ति वनौकसः बहुसत्त्वसमाकीर्णं तौ वा दशरथात्मजौ २१ अथ
वा कपिनैकेन हतं तत्कदनं महत् दुर्ज्ञेयः कार्यगतयो वृत्तस्य गम्यतामति मात्वयान्मम
येनास्ति तथापि तु विमृश्यताम् २२ तदा देवासुरे युद्धे युष्माभिः सहितो जयम् ते मम भवन्त
श्च तथा सुग्रीव प्रमुखान् हरीन् २३ परे पारे समुद्रस्य पुरस्कृत्य नृपात्मजौ सीतायाः पदवीं
वीतौ संप्राप्तौ वरुणालयम् २४

यहेतुः सा त्यज्यतामित्याशंक्य भयाभावमाह मानुषादिति २२ भयाभावे हेतुमाह तदेति येयुष्माभिः सहितो देवान जयते मेत यश्च
तच्चैव संति अतो मानुषान्मम यं यद्यपि तथापि विमृश्यतां विचार्यतामिति पूर्वेणान्वयः विमर्षे हेतुमाह सुग्रीवेत्युत्तरान्वयि २३ नृ
पात्मजौ हत्वेन वरुणालयमतिक्रम्य सीतायाः पदवीं प्राप्यान्विष्यतु सुग्रीवप्रमुखान् हरीन् पुरस्कृत्य समुद्रस्य परे पारे संप्राप्ताविति रा०म० ३७

र

श्रीराम २८

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

किमप्रयतामित्युक्तं किमर्थं प्रकारमाह ऽदेयेति यया सीता ऽदेया यया च दशरथात्मजौ वध्यौ तथैव भवद्भिर्मन्त्रो मे त्वयतां मन्त्रः क्रि
यतां ऽप्रयत्नसुनीतं सुनिश्चितं मंत्रतत्त्वमभिधीयताम् २५ निश्चित प्रायएव शत्रुजय इत्याह न हीत्यादि जगति लोके कस्यचिदिन्द्रादे
रपि ऽप्रसमज्जये शक्तिं न पश्यामि यथन्यस्य मनुष्य रूप शाखो वानरैः सह सागरं लीर्त्वा ऽस्मज्जये शक्तिप्रसंगमपि न पश्यामि यतो नि

ऽदेयाच यया सीता वध्यौ दशरथात्मजौ भवद्भिर्मन्त्रतां मंत्रः सुनीतं चाभिधीयताम् २५ न
हि शक्तिं प्रपश्यामि जगत्यन्यस्य कस्यचित् सागरे वानरैस्तीर्णे निश्चयेन जयो मम २६ त
स्य कामपरीतस्य निशम्य परिदेवितम् कुंभकर्णः प्रचुक्रोध वचनं चेदमब्रवीत् २७

श्चयेन ममैव जय इति योजना २६ ऽप्रयकुंभकर्णो भ्रातुरन्यायमूलानर्थप्राप्तिदर्शनात् क्रुद्ध ऽप्याह तस्येति कामपरी
तस्य कामातुरतया विपरीतबुद्धेरित्यर्थः परिदेवितं कामशोकप्रलापं निशम्य प्रचुक्रोध महाराजः सन्नीदृशं समायोप्र
यतीति क्रोधं चकार तदा विष्टं वचनं चाब्रवीत् २७

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०वा०यु० ३८ तदेव वचनमाह यदेत्यादि यदा सलक्ष्मणस्य रामस्य सीता प्रसह्य हृता तदा सकृत्समीक्ष्यैव तात्कालिकापातविचारं कृत्वैव प्रसह्य हृता तदैव ते चि
त्तं यमुना यामुनं ह्रदमिव सुनिश्चितं भजेत निश्चयमभजन्नाहं यथा यमुना यु पि व्या भवता रसमये एव स ह्रदं पूरयति काल्यान्तरे
तु समुद्रं गतत्वात्तज्जलस्य तत्पूरणासंभवः एवमस्माभिः सह विचारस्य स एव कालः इदानीं त्वनर्थनिश्चयो जात एवेति
विचारो निष्फल एवेति क्रोधजा व्यंग्योक्तिः २८ व्यंग्यतयोक्तमेव साक्षाद्व्याह सर्वमिति यदेतद्वचनापूर्वकं प्रस

यदा तु रामस्य सलक्ष्मणस्य प्रसह्य सीता खलु सा इहाहृता सकृत्समीक्ष्यैव सुनिश्चितं तदा भ
जेत चित्तं यमुनेव यामुनम् २८ सर्वमेतन्महाराज कृतमप्रतिमं तव विधीयेत सहास्माभिरा
दावेवास्य कर्मणः २९ न्यायेन राजकार्याणि यः करोति दशानन न स संतप्यते पश्चान्निश्चिता
र्थमतिर्नृपः ३०

ह्य परदारहरणादिरूपं तत्सर्वं महाराज तव अप्रतिमं अननुचितं इदानीं विचारोपि निष्फल इत्याह विधीयेतेति अस्य कर्मणः करणमुदि
श्य प्रवृत्तिकाल एव यद्यस्माभिः सह मंत्र्येत तदा निधीयेतामभिरक्षणनिवारणमिति शेषः इदानीं क्रियमाणो विचारस्तु गतजल
सेतुबंधनवद्व्यर्थ इति भावः २९ आदावेव विचार्य कृतस्य कर्मणः साफल्यमाह न्यायेनेति प्रथमं मंत्रिभिः सह निश्चितार्थमति
र्भूत्वा यो नृपतिर्न्यायेन राजकार्याणि करोति स तत्कार्यं कृत्वा पश्चान्न संतप्यते ३० रामा० ३८

ऽविचार्य कृतस्य फलं वैपरीत्यं दर्शयति ऽनुपायेनेति मंत्रिभिः सह सामाद्युपायविचाराभावेनेत्यर्थः अनेन मोहात्स्वयमेव यानि विपरीता
न्यन्यायकृत्यानि करोति तानि तथा क्रियमाणानि दुष्यंति कथमिवेत्यत आह अप्रयतेष्विति अप्रयतेषु अभिचारत्वादपवित्रेषु हुतानि ह
वींषीव तानि प्रयोक्तारमभिचारस्य कर्तारमिव कर्तारं कश्मलं प्रापयंत्येवं तत्तु हृदि दंडकर्मापाततः सुखमिव भासमानमपि परिणामे दुः
खायैवेति भावः ३१ मंत्रविचारानंतरं कर्तव्यसीतापहरणं मंत्रविचारात्पूर्वं कृतवतः सीताहरणात्पूर्वं कर्तव्यं मंत्रविचारमिदानीं

ऽनुपायेन कर्माणि विपरीतानि यानि च क्रियमाणानि दुष्यंति हवींष्यप्रयतेष्विव ३१ यः प
श्चात्पूर्वकार्याणि कर्माण्यभिचिकीर्षति पूर्वं चापरकार्याणि न स वेद नयानयौ ३२ चप
लस्य तु कृत्येषु प्रसमीक्ष्याधिकं बलम् छिद्रमन्ये प्रपद्यंते क्रौंचस्य खमिव द्विजाः ३३

चिकीर्षितु स्तवनिंद्यन्नीतिरनानाप्तीत्याह यः पश्चादिति पूर्वकार्याणि प्रथमकर्तव्यानि कर्माणि पश्चादभिचिकीर्षति एवं पश्चा
त्कर्तव्यानि पूर्वं करोति स नयानयौ न वेदेत्यर्थः ३२ विषयचपलस्य बलमपि निरर्थकमित्याह चपलस्येति अन्ये शत्रवः
परस्याधिकं बलं प्रसमीक्ष्यापि कृत्येषु चपलस्य तस्य निग्रहाय छिद्रं रंध्रं प्रपद्यंते द्विजा हंसादयो बलं घ्नस्यापि क्रौंचपर्वतस्य लंघनाय
कुमारशक्तिकृतं खं रंध्रं यथा प्रपद्यंते तद्वदित्यर्थः ३३

ऽप्रविचार्य कृतस्य फलं वैपरीत्यं दर्शयति अनुपायेनेति मंत्रिभिः सह सामाद्युपायविचाराभावेनेनमो हात्स्वधर्मेण यानि विपरीता न्यन्यायकृत्यानि करोति तानि तथा क्रियमाणानि दुष्यंति कश्मलं प्रापयंति अप्रयतेषु प्रयतेषु अभिचारत्वादपवित्रेषु हुतानि हवींषी वतानि प्रयोगेन ममभिचाररूपत्वात् राक्षसान् तिकर्तारं कश्मलं प्रापयंसेवत्तद्वदिदं कर्मापाततः सुखमिव भासमानमपि परिणामे दुःखायैवेति भावः ३१ मंत्रविचारानंतरकर्तव्यसीतापहरणे मंत्रविचारात्पूर्वं कृतवतः सीताहरणात्पूर्वं कर्तव्यं मंत्रविचारमिदानीं

ऽअनुपायेन कर्माणि विपरीतानि यानि च। क्रियमाणानि दुष्यंति हवींष्यप्रयतेष्विव ३१ यः प
श्चात्पूर्वकार्याणि कर्माण्यभिचिकीर्षति। पूर्वं चापरकार्याणि न स वेद नयानयौ ३२ चप
लस्य तु कृत्येषु प्रसमीक्ष्याधिकं बलम्। छिद्रमन्ये प्रपद्यंते क्रौंचस्य खमिव द्विजाः ३३

चिकीर्षितुत्वनित्यनीतिरतानात्तीत्याह यः पश्चादिति पूर्वकार्याणि प्रथमकर्तव्यानि कर्माणि पश्चादभिचिकीर्षति एवं पश्चात्कर्तव्यानि पूर्वं करोति स नयानयौ न वेदेत्यर्थः ३२ विषयचपलस्य चपलस्य बलमपि निरर्थकमित्याह चपलस्येति अन्ये शत्रवः परस्याधिकं बलं प्रसमीक्ष्यापि कृत्येषु चपलस्य तस्य निग्रहाय छिद्रं रंध्रं प्रपद्यंते द्विजाः हंसाः प्रलंबघ्नस्यापि क्रौंचपर्वतस्य लंघनाय
कुमारशक्तिकृतं खं रंध्रं यथा प्रपद्यंते तद्वदित्यर्थः ३३

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

एवं कर्म कृतवतस्तव नैतावत्कालं जीवनमतिमात्रं वयमादित्याह त्वयेति येन त्वया ऽप्रतिचिंतितं ऽविचारितं यदिदं महत्कार्यं प्र
वलद्दारहरणरूपमारब्धं तेन त्वं रामोऽतिप्रबलोऽपि दिष्ट्या नावधीति विषमिश्रमामिषं भोज्यं वस्तु मोक्तारं यथा हंति यथा हं
ति तद्वदित्यर्थः ३४ एवं गतेस्त्व कर्तव्यमाह तस्मादिति यस्मात्त्वया परैः प्रबलशत्रुभिरप्रतिममननुचिंतितं कर्मारब्धं ऽपतस्त्वस्मा

त्वयेदं महदारब्धं कार्यमप्रतिचिंतितम् दिष्ट्या त्वं नावधीद्रामो विषमिश्रमिवामिषम् ३४
तस्मात्त्वया समारब्धं कर्म ह्यप्रतिमं परैः अहं समीकरिष्यामि हत्वा शत्रूंस्तवानघ ३५
अहमुत्सादयिष्यामि शत्रूंस्तव विशांपते ३६ यदि शक्रविवस्वंतौ यदि पावकमारुतौ तावहं यो
धयिष्यामि कुबेरवरुणावपि ३७ गिरिमात्रशरीरस्य शितशूलधरस्य च नर्दतस्तीक्ष्णदंष्ट्रस्य
बिभीयाद्वै पुरंदरः ३८

मित्तं पादपि खामि मदानेन कुत्सितस्मादहं तव शत्रून्हत्वा तव कार्यं समीकरिष्यामीत्यर्थः ३५ उक्तमेव राज्ञः प्रीतये ऽभ्यस्यति तत्र स्वप्रत्यायनायाहमिति
विशांपते प्रजानां पते ३६ अप्रतिमानुरूपं वैभवं तौ क यंजेतव्यौ तत्राह यदीति तौ दशरथात्मजौ शक्रविवस्वंतौ यदि स्यातां तथापि ताव
हं योधयिष्यामि योत्स्यामीत्यन्वयः ३७ स्वस्य योधने सामर्थ्यविशेषं दर्शयति गिरीति गिरिमात्रशरीरस्य गिरिप्रमाणदेहस्य प्रमाणो ए म० ३०
ह्यसच्च प्रत्ययः पंचम्यर्थे षष्ठी ३८

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

पुनरिति यदि मोसलमम एकेन शरेण हतस्य पुनर्द्वितीयेन शरेण निहनिष्यति यावत्ततः पूर्वमेव तस्य रुधिरं पास्यामि काममत्यर्थमाश्वस्त
विश्वसः ३९ तेषु वचावहं जयं दाशरथेर्वधे न तावाहमाहर्तुं कर्तुं पतिष्ये फलेतु देवाप नमिति भावः खादामि वादिष्ये ४० ४१ यति दो

पुनर्मोसद्वितीयेन शरेण निहनिष्यति ततो हं तस्य पास्यामि रुधिरं काममाश्वस्त ३९ वधेन वै
दाशरथेः सुखावहं जयं तवाहर्तुमहं यतिष्ये हत्वा च रणे तं सहलक्ष्मणेन खादामि सर्वान्हरिपूथ
मुख्यान् ४० रमस्व कामं पिब चाग्र्यवारुणीं कुरुष्व कार्याणि हितानि विज्वरः मयाद्य रामे गमि
ते यमक्षयं चिराय सीता वशगा भविष्यति ॥ ४१ ॥ इत्यार्षे श्रीमद्रामायणे युद्धकाण्डे द्वादशः सर्गः
१२ एवमुक्तं क्रुद्धमाज्ञाय महापार्श्वो महाबलः मुहूर्तमनुसंचिंत्य प्रांजलिर्वाक्यमब्रवीत् १
यः खल्वपि वनं प्राप्य मृगव्यालनिषेवितम् न पिबेन्मधु संप्राप्य स नरो बालिशो भवेत् २

दशः सर्गः १२ मुहूर्तमनुसंचिंत्य एवमुक्तो क्रोधनिवारणोपायं विचार्य इत्यर्थः १ यः खलु पुरुषो मृगव्यालनिषेवितं दुष्प्रवेशं वनं प्राप्य
तत्र च मधु प्राप्य तन्मधु न पिबेत् स बालिशो मूर्खो भवेत् २

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० वा० ५० ननु बलात्परदारधर्षणमधर्मत्वादीश्वरस्याप्यविधेयमित्यत्राह ईश्वरस्येति धर्मफलप्रवर्तकानां प्रमादीनामपि वि
४० मीश्वरः ततः ऽयं विचारस्तेतु चिन्त्य इत्यर्थः ३ ऽथ तेनांगीकारे कथमनुभव इत्यत्राह बलादिति ४ ऽप्राप्यत्वाभिलषितेऽतिदेश्यपम
तोभयमेवनमहातेजस्त्वात् ऽपध्यापितन्निमित्तं भयं प्रशमुपास्तदापितत्तु प्रतिषेधमेव त्वयेत्याह लब्धकामस्येति पश्चात्सीता

ईश्वरस्यैश्वरः कोऽस्ति तव शत्रुनिबर्हण रमस्व सह वैदेह्या शत्रूनाक्रम्य मूर्द्धसु ३ बलात्कुक्कुटवृत्तेन वर्त्तस्व सुमहाबल आक्रम्याक्रम्य सीतां वै तां भुंक्ष्व च रमस्व च ४ लब्धकामस्य ते पश्चादागमिष्यति किं भयम् प्राप्तमप्राप्तकाले वा सर्वं प्रतिसहिष्यसि ५ कुंभकर्णः सहास्माभिरिंद्रजिच्च महाबलः प्रतिषेधयितुं शक्तौ सवज्रमपि वज्रिणाम् ६ उपप्रदानं सांत्वं वा भेदं वा कुशलैः कृतम् समतिक्रम्य दंडेन सिद्धिमर्थेषु रोचय ७

नुभवानंतरं प्राप्तं तदानीमेवागतं अप्राप्तकाले आगामिकाले प्राप्यं वा यद्भयमागमिष्यति तत्स
र्वं प्रतिसहिष्यसि प्रतिसहिष्यसे अभविष्यसीत्यर्थः ५ सपत्नान्निभृतुं शक्तिं दर्शयति कुंभकर्ण इति ६ एवमस्माकमेव प्राबल्याच्चतुर्ष्वप्युपाये
ष्वास्माभिरादरणीय इत्याह उपप्रदानमिति उपकुशलैः षड्गुणसमर्थैः कृतं सामादिकं समतिक्रम्य त्यक्त्वा दंडेन दंडोपायेन अर्थेषु प्रयो रा०म० ४०

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

एमादप्योपचर्वर्तितेत्यात्वा योद्धव्यमित्युक्तं निकुंभादिमतं दूषयन्नाह इहेति इहलंकापरिसरे शस्त्रप्रयाजेन शास्त्रे वैशी करिष्यामो ग्रही
ष्यामः ८ संपूजयन चिन्तानुगुणामिति श्लाघयन्नित्यर्थः ९ चिरवृत्तं किंचिद्रहस्यमस्तीति शेषः यत्तु एमया वा श्रुतं तदाख्याहि १० तदे

इहस्थाः शान्तवपुषं सर्वाञ्छत्रूंस्तेवमहाबल वशे शास्त्रशपातेन करिष्यामो न संशयः ८ एवमुक्तस्तदारा
जा महापार्श्वेन सवराः तस्य संपूजयन्त्वाक्यमिदं वचनमब्रवीत् ९ महापार्श्वाद्य वदतो रह
स्यं किंचिदात्मनः चिरवृत्तं तदाख्यास्ये यद्वा श्रुतमया १० पितामहस्य भवनं गच्छन्तीं पुंजि
कस्थलाम् चंचूर्यमाणामद्राक्षमाकाशेग्निशिखामिव ११ सा प्रसह्य मया भुक्ता कृत्वा विव
सनां ततः स्वयंभोर्भवनं प्राप्ता लोलिता नलिनी यथा १२ तच्च तस्य तदा मन्ये ज्ञातमासीन्महा
त्मनः अथ संकुपितो देवो मामिदं वाक्यमब्रवीत् १३ अद्य प्रभृति यामन्यां बलान्नारीं गमिष्य
सि तदा ते शतधा मूर्द्धा फलिष्यति न संशयः १४

वाहपितामहस्येति चंचूर्यमाणाम् दृष्टीन भीति वशान्निलीय
गतिमतीं ११ ततो दर्शनानंतरं लोलिता गजेनेति शेषः १२ तच्च धर्षणं महात्मनस्तस्य ज्ञातमासीदिति मन्ये निश्चितं १३ फलि
ष्यति विशीर्णा भविष्यतीत्यर्थः १४

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा० वा० पु० १५ ग्रपमहायाम्बीक्रंस्वशावल्यमेव गत्वा घते सागरस्येत्यादि दाशरथिर्हि यस्मादेतन्मे वलं न वेद तेन मामासादयति १६ को हि स्ता
४१ तमहद्वलं रत्निग्रोबः गिरिगुहारूपेश्याश्रये निवासे आसीनमिव सुप्तं सिंहमिव १७ नपश्यपतिनपश्यपतिस्म १८ आदीपयिष्यामि १९ धक्ष्यामि १९

इत्यहं तस्य शापस्य भीतः प्रसभमेव ताम् नारोपयं बलात्सीतां वैदेहीं शयने शुभे १५ सागरस्यो
वमेवेगो मारुतस्येव मे गतिः नैत द्दशरथिर्वेद ह्यासादयति तेन माम् १६ को हि सिंहमिवासीनं सु
प्तं गिरिगुहाशये क्रुद्धं मृत्युमिवासीनं संबोधयितुमिच्छति १७ न मत्तो निर्गतान्बाणान्द्विजि
ह्वान्पन्नगानिव रामः पशुपतिसंग्रामे तेन मामभिगच्छति १८ क्षिप्रं वज्रोपमैर्बाणैः शतधा
कार्मुकच्युतैः राममादीपयिष्यामि उल्काभिरिव कुंजरम् १९ तच्चास्य बलमादास्ये बलेन
महता वृतः उदयन्सविता काले नक्षत्राणां प्रभामिव २० न वासवेनापि सहस्रचक्षुषा युधा
स्मि शक्यो वरुणेन वा पुनः मयात्वियं बाहुबलेन निर्जिता पुरा पुरी वैश्रवणेन पालिता २१ २१

आदास्ये स्वंकुर्यपिष्ये दो अवखंडने दिप्ये दो वरंवड्डने इति धातुः २० देवानामप्यजेयोस्मि कथं मनुष्यादिभ्यो भयं मे स्यादित्याह नवा स्म०
सवेनेति युध्यास्मि पामिराण शक्यः जेतुमिति शेषः वैश्रवणेन पालिते स्मनेन पुष्पकवद्धे कापि अलका कुबेरापदं तातिसूचितम् २१ ४१

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

इति त्रयोदशः सर्गः ॥१३॥ एवं दुर्मंत्रिभिः स्वस्वचित्तानुसारेण कथिते तदसहमानो विभीषणः परमार्थमनुवदन् परमार्थमुपदिशतीति नि
शाचरेंद्रस्येति स विभीषणः एवं रावणस्य वाक्यं कुंभकर्णस्य गर्जितानि च निशम्य राक्षसराजमुद्दिश्य पहितमुदर्के सुखमर्थयु
क्तं कर्तव्यार्थबोधकं वाक्यमुवाच १ वृत इति शिहिमध्य देहोत्र भोगः बाह्वंतरं हृदयभागः एवं भोगराशिः शरीरपरिणाहो य

इत्यार्षे श्रीमद्रामायणे युद्धकाण्डे त्रयोदशः सर्गः ॥१३॥ निशाचरेंद्रस्य निशम्य वाक्यं स कुंभक
र्णस्य च गर्जितानि विभीषणो राक्षसराजमुख्यमुवाच वाक्यं हितमर्थयुक्तम् १ वृतो हि बाह्वं
वि तरभोगराशिश्चिंताविषः सुस्मिततीक्ष्णदंष्ट्रः पंचांगुलिः पंचशिरोतिकायः सीता महाहिस्तव के
न राजन् २ यावन्न लंकां समभिद्रवंति वलीमुखाः पर्वतकूटमात्राः दंष्ट्रायुधाश्चैव नखा
युधाश्च प्रदीयतां दाशरथाय मैथिली ३

स्यसः चिंतैव विषं यस्य स्वस्तुचितदर्शनजन्यं शोभनं स्मितमेव तीक्ष्णा दं
ष्ट्रा यस्य तस्याः पंचांगुल्य एव शिरांसि यस्य सा चासावतिकायश्च एवंभूता सीता महाहिस्तव केन वृतः त्वया नर्थस्य पादनायकेन
हनुमान् गृहीतः सर्वथा संत्याज्य एवेति भावः २ न केवलं तत्त्वेवानर्थहेतुः किंतु तावकीनस्य सर्वस्यापि आहृयावदिति यावत्पुरा निपातयो
र्लडिति लट् तावदिति शेषः वलीमुखाः वानराः पर्वतकूटमात्राः पर्वतशिखरप्रमाणाः ३ सीतामा मा स्थानमः

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

४ तर्हि कुंभकर्णादयो रामं वारयिष्यंतीत्यत्राह न कुंभकर्णौ इंद्रजितावित्ति ५ जीवंस्तु रामस्य न मोक्ष्यसे सन्निधिं प्राप्येति शेषः ६ देवतेभ्यो नो
स्माकं भयं न विद्म ७ संख्ये युद्धे ८ ९ प्रहस्तेति यथार्थजातं रामं प्रति यूयं ब्रवीत ब्रूत तन्न शक्यं कर्तुमिति शेषः यथा

यावन्न गृह्णाति शिरांसि बाणा रामेरिता राक्षसपुंगवानाम् वज्रोपमा वायुसमानवेगाः प्रदीय
तां दाशरथाय मैथिली ४ न कुंभकर्णौ इंद्रजितो च राजंस्तथा महापार्श्वमहोदरौ च निकुं
भकुंभौ च तथातिकायः स्थातुं समर्था युधि राघवस्य ५ जीवंस्तु रामस्य न मोक्ष्यसे त्वं गुप्तः स
वित्राप्यथवा मरुद्भिः न वासवस्यांकगतो न मृत्योर्नभो न पातालमनुप्रविष्टः ६ निशम्य वाक्यं
तु विभीषणस्य ततः प्रहस्तो वचनं बभाषे न नो भयं विद्म न दैवतेभ्यो न दानवेभ्यो ह्यथवा कदाचित्
७ न यक्षगंधर्वमहोरगेभ्यो भयं न संख्ये पतगोत्तमेभ्यः कथं नु रामाद्भविता भयं नो नरेंद्रपुत्रात्स
मरे कदाचित् ८ प्रहस्तवाक्यं त्वहितं निशम्य विभीषणो राजहिताभिकांक्षी ततो महार्थं वच
नं बभाषे धर्मार्थकामेषु निविष्टबुद्धिः ९ प्रहस्त राजा च महोदरश्च त्वं कुंभकर्णश्च यथार्थ
जातम् ब्रवीत रामं प्रति तन्न शक्यं यथा गतिः स्वर्गमधर्मबुद्धेः १०

स्माकं भयं न विद्म ७ संख्ये युद्धे ८ ९ प्रहस्तेति यथा
यार्थजातं रामं प्रति यूयं ब्रवीत ब्रूत तन्न शक्यं कर्तुमिति शेषः यथा अधर्मबुद्धेः स्वर्गसुदि अप्रगतिर् अशक्या तथेत्यर्थः १० १०

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

स्य धर्मविशारदस्य कार्ये निपुणस्य रामस्य वधः कथं भवेत् न कथंचिदपि भवतीत्यर्थः एतेन वध्यो दशरथात्मजा विस्मितोत्तरमुक्तं ग्रश्रवस्य
गमनवेलायामपि गूढदृप्तदर्पयानुपशांतप्रातिकूल्यो दृप्तः परेषां शत्रूणां भयाच्छरणागतोऽरपि पूर्वकृतवैरोऽपि कृतात्मना धर्मप्रवृत्त
त्रिरक्षितमनस्केन स्वप्राणानपि परित्यज्य रक्षितव्य इति सेवंधः २८ अथ शरणागतरक्षणधर्मस्य नित्यत्वबोधनाय तदकरणे पाप
माह स चेदिति सः भयात् त दृप्तत्वात् लोभात्संकल्पात्तस्माद्वा स्वस्य अपि भयमुत्प्रेक्ष्य तं तोहेतो वीमोहाच्छात्रार्थापरिज्ञानाद्वा का

आर्तो वा यदि वा दृप्तः परेषां शरणागतः । अरिः प्राणान्परित्यज्य रक्षितव्यः कृतात्मना ॥ २८
स चेद्भयाद्वा मोहाद्वा कामाद्वापि न रक्षति । स्वया शक्त्या यथा सत्त्वं तत्पापं लोकगर्हितम् ॥ २९
विनष्टः पश्यतस्तस्यारक्षितः शरणागतः । आदाय सुकृतं तस्य सर्वं गच्छेदरक्षितः ॥ ३०

मात्तच्छत्रोःसकाशात्किंचित्फलनीयं प्राणाद्यास्वयाशक्त्या स्वसामर्थ्येन सहायसंपादनेन स्वद्रव्यदानादिना वा यथान्यायेन रक्षति
चेच्छरणागतमिति शेषः तदा तत्पापं अरक्षितस्य शरणागतस्य पापं प्राप्नोति शेषः तत्पापं लोकगर्हितं भावेन निष्ठालोकनिंदां च प्राप्नो
ति २९ न केवलमेतावदेव स्वकृतसर्वसुकृतापहारं च प्राप्नोतीत्याह विनष्ट इति यः शरणागतोऽरक्षितो विनष्टः स्यात्स पश्यतस्तस्यार
क्षितः रक्षार्थं वृतस्य तमक्षमेवतस्य रक्षिताः सर्वसुकृतमादाय गच्छेत् ३०

रामः
६३

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

कंडुवचनचतुष्कस्य तात्पर्यं संग्रहेणाह एवमिति अत्र तत्र रक्षणाभावे अस्वर्ग्यं स्वर्गविरुद्धं नरकहेतुरित्यर्थः अयशस्यं अपकीर्तिकरं बलवीर्यवि
नाशनं ययोः शरीरबलवीर्ययोः हन्तारेव शरणागतान्नारक्षितस्तयोर्विनाशकमित्यर्थः ३१ यतस्तद्वचनं धर्मिष्ठं पापनिवर्तकं धर्महेतुकं य
शस्यं कीर्तिकरं फलोदये फलप्रदानकाले समुपस्थिते स्वर्ग्यं स्वर्गप्रदं च स्यात्तरक्षितुरिति शेषः अतस्तद्वचनं यथार्थं करिष्यामि
कंडुवचनोक्तप्रकारेण शरणागतरक्षणं करिष्यामीत्यर्थः ३२ अथ प्रतिष्ठितुनामैतत्सर्वं जगत्स्वामिनः सर्वलोकशरण्यस्य सर्वज्ञस्य सर्वश

एवं दोषो महानत्र प्रपन्नानामरक्षणे अस्वर्ग्यं चायशस्यं च बलवीर्यविनाशनम् ३१ करिष्या
मि यथार्थं तु कंडोर्वचनमुत्तमम् धर्मिष्ठं च यशस्यं च स्वर्ग्यं स्यात्तु फलोदये ३२
सकृदेव प्रपन्नाय तवास्मीति च याचते अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ३३ ३३

...दसकेत्य रक्षणं करिष्यामीत्यर्थः ३२ अथ प्रतिष्ठितुनामैतत्स्वामिनः सर्वलोकशरण्यस्य सर्वज्ञस्य सर्वशक्तेः परम
कारुणिकस्य सममानो दिसंकल्पसिद्धतया सहजो व्रतविशेषो व्यक्तीस्याह सकृदेवेति सकृदेव एकवारमेव उपायांतरेष्वावृत्तिः शास्त्रा
र्थः प्रपत्तौ त्वनावृत्तिः सकृदेव हि शास्त्रार्थः कृतोयं तारयेन्नरमित्युक्तेः प्रपन्नायेति गत्यर्थस्य पदेः ज्ञानार्थत्वान्मानसी प्रपत्तिरुक्ता तवा
स्मीति च याचत इति तु वाचिकी उभयोरन्यतरेणापि प्रपन्नायेत्यर्थः एवंविधायाधिकारिणे सर्वभूतेभ्य इति भीत्रार्थानां भयहेतुरिति पंच
मी भयहेतुतया प्रोक्तेभ्यः सर्वभूतेभ्योऽभयं भयाभावं ददामि अभयमेव मोक्षो नाम अप्यसो अभयं गतो भवति आनंदं ब्रह्मणो विद्वा
न्न बिभेति कुतश्चनेति विद्याविद्याफलत्वेन श्रवणात् एतद्व्रतं मम सततं धर्मकस्योचिदृष्टायां परित्यागयोग्य सदाचरणमित्यर्थः ३३

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० वा० यु० एवं परिग्रहाद्यवादिनं सुग्रीवमेव बलात्परिग्रहस्थं तं गीकारं कारयित्वा तमेव दत्तदानयनाय प्रेषयति आनयैनमिति एवं विभीष
६४ णो वा भवतु यदि वा विभीषणवेषधारी स्वयं रावणो भवतु उभयथाप्यस्य पूर्व्वोक्तस्य प्राग् रावणागतस्याभयं मया दत्तमतस्त्वमेनमानयेत्य
र्थः ३४ ३५ एवं सुग्रीवो विस्मयपरवशः प्राह किमत्रेति धर्मज्ञ शरणागतरक्षणधर्मरहस्यज्ञ लोकनाथ सर्वजनस्वामिन्

आनयैनं हरिश्रेष्ठ दत्तमस्याभयं मया विभीषणो वा सुग्रीव यदि वा रावणः स्वयम् ३४
राघवस्य वचः श्रुत्वा सुग्रीवः प्लवगेश्वरः प्रत्यभाषत काकुत्स्थं सौहार्देनाभिचोदितः ३५
किमत्र चित्रं धर्मज्ञ लोकनाथ सुखावह यत्त्वमार्यं प्रभाषेथाः सत्ववान्सत्पथे स्थितः ३६
मम चाप्यन्तरात्मायं शुद्धं वेत्ति विभीषणम् अनुमानाच्च सर्वतः सुपरीक्षितः ३७ तस्मा भावाच्च
त्क्षिप्रं सहास्माभिस्तुल्यो भवतु राघव विभीषणो महाप्राज्ञः सखित्वं चाभ्युपैतु नः ३८

सुखावह सर्वजनानंदकारिन् सत्ववान् सत्यैकनिष्ठस्त्वमार्यं कं ? यत्त्वं प्रभाषेथाः उक्तिमत्तत्र किं चित्रम् ३६ ममान्तरात्मापि विभीष रा०
णं शुद्धं वेत्ति तद्वाक्यश्रवणादिति भावः किंच परमञ्च थावि नाहनू मता भावादसिप्राय बोधकमुखविकाशादिरूपादनुमा ६४
नाच्च सर्वतः सुपरिक्षितश्चायं तस्मात् ३७ ३८

नरेश्वरः ततः सुग्रीववचो निशाम्य ततो हरीश्वरेणाभिहितं विभीषणसंगमं जगामेति संबंधः पुरंदरेण यथा पतत्रिराजेन संगमं स्वलाभममन्यत् तथा
परमप्रीतिरिह दृष्टान्ताभिप्रायः ३९ इत्यष्टादशः सर्गः १८ एवं शरणागतस्य शरणागतसौम्यरूपफलमुक्त्वा शरणागतस्य शरण्यसेवाख्यपुरुषार्थ
लाभमाह राघवेणेत्यादिना अभये तदपेक्षिते सर्वभूतानामभयदत्तेन ततः पूर्वं श्रुतेभ्यो विभीषणोऽभ्यागच्छितकानां श्रीरघुनाथकल्याणगुणानां साक्षा
त्कारेणासम्पन्नकृपन्नीभूतांगः स्वावरोहणाय भूमिं समवलोकयन् हृष्टः अभिमतलाभजनितप्रीतिप्रकर्षः खादवनिं पपात १ स तु धर्मात्मा सवी

ततस्तु सुग्रीववचो निशाम्य तद्धरीश्वरेणाभिहितं नरेश्वरः॥ विभीषणेनाशु जगाम संगमं पतत्रिराजेन यथा पुरंदरः॥३९॥ इत्यार्षे श्रीमद्रामायणे युद्धकांडेऽष्टादशः सर्गः॥१८॥॥
राघवेणाभये दत्ते सन्नतो रावणानुजः॥ विभीषणो महाप्राज्ञो भूमिं समवलोकयन्॥ खात्पपातावनिं हृष्टो भक्तैरनुचरैः सह॥१॥ स तु रामस्य धर्मात्मा निपपात विभीषणः॥ पादयोः शरणान्वेषी चतुर्भिः सह राक्षसैः॥२॥

स्ववस्थायामपि अप्रच्युतशरणागतिधर्मनिष्ठावान् शरणान्वेषी कृतशरणवरणो
विभीषणः रामस्य स्वामिनः पक्षपातातिशयद्योतकाभिरामाकारस्य पादयोः चतुर्भिः राक्षसैः सह निपपात पादशिरःप्रभृतिभिः षडंगैः प्रणा
तदर्थः आनुकूल्यस्य संकल्पः प्रातिकूल्यस्य वर्जनं चोक्तं धर्मात्मेति महाविश्वासः शरणान्वेषीति गोप्तृत्ववरणं पपातेत्यात्मनिक्षेप इति
सांगशरणागतिः कृता भवति २

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० वा० यु० एवं कापिकप्रारणागतिरु आग्रहवाचि कीं द प्रति अब्रवीदिति धर्मयुक्तं युक्तिं युक्तं सांप्रतं संप्रहर्षणं सद्यः संतोषकरं ३ त्यक्त्वा पुत्रां
६५ श्च दारांश्च राघवं शरणं गत इत्यादि सुग्रीवादि सर्ववानरसन्निधावुक्तमपि शरणागमप्रीतिवर्द्धनाय पुनरप्यनुसंधत्ते अनुजइत्यादि स
र्वभूतानां शरण्यमित्यनेन स्वविषयकमहत्त्वरूपावगमः सूचितः ४ शाप्यांतरनिरसनपूर्वकं स्वमेव प्राप्य इत्याह परित्यक्तेति लंका वासस्थानं मि

ष्ठ

अब्रवीच्च तदा वाक्यं रामं प्रति विभीषणः धर्मयुक्तं च युक्तं च सांप्रतं संप्रहर्षणम् ३ अनुजो राव
णस्याहं तेन चास्म्यवमानितः भवंतं सर्वभूतानां शरण्यं शरणं गतः ४ परित्यक्ता मया लंका
मित्राणि च धनानि च भवद्गतं च मे राज्यं जीवितं च सुखानि च ५ तस्य तद्वचनं श्रुत्वा रामो व
चनमब्रवीत् वचसा सांत्वयित्वैनं लोचनाभ्यां पिबन्निव ६ आख्याहि मम तत्त्वेन राक्षसानां
बलाबलम् ७ एवमुक्तस्तदा रक्षो रामेणाक्लिष्टकर्मणा रावणस्य बलं सर्वमाख्यातुमुपचक्रमे ८

त्राणि सुहृदो धनानि द्रव्याणि समागतानि वस्तूनि त्यक्तानीत्यर्थः मे राज्यमिति सर्वपरिग्रहोपलक्षणं जीवितमिति धारकपोषकभोग्योपलक्ष
णं सुखान्यैहिकामुष्मिकरूपाणि इदं सर्वं भवद्गतं भवत्कैंकर्यरक्षितं भवत्कैंकर्यं विनान्यन्नाहमर्थये इत्यर्थः ५ लोचनाभ्यां पिबन्नि
वानुग्रहचक्षुषा बलाबलं कथयन्निवेत्यर्थः ६ ७ ८ राम०
६५

सर्वभूतानामित्येतद्गोवलीवर्दन्यायेन गोधर्वादिव्यतिरिक्तपरं राजपुत्रेति संबुद्ध्या मानुषवध्यत्वं द्योतयति ९ शक्रप्रतिबलः शक्रबलस्पर्धी बलवान्
१० मणिभद्रः कुबेरसेनापतिः ११ वंदं गंधारूपमंगुलित्राणं येन सतो धाज्याघातवारणं अवध्यकवचः अभेद्यकवचः युधि अदृश्यो भवती

अवध्यः सर्वभूतानां देवगंधर्वरक्षसाम् राजपुत्र ददामीबो वरदानां त्वयेप्सुक ९ एवमावरजोऽस्मा
तमजेयश्च स्ववीर्यवान् कुंभकर्णो महातेजाः शक्रप्रतिबलो युधि १० एमसेनापतिस्तस्य प्रह
स्तो यदि वा श्रुतः केनापि येन संग्रामे मणिभद्रः पराजितः ११ बद्धगोधांगुलित्राणो ह्यवध्यकव
चो युधि धनुरादाय यस्तिष्ठन्नदृश्यो भवतींद्रजित् १२ संग्रामे सुमहद्व्यूहे तर्पयित्वा हुताशनम्
अंतर्धानगतः शत्रूनिंद्रजिद्धंति राघव १३ महोदरमहापार्श्वौ राक्षसश्चाप्यकंपनः अनीकस्था
स्तु तस्यैते लोकपालसमा युधि १४ दशकोटिसहस्राणि रक्षसां कामरूपिणाम् मांसशोणितभ
क्ष्याणां लंकापुरनिवासिनाम् १५ स तैस्तु सहितो राजा लोकपालानयोधयत् सह देवैस्तु ते भग्ना रावणो

त्यन्वयः १२ ते देवा हतं संग्रामे इति सुमहद्व्यूहे उच्चितवत्यसन्निवेशावति १३ अनीकस्थाः सेनापतयः १४ दशकोटिसहस्राणि संतीति शेषः
दंदं च प्रधानतः समविवक्षया १५ ते लोकपालाः १६

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०वा०यु० अन्वीक्ष्यालोच्य सर्वकर्तव्यं १७ कर्मापदानानि अपदानं कर्म वृत्तमित्यमरः ऊद्धकर्मनिर्वर्तितशौर्यादीनीत्यर्थः तान्यहमवगच्छाम्यवधार
६६ यामि वनंतु तानिमयिप्रभविष्यंतीतिभावः १८ अहं दशग्रीवं हत्वा राज्यमनिष्कंटकमपि त्वां राजानं करिष्यामि यतो मे शरणागतो सि इत्यर्थः १९
आत्मोचितं मर्यादाहरसातलमिति भूमिन्निहिताधोलोकविशेषः पातालं अधोलोकावधिभूतलोकं पितामहसकाशं स्वर्गप्रदे

विभीषणस्य तु वचस्तच्छ्रुत्वा रघुसत्तमः अन्वीक्ष्य मनसा सर्वमिदं वचनमब्रवीत् १७
यानि कर्मापदानानि रावणस्य विभीषण आख्यातानि च तत्त्वेन ह्यवगच्छामि तान्यहम् १८
अहं हत्वा दशग्रीवं सप्रहस्तं सहात्मजम् राजानं त्वां करिष्यामि सत्यमेतद्ब्रवीमि ते १९
रसातलं वा प्रविशेत्पातालं चापि रावणः पितामहसकाशं वा न मे जीवन्विमोक्ष्यते २०
अहत्वा रावणं संख्ये सपुत्रजनबांधवम् अयोध्यां न प्रवेक्ष्यामि त्रिभिस्तैर्भ्रातृभिः शपे २१
श्रुत्वा तु वनं (च) तस्य रामस्याक्लिष्टकर्मणः शिरसा वंद्य धर्मात्मा वक्तुमेव प्रचक्रमे २२ २२ २२

समीपं उपरितनलोकावधिभूतं सत्यलोकं वा गमिष्यतः २० उक्तमर्थं व्यतिरेकमुखेन दृढयन् सत्यमेतद्ब्रवीमि त इत्युक्तं विवृणोति अहत्वे रा०म०
ति तैः सौभ्रात्रसंपन्नतया प्रसिद्धैः २१ स्वाभिमतराज्यप्रदानप्रतिज्ञानाद्धृदनपूर्वं स्वाभिमतकैंकर्यं तत्त्वप्राप्यते श्रुत्वेति आवंद्येति छेदः २२ ६६

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

साह्यं साहाय्यं यथाप्राणं यथाबलं वाहिनीं रावणवाहिनीं २३ एवं स्वकैंकर्यव्यतिरिक्तफलमनाकांक्षमाणं विभीषणं स्वपरिष्वंगेन वशीकृ-
त्यानुषंगिकमपि फलं मया दत्तं भोगीकर्तव्यमित्यभिप्रायेण लक्ष्मणमादिशतीति इतीति २४ मानद बहुमानप्रद मत्प्रसादेऽस्ति फलम-

राक्षसानां वधे साह्यं लंकायाश्च प्रधर्षणे। करिष्यामि यथाप्राणं प्रवेक्ष्यामि च वाहिनीम् २३ इति
ब्रुवाणं रामस्तु परिष्वज्य विभीषणम्। अब्रवील्लक्ष्मणं प्रीतः समुद्राज्जलमानय २४ तेन चेमं
महाप्राज्ञमभिषिंच विभीषणम्। राजानं रक्षसां क्षिप्रं प्रसन्ने मयि मानद २५ एवमुक्तस्तु सौमि
त्रिरभ्यषिंचद्विभीषणम्। मध्ये वानरमुख्यानां राजानं रामशासनात् २६ तं प्रसादं तु रामस्य दृ
ष्ट्वा सद्यः प्लवंगमाः। प्रचुक्रुशुर्महात्मानं साधु साध्विति चाब्रुवन् २७ अब्रवीच्च हनूमांश्च
सुग्रीवश्च विभीषणम्। कथं सागरमक्षोभ्यं तराम वरुणालयम्। सैन्यैः परिवृताः सर्वे वानराणां महौजसाम् २८

दत्त्वमिति भावः २५ राजशासनादित्यनेनालंघनीयं राजशासनमिति विभीषणोऽनुमेन इति भाव्यते २६ प्रचुक्रुशुः हर्षनादं चक्रुः २७
अप्रयत्नमपीत्तरे कुत्रचित्सदेशे हनुमत्सुग्रीवौ ऊचतुरित्यत्र विभीषणं वानरसेनां तरणोपायमपृच्छतामित्याह अब्रवीदिति हनुमत्स्त्वेहेतुः स्तौ
भ्यमिति तत्रापि हेतुर्वरुणालयमिति वानराणां सैन्यैः परिवृताः कथं केनोपायेन सागरं तराम २८

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०वा०यु०३ पायैः केरुपायैर्नदनदीपतिं अधिगच्छामः यथा धिगमिष्यामः ससैन्याः सर्वे तरसा वरुणालयं यथा तरामस्तादृशोपायान्वेदितिप्रे
६७ ष्टः उपायेनाधिगच्छामस्तं पाटे ससैन्या नदनदीपतिं वरुणालयं यथोत्तरामस्तादृशमुपायं नाधिगच्छामो न जानीमः इत्यर्थः २९ एवं पृष्टे उपा

उपायैरधिगच्छामो यथा नदनदीपतिम् तरेम तरसा सर्वे ससैन्या वरुणालयम् २९ एवमुक्तस्तु धर्मा
त्मा प्रत्युवाच विभीषणः समुद्रं राघवो राजा शरणं गन्तुमर्हति ३० खानितः सगरेणायमप्रमेयो म
होदधिः कर्तुमर्हति रामस्य ज्ञातेः कार्यं महामतिः ३१ एवं विभीषणेनोक्तो राक्षसेन विपश्चिता
आजगामाथ सुग्रीवो यत्र रामः सलक्ष्मणः ३२ ततश्चाख्यातुमारेभे विभीषणवचः शुभम्
सुग्रीवो विपुलग्रीवः सागरस्योपवेशनम् ३३ प्रकृत्या धर्मशीलस्य राघवस्याप्यरोचत ३४

यमाह एवमिति ३० शरणं वरणम् ज्ञातेः कथमसौ कार्यं करिष्यतीत्याशंक्य कार्यकरणोपपत्तिमाह राघवसमुद्रयोः संबंधं दर्शयति खानित इति
सगरेणायं खानित इति प्रोक्तः ज्ञातेः रामस्य स्वन्वयः ३१ एवं विभीषणोक्तं श्रुत्वा यत्र रामो वर्तते देशे सलक्ष्मणः सुग्रीव आजगामेति संबंधः ३२
सागरस्योपवेशनं उपासनं ३३ सकलजगत्कुटुम्बस्य राघवस्यापि प्रकृत्या धर्मशीलत्वाद्रोचते स्मेत्यर्थः रा०म० ६७

श्री २ ते १

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

सः समः क्रियादक्षः स्वपक्षकार्यकरणसमर्थोपि सक्रियार्थे विभीषणाबहुमानार्थं सलक्ष्मणं सुग्रीवमभाषतेत्यन्वयः ३५
३६ उभाभ्यामर्थं कार्यं संप्रधार्य निश्चित्य यद्रोचते तदुच्यताम् ३७ समुदाचारः संज्ञाविधा उपचारः तात्संयुक्तमिति क्रियाविशे

स लक्ष्मणं महातेजाः सुग्रीवं च हरीश्वरम् सक्रियार्थे क्रियादक्षः स्मितपूर्वमभाषत ३५ विभी
षणस्य मंत्रोयं मम लक्ष्मण रोचते ब्रूहि त्वं सह सुग्रीवस्तवापि यदि रोचते ३६ सुग्रीवः पंडितो
नित्यं भवान्मंत्रविचक्षणः उभाभ्यां संप्रधार्यार्यौ रोचते यत्तदुच्यताम् ३७ एवमुक्तौ ततो वीरा
वुभौ सुग्रीव लक्ष्मणौ समुदाचारसंयुक्तमिदं वचनमूचतुः ३८ किमर्थं नो नरव्याघ्र न
रोचिष्यति राघव विभीषणेन यत्तूक्तमस्मिन्काले सुखावहम् ३९ अबद्ध्वा सागरे सेतुं घो
रेस्मिन्वरुणालयेलंकानासादितुं शक्यासेंद्रैरपि सुरासुरैः ४० विभीषणस्य शूरस्य यथार्थं
क्रियतां वचः अलं कालात्ययं कृत्वा समुद्रोयं नियुज्यताम् यथा सैन्येन गच्छामः पुरीं रावणपालिताम्
५१

षणम् ३८ अस्मिन्काले उपायांतरज्ञानकाले सुखावहम् यत्नेन कार्यसाधकं नोस्माकं योर्विभीषणेन यदुक्तं तत्कथं न
रोचिष्यति सर्वं यातः स्थिरचित्ते वेत्यर्थः ३९ ४० समुद्रो नियुज्यतां समुद्रः सेतुबंधनाय प्रार्थ्यताम् ४१

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

 संविवेश शयनमकरोत् । वेद्यामिव हुताशन इत्यनेन जाज्वल्यमानत्वं सूच्यते ॥ ५२ ॥ इत्येकोनविंशः सर्गः ॥ १९ ॥ अथ विभीषणागमनानंतरं
 लंकावृत्तांतं प्रस्तौति तत इत्यादिना निविष्टां समुद्रतीरस्थां ध्वजिनीं सेनां वीर्यवानिति दर्शनसामर्थ्योक्तिः ॥ १ ॥ दुरात्मनो दुर्बुद्धेः प्रकाले चारप्रवेश

एवमुक्तः कुशास्तीर्णे तीरे नदनदीपतेः ॥ संविवेश तदा रामो वेद्यामिव हुताशनः ॥ ५२ ॥ इत्यार्षे श्री
मद्रामायणे युद्धकाण्डे एकोनविंशः सर्गः ॥ १९ ॥ ततो निविष्टां ध्वजिनीं सुग्रीवेणाभिपालिताम्
ददर्श राक्षसोऽभ्येत्य शार्दूलो नाम वीर्यवान् १ चारो राक्षसराजस्य रावणस्य दुरात्मनः तां दृष्ट्वा सर्व
तो व्यग्रः प्रतिगम्य स राक्षसः प्रविश्य लंकां वेगेन राजानमिदमब्रवीत् २ एष वानरऋक्षौघो लंकां
समभिवर्तते अगाधश्चाप्रमेयश्च द्वितीय इव सागरः ३ पुत्रौ दशरथस्येमौ भ्रातरौ रामलक्ष्मणौ
उत्तमायुधसंपन्नौ सीतायाः पदमागतौ ४ एतौ सागरमासाद्य संनिविष्टौ महाबलौ बलं चाकाशमावृ
त्य सर्वतो दशयोजनम् ५

पितुरित्यर्थः सर्वतः सर्वतो वानरध्वजिनीं व्याजं प्रधानं पादृष्ट्वा वेगेन लंकामाविश्य राजानमब्रवी
दितिसंबंधः २ अगाधः अप्रतर्क्यप्रशः सेनापक्षे दुःप्रवेशः अप्रमेयोऽपरिच्छेद्यः ३ सीतायाः पदमागतौ सीतायाः स्थानमद्दिश्य प्राप्तौ ४ ब
लं सैन्यं च दशयोजनमाकाशतावत्पर्यंतावकाशमावृत्य संनिविष्टमिति व्यत्ययेनान्वयः ५

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

तत्वभूतं यथार्थमित्यर्थः ६ उपप्रदानं सीतायाः सांत्वं साम भेदो वा सुग्रीवं प्रति दंडस्तत्र कार्य एव रणोत्तीर्णेति भावः ७ संप्रधार्यात्मनोर्थं ति
त्कालोचितकार्यं शुकमुवाचेत्यन्वयः सुग्रीवं प्रति साम भेदप्रयोगार्थमिति शेषः ८ तदेवाह सुग्रीवमिति यथासंदेशं यथासंदेशमप्रका

तत्वभूतं महाराज त्वत्प्रियं वेदितुमर्हसि ६ त्वद्भूतां महाराज त्वत्प्रियमर्हसि वेदितुम् उपप्रदानं सां
त्वं वा भेदो वात्र प्रयुज्यताम् ७ शार्दूलस्य वचः श्रुत्वा रावणो राक्षसेश्वरः उवाच सहसा व्यग्रः सं
प्रधार्यार्थमात्मनः शुकं नाम तदा रक्षो वाक्यमर्थविदां वरम् ८ सुग्रीवं ब्रूहि गत्वाशु राजा
नं वचनान्मम यथा संदेशमक्लीबं श्लक्ष्णया परया गिरा ९ त्वं वै महाराजकुलप्रसूतो महाबल
श्चर्क्षरजःसुतश्च न कश्चनार्थस्तव नास्त्यनर्थस्तथापि मे भ्रातृसमो हरीश १० अहं यद्यहरं भा
र्यां राजपुत्रस्य धीमतः किं तत्र तव सुग्रीव किष्किंधां प्रतिगम्यताम् ११ ११ ११ ११११

रमनतिक्रम्य अक्लीबमकातरं श्लक्ष्णया परया मधुरया गिरा ब्रूहीति संबंधः ९ तवार्थः कोपि नास्ति रामसाहाय्यकारणेन प्राप्यफलं ना
स्ति अनर्थः परिहर्तव्यो नास्ति अतो निष्प्रयोजनप्रवृत्तिरनुचितेति भावः यद्यपि वा कश्चिदर्थो नर्थो जातेः स्यात्तथापि मे भ्रातृसमो
ति तथा च मद्विषये औदासीन्यमुचितमिति भावः १० ११

श्चार्कश्च

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

टी० वा० यु० मद्वचनमनादृत्यागमनेनापित्वयाकिमपिकर्त्तुंनशक्यमित्याह नहीयमिति १२ शुकोविहंगमोभूत्वाशुकपक्षीभूत्वाप्लुत्यचांबरंजगा
६९ मितिशेषः १३ सागरस्योपर्युपरिसागरसमीपोर्ध्वदेशेरावणेनोक्तं सर्वमिदंवाक्यंयथादिष्टमब्रवीदितिसंबंधः १४ तत्प्रापयंतंरा

नहीयंहरिभिर्लंकाप्राप्तुंशक्याकथंचन देवैरपिसगंधर्वैः किंपुनर्नरवानरैः १२ सतथाराक्षसेंद्रे
णसंदिष्टोरजनीचरः शुकोविहंगमोभूत्वातूर्णमाप्लुत्यचांबरम् १३ सगत्वादूरमध्वानमुपर्युप
रिसागरम् संस्थितोह्यंबरेवाक्यंसुग्रीवमिदमब्रवीत् सर्वमुक्तंयथादिष्टंरावणेनदुरात्मना १४
तत्प्रापयंतंवचनंतूर्णमाप्लुत्यवानराः प्रारभंततदाक्षिप्रंलोप्तुंहंतुंचमुष्टिभिः १५ सतैःप्लवंगैः
प्रसभंनिगृहीतोनिशाचरः गगनाद्भूतलेचाशुप्रतिगृह्यावतारितः १६ वानरैःपीड्यमानस्तु
शुकोवचनमब्रवीत् नदूतान्घ्नंतिकाकुत्स्थवार्यंतांसाधुवानराः १७ यस्तुहित्वामतंभर्तुःस्व
मतंप्रतिभाषते अनुक्तवादीदूतःसनसदूतोवधमर्हति १८

वणोक्तंसुग्रीवायेत्यर्थः प्रापयंतंगृहीतवंतः लोप्तुंप टी०म०
क्षाविति शेषः १५ १६ १७ यथोक्तराजसंदेशवादिनोममापराधोनास्तीत्याह यस्त्विति भर्तुर्मतंसंदिष्टमार्गंहित्वा स्वमतंतोत्का लोकप्रा ६९
सिद्धार्थमन्यदेवकिंचिद्यदिभाषतेतदासोऽनुक्तवादीसन्वधमर्हति १८

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

शुकस्य परिदेवितं परिदेवनरूपं वाक्यं श्रुत्वा मा वधिष्ट मा वधिष्टेत्युवाच एकवचनमार्षं १९ रामवचसा हरिभिरभये दर्शिते सति पत्रलघुः पत्रवल्लेन शीघ्रगामी भूत्वा वचनमब्रवीत् २० लोकरावणः लोकरावणत्वेनैव तत्तद्देशं विनैव गामेनैव ततो मे सह मन्दत्वमिति सूचि

शुकस्य वचनं रामः श्रुत्वा स परिदेवितम् उवाच मा वधिष्टेति घ्नतः शाखामृगांस्ततः १९ स च पत्रलघुर्भूत्वा हरिभिर्दर्शिते भये अन्तरिक्षस्थितो भूत्वा शुको वचनमब्रवीत् २० सुग्रीव सत्वसम्पन्न महाबलपराक्रम किं मया खलु वक्तव्यो रावणो लोकरावणः २१ स एवमुक्तः प्लवगाधिपस्तदा प्लवङ्गमानामृषभो महाबलः उवाच वाक्यं रजनीचरस्य चारं शुकं दीनमदीनसत्वः २२ न मेऽसि मित्रं न तथानुकम्प्यो न चोपकर्तासि न मे प्रियोऽसि अरिश्च रामस्य सहानुबन्धः स मेऽसि वालीव वधार्ह वध्यः २३ निहन्म्यहं त्वां ससुतं सबन्धुं सज्ञातिवर्गं रजनीचरेश लङ्कां च सर्वां महता बलेन सर्वैः करिष्यामि समेत्य भस्म २४

तं २१ वाक्यं प्रतिसंदेशवाक्यं अदीनसत्वः अदीनमनस्कः २२
अनुकम्प्यो दयनीयश्च नासि अरिश्च असीति शेषः अतः सहानुबन्धः सपुत्रमित्रादिपरिकरः ततो रामारित्वात् देव वालीव वध्योऽसि रामे रोऽसि
शेषः २३ त्वां मन्त्रिगणैः सर्वैः समेत्येत्यन्वयः २४

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा॰वा॰यु॰ हे राघव वायस नमोऽस्तु ते राघवान्नमुच्यते सर्वे प्रत्यर्थः अंतर्हितोंतर्धानं प्राप्नोतीति शेषः २५ पिशाचादीनामेकैकं समुदितं च त्रातारं न प्रपश्यामि प्र
७० तएवनजपंचकं चरितार्थे २६ जरया वृद्धमिति वृद्धं जटायुषमवधीरित्तियत् तत्र ते किं वीर्यमिति शेषः २७ सन्निधेरेव सान्निध्यं एमस्य

नमोस्तु ते वानराणां वरिष्ठ सर्वैः समेतैरपि मृग्यमाणः अंतर्हितः सूर्यपथं गतो पितृ पैवपातालमनुप्रविष्टः
गिरिं प्राप्यादौ बुद्धसंगतो वा हतो निरामेण महानुजस्त्वम् २५ तस्य ते त्रिषु लोकेषु न पिशाचं न राक्षसम्
त्रातारं नानुपश्यामि नगं धर्वं च राक्षसम् २६ एव धीस्त्वं जरया वृद्धं राघवे जटायुषम् २७
किंनु तेऽस्य सान्निध्येन का प्रो... स्मतास्य च हृता सीता विप्राणा स्त्री यो लांग्हानु बुध्यसे २८
महावक्त्रं महात्मानं दुर्धर्षं सुरैरपि न बुध्यसे रघुश्रेष्ठं प्राणान् हरिष्यति २९ ततोऽब्रवीद्वालि
सुतो वाक्यं नादो हरिसत्तमः नायं दूतो महाप्राज्ञ चारकः प्रतिभाति मे ३०

सान्निध्ये लक्ष्मणस्य च सकाशे त्वया सीता किन्तु हृता यां चौर्येणापहृत्वा न बुध्यसे स्वबलमिति शेषः २८ रघुश्रेष्ठं महावक्त्रं त्वादिगुणकेन
बुध्यसे रत्यर्थः २९ अयं स्वामिसंदेशप्रापणमात्रकृत्यो दूत एव न किं तु गुप्ततया परबलपरिज्ञानप्रवृत्तिश्चार एव ३० ३०
रा॰म॰
७०

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

कुतस्तु त्राह तुलितं हीति इहतिष्ठता नेनतव सर्वं बलं गलितं एवं प्रमातामेवं गूहेमितितुलयामित्तं परिच्छिद्य ज्ञातमित्यर्थः ३१ एतज्ञाडमी·
वेण ३२ चंडेरत्यंतकोपनेः ३३ लब्ध्वैते इत्यादि श्लोकद्वयमेकं वाक्यं लब्ध्वैतौ छिद्यंते यां चतात्रिमित्यत्र एतत्रिप्राद्दः ग्रहो एवं वचनः ग्रहमेवं वानर

तुलितं हि बलं सर्वमनेनैव तवतिष्ठता ॥ गृह्णता मामागमच्छेकामेतद्विममरोचते ॥ ३१ ॥ ततो ऽप्सरसां तमादिष्टाः
समुत्पत्य वलीमुखाः ॥ जग्मुः हृष्टा व वे धुत्ते किलिकिलं तमनापवत ॥ ३२ ॥ रुरुक तु वानरैः श्रेष्ठैस्तत्र तैः संप्रपी
डितः ॥ व्याजुक्रोश महात्मानं रामं दशरथात्मजम ॥ ३३ ॥ लब्ध्वैतमेव लात्पतौ भिद्यते मेतथा ह्यि तानि ॥ यां
च तारां मरिष्यामि जायेरात्रिं च यामहम ॥ ३४ ॥ एतस्मिन्नन्तरे काले जन्म साह्यं भृशं हृतम ॥ सर्वं तदुपपद्ये
था जह्यां चेद्यदि जीवितम ॥ ३५ ॥ नाघातयत्तदा मेऽश्रुत्वा तत्परिदेवितं वानरानं ब्रवीद्रामो मुच्यतां दू
तःप्रागतः ॥ ३६ ॥ इत्यार्षे श्रीमद्रामायणे कुंडे काण्डे विंशः सर्गः ॥ २० ॥ सीताराम सीताराम सीता

पीड्या जीवितं यदि जह्यां तदा यां एत्रिं यस्यां एष्यां जाये जात वानमिपां च एत्रिं यस्यां एष्यां मरिष्यामि एतस्मिन्नंतरे काले जन्म मातायोर्मध्य
वर्ति निकाले मया दृष्टं भृशं कृतं तत्सर्वं त्वमुपपद्येथाः प्राप्नुयाः यदीह स्वयाः निवारितता उनो जीवितं जह्यामित्यर्थः ३४ ३५ नघातयत्तव
धात्रुवर्तयत मुच्यतां दूतः प्रागत इति वधमो ह्रूतां तु दक्षिणाकूले ३६ इति विंशः सर्गः २०

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०वा०पु० एवं प्रासंगिकं परिसमाप्यैकांतरितपूर्वसर्गोक्तोदितकथाशेषमुपक्षिपति तैरिति ततः पुष्पकमोचनानंतरं सागरवेलायां दर्भानास्तीर्य रघु
७१ नंदनो राघवः प्राङ्मुखः सन् महोदधेरंजलिं कृत्वाम्बुजनाभो रामं बाहुमुपधाय उपधानीकृत्य प्रतिशिश्ये सुप्तवान् अभिमुखत्वेन प्रापितवान्
बाहुं वर्णयति जातरूपेति पुरा प्रयोध्यावासकाले जातरूपमयैः सुवर्णमयैश्च कांचनमयैर्भूषणैर्भूषितं एवकारोऽयोगव्यवच्छे
दार्थः १२ मणयादिमुक्ताप्रवरांतानि भूषणानि येषु तैः परमनारीणामुत्तमधात्रीजननानां भुजैर्बाहुभिरनेकधा लपनालंकरणादि

ततः सागरवेलायां दर्भानास्तीर्य राघवः । अंजलिं प्राङ्मुखः कृत्वा प्रतिशिश्ये महोदधेः ॥ १ ॥ बा
हुं भुजंगभोगाभमुपधायारिसूदनः । जातरूपमयैश्चैव भूषणैर्भूषितं पुरा ॥ २ ॥ मणिकांचनकेयूरमुक्ता
प्रवरभूषणैः । भुजैः परमनारीणामभिमृष्टमनेकधा ॥ ३ ॥ चंदनागरुभिश्चैव पुरस्तादधिवासितम् ।
बालसूर्यप्रकाशैश्च चंदनैरुपशोभितम् ॥ ४ ॥ शयने चोत्तमांगेन सीतायाः शोभितं पुरा । तक्षकस्येव संभो
गं गंगाजलनिषेवितम् ॥ ५ ॥

१ कालो भिसबं हस्तपृष्ठे एमसैक पल्लीलात्परमनारी प्राद्वेतश्च वधा त्रोविवक्षिताः ३ पुरस्तात् पूर्वं चं
दनागरुभिः स्नातोपभूतैरधिवासितं संजातगंधं उन्नवालसूर्यप्रकाशैः रतिरक्तैः श्वेतैः चंदनैः कुंकुमैरिति यावत् तैरुपशोभितमिति सर्वः ४
पुरा शयने हंसतूलिकामये तल्पे सीताया उत्तमांगेन शिरसा शोभितं एवं भुजंगं गंगाजलनिषेवितं गंगाजले वर्तमानं तक्षकस्य संभोगं शरीरमिव एमं०
स्थितः ५ ७०

संयुगेपुद्युगनं काग्रं गोपुराणिव वक्षुतिभठनिवारकं अप्रतएवशत्रूणां शोकवर्द्धनं दीर्घं दीर्घकालं सुहृदानंदनं सुखप्रापकं सागरांतव्य
तोयस्यासौ सागरांतो भूः मंडलं तस्य व्यपाश्रयमालंबनभूतं ६ पुनः मुहुर्मुहुः सव्यं यथा भवति तथा प्रक्षेप्तारं धूनं क्षिपता स्वेन कृता
ये ज्याघातास्तैर्विहतत्वचं ज्याघातकिणांकितमित्यर्थः एतादृशं सर्वं भुजं भुजउत्तमं गोसहस्रप्रदातारं दक्षिणं बाहुमुपधाय अद्यति

संयुगेयुगमेकाग्रं शत्रूणां शोकवर्धनम् सुहृदानंदनं दीर्घं सागरांतव्यपाश्रयम् ६ प्रक्षेप्ता
च पुनः सव्यं ज्याघातविहतत्वचम् दक्षिणोदक्षिणं बाहुं महापरिघसन्निभम् ७ गोसहस्र
प्रदातारमुपादाय भुजोत्तमम् अद्यमेमरणं वापि तरणं सागरस्य वा ८ इति रामोमतिं कृत्वा महा
बाहुर्महोदधिम् अधिशिश्ये च विधिवत्प्रयतो नियतोमुनिः ९ तस्य रामस्य सुप्तस्य कुशा
स्तीर्णे महीतले नियमादप्रमत्तस्य निशास्तिस्रोतिचक्रमुः १०

दिन मुमासनयाप्रसन्नस्य सागरस्य प्रसादेन मे
समैन्यस्य तरणं वापिस्यात् ततः परमुपेक्षितो सागरस्य मत्तो मरणं मे वस्यादिति ध्यतिं निश्चयं कृत्वा दक्षिणं यं वाविधिवत्प्रयतः परिशुद्धो
नियतः कापिकनियमवान्मुनिर्मौनी रामो महोदधिमुद्दिश्य प्राधिशिश्ये इत्यपेक्षित पूरणेनान्वयः ७ ८ ९ नियमादप्रमत्तस्याप्रप्रच्युत

रा०बा०यु० सः स्वं गुल्मजेगात् न हन्यामि त्यादिना प्रकटितवीर्यः नयज्ञः सामाद्युपायानीयप्रयोचितप्रयोगज्ञः धर्मवत्सलः शरणागतरक्षणरूपे धर्मे प्रीतिमान्
७२ उपासत उपास्त ११ एवं यथाशास्त्रं शरणागतत्वेपि फलप्रदानाभिमुख्याभावात् सागरस्य पापाधिक्ये दर्शयतीति न दर्शयति मंदो मंदबुद्धिः १२ समुद्रस्य क्रु
द्धः समुद्राय क्रुद्धः १३ अवलेपः दर्पः भिन्नवाक्यं स्वयमात्मानं न दर्शयतीति यत् अयं समुद्रस्य अवलेपो गर्वः वर्ततइति शेषः १४ प्रशमश्च

सत्रिरात्रोषितस्तत्र नयज्ञो धर्मवत्सलः उपासत तदा रामः सागरं सरितां पतिम् ११ न च दर्शयते रूपं मं
दो रामस्य सागरः प्रयतेनापि रामेण यथार्हमपि पूजितः १२ समुद्रस्य ततः क्रुद्धो रामो रक्तान्तलो
चनः समीपस्थमुवाचेदं लक्ष्मणं शुभलक्षणम् १३ अवलेपः समुद्रस्य न दर्शयति यः स्वयम्
१४ प्रशमश्च क्षमा चैव आर्जवं प्रियवादिता असामर्थ्यफला ह्येते निर्गुणेषु सतां गुणाः १५

प्रशांतिः क्षमा अपराधसहिष्णुत्वं आर्जवं कौटिल्याभावः प्रियवादिता चेति एते सतां गुणाः निर्गुणेषु दयादिगुणहीनेषु अवलिप्तेषु तद्विषये रा०म०
असामर्थ्यफलाः सर्वशक्तिप्रयोक्तापि दुष्टविषये प्रशमादिपरश्चेत्तमशक्तं मन्यंत इत्यर्थः अतोयं दंड एवैव विषय इति भावः १५ ७२

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

श्चात्मप्रशंसिनं श्रोयदि दुःखाभावेपि न क्षमया श्लाघमानं दुष्टं दुश्चरित्रं धृष्टं अधर्मप्रवृत्तौ साहसिकं विपरिधावकं सन्तत्ततः स्वगुणख्यापना
य परिधावनशीलं सर्वत्र प्राणिमात्रे उत्सृष्टदंडं कृतदंडं नरं लोकः सत्कुरुते बहुमन्यते १६ कीर्ति देशांतरख्याति यशः स्वदेशख्यातिः रणाम्।
द्विजयो वा लोके साम्ना शासितुं न शक्यते स स्वत्वयः अघमहाग्निर्भिन्नैरत एवमत्वा सर्वतः प्रवर्द्धिमें करैर्निरुद्धतोयं शङ्खादितत्तोयमक

आत्मप्रशंसिनं दुष्टं धृष्टं विपरिधावकम् सर्वत्रोत्सृष्टदंडं च लोकः सत्कुरुते नरम् १६ न साम्ना प्राप्य
ते कीर्तिर्न साम्ना प्राप्यते यशः प्राप्तुं लक्ष्मण लोकेस्मिन्जयो वा रणमूर्द्धनि १७ अद्य मद्बाणनिर्भिन्नैर्मे
करैर्मकरालयं निरुद्धतोयं सौमित्रे प्लवद्भिः पश्य सर्वतः १८ भोगिनां पश्य भोगानि मया भिन्नानि लक्ष्मण
महाभोगानि मत्स्यानां करिणां च करानिह १९ सशंखशुक्तिकाजालं समीनमकरं शरैः अद्य
युद्धेन महता समुद्रं परिशोषये २० क्षमया हि समायुक्तं मामयं मकरालयः असमर्थं विजानाति धिक् क्षमामीदृ

शत्वयं पश्य १८ भोगिनां नागानां सर्पाणां भोगानि शरीराणि छिन्नानि मया भिन्नानि मत्स्यानां महाभोगानि महाशरीराणि मया भिन्नानि पश्य करिणां गजा
कारमत्स्यानां करान् निर्भिन्नान्पश्येति शेषः १९ अद्य शंखजालं शुक्तिकाजालं सहितं समुद्रं युद्धेन बाणप्रहारेण परिशोषये पश्येति शेषः २०
असमर्थं त्वां विजानाति शेषः २१

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

स्वैवैमवमय व्यम्पाहचापमिति २३ २४ वेलासु तीरेषु कृतमर्यादं तत् दलं घने कृतानियमं निर्मर्यादं लंघितवेलं करिष्यामि २४ २५ घोरं धनुः शरैः

नदर्शयति साम्ना मे सागरो रूपमात्मनः चापमानय सौमित्रे शरांश्चाशीविषोपमान् समुद्रं शोषयिष्या
मि पद्भ्यां यांतु प्लवंगमाः २२ अद्याक्षोभ्यमपि क्रुद्धः क्षोभयिष्यामि सागरम् २३ वेलासु कृतमर्यादं स
हसोर्मिसमाकुलम् निर्मर्यादं करिष्यामि सायकैर्वरुणालयम् २४ महार्णवं क्षोभयिष्ये महादानवसं
कुलम् एवमुक्त्वा धनुष्पाणिः क्रोधविस्फारितेक्षणः बभूव रामो दुर्धर्षो युगांताग्निरिव ज्वलन् २५
संपीड्य च धनुर्घोरं कंपयित्वा शरैर्जगत् मुमोच विशिखानुग्रान्वज्रानिव शतक्रतुः २६ ते ज्व
लंतो महावेगास्तेजसा सायकोत्तमाः प्रविशंति समुद्रस्य जलं वित्रस्तपन्नगम् २७ ततो वेगः समुद्रस्य
समीनमकरो महान् संबभूव महाघोरः समारुतरवस्तथा २८ महोर्मिजालविततः शंखजालसमावृ
तः सधूमपरिवृत्तोर्मिः सहसासीन्महोदधिः २९

संपीड्य संपीडनपूर्वं सज्जं कृत्वा जगत्कंपयित्वा ज्याघोषेणेति शेषः उ
ग्रान्विशिखान्मुमोच शतक्रतुर्वज्रानिवेति संबंधः २६ २७ समुद्रस्य तोयवेगः जलक्षोभः समारुतरवः वातगत्या प्रवर्तितमारुतशब्दसहितो महा

[illegible]

३० ३१ ३२ तुशब्देन पूर्वसंधानाद्विशेषमाह अप्रमेयं अपरिच्छेद्यवैभवं धनुः प्रकर्षमाणं अमोघशरसंधानायेति भावः कोपेन विनिःश्वसंतं
राघवं सौमित्रिरुत्पत्योपागम्य मामेत्युक्त्वा समुद्रसत्त्वनाशनं न कार्यमित्युक्त्वा धनुरालंबे धृतवानित्यर्थः ३३ उदधेरेतद्विनाशनं विना

व्यथिताः पन्नागाश्चासन्दीप्तास्या दीप्तलोचनाः दानवाश्च महावीर्याः पातालतलवासिनः ३१ ऊर्मयः
सिंधुराजस्य सनक्रमकरास्तदा विंध्यमंदरमात्रास्ते समुत्पेतुः समंततः ३१ आघूर्णिततरंगौघः संभ्रांतो
रगराक्षसः उद्वर्तितमहाग्राहः संघोषो वरुणालयः ३२ ततस्तु तं राघवमुग्रवेगं प्रकर्षमाणं धनुरप्र
मेयम् सौमित्रिरुत्पत्य विनिःश्वसंतं मामेति चोक्त्वा धनुरालल्वे ३३ एतद्विनापि ह्युदधेस्तवाद्य सं
पत्स्यते वीरतमस्य कार्यं भवद्विधाः क्रोधवशं न यांति दीर्घं भवान्पश्यतु साधुवृत्तम् ३४ अंतर्हितैश्चा
पि तथांतरिक्षे ब्रह्मर्षिभिश्चैव सुरर्षिभिश्च शब्दः कृतः कष्टमिति ब्रुवद्भिर्मामेति चोक्त्वा महता स्वरे
ण ॥३५॥ इति किष्किंधाकांडे एकविंशः सर्गः ॥२१॥

पि साधुवृत्तं समीचीनोपायमेव दीर्घं यथा भवति तथा भवान्पश्य
तु ३४ कष्टमिति ब्रुवद्भिर्ब्रह्मर्ष्यादिभिर्महता स्वरेण मामेत्युक्त्वा शब्दो हा हेति शब्दः कृत इत्यर्थः ३५ इत्येकविंशः सर्गः ॥२१॥

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०वा०पु० प्रथमं विभीषणानुमत्यासागरं शरणं गत्वा तस्मिन्ननागते चापमानयेति वाचा भीषयित्वा तदाप्यनाविःकृतनिजरूपं शरैः प्रक्षोभ्य तावताप्य
७४ नागतस्य भीतिमुत्पादयितुं ब्रह्मास्त्रं संधानायोपक्रमते अथेति सपातालं पातालपर्यंतमित्यर्थः १ शरनिर्दग्धतोयस्य निर्जलस्य अत एव परिशुष्कस्य
भूम्यंतर्जीवन्नपकृत्यमानिहता निःसत्त्वानि यादांसि यस्य ते महान्पांसुरतिसूक्ष्मो रेणुरुत्पद्यते उत्पत्स्यते वर्तमानसामीप्ये लट् २ ननु सकलजल

अथ प्रोवाच रघुश्रेष्ठः सागरं दारुणं वचः अद्य त्वां शोषयिष्यामि सपातालं महार्णव १ शरनि
र्दग्धतोयस्य परिशुष्कस्य सागर मया निहतसत्त्वस्य पांसुरुत्पद्यते महान् २ मत्कार्मुकनि
सृष्टेन शरवर्षेण सागर पारं तेऽद्य गमिष्यंति पद्भिरेव प्लवंगमाः ३ विचिन्वन्नाभिजानासि पौरुषं ना
पि विक्रमम् दानवालयसंतापं मत्तो नावगमिष्यसि ४ सीताराम सीताराम सीताराम सीता ॥

शोषणे तव तावन्मात्र परिशोषात नगमनं तं भवतस्त्राह मत्कार्मुकेति शरवर्षेण शरजालेन सेतुस्थानीयेन सेतुबंधनादिक्लेशो मे न भवेदिति भावः
३ विक्रमं जानो परि शरसेतुबंधनजन्यक्लेशं भजन त स्वशोषणादि प्राप्तिल्वरूपं विक्रमं विचिन्वन् विशेषेण पर्यालोचयन्नाभिजानासि पौरुषं शा
स्त्रबलं सोजन्य निरवधं शरणागतरक्षणरूपं प्रपुरुषकृत्यं नाभिजानासि हे दानवालय मत्तो भाविनं संतापं नावगमिष्यसि न ज्ञास्यसि इत्यन्वयेनिशेषः ४ रा०म०
७४

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

ब्रह्मदंडनिभं शरं ब्राह्मेणास्त्रेण ब्रह्मास्त्रमंत्रेण संयोज्याभिमंत्र्य एवमभिमंत्रितं त्रितं शरं धनुषि संयोज्य विचकर्ष ब्रह्मदंडउक्तो नारदसंहितायां पितामहात्मजः क्रूरस्त्रिवर्णः शिखान्वितः ब्रह्मदंडो ह्ययं केतुः सर्वभूतविनाशन इति ५ रोदसी द्यावापृथिव्यौ संपफाले ववि प्र प्र

ब्राह्मेणास्त्रेण संयोज्य ब्रह्मदंडनिभं शरम् संयोज्य धनुषि श्रेष्ठे विचकर्ष महाबलः ५ तस्मिन्विकृष्यमाणे
सहसा तच्च वेगाच्छरासने रोदसी संपफाले च पर्वताश्च चकंपिरे ६ तमश्च लोकमाविवेश दिशश्च न
चकाशिरे पेतुश्च भूमिरे चाशु सर्वंसि सरित्स्तदा ७ तिर्यक्च सह नक्षत्रैः संगतौ चंद्रभास्करौ
भास्करांशुभिरदीप्तं तमसा च समावृतम् ८ प्रचकाशे तदाकाशमुल्काशतविदीपितम्
ग्रंतरिक्षाच्च निर्घाता निर्जग्मुस्तुल्यस्वनाः ९

रेतुरिव एकवचनमार्षं ६ ७ चंद्रभास्करौ नक्षत्रैः सह तिर्यक् संगतौ यथाप्राप्तपूर्वापरमार्गप्रतिरोधात् दक्षिणोत्तरमार्गगामिनावभूतामित्यर्थः भास्करांशुभिरदीप्तं समपितमसावृतमाकाशमासीदिति शेषः ग्रंथेन विरुद्धयोस्तेजस्तिमिरयोः सामानाधिकरण्यरूप उत्पातः सूचितः ८ तदाकाशमुल्काशतविदीपितं प्रचकाशे निर्घाता ग्रंतरिक्षात् निर्जग्मुः निःसृताः ९

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

दिविदिव्याः गत्वा द्यामारुतपंक्तयः परिवहादिवातस्कंधाः प्रास्फुरन् प्रचेलुः वभंजचेतिमारुतपंक्ति इति शेषः उद्वहन्मारुतसमूह इति शेषः प्रासेष्येव एवकर्त्तीप्रोत्थान्तान्पर्वतप्रदेशान् आरुजन्नपीडयन् बहुवचनमार्षं शिखराणिखंडपर्वतान्वभंजचेसन्वयः १०

प्रास्फुरं श्चपुनर्दिव्यादि विमारुतपंक्तयः वभंजचततदा वृक्षाजत्नदानुद्वहन्मुहुः आ
रुजंश्चैवशैलानांशिखराणि वभंजच १० दिविचसमहावेगाः संहताः समहास्वनाः मु
मुचुर्वैद्युतानग्नींस्तेमहाशनयस्तदा ११ प्रानिभूतानि दृश्यानि चुक्रुशुश्चाशनैः समं
पदृश्यानिचभूतानिमुमुचुर्भैरवस्वनम् १२ शिरांसिपरेचाभिभूतानिसंत्रस्तान्युद्विजंतिच
संप्रविश्यगिरेश्चापिनचपस्पंदिरेभयात् १३

तेपतमानामहाशनयः महावेगात्वादिगुणाः वैद्युतानग्नीन्मुमुचुः
११ पानीत्यादिश्लोकद्वयमेकंवाक्यं दृश्यानिमनुष्यादीनि अदृश्यानि पिशाचादीनि सर्वाणि भूतानि संत्रस्तान्यतएवोद्विजंति कंपमानि संतिच प्राशनैः समं प्रशनिघोषतुल्यघोषं यथाचुक्रुशुस्तथा भैरवंस्वनं मुमुचुः ततः शिरांसिपरेरसप्रानिहुस्त वन्दू मोपतितोनीसर्थः तत्रापि संप्रविश्यगिरेश्चितपादुःखिता निभयातिरेकान्नपस्पंदिरेनचलितितानीत्यर्थः १२ १३

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

नागैराक्षसैस्तोयोर्मिभिरितरभूतैश्चसहितोमहोदधिः ततोवेगात्प्रयत्नप्रयुक्तकेवलबाणप्रयोगकृतात्क्षोभात्सहसाभीमवेगोऽभूत् ब्रह्मास्त्रसंधा
नेनातिभयंकरक्षोभोऽभूदित्यर्थः १४ वेलाकूलंद्वीपवतियोजनमितितत्रवचःप्रत्ययस्ततोऽन्यत्रापिवेलामुद्रेध्ययोजनंव्यतिचक्राम योजनमात्रं

सहभूतैः सतोयोर्मिः सनागः सहराक्षसः सहसाभ्युत्ततो वेगाद्भीमवेगो महोदधिः १४ योजनंव्यति
चक्रामवेलामन्यत्रसंप्लवात् १५ तंतथासमतिक्रांतंनातिचक्राम राघवः तमुद्धृतममित्रघ्नो
रामोनदनदीपतिम् १६ ततोमध्यात्समुद्रस्यसागरःस्वयमुत्थितः उदयाद्रिमहाशैलान्मेरोरि
वदिवाकरः १७ पन्नगैःसहदीप्तास्यैःसमुद्रःप्रत्यदृश्यत स्निग्धवैडूर्यसंकाशोजांबूनदविभू
षणः १८ रक्तमाल्यांबरधरःपद्मपत्रनिभेक्षणः सर्वपुष्पमयीं दिव्यांशिरसाधारयन्स्रजम्
१९

वहिर्निर्गतइत्यर्थः १५ तंतथासमतिक्रांतंपलायमानंतमुद्धृतंसापराधंनदनदीपतिंसागरंराघवोरामःप्रमित्रघ्नोपिनातिचक्रामनावधीरित्य
र्थः परमकारुणिकेनश्रीरामेणसमुद्रभयोत्पादनार्थमेवब्रह्मास्त्रंसंहितंनतद्वधार्थमितिभावः १६ समुद्रस्यमध्यादुत्थितास्वयंसा
गरः समुद्राभिमानीदेवः दिवाकरस्थानपयावितिप्रोक्तः १७ जांबूनदंजांबूनदीप्रभवंसुवर्णम् १८

ए०वा०यु० जातरूपमयैः आकरजसुवर्णप्रचुरैस्तपनीयविभूषणैः तपनीयं तप्तकांचनमधिकवर्णं तद्रचितविभूषणैः आत्मजानां चरित्सिन्धुसम्बन्धिना
७६ नां रत्नैर्विभिर्भूषणोत्तमैश्च भूषितः २० एत एव विविधधातुभिर्मण्डितः शैल इव कालिकानि ... ल्लैर्मेघपटलसमानितो वातैः संकुलः मेघजाले
च कालिके त्यमरः २१ समुपक्रम्य समुपागम्य पूर्वमामंत्र्य हे रामेति प्रथमं संबोध्य प्रांजलिः सन् शरपाणिनं शरः पाणौ यस्य तं राघवं वक्ष्यमा

जातरूपमयैश्चैव तपनीयविभूषणैः आत्मजानां च रत्नानां भूषितो भूषणोत्तमैः २० धातु
भिर्मंडितः शैलो विविधैर्हिमवानिव आघूर्णिततरंगौघः कालिकानिलसंकुलः २१
गंगासिंधुप्रधानाभिरापगाभिः समावृतः सागरः समुपक्रम्य पूर्वमामंत्र्य वीर्यवान् उप
ब्रवीत्प्रांजलिर्वाक्यं राघवं शरपाणिनम् २२ पृथिवी वायुराकाशमापो ज्योतिश्च रा
घव स्वभावे सौम्य तिष्ठंति शाश्वतं मार्गमाश्रिताः २३

णमब्रवीदिति संबंधः २२ एतावत्कालमनागमने स्वीयम
गाधत्वमेव कारणमिति तु च पितुस्तामान्यतो भूतस्थितिमाह पृथिवीत्यादि श्लोकद्वयेन हे सौम्य प्रसन्नाननपृथिव्यादयः पंचपदार्थाः शा रामु०
श्वतं मार्गमनादिं व्रतं स्वं स्वरूपस्थितिप्रकारमाश्रिताः संतः स्वभावे काठिन्यतिर्यग्गमनावकाशप्रदानागाधत्वोर्ध्वज्वलनादिस्व ७६
भावे तिष्ठंति स्वस्वभावं नातिक्रामंतीत्यर्थः २३

ततस्मात्सर्वेषां पृथिव्यादीनां स्वस्वभावानतिलंघितत्वादहमप्यात्मयोऽव्ययः स्वप्राकाशवन श्रोत्तएव ममापिस्वभावः याधत्तुविकारोऽन्यथा
भावोभवेत् एतत्तेप्रवदामित्यर्थः २४ तर्हि माभूत्स्वभावहानिर्घनीभवनेनास्माकं मानिप्रयच्छेत्यापाशंक्यातपालेचरजंतुपीडाप्रसादतःप्रका
रांतरेणमार्गकरिष्यामीत्याह न कामादित्यादि सार्धश्लोकद्वयेन कामात्किंचिद्धत्त्वमितिनावादृत्रोभात्स्व कीयवस्तुपरित्यागात्तहि
ष्णुत्वाभ्दयाद्दंडभयाद्रागादनुरागाद्वा कथंचनस्वप्रत्नेनहेतुनावानत्तंभयेपीडाकरत्वादिति भावः पार्थिवात्मजेतितंबोधयनेनसर्वमर्था

तत्स्वभावो मम प्राप्येष पदात्माथोहमव्ययः विकारस्तु भवेद्याधएतत्ते शब्ददाम्यहम् २४
न कामान्न च लोभाद्वा न भयात्पार्थिवात्मज एतन्नकाकुत्स्थजं त्वं स्तंभयेपं कथंचन २५
विधास्येपेनगं तामिविषहिष्यप्यहं तथा त्वाहान प्रहरिष्यंति पावत्सेनान्तरिष्यति हरिणां त-
रणोत्तमं करिष्यामि प्रत्यायतनम् २६

दास्याम्यकोऽसीति द्योतयति २५ तर्हि कथं कार्यसिद्धिरहत्तत्राहविधास्य इति येनवध्यमानास्तेतु नागंतासितदानुकूल्यं विधास्ये करिष्या
मित्तेविषाहिष्यपीत्यर्थः उत्तमे वा यत्थ्ये यीयाह त्वाहा इति हरम्यहरिणांत्तरणोत्तरणानिमित्तं तथाप्यलं करिष्यामि यथापावत्सेनात्तरि
ष्यतितावद्ब्राह्मणानान्नप्रहरिष्यंति वध्यमानामार्गमपि सेतुं कुर्वित्यर्थः सत्ताद्विधाने भयात्मिहा चेति बोध्यम् २६ २६ ६६६६ ११०

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

तदा एवं भाषमाणे काले महावाणो ब्रह्मास्त्रसंयुतो वाणस्तस्य पीः २७ २८ उत्तरेणोत्तरेण वर्त्तमव्ययं ममोत्तरेण समन्त समीपदेशे द्रुमकुल्य इति ख्यातः प्राप्यतमः कश्चिद्देवकाशोमध्यदे शोत्ति यथा लोके ख्यातः प्राप्यत मथ्रमवान् तद्दिसर्गः २९ तत्र उग्रदर्शनक

तमब्रवीत्तदा रामः श्यामुमेव रुणालय ॥ अमोघोयं महावाणः कस्मिन्देशे निपात्यताम् २७

रामस्य वचनं श्रुत्वा तं च दृष्ट्वा महाशरम् महोदधिर्महातेजा राघवं वाक्यमब्रवीत् २८ उत्तरे

णावकाशोस्ति कश्चित्प्राप्यतमो मम द्रुमकुल्य इति ख्यातो लोके ख्यातो यथा भवान् २९

उग्रदर्शनकर्माणो बहवस्तत्र दस्यवः आभीरप्रमुखाः पापाः पिबंति सलिलं मम ३० तैर्न तत्स

स्पर्शनं पापं सहेयं पापकर्मभिः अमोघः क्रियतां राम तत्र प्रायेत्तमः ३१ तस्य तद्वच

नं श्रुत्वा सागरस्य महात्मनः मुमोच तं शरं दीप्तं वीरः सागरदर्शनात् ३२ तेन तं मरुकांतारं

पृथिव्यां वेल्ह विश्रुतम् निपातितः शरो यत्र वज्राशनि समप्रभः ३३ ३३ ३३

मणीयेषां तादृशा बहवो दस्यवः पापा आभीरप्रमुखाः संतित्ते मम सलिलं पिबंति ३० तैः पापकर्मभिः स्पर्शनं ममास्तित त्यायेन सहेयमतस्तत्र

त्रापममोघः शरोमुच्यतां ३१ सागरदर्शनात्सागरोपदेशादिसर्गः ३२ तेन रामेण दीप्ता शनि समप्रभः शरो यत्र पातितस्तत्स्थलं पृथिव्यां मरुकां

तारमितिविश्रुतंप्रथम ३३

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

व्रणमुखात् व्रणाख्यात् विकृतबाणात् ३४ उत्थितं व्रणकूपादिति शेषः समुद्रस्य जलमिव प्रभूतमिति शेषः दृश्यत इति संबन्धः ३५ तस्मादवदा
रणशब्दात् बाणपातेन हेतुना तद्देशस्य कुक्षिषु सरस्तटाकादिषु वर्तमानाः आपः तन्नीरयो दस्युजीवनसाधनीभूताः शोषयदामरु
ति शेषः ३६ पूर्वं रामबाणनिपातेन प्रसिद्ध्या विश्रुतत्वमुक्तं सम्प्रति विरोधिनिरासात् त्रिषु लोकेषु विख्यातत्वमाह विख्यातमि

ननाद च तदा तत्र वसुधा पार्वत्यपीडिता तस्माद्व्रणमुखात्तोयमुत्पपात रसातलम् ३४ स बभूव त
दा कूपो व्रण इत्येव विश्रुतः सततं चोत्थितं तोयं समुद्रस्येव दृश्यते ३५ अवदारणशब्दश्च
दारुणः समपद्यत तस्मात्तद्बाणपातेन त्वपः कुक्षिष्वशोषयत् विख्यातं त्रिषु लोकेषु मरुकां
तारमेव च ३६ शोषयित्वा तु तां कुक्षिं रामो दशरथात्मजः वरं तस्मै ददौ पश्चान्मरवेऽमरविक्रमः
३७ पशव्यश्चाल्परोगश्च फलमूलरसायुतः बहुस्नेहो बहुक्षीरः सुगन्धिर्विविधौषधिः ३८ ए
वमेतैश्च संयुक्तो बहुभिः संवृतो मरुः रामस्य वरदानाच्च शिवः पंथा बभूव ह ३९ सीताए माए

ति मरुकान्तारमेव चेति मरुकान्तारनाम्नैव प्रसिद्धमित्यर्थः ३६ कुक्षिं समुद्रव्यपदेशं मरुकान्तारं शोषयित्वा दशरथात्मजस्तस्मै मरवे मरुदेशाय
वरं ददौ ननु कथं मरुत्वप्रभावे भावयन्तो वरदानमित्यत आह अमरविक्रम इति ३७ पशव्यः पशुभ्यो हितः पशूपभोग्यबाल्वतृणादिसम
द्धस्पर्शः अल्परोगः आरोग्यवनस्थलः फलमूलरसैरयुतः घृतः स्नेहो दुग्धं विविधौषधिरित्यत्र बहुगोधिः ३८ एवमेतैरेवंप्रकारैर्भोगैः शि

वा॰ रा॰ यु॰ टी॰ ७३

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

तस्मिन् कुक्षौ दग्धे शोषितजले ४० पित्रा विश्वकर्मणा सर्ववस्तुनिर्माणसामर्थ्यं दत्तवरः विश्वकर्मणस्तव प्रीतिमान् त्वयि द्विषप
प्रीतिमान् तेन त्वन्नामस्मरणपूर्वकं त्वित्यर्थः स सारसागरेगाधता संपादकस्त्वन्नाम्नो मद्गाधतासंपादनमीषत्करमिति भावः ४१ कपंल
प्यगाधे करिष्यतीत्यत्राह तमिति तं तत्कृतसेतुं तावद्द्रोण धोमूत्वा धारयिष्यामि तावन्मात्रसहायेमया कृतसेतुनिर्माणं तस्येषत्कर

तस्मिन्दग्धे तदा कुक्षौ समुद्रः सरितांपतिः । राघवं सर्वशास्त्रज्ञमिदं वचनमब्रवीत् ४०
अयं सौम्य नलोनाम तनयो विश्वकर्मणः । पित्रा दत्तवरः श्रीमान्प्रीतिमान् विश्वकर्मणः
४१ एष सेतुं महोत्साहः करोतु मपि वानरः । तमहं धारयिष्यामि यथा ह्येष पिता तथा ४२
एवमुक्त्वोदधिर्नष्टः समुत्थाय नलस्तदा । अब्रवीद्वानरश्रेष्ठो वाक्यं रामं महाबलम् ४३
अहं सेतुं करिष्यामि विस्तीर्णे वरुणालये । पितुः सामर्थ्यमास्थाय तत्त्वमाह महोदधिः ४४
दंड एव परो लोके पुरुषस्येति मे मतिः । धिक्क्षमामकृतज्ञेषु सांत्वं दानमथापि वा ४५

मित्याह यथेति सेत्वादिनिर्माणे यथास्य पिता विश्वकर्मा तथा एष एव तस्मिन्कर्मणि समर्थ इत्यर्थः ४२ नष्टो ऽदर्शनं गतो तर्हितइत्यर्थः ।
ततो नलः समुत्थायाब्रवीत् ४३ तद्वाक्यमाह अहमिति पितुर्वरदानसामर्थ्यमास्थाय सेतुं करिष्यामि महोदधिश्च तत्त्वमेवाह इत्यर्थः
अथ किंचिद्वक्तुं लोकस्थितिमाह दंड एवेति पुरुषस्याकृतज्ञेऽषु दंड एव परो वशसाधक इति मे मतिः सतएवाकृतज्ञे षु क्षमा धिक् ४५

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

कुत एवं तत्राह अयं हीति यतोऽयं सागरोऽस्मत्पूर्वजैः सगरपुत्रैर्वर्धितो विश्वकृत तत्तत्पादं दण्डभयाद्वा सेतुकर्मदिदृक्षया राघवाय गाधं ददौ न तु
रामसंवर्धितत्वमात्रेण हनुमति तस्मै नाकद्वारेणाहृतोपचारः सागरः साक्षाद्दामचेद्दृष्टमागत्ते अप्रभु सुपायमविलम्बेन किमयं नोपदिष्ट
वानिति चेत्सत्यं मयापि विलम्बेन कि ममायं विलम्बं समसह मानो रामो मयि कोपाद्दत्तं संधास्यतीति तदा तत्प्रसादपित्वा संहिते नाभ्ये रामम

अयं हि सागरो भीमः सेतुकर्मदिदृक्षया ददौ दण्डभयाद्गाधं राघवाय महोदधिः ४६ मम मातुर्व
रो दत्तो मन्दरे विश्वकर्मणा मया तु सदृशः पुत्रस्तव देवि भविष्यति ४७ औरसस्तस्य पुत्रो
ऽहं सदृशो विश्वकर्मणा न चाप्यहं तु शक्नोमि अपृष्टो वक्तुमिहात्मनः ४८ समर्थ
श्चाप्यहं सेतुं कर्तुं वै वरुणालये काममद्यैव बध्नन्तु सेतुं वानरपुंगवाः ४९

प्रार्थूत घात्तपित्वाप पश्चाद्दुपकरिष्यामीति धियास्थित इति न दोषः ४६ स्वस्य पितृसदृशत्वेद शीपितृवरागमनप्रकारमाह मम मातु
रिति मया सदृशस्तव पुत्रो भविष्यति वरयो वरः ४७ औरसः पुत्रः मातुराल्लिंगानपूर्वं स्वतेजो निषेकद्वारा निर्मितः पुत्र इत्यर्थः अतोऽहं विश्वि
निर्मितो विश्वकर्मणा सदृशः नन्वेतत्सामर्थ्यं प्रागेव किं नावदत्तत्राह न चेति अपृष्टमात्मप्रशंसा वक्तुं नये ति शेषः ४८ यस्मात्समर्थोऽस्मि तस्माद
द्यैव मया सह वानराः सेतुं बध्नन्तु वेष्टनानुसारादी यता मिसर्थः ४९

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

विसृष्टाः नियुक्ताः उत्पेततुः उत्पेतुः ५० नगसंकाशाः तेन नगान् पादपान् बभंजुः सागरं सागरसमीपं प्रचकर्षुः प्रापुः वृक्षवंतः ५१ सालाश्वक

ततो विसृष्टा रामेण सर्वे ते हरिपुंगवाः उत्पेततुर्महारण्यं हृष्टाः शतसहस्रशः ५० ते नगान्न
गसंकाशाः शाखामृगगणर्षभाः बभंजुः पादपांस्तत्र प्रचकर्षुश्च सागरम् ५१ ते सालैश्चा
श्वकर्णैश्च धवैर्वंशैश्च वानराः कुटजैरर्जुनैस्तालैस्तिलकैस्तिमिशैरपि ५२ बिल्वकैः स
प्तपर्णैश्च कर्णिकारैश्च पुष्पितैः चूतैश्चाशोकवृक्षैश्च सागरं समपूरयन् ५३ समूलांश्च वि
मूलांश्च पादपान्हरिसत्तमाः इंद्रकेतूनिवोद्यम्य प्रजह्रुर्हरयस्तदा ५४ तालान्दाडिमगु
ल्मांश्च नारिकेलविभीतिकान् करीरान्बकुलान्निंबान्समाजह्रुरितस्ततः ५५ हस्तिमात्रा
न्महाकायाः पाषाणांश्च महाबलाः पर्वतांश्च समुत्पाट्य यंत्रैः परिवहंति च ५६ प्रक्षिप्य
माणैरचलैः सहसा जलमुद्धतम् समुत्ससर्प चाकाशमवासर्पत्ततः पुनः ५७ सीता

तीयोरवांतरजातिभेदः ५२ ५३ इंद्रकेतून् फलपुष्पादिना शोभावत्त्वादिंद्रध्वजस्तंभान् दृश्यानुन्मूल्योद्यम्योद्धृत्य प्रजह्रुः ५४
५५ यंत्रैर्यानयंत्रसाधनैः ५६ उद्धतमूर्ध्वं गतम् अधः पपात तत्पर्यः ५७

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

शतयोजनं व्यायतं तत्सूत्राणि प्रगृह्णंति सेतोरवक्रत्वायेति शेषः व्यायतं व्यायामः ५८ नदनदीपतेर्मध्ये शतयोजनमायतं दीर्घं महासेतुं नलश्चक्रे स सेतुर्वानरैर्घोरकर्मभिः युगपदनेकपर्वतानयनकर्मभिः क्रियते नलक्रियानुसारेणेति शेषः ५९ अन्ये दंडान्मानदंडान्सेतोर्के

समुद्रं क्षोभयामासुर्निपतंतः समंततः सूत्राण्यन्ये प्रगृह्णंति ह्यायतं शतयोजनम् ५८
नलश्चक्रे महासेतुं मध्ये नदनदीपतेः स तदा क्रियते सेतुर्वानरैर्घोरकर्मभिः ५९ दंडा
नन्ये प्रगृह्णंति विचिन्वंति तथापरे वानरैः शतशस्तत्र रामस्याज्ञापुरःसरैः ६० मेघाभैः
पर्वताग्रैश्च तृणैः काष्ठैर्बबंधिरे पुष्पिताग्रैश्च तरुभिः सेतुं बध्नंति वानराः ६१ पाषा
णांश्च गिरिप्रख्यान् गिरीणां शिखराणि च दृश्यंते परिधावंतो गृह्य वारणसन्निभाः ६२
शिलानां क्षिप्यमाणानां शैलानां तत्र पात्यताम् बभूव तुमुलः शब्दस्तदा तस्मिन्महोदधौ
६३

बंधनीयसेतुविभागार्थं प्रगृह्णंति समविषमभागान् परीक्ष्यंते विचिन्वंति श्रमात्तत्र तत्र छायाप्रसुलीन वानरानन्वेषयंति
वानरैर्बबंधिरे सेतुप्रदेशा इति शेषः नलबद्धसेतोरुपरि प्रदेशा वानरैः सज्जीकृता इत्यर्थः पुष्पिताग्रैरिति मार्दवार्थमुभयत्र वर्षा धुरत्यर्थः
६० ६१ एवं वानराणां पर्वतानयनं वर्णयति पाषाणानिति गृह्य गृहीत्वा ६२ पात्यतां पात्यमानानां तुमुलः संकुलः ६३ राम

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० वा० यु० ८० ६४ योजनानि चतुर्दश दैर्घ्यमत्र चतुर्दश योजनपरिमितः सेतुर्विरचित इत्यर्थः एवमन्यत्रापि द्रष्टव्यं ६५ ६६ ६७ ६८ पंचदिनैः शतयो
जनं बंधस्तु वेलेत्सामीप्ये सप्तम्यव्ययीभावः वेलासमीपपर्यन्तमधिकृत्येत्यर्थः ६९ अस्य पिता यथा यादृशः प्रतिवि

सहेलं हनुमान्कैलं पं पं विपुलं मासिपन् ततेकोटिवामेनस्त्वीलंजगृहे नलः ६४ कृतानि
प्रथमेनाह्ना योजनानि चतुर्दश प्रहृष्टैर्गजसंकाशैस्त्वरमाणैः प्लवंगमैः ६५ द्वितीयेन
तथैवाह्ना योजनानि तु विंशतिः कृतानि प्लवगैस्तूर्णं भीमकायैर्महाबलैः ६६ अह्ना तृती
येन तथा योजनानि तु सागरे त्वरमाणैर्महाकायैरेकविंशतिरेव च ६७ चतुर्थेन त
था चाह्ना द्वाविंशतिरथापि च योजनानि महावेगैः कृतानि त्वरितैस्ततः ६८ पंचमेन
तथा चाह्ना प्लवगैः क्षिप्रकारिभिः योजनानि त्रयोविंशत्सुवेलमधिकृत्य वै ६९ स वा
नरवरः श्रीमान् विश्वकर्मात्मजो बली बबंध सागरे सेतुं यथा चास्य पिता तथा ७० स नले
न कृतः सेतुः सागरे मकरालये शुशुभे सुभगः श्रीमान्स्वातीपथ इवांबरे ७१ ॥१॥ रामा० ८०

श्चिष्वत्तथाता दृशः शक्तिविशिष्ट इत्यर्थः ७० सुभगः शोभनमाहात्म्यवान् स्वातीपथः छायापथः यद्वा स्वातीवीथी साचाकाशे सूर्यादी
नां मध्यमे मार्गे मध्यमा वीथी तदुक्तं वायुपुराणे हस्तश्चित्रा तथा स्वाती मध्यवीथी मिः स्मृतेति ७१

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

७२ ७३ निर्विघ्नसेतुबंधेनजातंवानरहर्षंदर्शयति आप्लवंत इति आप्लवंतो दूरे पतंतो गर्जंतः प्लवंगमाश्च ददृशुः अचिंत्यमचिंत्यमविस्तर
नं असह्यं मानवत्तंबंधं विना केनाप्यशक्यकरणं अद्भुतं आश्चर्यकरं रोमहर्षणं पुलकावहं ७४ ७५ सागरे सेतुं बध्नंतः सेतुबंध

ततोदेवाःसगंधर्वाःसिद्धाश्चपरमर्षयः आगम्यगगनेतस्थुर्द्रष्टुकामास्तदद्भुतम ७२
दशयोजनविस्तीर्णंशतयोजनमायतम् ददृशुर्देवगंधर्वानलसेतुंसुदुष्करम ७३
आप्लवंतःप्लवंतश्चगर्जंतश्चप्लवंगमाः तमचिंत्यमसह्यंचह्यद्भुतंरोमहर्षणम ७४ ददृ
शुःसर्वभूतानिसागरेसेतुबंधनम् तानिकोटिसहस्राणिवानराणांमहौजसाम ७५ ब
ध्नंतःसागरेसेतुंजग्मुःपारंमहोदधेः ७६ विशालःसुकृतःश्रीमान्सुभूमिःसुसमाहितः अ
शोभतमहान्सेतुःसीमंतइवसागरे ७७ ततःपारेसमुद्रस्यगदापाणिर्विभीषणः परेषामभिघातार्थ
मतिष्ठत्सचिवैःसह ७८ सुग्रीवस्तुततःप्राहरामंसत्यपराक्रमम् हनूमंतंत्वमारोहअंगदंत्वथलक्ष्मण

सहकारितोवानरामहोदधेःपारंजग्मुः ७६ सुकृतः दृढबद्धः श्रीमान् ऋजुत्वेनकांतिमान् सुभूमिः निम्नोन्नतत्वरहितः सुसमाहि
तः निर्विवरः महान्सेतुः सागरे सीमंत इवाशोभत तेति सेबंधः ७७ परेषां राक्षसानाम ७८ ७९ ७९ १९ ७९ ७९

८१
युद्ध

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

१० वा० यु० विपुलः प्रतिबोजनः वैहायसौ गगनगामिनौ ८० सुग्रीवेण समन्वितो रामो धन्वी अग्रतो जगाम अग्रेन सुग्रीवस्य व्योममार्गगम
८१ नमर्थसिद्धं ८१ वैहायसगताः विहायसं वेधिगतं गमनं येषां ते तथोक्ताः सुपर्णा गरुडाः ८२ तरंती हरिवाहिनी महता घोषेण घोषं

॥ ध्रुवं हि विपुलो वीर सागरोऽयमकल्पवः वैहायसौ युवामेतौ वानरौ तारयिष्यतः ८० ॥ अग्रतस्तस्य
सैन्यस्य श्रीमान् रामः सलक्ष्मणः जगाम धन्वी धर्मात्मा सुग्रीवेण समन्वितः ८१ ॥ अन्ये मध्येन
रा गच्छंति पार्श्वतोऽन्ये प्लवंगमाः सलिले प्रपतंत्यन्ये मार्गमन्ये न लेभिरे केचिद्वैहायसगताः सुपर्णा इव
पुप्लुवुः ८२ घोषेण महता घोषं सागरस्य समुच्छ्रितम् भीममंतर्दधे भीमा तरंती हरिवाहिनी ८३
वानराणां हि सा तीर्णा वाहिनी नलसेतुना तीरे निविविशे राज्ञा बहुमूलफलोदके ८४ तदद्भुत
तं राघवकर्म दुष्करं समीक्ष्य देवाः सह सिद्धचारणैः उपेत्य रामं सहसा महर्षिभिः समभ्यषिंचन् सुशु
भैर्जलैः पृथक् ८५

ता सागरस्य भीमं घोषं मंतर्दधे तिरोहितवती ८३ सा वानराणां वाहिनी नलसेतुना तीर्णा सती बहु
बहुमूलफलोदके परतीरे राज्ञा सुग्रीवेण निविविशे निविष्टा प्रीतिस्थान्वयः ८४ दुष्करं रामादन्यैर्मनसापि कर्तुमशक्यं सुशु रा० ८१
भैर्जलैः नाना प्रांगमादि जलैः पृथक् प्रत्येकमभ्यषिंचन् ८५

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

ग्रभिषिच्याशीर्वादं कुर्वन्ति जयस्वेत्यादि इतीवेति अप्रतीवार्षिकं नरदेवसत्कृतं नरैर्देवैश्च सत्कृतं अपूजयन् प्रस्तुवन्ति सर्वाः स्तुति
हिं वाचिकी पूजा ३५ इति द्वाविंशः सर्गः २२ अथ रामस्य चिरं मिलन्ति तत्समरनिमित्तानि वक्ष्यामाह निमित्तानीति वक्ष्यमाणानि सर्वाः त
दा वसपकत्ताकामंदके निमित्तानेव शंसन्ति शुभाशुभफलोदयं तस्मादेतानि शास्त्रज्ञेराजा समुपलक्षयेदिति १ शीतोदकं फलवं

जयश्च शत्रून् नरदेव मेदिनीं ससागरां पालय चाप्रतीः समाः ॥ इतीव रामं नरदेवसत्कृतं शुभैर्वचोभिर्वि
विधैरपूजयन् ॥३५॥ इत्यार्षे श्रीमद्रामायणे लङ्काकारे द्वाविंशः सर्गः ॥२२॥ निमित्तानि निमित्तज्ञो
दृष्ट्वा लक्ष्मणपूर्वजः सौमित्रिं तं परिष्वज्य इदं वचनमब्रवीत् १ परिग्लानोदकं शीतं वनानि फ
लवन्ति च वल्लीघं सविभज्येमं व्यूहन्ति क्षेमलक्ष्मण २ लोकक्षयकरं भीमं भयं पश्याम्युपस्थि
तम् निर्वर्हणं प्रवीराणां ऋक्षवानररक्षसाम् ३ वाताश्च कलुषा वान्ति कंपते च वसुंधरा पर्वता
श्चाग्रिता वेपन्ते पतन्ति च महीरुहाः ४

नि वनानि च परिग्लानस्य प्राप्तिश्च वल्लीघं सविभज्य क्रूरा गोत्वा गोलांगूलवानरविभागं कृ
त्वा व्यूहन्ति तस्य गरुडादि व्यूहं कृत्वा तिष्ठामे सर्पः २ लोकक्षयकरं विशिष्य प्रवीराणां निर्वर्हणं विनाशार्कं भयं भयनिमित्तमुपस्थि
तं पश्यामि ३ कलुषा रजोव्याप्ता महीरुहाः पतन्ति अकस्मादिति शेषः ४

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० आ० उ० ८२ क्रव्यादसंकाशाः गृध्ररूपेणादित्यसदृशाः धूम्रवर्णाः प्रतत एव परुषाः परुषस्वनाः क्रूराः भयंकरा मेघाः शोणितबिंदुभिर्मिश्रमुदकं क्रूरं यथा तथा प्रवर्षंति ५ रक्तचंदनसंकाशा रक्तचंदनतुल्या मेघवती संध्या परमदारुणा भवतीति शेषः ज्वलतः आदित्यादेतदग्निमंडलं प्रपतति ६ दीनाः दीनाकृतयः पश्चादिशं सूर्यास्तमुखं विनर्दंति जनयंतः सूचयंतः ७ अप्रकाशो निष्प्रभः संतापयति सो ... किरणाः

मेघाः क्रव्यादसंकाशाः परुषाः परुषस्वनाः क्रूराः क्रूरं प्रवर्षंति मिश्रं शोणितविंदुभिः ५ रक्तचंदनसंकाशा संध्यापरमदारुणा ज्वलतः प्रपतत्येतदादित्यादग्निमंडलम् ६ दीना दीनस्वराः क्रूराः सर्वतो मृगपक्षिणः पश्चादिशं विनर्दंति जनयंतो महद्भयम् ७ रजन्यामप्रकाशस्तु संतापयति चंद्रमाः कृष्णरक्तांशुपर्यंतो लोकक्षय इवोदितः ८ ह्रस्वो रूक्षोऽप्रकाशश्च परिवेषः सुलोहितः आदित्ये विमले नीलं लक्ष्मणं दृश्यते ९ रजसा महता चापि नक्षत्राण्यावृतानि च युगांतमिव लोकानां पश्य शंसंति लक्ष्मण १०

लक्ष्म

तस्य कृष्णरक्तांशुपर्यंते पर्यंतः चंद्रमाः लोकक्षये इव उदितः
तथा चाह काश्यपः हिममंडलमध्यगतः ... पंक्तिमंडल इति ८ ह्रस्वत्वादिगुणकः परिवेषः आदित्ये दृश्यते नीलं लक्ष्म चंद्र इव
कलंक इव दृश्यत इत्यर्थः ९ महता रजसा ... नक्षत्राण्यावृतानि त्रिकाले इति शेषः लोकानां युगांतं प्रलयमिव शंसंति पश्य १० रामं० ८२

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

सुमहाभयान्महाभयजनकान्नादान् ११ प्रधुनाह ग्रृध्रमाननिमित्तानां फलमाह शैलैरित्यादिना १२ १३ रामो जनरमतो रामः प्रतः
प्रतस्थे इत्युत्साहातिशयोक्तिः प्रभुः समर्थः १४ निश्चिताः निश्चयवंतः १५ धृतानां धैर्यवतां कर्मचेष्टामिर्युद्धकर्मविषयचेष्टामित्युतोषे

काकाः श्येनास्तथा नीचैर्गृध्राः परिपतंति च शिवाश्चाप्यशुभान्नादान्नदंति सुमहाभयान्
११ शैलैः शूलैश्च खड्गैश्च विमुक्तैः कपिराक्षसैः भविष्यत्यावृता भूमिर्मांसशोणितकर्द-
मा १२ क्षिप्रमद्यैव दुर्धर्षां पुरीं रावणपालिताम् अभियाम जवेनैव सर्वैर्हरिभिरावृताः १३
इत्येवमुक्त्वा धन्वी स रामः संग्राम धर्षणः प्रतस्थे पुरतो रामो लंकामभिमुखो विभुः १४
सविभीषणसुग्रीवाः सर्वे ते वानरर्षभाः प्रतस्थिरे विनर्दंतो निश्चिता द्विषतां वधे १५
राघवस्याप्रियार्थं तु धृतानां वीर्यशालिनाम् हरीणां कर्मचेष्टाभिस्तुतोष रघुनंदनः १६
इत्यार्षे श्रीमद्रामायणे युद्धकांडे त्रयोविंशः सर्गः॥२३॥ सा वीरसमितीराज्ञा विरराज व्यवस्थिता
राक्षसानां शुभा मन्दा पौर्णमासीव शारदी १

सान्वयः १६ इति त्रयोविंशः सर्गः २३ सा वीराणां समितिः सभा राज्ञा रामे
ण व्यवस्थिता कृतव्यूहा विरराज शुभमन्दा शारदी पौर्णिमासी शशिनेव १

रा० वा० यु० तेन सागरवर्चसा सागरनिभेन बलौघेन पीड्यमाना वसुंधरा सेनाया वेगेन प्रचचाल वित्रस्ता चेत्यन्वयः २ ततः सेनानिवेशनानंतरं निः
८३ कोलाहलेनेतीस्पर्धः काननौकसः लंकाया मा क्रुष्टं हेतना क्रोशं कोलाहलं भेरीमृदंगानां संघुष्टं घोषं च तुमुलं संकुलं तेनोम

प्रचचाल च वेगेन विस्त्रस्ता च वसुंधरा पीड्यमाना बलौघेन तेन सागरवर्चसा २ ततः शु
श्रुवुराक्रुष्टं लंकायां काननौकसः भेरीमृदंगसंघुष्टं तुमुलं रोमहर्षणम् ३ बभूवुस्तेन
घोषेण संहृष्टा हरियूथपाः अमृष्यमाणास्तं घोषं विनेदुर्घोषवत्तरम् ४ राक्षसास्तु
प्लवंगानां शुश्रुवुस्तेऽपि गर्जितम् नर्दतामिव दृप्तानां मेघानामंबरे स्वनम् ५ दृष्ट्वा दाशर
थिर्लंकां चित्रध्वजपताकिनीम् जगाम मनसा सीतां दूयमानेन चेतसा ६ अत्र सा मृग
शावाक्षी रावणेनोपरुध्यते अभिभूता ग्रहेणेव लोहितांगेन रोहिणी ७ सीता

महर्षीणां पक्षात् वानराः शुश्रुवुरित्यर्थः ३ घोषवत्तरं राक्षसघोषादधिकघोषवत् ४ अंबरे मेघानां स्वनमिव तेऽपि राक्षसाः प्लवगानां तद्गी रा०म०
र्जितं शुश्रुवुः ५ दूयमानेन दुःखितेन चेतसा उपलक्षितो दाशरथिर्लंकां दृष्ट्वा सीतां मनसा जगाम सस्मारेत्यर्थः ६ स्मरणप्रकार ८३
मेवाह अत्रेति उपरुध्यते उपरुद्धा तिष्ठति लोहितांगो ग्रहः ७

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

आत्मनस्तत्कालहितं वक्ष्यमाणं वचनमुवाच ८ आलिखंतीमिवेत्यादि लंकावर्णनं वाक्यस्य तत्कालहितत्वं नास्ति तथापि एतद्वाक्यानंतरमंगदं सह नीलेनेत्यादिना तत्तत्कालहितेन सेनारक्षणनियोगवाक्येन साहचर्यादालिखंतीमिवेत्यादि सर्ववाक्यं तत्कालहितमिति मंतव्यं च आलिखंतीमिव प्रांतौ उच्छ्रितां उन्नतां नगाग्रे त्रिकूटशिखरे ९ लंकां बहुभिर्विमानैः सप्तभूमिकप्रसादैः संकीर्णां नि

दीर्घमुष्णं च निश्वस्य समुद्वीक्ष्य च लक्ष्मणम् उवाच वचनं वीरस्तत्कालहितमात्मनः ८

२५ आलिखंतमिवाकाशमुच्छ्रितापैर्लक्ष्मण मनसेव कृतां लंकां नगाग्रे विश्वकर्मणा ९ वि

मानैर्बहुभिर्लंकां संकीर्णामभि विराजते विष्णोः पदमिवाकाशं छादितं पांडुभिर्घनैः १० पु

ष्पितैः शोभिता लंका वनैश्चैत्ररथोपमैः नानापतगसंघुष्टैः फलपुष्पोपगैः शुभैः ११ प

पुपमत्तविहंगानि पलीनभ्रमराणि च कोकिलाकुलखंडानि दोधवीति शिवो निलः १२

विराजते तत्र शोभमानां पांडुभिर्घनैः छादितं संकीर्णां विष्णोर्व्यापनशीलस्य वायुमयस्य ब्रह्मणः पदं प्रचारस्थानमाकाशमिव १० फलपुष्पोपगैः फलभूतानि पुष्पाणि येषां ते फलपुष्पाः मदिरेकाघातमिशम्पत्तयन्ति याग्रतः पुष्पितैरिसेनेन पौनरुक्त्यं ११ कोकिलैराकुलं खंडं वृक्षसमूहो येषु तानि वनानि दोधवीति पुनः पुनः कंपयति १२

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा० वा० यु० विभजन् व्यभजत् १३ च लेखं बलमादाय सह बलं गृहीत्वा नीलेन सह अंगद उरसि उच्यमान पुरस्थ व्यूहस्य उरसि तिष्ठेदिति कपिसेनां प्रशास्य १४
८४ वानरौघसमावृत ऋषभो वानरवाहिन्या दक्षिणं पार्श्वमाश्रित्य तिष्ठेदित्यन्वयः १५ गंधहस्ती मत्तो गजः १६ युक्तः सावधानः १७ ऋक्षो।

यति दाशरथी रामो लक्ष्मणं समभाषत बलं च तत्र विभजन् शास्त्रदृष्टेन कर्मणा १३ प्रशास्य कपि
सेनां तां बलमादाय वीर्यवान् अंगदः सह नीलेन तिष्ठेदुरसि दुर्जयः १४ तिष्ठेद्वानरवाहिन्या
वानरौघसमावृतः आश्रितो दक्षिणं पार्श्वम् ऋषभो नाम वानरः १५ गंधहस्तीव दुर्धर्षस्तरस्वी गंध
मादनः तिष्ठेद्वानरवाहिन्याः सव्यं पार्श्वम् अधिष्ठितः १६ मूर्ध्नि स्थास्याम्यहं युक्तो लक्ष्मणेन सम
न्वितः १७ जाम्बवांश्च सुषेणश्च वेगदर्शी च वानरः ऋक्षमुख्यो महात्मानः कुक्षिं रक्षन्तु ते
त्रयः १८ जघनं कपिसेनायाः कपिराजोऽभिरक्षतु पश्चार्धमिव लोकस्य प्रचेतास्तेजसावृतः १९
सुविभक्तमहाव्यूहा महावानररक्षिता अनीकिनी सा विबभौ यथा द्यौः साभ्रसंप्लवा २०

जाम्बवान् सुषेणो वेगदर्शी च ऋक्षमुख्यो ते त्रयो महात्मानो महाबुद्धयः कुक्षिं कुक्षिस्थानं १८ जघनं पश्चार्धं कपिराजः सुग्रीवः लोकस्य भूर्लोकस्य पश्चिमदिशं तेजसावृतः प्र रा० वा०
चेता इव १९ सुविभक्तमहाव्यूहा सुष्ठु कृता गरुडव्यूहा उत्तरत्र शार्दूलवचनेन गरुडव्यूहमाश्रित्येति वक्ष्यमाणत्वात् साभ्रसंप्लवा अभ्रसंचारसहिता २० ८४

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

विमर्दयिषवः मर्दयितुमिच्छवः आसेदुः आसादयितुमुद्युक्ताः २१ आरवैरिति आरवैः विकीर्णैश्चूर्णयाम इति मनांसि दधिरे निश्चयं चक्रुरित्यर्थः २२ शुक एष विमुच्यतामिति पूर्वं मुच्यतां दूत आगात् इत्यत्रोताडनादि दुःखान्मुच्यतामित्येवार्थः तेन वध्यात्यापित इत्यवगन्तव्यम्

प्रगृह्य गिरिशृङ्गाणि महतश्च महीरुहान् आसेदुर्वानरा लंकां विमर्दयिषवो रणे २१ आरवै
रैर्विकीर्णमैर्नालंकां मुष्टिभिरेव वा इति स्म दधिरे सर्वे मनांसि हरिपुंगवाः २२ ततो रामो महा
तेजाः सुग्रीवमिदमब्रवीत् सुविभक्तानि सैन्यानि शुकः एष विमुच्यताम् २३ रामस्य तु व
चः श्रुत्वा वानरेन्द्रो महाबलः मोचयामास तं दूतं शुकं रामस्य शासनात् २४ मोचितो रामवाक्ये
न वानरैश्चातिपीडितः शुकः परमसंत्रस्तो रक्षोधिपमुपागमत् २५ रावणः प्रहसन्नेव शुकं
वाक्यमुवाच ह किमिमौ ते सितौ पक्षौ लूनपक्षश्च दृश्यसे कच्चिन्नानेकचित्तानां तेषां त्वं वशमा
गतः २६ ततः स भयसंविग्नस्तेन राज्ञाभिचोदितः वचनं प्रत्युवाचेदं राक्षसाधिपमुत्तमम् २७

२३ २४ २५ प्रहसन्नेव लूनपक्षत्वादि विकृताकारं दृष्ट्वा प्रहसन् इमौ ते पक्षौ सितौ बद्धौ किं अपि तु एव लूनपक्षश्च दृश्यसे अनेकचित्ता
नां चलचित्तानां वानराणां वशमागतः कच्चिदिति संबन्धः २६ भयसंविग्नः भयेन संभ्रान्तः २७

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

सागरस्योत्तरे तीरे इत्यस्य वाच्यं वानरा याति एव वानरान्सांत्वयन् ऋष्यमृकं प्राप्य वचनं यथा संदेशं तथा प्राप्तुं वमितिसंबंधः २८ प्रहृष्टं तथा ब्रुव
लो कुंपदो भागि छिन्नं मुष्टिमिर्हितुं चारध्वः २९ ते परिभवं कर्त्तारः संभाषितुं न शक्याः तं शश्रः मिथः संवादः पत्तः प्र हृत्ये सादि ३० व

सागरस्योत्तरे तीरे ब्रुवं स्तो वचनं तथा यथा संदेशमक्लिष्टं स्तोत्वयमृग्लप्लवगाधिप २८ कु
द्धैस्तैरहमत्युत्पद्द्य मात्रैः प्लवंगमैः महोत्तोप्यविचारध्वोहंतुं लोमुचमुष्टिभिः २९ नैवसं
भाषितुं शक्याः संप्रश्नोत्र न लभ्यते प्रकृत्या कोपनास्तीक्ष्णा वानरा वानराधिप ३० स च हं
ता विराधस्य कबंधस्य खरस्य च सुग्रीव सहितो रामः सीतायाः पदमागतः ३१ स कृत्वा सा
गरे सेतुं तीर्त्वा च लवणोदधिम् एवं रक्षांसि निर्धूय धन्वीति छति राघवः ३२ ऋक्ष वाना
र संघानामनीकानि सहस्रशः गिरिमेघनिकाशानां छादयंति वसुंधराम् ३३ राक्षसानां बलौ
घस्य वानरेंद्र बलस्य च नैतयोर्विद्यते संधिर्देवदानवयोरिव ३४ दयमाता सीता प्रदानस्य प्राप्यामि ध्येसी

ता प्रदानस्य श्रेष्ठ त्वं दर्शयितुं प्रयाय राक्षसं वर्तीयन् विसाय्य माहस्त चेति विराधादिहंतेत्यनेन तवापि हंतेति सूचितं पदं स्यात् मन्विष्यागतः ३१ रक्षांसि निर्धूय तत्तीर्त्वा एव इत्यति सन्निहितत्वमुच्यते ३२ संघानामनीकानेन संघ शब्दो न्यां महानीकत्वं सूचितं ३३ संधिः संधा

सुं० का० ५४
राम०
८५

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

पुरंध्रायांति स्त्रीप्राया स्यंति यावत्सु रानिपातयोर्लिङ् इति भविष्यति लिङ् एकतरं वध्यमानयोरन्यतरं तदेवाह सीतामिति ३५ ३६ सर्वलोकभया
त् सर्वलोकेभ्यो भयात् यद्वा सर्वस्मादन्यस्मात् लोकस्य भये प्राप्तेऽपीत्यर्थः ३७ समभिधावंति धाविष्यंति ३८ तूणीप्रायैः शिरूणन्तस्मन्भावे

पुरंध्राकारमायांति दिष्टमेकतरं कुरु सीतां चास्मै प्रयच्छाशु सुयुद्धं वा प्रदीयताम् ३५ श्रु
त्वैवं वचनं श्रुत्वा रावणो वाक्यमब्रवीत् रोषतरक्तनयनो निर्दहन्निव चक्षुषा ३६ यदि मां शक्तिपु
धेरन्देवगांधर्वदानवाः नैव सीतां प्रदास्यामि सर्वलोकभयादपि ३७ कदा समभिधावंति रा
घवं मामकाः शराः वसंते पुष्पितं मत्ता भ्रमरा इव पादपम् ३८ कदा तूणीशयैर्दीप्तैः शतशः
कार्मुकच्युतैः शरैरादीपयाम्येनमुल्काभिरिव कुंजरम् ३९ तच्चास्य बलमादास्ये बलेन
महतावृतः ज्योतिषामिव सर्वेषां प्रभामिव दिवाकरः ४० सागरस्येव मे वेगो मारुतस्येव मे बलम्
न च दाशरथिर्वेद तेन मां योद्धुमिच्छति ४१

न केवलं तूणीशयैरित्यर्थः उल्काभिर्निर्गतज्वालाकाष्ठैः कुंजरमभिद्रावयंतीति प्रसिद्धिः ३९ अस्य रामस्य बलमादास्ये तिरस्करिष्यामि
४० न वेद न जानाति ४१

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा० वा० यु० पशुपतिद्वयवान् ४२ पुरा पूर्वं मम वीर्यं न जानाति नाज्ञासीत् इतः परे ज्ञास्यतीत्यर्थः ४२ अप्रपक पव्याजेन युद्धस्य मनोविनोदक
८६ रत्वमाह मम चापेति श्लोकद्वयमेकं वाक्यं ममाहितवाहिनीमेव महारंगे विपुलं रङ्गस्थानं वा अवगाह्य प्रविश्य शरैरेव कोणैर्वीणा
वादनदण्डैः प्रवादितां ज्याप्रकृष्टतुमुलां ज्याप्रकृष्टे तुमुलः प्राचुर्यो यस्यास्तां आर्त्तभीतप्रवदनं तत्स्वन उपलक्ष्यते आर्त्तभीतानां र

न मे तूणीशयान्बाणान्सविषानिव पन्नगान् ॥ रामः पशुपतिसंग्रामे तेन मां योद्धुमिच्छति ॥ ४३ ॥ न
जानाति पुरा वीर्यं मम युद्धे स राघवः ॥ मम चापमयीं वीणां शरकोणप्रवादिताम् ॥ ज्याप्रकृष्टतु
तुमुलां घोरामार्त्तभीतमहास्वनाम् ॥ ४४ ॥ नाराचतलसन्नादां तां ममाहितवाहिनीम् ॥ अव
गाह्य महारंगे वादयिष्याम्यहं रणे ॥ ४५ ॥ न वासवेनापि सहस्रचक्षुषा यथास्मि शक्यो वरुणेन
वा पुनः ॥ यमेन वा धर्षयितुं शराग्निना महाहवे वैश्रवणेन वा स्वयम् ॥ ४६ ॥ इत्यार्षे श्रीमद्रा
मायणे युद्धकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

नेरव महास्वनो यस्यास्तां नाराचतलस्वन एव सन्नादो यस्यास्तां घोराम रा०यु०
न्येवीदयितुम् शक्यां मम चापमयीं वीणां वादयिष्यामीत्यन्वयः तुमुलं महास्वनं सन्नाद शब्दैः वीणापामद्रुमे ध्वानतारः स्वरा उ ८६
च्यते तेन प्रयोगः सूचिताः ४४ ४५ न शक्यो जेतुमिति शेषः ४६ इति चतुर्विंशः सर्गः २४

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

ग्मे सवध्दे सागरे तीर्णे स्वति एवं रावणः शुकसारणाख्यावमात्यावब्रवीदिति सं वंधः शुक इति शुकः पूर्वस्मादन्यः सारणसहचर्यात् १ वानरं बलं
दुस्तरं सागरं तीर्णमिति एतेनासागरे सेतुवंधनं रूनं कृतमिति चेत्तद्भयमप्यभूतपूर्वम् २ तं रामेण कृतं समुद्रे सेतुवंधनं कपंचनाप्रा
प्तपूरुषोदितं दत्वेपि न श्रद्दध्यां समुद्रस्य विगाढदरत्वेन जीवद्भातिरप्राक्यं वंधनत्वादित्याशयः अपापि तान्वुद्धिसिद्धं वानरं वलं तु
मया पृथु तत्तु नासंख्येयं संख्यायास्तात्वमिसर्थः ३ भवंतावित्यादिश्लोकचतुष्टयमेकान्वयं तस्माद्भवंतावनुपलक्षितौ वानरसैन्यं

सबद्धे सागरे तीर्णे रामे दशरथात्मजे अमात्यौ रावणः श्रीमानब्रवीच्छुकसारणौ १ समग्रं
सागरं तीर्णं दुस्तरं वानरं बलम् अभूतपूर्वं रामेण सागरे सेतुवंधनम् २ सागरे सेतुवंधं
तं न श्रद्दध्यां कथंचन अवश्यं चापि संख्येयं तन्मया वानरं वलम् ३ भवंतौ वानरं
सैन्यं प्रविश्यानुपलक्षितौ परिमाणं च वीर्यं च ये च मुख्याः प्लवंगमाः ४ तीता राम

प्रविश्य परिमाणं वानराणामियत्तां तेषां वीर्यं वलपरिच्छेदं ये प्लवंगमा मुख्याः प्रधानभूतास्तान् ये रामस्य सुग्रीवस्य च हे संमताः मंत्रिणः
ये पूर्वमभिवर्तन्ते नाशीरभयः ये च वत्तु वः शूराः प्लवंगमास्तान् सर्वान् सागरं यानि ते तलिलेवाराशौ वलेन वधाजते समुद्रे सेतुर्यथा वद्ध
स्तं प्रकारं ते पांसि वेश्मानि वानराणां स्वयं वसतां ये कर्तव्यविषयनिश्चयं वीर्यं वलं प्रहरणान्यायुधानि लक्ष्मणस्य व्यवसायं वलं च तत्त्व
तः पारमार्थिन्येन ज्ञातुमर्हथ इति सं वंधः ४

६३ यु० का०

टी० वा० यु० ५ ६ ७ ८ ९ नाध्यगच्छेतां नाप्राप्नुवातां १० तत्र हेतुमाह तत्स्थितमित्यादिश्लोकद्वयेन निर्दरेषु दलितपर्वतप्रदेशेषु उपवने ग्रामेष्वारा
८७

मंत्रिणो ये च रामस्य सुग्रीवस्य च संमताः ये पूर्वमभिवर्तंते ये च शूराः प्लवंगमाः ५ स च सेतुर्यथा बद्धः सागरे सलिलार्णवे निविष्टाश्च यथा ते वै वानराणां महात्मनाम् ६ एमस्य व्यवसायं च वीर्यं प्रहरणानि च लक्ष्मणस्य च वीरस्य तत्त्वतो ज्ञातुमर्हथः ७ कश्च सेनापतिस्तेषां वानराणां महौजसाम् एतज्ज्ञात्वा यथातत्त्वं शीघ्रमागंतुमर्हथः ८ इति प्रतिसमादिष्टौ राक्षसौ शुकसारणौ हरिरूपधरौ वीरौ प्रविष्टौ वानरं बलम् ९ ततस्तद्वानरं सैन्यमचिंत्यं लोमहर्षणम् संख्यातुं नाध्यगच्छेतां तदा तौ शुकसारणौ १० तत्स्थितं पर्वताग्रेषु निर्दरेषु गुहासु च समुद्रस्य च तीरेषु वनेषूपवनेषु च ११ तरमाणं च तीर्णं च तर्तुकामं च सर्वशः निविष्टं निविशच्चैव भीमनादं महाबलम् तद्बलार्णवमक्षोभ्यं ददृशाते निशाचरौ १३ तौ ददर्श महातेजाः प्रतिच्छन्नौ विभीषणः आचचक्षेऽथ रामाय गृहीत्वा शुकसारणौ १४

मः स्यादुपवनमित्यमरः ११ १२ ददृशाते ददृशतुः १३ राम०
८७
प्रथ विभीषणस्तौ वानररूपौ प्रतिच्छन्नौ ददर्श तौ गृहीत्वा पश्चाद्रामाय चचक्षे इत्यपेक्षितपूरणेनान्वयः १४

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

१५ तौ रामं दृष्ट्वा व्यथितौ जीविते निराशौ चाभूतां १६ रावणप्रहितौ तत्प्रेषितौ १७ प्रहसन् रावणबुद्धिमंत्रस्मरणात् प्रहासः सर्वभूतहिते
रतः रिपूणामपि वत्सलः १८ वयमिति सुग्रीवादिसहितस्य स्वस्य निर्देशः यथोक्तं रावणोक्तमनतिक्रम्य कार्यं कृतं चेत् छंदतः स्वे

तस्यैतौ राक्षसेंद्रस्य मंत्रिणौ शुक सारणौ लंकायाः समनुप्राप्तौ चारौ परपुरंजय १५ तौ दृष्ट्वा
व्यथितौ रामं निराशौ जीविते तदा कृतांजलिपुटौ भीतौ वचनं चेदमूचतुः १६ आवामिहा
गतौ सौम्य रावणप्रहितावुभौ परिज्ञातुं बलं कृत्स्नं तवेदं रघुनंदन १७ तयोस्तद्वचनं श्रु
त्वा रामो दशरथात्मजः अब्रवीत्प्रहसन्वाक्यं सर्वभूतहिते रतः १८ यदि दृष्टं बलं कृत्स्नं वयं
वा सुसमीक्षिताः यथोक्तं वा कृतं कार्यं छंदतः प्रतिगम्यताम् १९ अथ किंचिददृष्टं वा भू
यस्तद्द्रष्टुमर्हथ विभीषणो वा कार्त्स्न्येन भूयः संदर्शयिष्यति २० न चात्मग्रहणं प्राप्य भेत
व्यं जीवितं प्रति न्यस्तशस्त्रौ गृहीतौ वा न दूतौ वधमर्हतः २१ प्रच्छन्नौ च विमुंचैमौ चारौ रात्रि
चरावुभौ शत्रुपक्षस्य सततं विभीषण विकर्षितौ २२

च्छया १९ अथेति पदांतरे विभीषणो वा यस्माद्द्विप्रि स्थि
न वर्तांश्च यमिति श्लोकः २० २१ विभीषणं प्रत्याह प्रच्छन्नाविति हे विभीषण प्रच्छन्नौ चमूढतया रंध्रान्वेषिणावपि शत्रुपक्षस्य रावणस्य त्रौ
दतस्य सुग्रीवादेः सततं विकर्षितौ भेदादिप्रणवपीडितौ रात्रिचरौ विमुंचेत्यन्वयः २२

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

सारहप्रविश्ये

रा० वा० यु० ८८ पुनश्चरणैर्ग्रासादिना २३ यथाकामं यथेष्टं २४ श्वः काले प्रातःकाले २५ वज्रवानभ्यस्तवज्रः २६ प्रतिनंद्य अभिनंद्य २७ मुक्तौ आवा
मिति शेषः धर्मात्मना दूतवधमनिच्छतेति शेषः २८ एकस्थानगता इत्यादि श्लोकत्रयमेकं वाक्यं यत्र लंकामर्दनरूपकार्ये एकस्या

प्रविशिष्य पुरीं लंकां भवद्भ्यां धनदानुजः । वक्तव्यो रक्षसां राजा यथोक्तं वचनान्मम २३ यद्
त्वं च समाक्षिप्य सीतां मे हृतवानसि । तद्दर्शय यथाकामं ससैन्यः सहबांधवः २४ श्वः काले नगरीं
लंकां सप्राकारां सतोरणाम् । रक्षसां च बलं पश्य शरैर्विध्वंसितं मया २५ घोरं रोषमहं मोक्ष्ये ससै
न्ये त्वयि रावण । श्वः काले वज्रवान्वज्रं दानवेष्विव वासवः २६ इति श्रुत्वा समादिष्टौ राक्षसौ शु
कसारणौ । जयेति प्रतिनंद्यैनं राघवं धर्मवत्सलम् । आगम्य नगरीं लंकामब्रूतां राक्षसाधिपम् २७
विभीषणगृहीतौ तु वधार्हौ राक्षसेश्वर । दृष्ट्वा धर्मात्मना मुक्तौ रामेणामिततेजसा २८ एकस्थान
गता यत्र चत्वारः पुरुषर्षभाः । लोकपालसमाः शूराः कृतास्त्रा दृढविक्रमाः २९ सीतां राम सीता

नगताणकत्रमिलिताहत्त्रकार्यविमयेसर्वैवानराहत्तिष्ठतु उक्तविप्रोषणारामादयश्चत्वार एव लंकामुत्पाट्य संक्रामयितुंश्व

पद्मवेषु गुणासमिवंवधः २९

एमं० ८८

३०।३१ यादृशो नामस्य रूपं यादृशानि प्रहरणानि तानि द्विमर्शेनस्ते एक एव वधिष्यतीति मन्यावहे इत्यर्थः ३२ नन्वस्महायशूरोपि रामः सेनाहननाद्युत्साहः स्यादतस्तत्क्रियतां तत्राह रामेति सुग्रीवस्य पक्षे स्थितं सुग्रीवांगं हनुमदादिसहितं तामाक्षपरिच्छिन्ना हरिवाहिनी कपिसेना रामेण लक्ष्मणेन च गुप्ता सती दुर्धर्षितत एव भूवन केवलं मनुष्यादिभिः किंतु सुरैरपि न केवलं सुरैरेव किंतु सुरासुरैरपि तिध्वंविहायह्नतसौ

रामो दाशरथिः श्रीमांल्लक्ष्मणश्च विभीषणः सुग्रीवश्च महातेजा महेंद्रसमविक्रमः ३० एते शक्ताः पुरीं लंकां सप्राकारां सतोरणाम् उत्पाट्य संक्रामयितुं सर्वे तिष्ठंतु वानराः ३१ यादृशं तस्य रामस्य रूपं प्रहरणानि च वधिष्यति पुरीं लंकामेकस्तिष्ठंतु ते त्रयः ३२ रामलक्ष्मणगुप्ता सा सुग्रीवेण च वाहिनी बभूव दुर्धर्षतरा सर्वैरपि सुरासुरैः ३३ प्रहृष्टयोधा ध्वजिनी महात्मनां वनौकसां संप्रति योद्धुमिच्छताम् अलं विरोधेन शमो विधीयतां प्रदीयतां दाशरथाय मैथिली ३४ सीताराम

हार्दैरपि न केवलमनायकैस्तैः सेंद्रैरपि त्वाचातो विहाय नायकास्तानुवर्तिभिरित्यर्थः ३३ महात्मनां दृढमनस्कानां संप्रति सद्य एव युद्धमिच्छतां वनौकसां ध्वजिनी प्रहृष्टरूपा हर्षद्योतकाकारयुक्ता भवतीति शेषः अतस्त्वद्विरोधेनालं शमः संधिर्विधीयतां दाशरथाय मैथिली

टी॰ यु॰ दीपवतामिमतं सं॰ ३६

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

इति पंचविंशः सर्गः ॥२५॥ अक्लीबम् अकातरं प्रत्यभाषत प्रतिनिर्दिदेश इत्यर्थः १ सर्वलोकभयात् सर्वलोकेभ्यो भयात् २३ सपत्नः शत्रुः ४ बहुतालसमु

इत्यार्षे श्रीमद्रामायणे युद्धकाण्डे पंचविंशः सर्गः ॥२५॥ तद्वचः पथ्यमक्लीबं सारणेनाभिभाषितम्
निशम्य रावणो राजा प्रत्यभाषत सारणम् १ यदि मामभियुञ्जीरन्देवगन्धर्वदानवाः नैव सीतामहं दद्यां
सर्वलोकभयादपि २ त्वं तु सौम्य परित्रस्तो हरिभिः पीडितो भृशम् प्रतिप्रदानमद्यैव सीतायाः सा
धु मन्यसे ३ को हि नाम सपत्नो मां समरे जेतुमर्हति इत्युक्त्वा परुषं वाक्यं रावणो राक्षसाधिपः ४
आरुरोह ततः श्रीमान्प्रासादं हिमपाण्डुरम् बहुतालसमुत्सेधं रावणोऽथ दिदृक्षया ५ ताभ्यां चराभ्यां
सहितो रावणः क्रोधमूर्छितः पश्यमानः समुद्रं च पर्वतांश्च वनानि च ६ ददर्श पृथिवीदेशं सुसं
पूर्णं प्लवंगमैः तदपारमसह्यं च वानराणां महाबलम् ७ सीतारामाभ्यां नमः सीता राम

त्सेधं स्वनेकतालप्रमाणोन्नतं दिदृक्षया वानरबलदर्शनेच्छया ५ चराभ्यां चाराभ्यां क्रोधमूर्छितः क्रोधेन व्याप्तः पश्यमानः पश्यन् राम०
६ पृथिवीदेशं प्रांशुकूटावधिप्रदेशं अपारमुत्तरावधिरहितं वानराणां महाबलं च ददर्शेत्यन्वयः ७ ८१

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

एषामितिनिर्द्धारणोषष्ठी ८ केषांशृणोतिवचनमितिशेषः यूथपयूथपाः महाप्रधानाः ९ वचनंउत्तरंआचचक्षेइत्यन्वयः १० त्रिभिर्नीलं
वर्णयतिएषइतिसहस्राणांशतेनलक्षेणेत्यर्थः ११ सुग्रीवस्यबलाग्रेतिष्ठतिएषनीलइत्यन्वयः १२ १३ बाहूप्रगृह्यइत्यारभ्यत्रिभिरङ्गदं

प्रशान्तोवध्यतांराजापरिपप्रच्छसारणम् एषांकेवानरामुख्याःकेशूराःकेमहाबलाः ८ के
पूर्वमभिवर्तन्तेमहोत्साहाःसमन्ततः केषांशृणोतिसुग्रीवःकेवायूथपयूथपाः ९ सारणाचक्ष्व
मेसर्वंकेप्रधानाःप्लवंगमाः ९ सारणोराक्षसेन्द्रस्यवचनंपरिपृच्छतः आचचक्षेथमुख्यज्ञोमुख्या
स्तत्रवनौकसः १० एषयोभिमुखोलंकांनर्द्दंस्तिष्ठतिवानरः यूथपानांसहस्राणांशतेनपरि
वारितः ११ यस्यघोषेणमहतासप्राकारासतोरणा लंकाप्रवेपतेसर्वासशैलवनकानना १२
सर्वशाखामृगेन्द्रस्यसुग्रीवस्यमहात्मनः बलाग्रेतिष्ठतेवीरोनीलोनामेषयूथपः १३ बाहूप्रगृ
ह्ययःपद्भ्यांमहींगच्छतिवीर्यवान् १४ लंकामभिमुखःकोपादभीक्ष्णंचविजृंभते गिरिशृंगप्रती
काशःपद्मकिंजल्कसन्निभः १५

केनदुर्जयत्वेतदतैःसार्द्धयत्नेनाकेरंगदंवर्णयतिबाहूप्रगृह्यउद्यम्यपद्भ्यां
महींगच्छतिनखदितिशेषः १४ पद्मकिंजल्कसन्निभःपद्मकेसरवर्णीतद्वर्णः १५

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा० वा० ९० स्फोटयति भूमौ ताडयति ॥ प्रतिसंरब्धः कुपितः स्वनंतिपतिस्वनंती स्पर्धः १६ ॥ अभिषेचितो अभिषिक्तः १७ पराक्रांतः पराक्रमितु मुद्यतः १८
९० यदृच्छया हनूमता जनकात्मजा दृष्टा सा सर्वी न सरितस्तीर्त्वा गदसामेत्रमूलेति प्रोषः १९ बहूनि पूष्पाणि परिगृह्य स्वेनानीके न त्वामभियाति २०

स्फोटयत्यपतिसंरब्धो लांगूलं च पुनः पुनः पुष्पलोमूलशब्देन स्वनंतिप्रदिशो दश १६ एष वानर
राजेन सुग्रीवेणाभिषेचितः यौवराज्येंगदो नाम त्वामाह्वयति संयुगे १७ वालिनः सदृशः पुत्रः सुग्री
वस्य सदा प्रियः राघवार्थे पराक्रांतः शक्रार्थे वरुणो यथा १८ एतस्यैषा मतिः श्रेष्ठा यद्दृष्टा जन
कात्मजा हनूमता वेगवता राघवस्य हितैषिणा १९ बहूनि वानरेंद्राणामेष यूथानि वीर्यवान् परि
गृह्याभियाति त्वां स्वेनानीकेन दुर्जयः २० अनु वालिसुतस्यापि बलेन महता वृतः वीरस्तिष्ठति सं
ग्रामे सेतुहेतुरयं नलः २१ ये तु विष्टभ्य गात्राणि क्ष्वेलयंति नदंति च ॥ उत्थाय च विजृंभंते क्रोधेन
हरियूथपाः २२ रामा०
९०

वालिसुतस्यानु पश्चात् सेतुहेतुः सेतुकर्ता नलो यमेवेत्यर्थः ॥ यूथश्चेतं वर्त्ता यति ये विस्ताघ्नी कानि ग्रहम्यन्ति सं तैश्चतुः श्लोकैः ये तुगा
त्राणि विष्टभ्य ऊर्ध्वम्य क्ष्वेलयंति सिंहनादं कुर्वंति नदंति गर्जंति क्रोधेन विजृंभंते गात्रविनामं कुर्वंति २२

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

ते चंदनवासिनो वीरा दानमनु गच्छंति एष एव भीमविक्रमः श्वेतः स्वेनानीकेन लंकां मर्दितुमाशंसते प्रार्थयते एषैवेति संधिरार्षः २३ २४
सुग्रीवमागम्य पुनर्गच्छतीत्यनेन एवं तादर्शनसमये कार्यार्थं सुग्रीवसमीपमागत्य गत्वा निति स्तायते २५ यः पुरेत्यादि सार्द्धेन कुमुदवर्णनं

तमेनमनुगच्छंति वीराश्चंदनवासिनः एषैवाशंसते लंकां स्वेनानीकेन मर्द्दितुम् २३ श्वेतो रजतसं
काशश्चपलो भीमविक्रमः बुद्धिमान्वानरश्रेष्ठः त्रिषु लोकेषु विश्रुतः २४ तूर्णं सुग्रीवमागम्य पु
नर्गच्छति वानरः विभजन्वानरीं सेनामनीकानि प्रहर्षयन् २५ यः पुरा गोमतीतीरे रम्यं पर्येति पर्व
तम् नाम्ना संरोचनो नाम नानानगयुतो गिरिः तत्र राज्यं प्रशास्त्येष कुमुदो नाम यूथपः २६ योसौ श
तसहस्राणां सहस्रं परिकर्षति २७ यस्य वाला बहुव्यामा दीर्घलांगूलमाश्रिताः ताम्राः पीताः सिता
श्वेताः प्रकीर्णा घोरदर्शनाः २८

रम्यं रम्याख्यं यस्मिन्संरोचन इति नामांतरं २६ तत्र एष कुमुदो नाम यूथपः राज्यं प्रशास्ति
करोति यो सावि त्याद्यस्यापि स्वेनानीकेन मर्द्दितुमित्यं तेन सार्द्ध श्लोकद्वयेन चंडाख्य वर्णनं परिकर्षति प्रानयिष्यति २७ यस्य वालाः लोमानि
बहुव्यामाः बहुदीर्घप्रमाणाः सिताः श्लिष्टाः २८

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा० बा० पु० चंडः चंडाख्यः २९ यस्त्वेषस्त्यारभ्य लंकां मर्द्दितुमोजसेत्येतत्सार्द्धत्रिभिः श्लोकैरंभाख्य वर्णनं निभृतः ए कारः ३० ३१ येमते प्रस्तुगार्थ्यं
९१

ग्रदीनो वानरश्चंडः स गनाममभिकांक्षति एषैवाशंसते लंकां स्वेनानीकेन मर्द्दितुम् २९ यस्त्वेषा सि
हसंकाशः कपिलो दीर्घकेसरः निभृतः प्रेक्षते लंकां दिधक्षन्निव चक्षुषा ३० विंध्यं कृष्णगि
रिं सह्यं पर्वतं च सुदर्शनम् राजन्सततमध्यास्ते रंभो नामैष यूथपः ३१ शतं शतसहस्राणां त्रिंश
च्च हरिपुंगवाः यमेते वानरा घोराश्चंडाश्चंडपराक्रमाः परिवार्यानुगच्छंति लंकां मर्द्दितुमोज
सा ३२ यस्तु कर्णौ विवृणुते जृंभते च पुनः पुनः न तु संविजते मृत्योर्न च सेनां प्रधावति ३३ प्र
कंपते च क्रोधेन तिर्यक्च पुनरीक्षते पश्य लांगूलविक्षेपं क्ष्वेडश्चैष महाबलः ३४ महाजवो वीत
भयो रम्यं साल्वेयपर्वतम् राजन्सततमध्यास्ते शरभो नाम यूथपः ३५ एतस्य बलिनः सर्वे विहा
रा नाम यूथपाः राजञ्छतसहस्राणि चत्वारिंशत्तथैव च ३६

तीक्ष्णन्वयः ३२ यस्तु कर्णौ विस्फारयन्च त्वारिंशत्त
वो वचसंतैश्चतुः श्लोकैः शरभाख्य वर्णनम् मृत्योर्न संविजते नोद्वेगं गच्छति तत्र धावरदम्नादित्ति प्र शेषः न च सेनां प्रधावति किं त्वेक एव

बोद्धव्यमिति शेषः ३३ ३४ ३५ ३६

रा० म०
९१

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

यत्तु मेघरवेत्यारभ्य येषां यूथानि भागश इत्यंतैश्चतुःश्लोकैः पनसाख्यवानरवर्णनं ३७ शाखामृगाणां मध्ये यस्य घोषः भेरीणामिव
नादः स्वयं श्रूयते ३८ ३९ येषां यूथपानां यूथानि भागशः प्रत्येकं वर्तंते ते शतसहस्राणां शतार्धं पंचाशत् छद्मदालेख्यं यूथपाए

यत्तु मेघरवाकाशः शैलमहानावलसतिष्ठति मध्ये वानरवीराणां सुराणामिव वासवः ३७ भेरीणामि
वतेनादो यस्यैव श्रूयते महान् घोषः शाखामृगेंद्राणां संग्रामाभिकांक्षताम् ३८ एष पर्व
तमध्यास्ते पारियात्रमनुत्तमम् पुष्टे दुष्प्रसहो नित्यं पनसो नाम यूथपः ३९ एनं शतसहस्रा
णां शतार्द्धं पर्युपासते यूथपा यूथपश्रेष्ठं येषां यूथानि भागशः ४० यत्तु भीमामप्यवलंतींच
मूर्तिष्ठति श्यामयन् ४१ स्थितस्तीरे समुद्रस्य द्वितीय इव सागरः एष दर्दुरसंकाशो विनतो नाम
यूथपः ४२ पिबंश्चरति पर्णासां नदीनामुत्तमां नदीम् षष्टिः शतसहस्राणि बलमस्य प्लवंगमाः ४३ किष्किं ७४

त्येपनसं पर्युपासते इति संबंधः ४० यत्तु भीमामित्यादिसार्द्धश्लोकं विनतवर्णनं दर्दुरः पर्वतः ४१ ४२ पिबंश्चरतीत्यारभ्य यथा यूथा
निभागश इत्यंतश्लोकद्वयेन क्रथनाख्यवानरवर्णनं पर्णासा नदी मिस्य पः षष्टिः शतसहस्राणि त्वंगमाः प्रत्येकं पनसस्य बलं

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा० वा० यु० विक्रान्ता बलवन्तश्च यथा पूर्वा इति शेषः यथास्य यूथपास्ते येषां भागशः प्रत्येकं यूथानि च सन्तीति शेषः ४४ पनस इत्यारभ्य स्वेना
९२ नीकेन मर्दितुमित्यन्तेन सार्द्धद्वयेन श्लोकेन नगवत् वर्णानि वपुः पुष्यति पुष्ट हर्षादभिवर्द्धयतीत्यर्थः ४५ ४६ उपसंहरति एत इति

स्वामाव्हयति युद्धाय कम्पनो नाम यूथपः । विक्रान्ता बलवन्तश्च यथा पूर्वनिभागशः ॥४४॥ पनस्तु
गैरिकवर्णाभं वपुः पुष्यति वानरः । अवमत्य सदा सर्वान्वानरान्बलदर्पितः ॥ गवयो नाम तेज
स्वी त्वां क्रोधादभिवर्त्तते ४५ एनं शतसहस्राणि सप्ततिः पर्युपासते एषैवाशंसते लंकां स्वेना
नीकेन मर्द्दितुम् ४६ एते दुष्प्रसहा वीरा बलिनः कामरूपिणः ॥ यूथपा यूथपश्रेष्ठा येषां यू
थानि भागशः ॥४७॥ इत्यार्षे श्रीमद्रामायणे युद्धकाण्डे षड्विंशः सर्गः ॥२६॥ सीतारामाभ्यां नमः ॥
तांस्तु तेऽहं प्रवक्ष्यामि प्रेक्षमाणस्य यूथपान् राघवार्थे पराक्रान्ता ये न रक्षन्ति जीवितम् १ स्निग्धा य
स्य बहु व्यामा वाला लांगूलमाश्रिताः ताम्राः पीताः सिताः कृष्णाः प्रकीर्णा घोरकर्मणः २ २

यूथपाः शृंगादयः यूथपश्रेष्ठाः सुग्रीवादयः यूथानि भागशः पृथक् विद्यन्त इति शेषः ४७ इति षड्विंशः सर्गः २६ ये राघवा
र्थे पराक्रान्ताः सन्तः जीवितं न रक्षन्ति तान् यूथपान् प्रेक्षमाणस्य ते तुभ्यं संप्रवक्ष्यामीत्यन्वयः १ स्निग्धा इत्यारभ्य तामभिसंधार रा० म०
ति घोरकर्मणोऽपि यस्य लांगूलमाश्रिताः बहु व्यामाः प्रतिदीर्घाः वालाः रोमाणि सिताः स्निग्धाः प्रकीर्णा विक्षिप्ताः २ २ २ ९२

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

प्रगृहीताः उत्क्षिप्ताः सूर्यस्य मरीचयः रश्मयो येषु प्रांशु चापादि रूपेण प्रस्तारात् प्रस्तारं प्रकाशन्ते कदाचित्पृथिव्यामनुकृष्यन्ते च एष
तारो नाम्ना स्यन्वयः ३ यमिति सार्धश्लोकमेकान्वयं यन्तारं तारस्य हरिराज किं करत्वेन तदीया किंकरा हरिराजा के कराः ए वंति न कश्चि

प्रगृहीताः प्रकाशन्ते सूर्यस्येव मरीचयः पृथिव्यां चानुकृष्यन्ते तारो नामैष यूथपः ३ यं पृष्ठतोऽनु
गच्छन्ति शतशोऽथ सहस्रशः द्रुमा न द्यम्य सहिता लंकारोहणतत्पराः यूथपा हरिराजस्य किंक
राः समुपस्थिताः ४ नीलानिव महामेघा तिष्ठतो यांस्तु पश्यसि ५ पश्यति तां जनसंकाशान्
युद्धे सत्यपराक्रमान् असंख्येयाननिर्देश्यान् परं पारमिवोदधेः ६ पर्वतेषु च ये केचिद् विषमेषु
नदीषु च एते त्वामभिवर्तन्ते राजन् ऋक्षाः सुदारुणाः ७ एषां मध्ये स्थितो राजन् भीमा
क्षो भीमदर्शनः पर्जन्य इव जीमूतैः समन्तात् परिवारितः ८ सीतारामा यां नमः सीता

द्वितीयश्चः ४ नीलानिवेत्यारभ्य धूम्रो नामैष यूथपः इत्यन्तेन सार्धश्लोकचतुष्टयेन ऋक्षराज धूम्रं वर्णितं महोदधेः परं पारमिव
अनिर्देश्यान् नीलान्महामेघानिव तिष्ठतः अहितां जनसंकाशान्यान् पश्यसि ५ ६ ये केचित् पर्वतेषु नदीषु च वर्तन्ते ते एते सुदारु
णाः ऋक्षाः त्वामभिवर्तन्ते त्वामभिमुखं वर्तन्ते [illegible] इति संबन्धः ७ जीमूतैः कालमेघैः समन्तात्परितः पर्जन्य इव स्थितो पए यो मध्ये

स्थितो त्तिष्ठ यो धूम्रनामा यूथपः तस्य पिं २

रा० वा० यु० ९ यवीयानस्येत्यादिभिर्जाम्बवद्वर्णनं धूम्रस्य यवीयान् कनिष्ठो भ्राता रूपेण आत्मसमानो पि पराक्रमे विशिष्टः १० गुरुवर्ती गुरुशु
९३ श्रूषकः ११ साह्यं साहाय्यं देवासुरे युद्धे इति शेषः १२ आरुह्येति सैन्यं वर्णयति आरुह्येति पर्वताग्रेभ्य इति ल्यब्लोपे पंचमी न उद्विजंति न बि

ऋक्षवंतं गिरिश्रेष्ठमध्यास्ते नर्मदां पिबन् सर्वर्क्षाणामधिपतिर्धूम्रो नामैष यूथपः ९ य
वीयानस्य तु भ्राता पश्यैनं पर्वतोपमम् भ्रात्रा समानो रूपेण विशिष्टस्तु पराक्रमे १० स एष जांब
वान्नाम महायूथपयूथपः प्रशांतो गुरुवर्ती च संप्रहारेष्वमर्षणः ११ एतेन साह्यं तु महत्कृतं
शक्रस्य धीमता देवासुरे जांबवता लब्धाश्च बहवो वराः १२ आरुह्य पर्वताग्रेभ्यो महाभ्रविपुलाः
शिलाः मुंचंति विपुलाकारा न मृत्योरुद्विजंति च १३ राक्षसानां च सदृशाः पिशाचानां च रोमशाः
एतस्य सैन्या बहवो विचरंत्यग्नितेजसः १४ यं त्वेनमभिसंरब्धं प्लवमानमवस्थितम् प्रेक्षंते वानराः
सर्वे स्थिता यूथपयूथपः १५

भ्यति १३ रोमशाः प्रवृद्धिकरोमवंतः रक्षःपिशाचसादृश्यं क्रौर्येण १४ आम्पांडुं संबोधयति यं त्वे रामा०
नामिति अभिसंरब्धं कुपितं प्लवमानमवस्थितं प्लवमानत्वेन वर्तमानं लीलार्थमिति शेषः स्थितं लीलार्थमेव पुनः स्थितमेनं यूथपं स ९३
र्वे वानराः प्रेक्षंते आश्चर्येणेति शेषः १५

बलेन पर्युपास्ते बलेन प्रीणातीत्यर्थः १६ त्रिभिः सन्नादं वर्णयति यः स्थितमिति यः सन्नादाख्यः गच्छन् योजने स्थितं शैलं पार्श्वेन सेव-
ते स्पृशति अनेन योजनपरिमितमस्य स्थौल्यमित्युक्तं भवति न चैव गतः गमनवेलायां कायेन ऊर्ध्वमुपरि योजनं प्राप्नोति स्पृशतीत्यनेन योज-

एष राजन् सहस्राक्षं पर्युपास्ते हरीश्वरः बलेन बलसंपन्नो धूम्रो नामैष यूथपः १६ यः स्थितं
योजने शैलं गच्छन् पार्श्वेन सेवते ऊर्ध्वं तथैव कायेन गतः प्राप्नोति योजनम् १७ यस्मान्न परमं रू-
पं चतुष्पादेषु विद्यते श्रुतः सन्नादनो नाम वानराणां पितामहः १८ येन युद्धं तदा दत्तं रणे शक्रस्य धी-
मतः पराजयश्च न प्राप्तः सोयं यूथपयूथपः १९ यस्य विक्रममाणस्य शक्रस्येव पराक्रमः एष गंधर्व-
कन्यायामुत्पन्नः कृष्णवर्त्मनः २० २०

नोन्नतत्वमुक्तं भवति १७ यत एव चतुष्पादेषु पशुषु परमं रूपं शरीरं न वि-
द्यते १८ पुरा युद्धकाले १९ यस्य विक्रममाणस्येत्यारभ्य पत्रोनानीकेन मर्दितुमिच्छतीत्यंतैः पंचश्लोकैः क्रोधनाख्यवानरवर्णनं विक्रममाणस्य
पराक्रमं कुर्वतो यस्य पराक्रमः शक्रस्येव तत्पराक्रमसदृश इत्यर्थः कृष्णवर्त्मन अग्नेः २०

किमर्थमुत्पादित इत्याह तदेति त्रिदिवौकसां साह्यार्थमित्यर्थः २१ तत्र सुग्रीवान्वयि वैश्रवणो राजा यत्र गिरौ जंबूमुपनिषेवते यो जंबूवृक्षमुपसेवत इत्य
र्थः प० पर्वतो बहुकिन्नरसेविनां पर्वतेंद्राणां राजा यश्च ते भ्रातुः कुवेरस्य विहारसुखदः २१ २२ तत्रागिरौ कैलासे यो वसति श्रीमान् कत्थनः
श्लाघारहितः कार्यतो वपराक्रमदर्शकः एष क्रोधनो नाम यूथप इत्यर्थः २३ २४ यो गंगामित्यारभ्य पत्रेतद्बहुलेरं जर

तदा देवासुरे युद्धे साह्यार्थं त्रिदिवौकसाम् यत्र वैश्रवणो राजा जंबूमुपनिषेवते २१ यो राजा पर्
वतेंद्राणां बहुकिन्नरसेविनाम् विहारसुखदो नित्यं भ्रातुस्ते राक्षसाधिप २२ तत्रैव वसते श्री
मान्बलवान्वानरर्षभः युद्धेष्वकत्थनो राजन्क्रोधनो नाम यूथपः २३ वृतः कोटीसहस्रेण ह
रीणां समवस्थितः एषैवाशंसते लंकां स्वेनानीकेन मर्दितुम् २४ यो गंगामनुपर्येति त्रासयन् गा
जयूथपान् हस्तिनां वानराणां च पूर्ववैरमनुस्मरन् २५

म र्पैतैः सार्धसप्तश्लोकैः प्रमाथि वानरवर्णनं यो हस्तिनां
वानराणां च पूर्ववैरमनुस्मरन् इहां गामनुगंगासमीपे हस्तियूथपान् त्रासयन् पर्येति परितः संचरति पुराकिल प्रौवसादनो नाम
मासुरो गजरूपेण मुनीन्वाधमानस्तैर्मुनिभिः प्रोक्तो दितेनकेसरिणा हतस्ततः संतुष्टैर्मुनिभिर्महापराक्रमो हनूमान्ते पुत्रो भविष्यतीति वरो दत्तः
ततः प्रभृति हस्तिनां वानराणां च वैरमभूदिति पौराणिकी गाथा २५

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

एषनेनाप्रभुर्वन्यान्गजान्योधयतेमहीरुहांश्चारुजतीत्यर्थः २६ हैमवतींनदींगामनुवर्त्तमानमुशीरवीजाख्यं पर्वतमाश्रित्य
योरमते २७ वीरस्यभावोवीर्यमुत्साहः विक्रमः पराक्रमस्ताभ्यांदृप्तानांबाहुशालिनांवानराणांशतसहस्राणांसहस्रंसहस्रल

एषपूर्वपतिर्नाम गर्जन्गिरिगुहाशयः गजान्योधयतेवन्यान्नारुजंश्चमहीरुहान् २६
हारिणंवाहिनीमुख्योनदींहैमवतीमनु उशीरबीजमाश्रित्यपर्वतंमंदरोपमम् रमतेवान
रश्रेष्ठोदिविशक्रइवस्वयम् २७ एनंशतसहस्राणांसहस्रमभिवर्त्तते वीर्यविक्रमदृप्ता
नांनर्द्दतांबाहुशालिनाम् २८ सएषनेतावैतेषांवानराणांमहात्मनाम् सएषदुर्द्धरोराज
न्प्रमाथीनामयूथपः २९ वातेनेवोद्धतंमेघंयमेनमनुपश्यसि अनीकमपिसंरब्धंवान
राणांतरस्विनाम् ३० उद्धूतमरुणाभासंपवनेनसमंततः विवर्त्तमानंबहुशोयत्रैतद्बहुलंरजः ३१

स्त्रमितियावत्एनमनुवर्त्तत इत्यन्वयः नेतानायकः २८ २९ सएषःप्रमाथीनामयूथपोदुर्धरः शत्रुभिर्धर्तुमशक्यः
कः प्रमाथिनंविशिनष्टिवोधयतिवातेनेति ३० तरस्विवानरसंबंधियस्यानीकंसंरब्धंकुपितंपश्यसियस्यानीकेनोद्धतंबहुलं
रजोऽरुणाभंधूम्रवर्णंपवनेनसमंततोबहुशोविवर्त्तमानंविक्षिप्यमाणंयत्रपत्तमीपेपश्यसिसएषप्रमाथीत्यन्वयः ३१

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

टी० वा० पु० द्वाभ्यां वाक्षं वृत्तापतिए तेगमितेति प्राप्त सहस्राणि गोलांगूलाः सेतुबंधने दृष्ट्वा गोलांगूलेन वाक्षं नाम पूर्वपर्वं परिवार्य्य लेकां
९५ मर्द्दितुमभिवर्त्तंत इति संबंधः ३२ ३३ भ्रमराचरिता इत्यारभ्य केसरिनाम पूर्व पर्वतं तश्लोकचतुष्टयेनेकेसरि वानर वर्णा

एते सितमुखा घोरा गोलांगूला महाबलाः प्राप्तं प्राप्त सहस्राणि दृष्ट्वा वै सेतुबंधने ३२ तै
गोलांगूलं महावेगा वाक्षं नाम पूर्वपर्म परिवार्याभिवर्त्तंते कामर्द्दितु मोजसा ३३
भ्रमराचरिता यत्र सर्वकालफलद्रुमाः यं सूर्यस्तुल्यवर्णाभमनुपर्येति पर्वतम् ३४
यस्य भासा सदा भांति तद्देशा मृगपक्षिणः यस्य प्रस्थं महात्मानो न त्यजंति महर्षयः ३५
सर्वकामफला वृक्षाः सदा पुष्पसमन्विताः मधूनि च महार्हाणि तस्मिन्पर्वतसत्तमे ३६

नं पूर्वयस्मिन्कांचन पर्वते सर्वकालफलद्रुमाः सर्वकाले फलं नित्यादिदृश्यः द्रुमाः भ्रमरैराचरिताः व्याप्ताः संति यं सूर्यस्तुल्य राम०
वर्णीकांतिमंतं पर्वतमनुपर्येति प्रदक्षिणीकरोति ३४ मृगपक्षिणः तद्वर्तिमृगादयः यस्य भासा तद्वर्णाः सदा भांति ३५ यस्मि ९५
न् पर्वतसत्तमे सकामफलाः काम्यंत इति कामा विषयाः सर्वे भोगार्हास्त्रक्चंदनाभरणवस्त्रादिरूपफलप्रदा वृक्षाः संति ३६

तस्मिन् कांचनपर्वते मे ते वानरमुख्यानां मुख्य एषः केसरीनाम यूथपो रमते ३७ षष्टिरित्यारभ्य द्वयान्कुरुते हरिरिस्यत्तेन श्लोकार्ध
केन प्रातवलीवर्णानि गिरिसहस्राणां षष्टिरत्तितेरम्याः कांचनपर्वता भवंति तेषां मध्ये गिरिवरः सावर्णिमेरुनामास्तीति शे

तत्रैष रमते राजन् रम्ये कांचनपर्वते मुख्यो वानरमुख्यानां केसरीनाम यूथपः ३७ षष्टि
गिरिसहस्राणां रम्याः कांचनपर्वताः तेषां मध्ये गिरिवरस्त्वमिवानघ रक्षसाम ३८ त
त्रैते कपिलाः श्वेतास्ताम्रास्या मधुपिंगलाः निवसंत्युत्तरगिरौ तीक्ष्णदंष्ट्रा नखायुधाः
३९ सिंहा इव चतुर्दंष्ट्रा व्याघ्रा इव दुरासदाः सर्वे वैश्वानरसमा ज्वलदाशीविषोपमाः
४० सुदीर्घांचितलांगूला मत्तमातंगसन्निभाः महापर्वतसंकाशा महाजीमूतसंनिभाः
४१ वृत्तपिंगलनेत्रा हि महाभीमगतिस्वनाः मर्दयंतीव ते सर्वे तस्थुर्लंकां समीक्ष्यते ४२

वेधः ३८ मेरुस्थवानरान्वर्णयति तत्रैते इत्यादिना ३९ वैश्वानरोऽग्निस्तद्वद्दुःसहस्पर्शाः ज्वलाशीविदंष्ट्रा विषं येषां ते आशीविषाः
सर्पाः ज्वलंतः कुपिताश्च आशीविषास्तत्तुल्यास्तद्वत्कोपना इत्यर्थः ४० सुदीर्घं संचितमुदंचितं लांगूलं येषां ते ४१ महाभीमा ग
तिः स्वनश्च येषां ते वानराः तेन बलेन लंकां समीक्ष्य मर्दयंतीव तस्थुरिति संबंधः ज्वालाशीविषा व्यत्ययः ४२

रा० वा० पु० ३ पतिष्ठतिउपतिष्ठते ४३ एषैवेतिसंधिरार्षः ४४ घोरः येषामाक्रमे प्राणानांप्राशोभु ४५ ४६ ४७ प्रविध्वस्ता शत्रुणांताः विकि
९६

९ एषचैषामधिपतिर्मध्ये तिष्ठतिवीर्यवान् जयार्थी नित्यमादित्यमुपतिष्ठतिवीर्यवान् ४३
नाम्नापृथिव्यांविख्यातो राजंछतवलीतिपः एषैवाप्रासतेलेकांस्त्वेनानीकेनमर्दितुम् ४४
विक्रांतोवलवान्कूरः घोरः षेत्येव्यवस्थितः रामप्रियार्थं [illegible] प्राणानांदयांनकुरुतेहरिः ४५
गजोगवाक्षोगवयोनलोनीलश्चवानरः एकैकमपूथानां कोटिभिर्दृशाभिर्वृताः ४६
तथान्येवानरश्रेष्ठाविंध्यपर्वतवासिनः नशक्यंतेवहुत्वात्तुसंख्यातुंलघुविक्रमाः ४७॥
सर्वेमहाराजमहाप्रभावाः सर्वेमहाशैलनिकाशकायाः सर्वेसमर्थाःपृथिवींक्षणेनकर्तुंप्र॥
विध्वस्तविकीर्णशैलाम् ॥४८॥ इत्यार्षेश्रीमद्रामायणेयुद्धकांडेसप्तविंशः सर्गः ॥ २७ ॥
सारणस्यवचः श्रुत्वारावणंराक्षसाधिपम् वलमादिश्यतत्सर्वंशुकोवाक्यमथाब्रवीत् १

र्णांविक्षिप्ताः शैलायस्यांतां ४८ इतिसप्तविंशः सर्गः २७ शुकः सारणस्यवचः श्रुत्वातेनकार्लेनानुक्रांत्येयंते सर्वंवलमादिश्यकथं उ

उत्या लिखितप्राणांपकमा तेन प्रवृत्ति गणकरि
मंगलतारांतामरभमस्तुकि लिखितो प्रस्थास्मरः १

समा०
९६

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

न्यग्रोधानिवगांगेयान्गंगातीररूहान् हैमवतानाहिमवत्पार्श्वोद्भवान् २ दैत्यदानवसंकाशाः दैत्यदानवतुल्यबलाः ३
एषांकोटीतिसुग्रीवसचिवसंख्यासर्वंवक्ष्यमाणसंख्यातुसगोत्रिवक्ष्यति शंखवृंदादिस्वरूपमग्रेउत्तरत्रस्वयमेववक्ष्यति वृंद

गृहीतान्यप्रपश्यियानेतान्मत्तानिवमहाद्विपान् न्यग्रोधानिवगांगेयान्सालान्हैमव
तानिव २ एतेदुष्प्रसहाराजन्बलिनःकामरूपिणः दैत्यदानवसंकाशायुद्धेदेवपराक्र
माः ३ एषांकोटिसहस्राणिनवपंचचसप्तच तथाशंकुसहस्राणितथावृंदशतानि
च ४ एतेसुग्रीवसचिवाःकिष्किंधानिलयाःसदा हरयोदेवगंधर्वैरुत्पन्नाःकामरू ९
पिणः ५ यौतौपश्यसितिष्ठंतौकुमारौदेवरूपिणौ मैंदश्चद्विविदश्चैवताभ्यांनास्तिसमो ६
युधि ६ ब्रह्मणासमनुज्ञातावमृतप्राशिनावुभौ आशंसेतेयथालंकामेतौमर्दितुमोज

शतादिसंख्याःसंतीतिशेषः ४ सुग्रीवसचिवाःसुग्रीवसहायाः कामरूपिणः कामरूपत्वेनोत्पन्नाइत्यर्थः पूर्वंकामरूपित्व
मुक्तंतस्यदानीमौत्पत्तिकत्वमुच्यतइतिनपुनरुक्तिः ५ कुमारौतरुणौयौपश्यसितौमैंदश्चद्विविदश्चेत्युच्यतइत्यर्थः ६ ता
भ्यांसमोनास्तीत्यत्रहेतुंदर्शयतिब्रह्मणेति समनुज्ञातौसितावमृतप्राशिनावित्यर्थः ७

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

ए० वा० पु० हनूमंतंवर्तायतियंत्वितिसार्द्धपंक्ति श्लोकैः प्रभिन्नमत्तं प्रभिन्नोगवितोमत्तस्तमरः ८ एषत्वं कार्यावैदेह्यास्तवाभिगंताश्च
९७ न्वे धीसमीपमागतस्त्वेत्यर्थः ९ केसरिणःपुत्रः क्षेत्रजस्त्वर्थः १० सततगोवाग्गुः ११ त्रियोजनसहस्रं आदित्यरूपमूमेरुपरित्वे

पंतुप्रश्यसितिष्ठतंप्रभिन्नमिव कुंजरम् योबलात्साभयेकुद्धः समुद्रमपिवानरः ८
एषोभिगंतालंकायांवैदेह्यास्तवचप्रभो एनंपश्यपुरादृष्टंवानरं पुनरागतम् ९ ज्ये
ष्ठः केसरिणःपुत्रोवातात्मज इतिश्रुतः हनूमानितिविख्यातोलंघितोयेनसागरः १०
कामरूपीहरिश्रेष्ठोवलवीर्यसमन्वितः अनिवार्यगतिश्चैवयथासततगःप्रभुः ११
उद्यंतंभास्करंदृष्ट्वाबालःकिलबुभुक्षितः त्रियोजनसहस्रंतुअध्वानमवतीर्यहि १२
आदित्यमाहरिष्यामिनमेक्षुत्प्रतियास्यति इतिनिश्चित्यमनसापुप्लुवेबलदर्पितः १३ अ
नाधृष्यतमंदेवमपिदेवर्षिराक्षसैः अनासाद्यैवपतितोभास्करोदयनेगिरौ १४ १

अध्वयोजनांतरितत्वात्रिजनसहस्रमित्येतदनेकयोजनसहस्रोपलक्षणं १२ प्रतियास्यति भूलोकवर्तिफलैरिति शेषः १३
अनासाद्यभास्करमितिशेषः भास्करोदयनगिरौ पतितो भास्करोदयनस्तामिन्गिरौ यद्यप्युत्तरकांडे इंद्रवज्रेणापतनमुक्तं

सम्पातिहनूमत्प्रभावं १८

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

१५ कपिमिमं कपिं त्वयाविदितेसमाहसत्वमिति ॥ आगमयोगेन ॥ आगमप्राप्तोपदेशः स एव योगः उपायः ॥ आगमवाक्यश्रवणेनेत्य
र्थः १६ १७ धूमकेतुरग्निर्येन ज्वाज्वल्यते प्रज्वल्यते प्रज्वालितः हुतः त्वत्तेजो रूपोपि पापपुच्छे प्राप्य प्रज्वालितः लंकायां नि

पतितस्य कपेरस्य हनुरेकाशिलातले । किंचिद्भिन्नो दृढहनुर्हनूमानेष तेन वै १५ सत्यमागमयो
गेन ममैष विदितो हरिः १६ नास्य शक्यं बलं रूपं प्रभावो वानुभाषितुम् एष आशंसते लंकामेको
मर्दितुमोजसा १७ येन ज्वाज्वल्यते सौम्य धूमकेतुस्तवाद्य वै लंकायां निहितश्चापि क
थं विस्मरसे कपिम् १८ पद्मश्चैषोनंतरः शूरः श्यामः पद्मनिभेक्षणः इक्ष्वाकूणामतिरथो
लोके विश्रुतपौरुषः १९

हितो निक्षिप्तश्च तं कपिं कथं विस्मरसे इति संबंधः १८ श्रीरामं वर्णयति श्लो
कचतुष्टयेन पद्मश्चैष इति ॥ अनंतरः ॥ अनंतसन्निहितः हनूमंतमवष्टभ्य स्थितः इत्यर्थः शूरः प्रकटितशौर्यः श्यामः का
लांबुदकमनीयविग्रहः पद्मनिभेक्षणः विकसितकमलविलोभनीयविलोचनः इक्ष्वाकूणां मध्ये अतिशयितर
रा थः ॥ अपराजितरथः लोके विराधवधादिवधेन ख्यातं वालिवधेन विख्यातं पौरुषं पराक्रमः १९

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

यस्मिन्धर्मो न चलन्ति ज्यावालिप्रभृतिभिराकुलीकृतोप्यकंप्यः यो धर्मेनातिवर्त्तते भरतादिभिः हृतिपित्र तिवं धेपितृव
चनपरिपालनेन धर्मेनातिवर्त्ततेनातिक्रामति यो ब्राह्मं महदस्त्रं वेदाख्यमंत्रं वेदांश्च वेदजानाति ब्रह्मास्त्रमं त्रस्य वेदांतर्गतिले

यस्मिन्न चलन्ति धर्मो यो धर्मं नातिवर्त्तते यो ब्राह्मं महदस्त्रं वेदांश्च वेद वेदविदां वरः २० यो भिंद्या
द्गगनं बाणैर्मेदिनीं चैव दारयेत् यस्य मृत्योरिव क्रोधः शक्रस्येव पराक्रमः २१ यस्य भार्या
जनस्थानात्सीता चापहृता त्वया स एष रामस्त्वां राजन्योद्धुं समभिवर्त्तते २२ तस्यैष द
क्षिणे पार्श्वे शङ्खजांबूनदप्रभः विशालवक्षास्ताम्राक्षो नीलकुंचितमूर्द्धजः २३ ए
षो हि लक्ष्मणो नाम भ्रातुः प्रियहिते रतः नये युद्धे च कुशलः सर्वशास्त्रविदां वरः २४ ए

पिशाखान्यास्य पाडुक्तिः वेदविदां वेदार्थज्ञानतां वरः श्रेष्ठः २० गगनमिति गगनस्थविमानादिकमित्यर्थः २१ संप्रति को
पाम्द्वेहे तुमाह यस्य भार्येति २२ ए रक्षसां वलिपतिपद्मेष इत्यादि चतुर्भिः श्लोकैः दक्षिणे पार्श्वे समस्येति शेषः शङ्खजां

द्भकः श्वागाम्भीर्यादिगुणैः सम्पन्न इ
ति भावः २३

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

प्राणो बहिश्चरः स्पन्देन प्राणसंरक्षकत्वमुच्यते २५ २६ द्वाभ्यां विभीषणं वक्ति यस्तु पश्यति यस्तु लक्ष्मणस्य संपत्संवामे पार्श्वमा
श्रित्य तिष्ठति रक्षोगणेन राक्षसे न सचतुष्ट्ये न परिक्षिप्तो व्याप्तः १ एष राजा विभीषण इति संबंधः २७ कुतः इत्यत आह श्री

अमर्षी दुर्जयो जेता विक्रान्तो बलसंयुतः रामस्य दक्षिणो बाहुर्नित्यं प्राणो बहिश्चरः २५ न ह्येष
राघवस्यार्थे जीवितं परिरक्षति एषैवाशंसते युद्धे निहन्तुं सर्वराक्षसान् २६ यस्तु लक्ष्मणसोपष्टं
रामस्याश्रित्य तिष्ठति रक्षोगणपरिक्षिप्तो राजा ह्येष विभीषणः २७ श्रीमता राजराजेन लं
कायामभिषेचितः त्वामसौ प्रति संरब्धो युद्धायैषोऽभिवर्तते २८ यं तु पश्यसि तिष्ठन्तं मध्ये गिरि
मिवाचलम् सर्वशाखामृगेन्द्राणां भर्तारममितौजसम् २९ तेजसा यशसा बुद्ध्या बलेना
भिजनेन च यः कपीनति बभ्राज हिमवानिव पर्वतान् ३० सीतारामाभ्यां नमः सीताराम

मतेति अप्रवासमस्तकामलेन लंकाराज्याभिषिक्तो मर्षः राजराजेन रामेण लंकायामभिषेचितः एषोऽसौ संरब्धः कुपित
स्त्वां प्रति युद्धाय अभिवर्तते इत्यन्वयः २८ पंचभिः श्लोकैः सुग्रीवं वर्णयति य इति मध्ये राम विभीषणयोर्मध्ये अचलं निश्च
लं २९ बुद्ध्या ऊहापोहरूपज्ञानेन बलेन प्राणिरूपसैन्येन च अभिजनेन कुलेन अतिबभ्राज वानरान् अतिक्रम्याति शोभेन बभ्रा

रा॰ यु॰ ३०

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

दुर्गो प्राकारादिना दुर्गो पर्वतदुर्गस्थां पर्वतरूप दुर्गे स्थितां ३१ शतं वृष्कर शतं पद्मा कांता कामयमाना लक्ष्मीः वीरल

किष्किंधोरुसमध्यास्ते गुहां सगहनद्रुमाम् दुर्गो पर्वतदुर्गस्थां प्रधानैः सह यूथपैः ३१ य
स्यैषा कांचनीमाला शोभते शतपुष्करा कांता देवमनुष्याणां यस्यां लक्ष्मीः प्रतिष्ठिता ३२
एतां मालां चतारां च कपिराज्यं च शाश्वतम् सुग्रीवो वालिनं हत्वा रामेण प्रतिपादितः ३३ शतं श
तसहस्राणां कोटिमाहुर्मनीषिणः शतं कोटिसहस्राणां शंकुरित्यभिधीयते ३४ शतं शंकु
सहस्राणां महाशंकुरिति स्मृतः महाशंकुसहस्राणां शतं वृंदमिहोच्यते ३५ शतं वृंदसहस्रा
णां महावृंदमिति स्मृतम् महावृंदसहस्राणां शतं पद्ममिहोच्यते ३६ शतं पद्मसहस्राणां म
हापद्ममिति स्मृतं महापद्मसहस्राणां शतं खर्वमिहोच्यते ३७ शतं खर्वसहस्राणां महाखर्व
मिहोच्यते महाखर्वसहस्राणां समुद्रमभिधीयते शतं समुद्रसाहस्रं मम हौघमिति विश्रुतम्
३८

लक्ष्मीः ३२ प्रतिपादितः प्रापितः ३३ शपसर्ववचनसंख्यां दर्शयितुं संख्यास्वरूपं दर्शयति शतमिति शतसहस्राणां लक्षाणां शतंकोटिरित्यर्थः ३४ ३५ ३६ ३७ ३८

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

ह

ग्रयवलसंख्यामाैएवंकोटीतिएवंको। टिमहोघेगोसाद्यावांतरसंख्याभेदकीर्त्तनमवांरसेनापरिच्छेदात् समुद्रसदृशेनसा

एवंकोटिसहस्रेणशंकूनांचशतेनच महाशंकुसहस्रेण तथावृंदशतेनच ३९ महावृं
दसहस्रेणतथापद्मशतेनच महापद्मसहस्रेणतथाखर्वशतेनच ४० समुद्रेणचतेनैव
महौघेनतथैवच एवंकोटिमहौघेनसमुद्रसदृशेनच ४१ विभीषणेनवीरेणसचिवैःपरि
वारितः सुग्रीवोवानरेंद्रस्त्वांयुद्धार्थमभिवर्तते महाबलवृतोनित्यंमहाबलपराक्रमः ४२
इमांमहाराजसमीक्ष्यवाहिनीमुपस्थितांप्रज्वलितग्रहोपमाम् ततःप्रयत्नःपरमोविधीय
तांयथाजयःस्यान्नपरैःपराभवः॥४३॥इत्यार्षेरामायणेयुद्धकांडेऽष्टाविंशःसर्गः॥२८॥शुकेन
तुसमाख्यातांस्तान्दृष्ट्वाहरियूथपान् समीपस्थंचरामस्यभ्रातरंस्वंविभीषणम् १

गरसदृशेनविभीषणेनवीरेणसचिवैःसहितेनपरिवारितःसुग्रीवोवानरेंद्रस्त्वांप्रतियुद्धार्थमभिवर्तते
३९ ४० ४१ ४२ प्रज्वलितग्रहोपमांप्रज्वलितग्रहःज्योलोपमाम् ४३ इत्यष्टा

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०यु०वा० लक्ष्मणं च महावीर्यं भुजं रामस्य दक्षिणम् सर्ववानरराजं च सुग्रीवं भीमविक्रमम् २ गजं गवा
१०० क्षं शरभं मैन्दं द्विविदमेव च अङ्गदं चैव बलिनं वज्रहस्तात्मजात्मजम् ३ हनूमन्तं च विक्रान्तं जाम्बवन्तं
६ सुदुर्जयम् नीलं सेनापतिं चैव नलं गवयमेव च ४ किंचिदाविग्नहृदयो जातामर्षः स्वरावराः
भर्त्सयामास तौ वीरौ कथान्ते शुकसारणौ ५ अधोमुखौ तौ प्रणतावब्रवीच्छुकसारणौ रोष
गद्गदया वाचा संरब्धः परुषं तदा ६ न तावत्सदृशं नाम सचिवैरुपजीविभिः विप्रियं नृपतेः
कर्तुं निग्रहे प्रग्रहे प्रभोः ७ रिपूणां प्रतिकूलानां युद्धार्थमभिवर्त्तताम् उभाभ्यां सदृशं नाम
वक्तुमप्रस्तवे स्तवम् ८ आचार्या गुरवो वृद्धा वृथा वां पर्युपासिताः सारं यद्राजशास्त्राणामनु
जीव्यं न गृह्यते ९ गृहीतो वा न विज्ञातो भारोऽज्ञानस्य वाह्यते ईदृशैः सचिवैर्युक्तो मूर्खैर्दिष्ट्या
धाराम्यहम् १० किं नु मे मृत्युभयं नास्ति मां वक्तुं परुषं वचः यस्य मे शासतो जिह्वा प्रयच्छति शुभाशुभम् रा०म०
११ अप्येव दहनं स्पृष्ट्वा वने तिष्ठन्ति पादपाः राजदोषपरामृष्टास्तिष्ठन्ते नापराधिनः १२ १००

चः

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

हन्यामहं त्विमौ पापौ प्राप्नुवन्तश शांतकौ यदि पूर्वोपकारैर्मे क्रोधो नस्मृतां व्रजेत १३ अपध्वं
सतनं पूयध्वं सान्निकर्षादितो मम नहि वां हंतुमिच्छामि स्मात्पुपकृतानि वाम् हतावेव कृतघ्नौ
तौ ममाभिनिवृत्ताप्नुवतो १४ एवमुक्तौ तु लब्धौ द्रोतावुभौ प्रशुकसारणौ रावणं जयशब्देन वर्धयित्वे
द्याभिनिस्सृतौ १५ अब्रवीत्तद दशग्रीवः समीपस्थं महोदरम् उपस्थापय मे शीघ्रं चारान् नि ति
निशाचरम् १६ महोदरस्तथोक्तस्तु शीघ्रमाज्ञापयच्चरान् १७ ततश्चाराः संत्वरिताः प्राप्ताः पा
र्थिवशासनात् उपस्थिताः प्रांजलयो वर्धयित्वा जयाशिषा १८ तानब्रवीत्ततो वाक्यं राव
णो राक्षसाधिपः चरान्प्रत्यायिकान्शूरान्धीरान्विगतसाध्वसान् १९ इतो गच्छत रामस्य व्यव
सायं परीक्षया मंत्रेष्वभ्यंतरा येस्य प्रीत्या तेन समागताः २० कथं स्वपिति जागर्ति किमद्य च
करिष्यति विज्ञाय निपुणं सर्वमागंतव्यमशेषतः २१ चारेणाविदितः शत्रुः पंडितैर्वसुधाधि
पैः युद्धे स्वल्पेन यत्नेन समासाद्य निरस्यते २२ चारास्तु ते तथेत्युक्त्वा प्रहृष्टा राक्षसेश्वरम्
शार्दूलमग्रतः कृत्वा ततश्चक्रुः प्रदक्षिणम् २३ ततस्त्वेनं महात्मानं चारा राक्षससत्तमम् कृ

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० वा० यु० त्वा प्रदक्षिणो जग्मुर्यत्र रामः सलक्ष्मणः ॥२४॥ ते तु वेलस्य शैलस्य समीपे रामलक्ष्मणौ प्रच्छन्ना
१०१ ददृशुर्गत्वा ससुग्रीवविभीषणौ ॥२५॥ प्रेक्षमाणाश्चमूं तां च बभूवुर्भयविक्लवाः ते तु धर्मात्मना
दृष्टा राक्षसेन्द्रेण रक्षसा ॥२६॥ विभीषणेन तत्रस्था निगृहीता यदृच्छया शार्दूलो ग्राहितस्त्वेकः
पापो यमिति राक्षसः ॥२७॥ मोचितः सोऽपि रामेण वध्यमानः प्लवङ्गमैः आनृशंस्येन रामेण मोक्षि
ता राक्षसाः परे ॥२८॥ वानरैरर्दितास्ते तु विक्रान्तैर्लघुविक्रमैः पुनर्लङ्कामनुप्राप्ताः श्वसन्तो नष्ट
चेतसः ॥२९॥ ततो दशग्रीवमुपस्थितास्तु ते चारा बहिर्नित्यचरा निशाचराः गिरेः सुवेलस्य स
मीपवासिनं न्यवेदयन् भीमबलं महाबलाः ॥३०॥ इत्यार्षे रामायणे युद्धकाण्डे एकोनत्रिंशः
सर्गः ॥२९॥ ततस्तमक्षोभ्यबलं लङ्काधिपतये चराः सुवेले राघवं शैले निविष्टं प्रत्यवेदयन् १
चाराणां रावणः श्रुत्वा प्राप्तं रामं महाबलम् जातोद्वेगोऽभवत् किंचिच्छार्दूलं वाक्यमब्रवी
त् २ अयथावच्च ते वर्णो दीनश्चासि निशाचर नासि कच्चिदमित्राणां क्रुद्धानां वशमागतः रा०
३ इति तेनानुशिष्टस्तु वाचं मन्दमुदीरयन् तदा राक्षसशार्दूलं शार्दूलो भयविह्वलः ४ १०१

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

नतेचारयितुंशक्याराजन्वानरपुंगवाः विक्रांताबलवंतश्चराघवेणचरक्षिताः ५ नापिसंभाषितुं
शक्याःसंप्रश्नोत्रनलभ्यते सर्वतोरक्ष्यतेपंथावानरैःपर्वतोपमैः ६ प्रविष्टमात्रेज्ञातोहंबलेनत॥
स्मिन्विचारिते बलाद्गृहीतोरक्षोभिर्बहुधास्मिविचारितः ७ जानुभिर्मुष्टिभिर्दंतैस्तलैश्चाभिह
तोभ्रमम् परिणीतोस्मिहरिभिर्बलवद्भिरमर्षणैः ८ परिणीयचसर्वत्रनीतोहंरामसंसदम् रुधि
रस्राविदीनांगोविक्लवश्चलितेंद्रियः ९ हरिभिर्वध्यमानश्चयाचमानःकृतांजलिः राघवेणप
रित्रातोजीवामीतियदृच्छया १० एषशैलैःशिलाभिश्चपूरयित्वामहार्णवं द्वारमाश्रित्यलंकायाराम
स्तिष्ठतिसायुधः ११ गरुडव्यूहमास्थायसर्वतोहरिभिर्वृतः मांविसृज्यमहातेजालंकामेवाभि
वर्त्तते १२ पुराप्राकारमायातिक्षिप्रमेकतरंकुरु सीतांवापिप्रयच्छाशुयुद्धंवाप्रदीयताम् १३
मनसातंतदाश्रुत्यतत्क्रुद्धोराक्षसाधिपः शार्दूलस्यमहद्वाक्यमथोवाचसरावणः १४ यदिमांप्र
तियुध्येरन्देवगंधर्वदानवाः नैवसीतांप्रदास्यामिसर्वलोकभयादपि १५ एवमुक्त्वामहातेजा
रावणःपुनरब्रवीत् चारितामवतासेनाकेत्रशूराःप्लवंगमाः १६ कीदृशाःकिंप्रभावाश्चवानराये

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा॰वा॰पु॰ दुरासदाः कस्यपुत्रास्त्वपौत्रास्त्वतत्वमाख्यातुमर्हसि १७ तथात्रप्रतिपत्स्यामिज्ञात्वातेषां
१०२ बलाबलम् अवश्यंबलसंख्यानंकर्तव्यंयुद्धमिच्छता १८ तदेवमुक्तःशार्दूलोरावणेनततश्चा
रः इदंवचनमारेभेवक्तुंरावणसन्निधौ १९ अथर्क्षरजसःपुत्रोयुधिराजासुदुर्जयः गद्गदस्या
थपुत्रोवैजांबवानितिविश्रुतः २० गद्गदस्याथपुत्रोन्योगुरुपुत्रःशतक्रतोः कदनंयस्यएकेनकृतमे
केनरक्षसाम् २१ सुषेणश्चात्रधर्मात्मापुत्रोधर्मस्यवीर्यवान् सौम्यःसोमात्मजश्चात्रराजन्द
धिमुखःकपिः २२ सुमुखोदुर्मुखश्चात्रवेगदर्शीचवानरः मृत्युर्वानररूपेणनूनंसृष्टःस्वयं
भुवा २३ पुत्रोहुतवहस्याथनीलःसेनापतिःस्वयम् अनिलस्यचपुत्रोयंहनूमानितिविश्रुतः २४
नप्ताशक्रस्यदुर्धर्षोबलवानंगदोयुवा मैंदश्चद्विविदश्चोभौबलिनावश्विसंभवौ २५
पुत्रावैवस्वतस्यात्रपंचकालांतकोपमाः गजोगवाक्षोगवयःशरभोगंधमादनः २६ दशवा
नरकोट्यश्चशूराणांयुद्धकांक्षिणाम् श्रीमतांदेवपुत्राणांशेषानाख्यातुमुत्सहे २७ पुत्रो रा॰म॰
दशरथस्यैषसिंहसंहननोयुवा दूषणोनिहतोयेनखरश्चत्रिशिरास्तथा २८ नास्ति २०२

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रामस्य सदृशो विक्रमे भुवि कश्चन विराधो निहतो येन कबंधश्चांतकोपमः २९ वक्तुं न शक्तो रामस्य
गुणान्कश्चिन्नरः क्षितौ जनस्थानगता येन तावंतो राक्षसा हताः ३० लक्ष्मणश्चापि धर्मात्मा मा
तंगानामिव र्षभः यस्य बाणपथं प्राप्य न जीवेदपि वासवः ३१ श्वेतो ज्योतिर्मुखश्चात्र भास्करस्यात्मसं
भवौ वरुणस्य च पुत्रोऽथ हेमकूटः प्लवंगमः ३२ विश्वकर्मसुतो वीरो नलः प्लवगसत्तमः विक्रांतो बल
वानत्र वसुपुत्रः सुदुर्धरः ३३ राक्षसानां वरिष्ठश्च तव भ्राता विभीषणः प्रतिगृह्य पुरीं लंकां राघव
स्य हिते रतः ३४ इति सर्वं समाख्यातं तवेदं वानरं बलम् सुवेलेऽधिष्ठितं शैले शेषकार्ये भवान्ग
तिः ॥३५॥ इत्यार्षे श्रीमद्रामायणे युद्धकांडे त्रिंशः सर्गः ॥३०॥ ततस्तदक्षोभ्यबलं लंकाधिप
तेश्चराः सुवेले राघवं शैले निविष्टं प्रत्यवेदयन् १ चाराणां रावणः श्रुत्वा प्राप्तं रामं महाबलम् जा
तोद्वेगोऽभवत्किंचित्सचिवानिदमब्रवीत् २ मंत्रिणः शीघ्रमायांतु सर्वे वै सुसमाहिताः अयं नो मंत्रका
लो हि संप्राप्त इव राक्षसाः ३ तस्य तच्छासनं श्रुत्वा मंत्रिणोऽभ्यागमन्द्रुतम् ततः संमंत्रयामास र
क्षोभिः सचिवैः सह ४ मंत्रयित्वा तु दुर्धर्षः क्षमं यत्तदनंतरम् विसर्जयित्वा सचिवान्प्रविवेशालयमात्म

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०वा०यु० पम् ५ ततो राक्षसमादाय विद्युज्जिह्वं महाबलम् मायाविदं महामायः प्राविशद्यत्र मैथिली ६
१०३ विद्युज्जिह्वं च मायाज्ञमब्रवीद्राक्षसाधिपः मोहयिष्यामहे सीतां मायया जनकात्मजाम् ७ शिरो
मायामयं गृहीत्वा राघवस्य निशाचर मां त्वं समुपतिष्ठस्व महच्च सशरं धनुः ८ एवमुक्तस्तथेत्याह वि
द्युज्जिह्वो निशाचरः दर्शयामास तां मायां सुप्रयुक्तां स रावणो ९ तस्य तुष्टोभवद्राजा प्रददौ च विभूष
णम् ५ अशोकवनिकायां च सीतादर्शनलालसः १० नैर्ऋतानामधिपतिः संविवेश महाबलः ततो
दीनामदीनार्हां ददर्श धनदानुजः ११ अधोमुखीं शोकपरामुपविष्टां महीतले भर्तारमेव ध्यायं
तीम् अशोकवनिकां गताम् उपास्यमानां घोराभी राक्षसीभिरदूरतः १२ उपसृत्य ततः सीतां प्रहर्ष
न्नाम कीर्त्तयन् ८ इदं च वचनं धृष्टमुवाच जनकात्मजाम् १३ सांत्व्यमाना मया भद्रे यमुपाश्रित्य
वल्गसि खरहंता स ते भर्त्ता राघवः समरे हतः १४ छिन्नं ते सर्वतो मूलं दर्पस्ते निहतो मया व्यस
नेनात्मनः सीते मम भार्या भविष्यसि १५ विसृजैतां मतिं मूढे किं मृतेन करिष्यसि भवस्व भद्रे रा०म०
भार्याणां सर्वासामीश्वरी मम १६ अल्पपुण्ये निवृत्तार्थे मूढे पंडितमानिनि शृणु भर्तृवधं सी १०३

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

तेद्योरं वज्रवधं यथा १७ समायातः समुद्रान्तं मांहं तु किं लराघवः वानरेन्द्र प्रतापीतेन वलेन महतावृतः
१८ सन्निविष्टः समुद्रस्य पीड्यतीरम पोत्तरम् वलेन महता रामो व्रजत्यस्तं ते दिवाकरे १९ अथ पाध्व
निपरिश्रान्तमर्धरात्रे स्थितं वलम् सुवेलस्थं समासाद्य चरितं प्रथमं चरैः २० तस्य लत प्रतापीतेन
वलेन महता मम वलं मस्य हतं रात्रौ यवत्राम्मः सत्नक्षमाताः २१ पट्टिशान्परिघान् चक्रान् खड्गान्दं
डान्महायसान् वाणजालानि शूलानि भास्वरान्कूटमुद्गरान् २२ यष्टीश्च तोमरान्प्रासान् चक्राणि
मुसलानि च उद्यम्योद्यम्य रक्षोभिर्वानरेषु निपातिताः २३ अथ सुप्तस्य रामस्य प्रहस्तेन प्र
माथिना अस्मत्कं कृत हस्तेन शिरश्छिन्नं महासिना २४ । विभीषणः समुत्पत्य निगृहीतो य
दृच्छया दिशः प्रव्राजितः सर्वैः लक्ष्मणः प्लवगैः २५ सुग्रीवो ग्रीवया भग्नया शेते वगाधि
पः निरस्तहनुकः शेते हनूमान्राक्षसैर्हतः २६ जाम्बवानथ जानुभ्यामुत्पतन्निहतो युधि प
ट्टिशैर्वहुभिः छिन्नो निकृत्तः पादपो यथा २७ मैन्दश्च द्विविदश्चोभौ निहतौ वानरर्षभौ निश्व
सन्तौ रुदन्तौ च रुधिरेणापरिप्लुतौ २८ असिना व्यापतौ छिन्नौ मध्ये ह्यरिनिषूदनौ अनुतिष्ठति

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

१०४ मेदिन्यां पतनतः पनसो यथा २९ नाराचैर्बहुभिः छिन्नः शेते दर्यां दरीमुखे: कुमुदस्तु महातेजा निष्कू-
रा० वा० यु० जः सायकैः कृतः ३० शरभो बहुभिः छिन्नः शरैरासाद्य राक्षसैः पतितो रुधिरोद्गारी क्षितौ
निपतितो गदः ३१ हरयो मथिता नागैः रथजालैस्तथापरे शयाना मृदितास्तत्र वायुवेगैरिवाम्बु-
दाः ३२ प्रहृताश्चापरे त्रस्ता हन्यमाना जघन्यतः अभिद्रुतास्तु रक्षोभिः सिंहैरिव महाद्विपाः ३३
सागरे पतिताः केचित्केचिद्गगनमाश्रिताः ऋक्षा वृक्षान्समारूढा वानरैर्व्यतिमिश्रिताः ३४ साग-
रस्य च तीरेषु शैलेषु च वनेषु च पिंगलाक्षा विरूपाक्षैर्बहुभिर्विहतो हताः ३५ एवं तव हतो भ-
र्ता ससैन्यो मम सेनया क्षतजार्द्रं रजोध्वस्तमिदं चास्याहृतं शिरः ३६ ततः परमदुर्धर्षो रावणो रा-
क्षसेश्वरः सीतायामुपशृण्वत्यां राक्षसीमिदमब्रवीत् ३७ राक्षसं क्रूरकर्माणं विद्युज्जिह्वं समा-
नय येन तद्राघवशिरः संग्रामात्स्वयमाहृतम् ३८ विद्युज्जिह्वस्ततो गृह्य शिरस्तत्सशरासनम्
प्रणामं शिरसा कृत्वा रावणस्याग्रतः स्थितः ३९ तमब्रवीत्ततो राजा रावणो राक्षसं स्थितम् विद्युज्जि-
ह्वं महाजिह्वं समीपपरिवर्तिनम् ४० अग्रतः कुरु सीतायाः शीघ्रं दाशरथेः शिरः अवस्थां पश्चि राम०
१०४

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

मांभर्तुः रूपाणा साधुपश्यतु ४१ एवमुक्तेतुतद्रक्षः शिरस्तत्प्रियदर्शनम् उपनिक्षिप्यसीतायाः क्षि
प्रमंतरधीयतः ४२ रावणश्चापिचिक्षेपभास्वरं कार्मुकंमहत् त्रिषुलोकेषुविख्यातंसीतामिदमु
वाचच ४३ इदंतत्तवरामस्यकार्मुकं~~तुदत्तःप्रियसखा~~ज्यासमावृतम् इहप्रहस्तेनानीतंतंह
त्वानिशिमानुषम् ४४ सविद्युज्जिह्वेनसहैवतच्छिरोधनुश्चभूमौविनिकीर्यरावणः विदेहराज
स्यसुतांयशस्विनीं ततोब्रवीत्तांभवमेवशानुगा ॥ ४५ ॥ इत्यार्षेयुद्धकांडे एकत्रिंशः सर्गः ॥ ३१ ॥
सासीतातच्छिरोदृष्ट्वातच्चकार्मुकमुत्तमं सुग्रीवं प्रतिसंसर्गमाख्यातंचहनूमता १ नयनेमुखव
र्णंचभर्तुस्तत्सदृशंमुखम् केशान्केशांतदेशंचतंचचूडामणिंशुभम् २ एतैस्सर्वैरभिज्ञानै
रभिज्ञायसुदुःखिता विजगर्हेचकैकेयींक्रोशंतीकुररीयथा ३ सकामाभवकैकेयिहतोयंकुल
नंदनः कुलमुत्सादितंसर्वंत्वयाकलहशीलया ४ आर्येणकिंनुकैकेय्याः कृतंरामेणविप्रियम्
यन्मयाचीरवसनेदत्वाप्रव्राजितोवनम् ५ एवमुक्त्वातुवैदेहीवेपमानातपस्विनी जगामजगतींबा
लाछिन्नातुकदलीयथा ६ सामुहूर्तात्समाश्वस्यप्रतिलभ्यचचेतनां तच्छिरः समुपाघ्रायविल

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०ब्रा०यु० ल्लापायतेक्षणा ७ हाहतास्मिमहाबाहो वीरव्रतमनुव्रत इमांतेपश्चिमावस्थांगतास्मिविधवाकृ
१०५ ता ८ प्रथमंमरणंनार्याभर्तुर्वैगुण्यमुच्यते सुवृत्तःसाधुवृत्तायाःसंवृत्तस्त्वंममाग्रतः ९ दुःखाद्दुः
खंप्रपन्नायामग्नायाःशोकसागरे योहिमामुद्यतस्त्रातुंसोपित्वंविनिपातितः १० सात्वश्रूर्ममकौस
ल्यात्वयापुत्रेणराघव वत्सेनेवयथाधेनुर्विवत्सावत्सलाकृता ११ आदिष्टंदीर्घमायुस्तेदैव
ज्ञैरपिराघव अनृतंवचनंतेषामल्पायुरसिराघव १२ अथवानश्यतिप्रज्ञाप्राज्ञस्यापिसत
स्तव पचत्येनंयथाकालोभूतानांप्रभवोह्ययम् १३ अदृष्टंमृत्युमापन्नःकस्मात्त्वंनयशास्त्र
वित् व्यसनानामुपायज्ञःकुशलोह्यसिवर्जने १४ तथात्वंसंपरिष्वज्यरौद्रयातिनृशंसया का
लरात्र्यामयाछिद्यहृतःकमललोचनः १५ उपशेषेमहाबाहोमांविहायतपस्विनीम् प्रिया
ष मिवशुभांनारींपृथिवींपुरुषर्षभः १६ अर्चितंसततंयत्नाद्गंधमाल्यैर्मयातव इदंतेमत्प्रियंवीरधनुः
कनकभूषणम् १७ पित्रादशरथेनत्वंश्वशुरेणममानघ सर्वैश्चपितृभिःसार्द्धंनूनंस्वर्गेसमा राम०
गतः १८ दिविनक्षत्रभूतस्त्वंमहत्कर्मकृतंप्रियम् पुण्यंराजर्षिवंशंत्वमात्मनःसमुपेक्षसे १९ १०५

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

किं मां न प्रेक्षसे राजन् किं मां न प्रतिभाषसे बालां बालेन संप्राप्तां भार्यां मां सहचारिणीम् २० संश्रुतं
गृह्णता पाणिं चरिष्यामीति यत्त्वया स्मर तन्मम काकुत्स्थ नय मामपि दुःखिताम् २१ कस्मान्मामप
हाय त्वं गतो गतिमतां वर अस्माल्लोकादमुं लोकं त्यक्त्वा मामपि दुःखिताम् २२ कल्याणैरुचितं
यत्तत्परिष्वक्तं मयैव तु क्रव्यादैस्तच्छरीरं ते नूनं विपरिकृष्यते २३ अग्निष्टोमादिभिर्यज्ञैरिष्टवानाप्त
ल दक्षिणैः अग्निहोत्रेण संस्कारं केन त्वं न तु लप्स्यसे २४ प्रव्रज्यामुपपन्नानां त्रयाणामेकमागत
म् परिप्रक्ष्यति कौशल्या लक्ष्मणं शोकलालसा २५ स तस्याः परिपृच्छन्त्या वधं मित्रबलस्य
ते तव चाख्यास्यते नूनं निशायां राक्षसैर्वधम् २६ सा त्वां सुप्तं हतं ज्ञात्वा मां च रक्षोगृहं गताम् हृद
येनावदीर्णेन न भविष्यति राघव २७ मम हेतोरनार्याया अनर्हः पार्थिवात्मजः रामः सागरमुत्तीर्य
न वीर्यवान् गोष्पदे हतः २८ अहं दाशरथेनोढा मोहात्स्वकुलपांसनी आर्यपुत्रस्य रामस्य भार्या मृ
त्युरजायत २९ नूनमन्यां मया जातिं वारितं दानमुत्तमम् याहमद्यैव शोचामि भार्या सर्वातिथेरि
ह ३० साधु पातय मां क्षिप्रं रामस्योपरि रावण समानय पतिं पत्न्या कुरु कल्याणमुत्तमम् ३१ श्रि

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०वा०यु० ममापि शिरसा श्चायं कायं कायेन योजय रावणानुगमिष्यामि गतिं भर्तुर्महात्मनः ३२ इतीव दुःखसं
१०६ तप्ता विललापायतेक्षणा भर्तुः शिरो धनुश्चैव ददर्श जनकात्मजा ३३ एवं लालप्यमानायां सी
तायां तत्र राक्षसः अभिचक्राम भर्तारमनीकस्थः कृताञ्जलिः ३४ विजयस्वार्यपुत्रेति सोभि
वाद्य प्रसाद्य च न्यवेदयदनुप्राप्तं प्रहस्तं वाहिनीपतिम् ३५ अमात्यैः सहितः सर्वैः प्रहस्तः समुपस्थि
तः तेन दर्शनकामेन अहं प्रस्थापितः प्रभोः ३६ नूनमस्ति महाराज राजभावात्क्षमान्वितम् किं
चिदात्ययिकं कार्यं तेषां त्वं दर्शनं कुरु ३७ एतच्छ्रुत्वा दशग्रीवो राक्षसप्रतिवेदितम् अशोक
वनिकां त्यक्त्वा मन्त्रिणां दर्शनं ययौ ३८ स तु सर्वं समर्थ्यैव मन्त्रिभिः कृत्यमात्मनः सभां प्रविश्य विदधे
विदित्वा रामविक्रमम् ३९ अन्तर्धानं तु तच्छीर्षं तच्च कार्मुकमुत्तमम् जगाम रावणस्यैव निर्याणसम
नन्तरम् ४० राक्षसेन्द्रस्तु तैः सार्द्धं मन्त्रिभिर्भीमविक्रमैः समर्थयामास तदा रामकार्यविनिश्चयम्
४१ अविदूरस्थितान्सर्वान्बलाध्यक्षान्हितैषिणः अब्रवीत्कालसदृशो रावणो राक्षसाधिपः
४२ शीघ्रं भेरीनिनादेन स्फुटकोणाहतेन मे समानयध्वं सैन्यानि वक्तव्यं च न कारणं राम० १०६

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

ध्वंसेन्मानिवक्त्रं यं च न कारणम् ४३ ततस्तथेति प्रतिगृह्य तद्वचो ते देवदूताः सहसा महद्बलम् समानयंश्चै
व समागतं च न्यवेदयन्भर्तरि युद्धकांक्षिणः ॥४४॥ इत्यार्षे रामायणे सुन्दरकाण्डे द्वात्रिंशः सर्गः ॥३२॥ सी
तां तु मोहितां दृष्ट्वा सरमा नाम राक्षसी आससादाशु वैदेहीं प्रियां प्रणयिनीं सखीम् १ मोहितां राक्षसेन्द्रेण
सीतां परमदुःखिताम् आश्वासयामास तदा सरमा मृदुभाषिणी २ सा हि तत्र कृता मित्रं सीतया रक्ष्य
माणा या रक्षन्ती रावणाद्दिष्टा सानुक्रोशा दृढव्रता ३ सा ददर्श सखीं सीतां सरमा नष्टचेतनाम् उपावृ
ध्वस्तां त्योत्थितां वडवामिव पांसुषु ४ तां समाश्वासयामास सखीस्नेहेन सुव्रता ५ उक्ता यद्रावणेन त्वं प्रत्यु
क्तश्च स्वयं त्वया सखीस्नेहेन तन्भीरु मया सर्वं परिश्रुतम् ६ लीनया गहने शून्ये भयमुत्सृज्य रावणात्
तव हेतोर्विशालाक्षि न हि मे जीवितं प्रियम् ७ स सम्भ्रान्तश्च निष्क्रान्तो यत्कृते न राक्षसेश्वरः तच्च मे वि
दितं सर्वमभिनिष्क्रम्य मैथिलि ८ न शक्यं सौप्तिकं कर्तुं रामस्य विदितात्मनः वधश्च पुरुषव्याघ्रे त
स्मिन्नैवोपपद्यते ९ न त्वेव वानरा हन्तुं शक्याः पादपयोधिनः सुरा देवर्षभेणेव रामेण हि सुरक्षिताः १०
दीर्घवृत्तभुजः श्रीमान्महोरस्कः प्रतापवान् धन्वी संहननोपेतो धर्मात्मा भुवि विश्रुतः ११ विक्रान्तो र

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० बा० पु० क्षितानिप्रमात्मनश्चपरस्यचलक्ष्मणोनमहत्मात्राकुशलीनयशास्त्रवित् १२ हंतापरबलौघानाम
१०७ चिंत्यबलपौरुषः नहतोरघवःश्रीमान्सीतेशत्रुनिवर्हणः १३ अप्रकृतबुद्धिकृत्येनसर्वभूतविरो
धिना इयंप्रयुक्तारौद्रेणमायामायाविनात्वयि १४ शोकस्तेविगतःसर्वःकल्याणंत्वामुपस्थितम
ध्रुवंत्वांभजतेलक्ष्मीःप्रियंतेभवतिशृणु १५ उत्तीर्यसागरंरामःसहवानरसेनयासन्निविष्टःसमुद्र
स्यतीरमासाद्यदक्षिणम १६ दृष्टोमेपरिपूर्णार्थःकाकुत्स्थःसहलक्ष्मणः सहितैःसागरांतस्थैर्बलै
स्तिष्ठतिरक्षितः १७ अनेनप्रेषितायेचराक्षसाःलघुविक्रमाः राघवस्तीर्णइत्येवप्रवृत्तिस्तैरिहाहृता
१८ सतांश्रुत्वाविशालाक्षिप्रवृत्तिंराक्षसाधिपः एषमंत्रयतेसर्वैःसचिवैःसहरावणः १९ इतिब्रुवाणा
सरमाराक्षसीसीतयासह सर्वोद्योगेनसैन्यानांशब्दंशुश्रावभैरवम २० दंडनिर्घातवादिन्याःश्रुत्वाभे
र्यामहास्वनम उवाचसरमासीतामिदंमधुरभाषिणी २१ सन्नाहजननीह्येषाभैरवाभीरुभेरिका
भेरीनादंचगंभीरंशृणुतोयदनिस्वनम २२ कल्प्यंतेमत्तमातंगायुज्यंतेरथवाजिनः दृष्यंतेतुरगारूढाः
प्रासहस्ताःसहस्रशः २३ तत्रतत्रचसन्नद्धाःसंपतंतिसहस्रशः आपूर्यंतेराजमार्गाःसैन्यैरद्भुतदर्शनैः रामा० १०७

वेगवद्भिर्नदद्भिश्चतोयौघैरिवसागरः २४ शस्त्राणांचप्रसन्नानांचर्मणांवर्मणांतथा रथवाजिगजा
नांचएषसैद्धानुपातिनाम् २५ संभ्रमोरक्षसामेषहृषितानांतरस्विनाम् प्रभांविसृजतांपश्यपन्नानाव
तीतमुत्थितानाम् २६ संभ्रमोरक्षसामेषतुमुलोलोमहर्षणाम् श्रीस्त्वांभजतिशोकघ्नीरक्षसांभयमागा
तम् २७ रामःकमलपत्राक्षोदैत्यानामिववासवः अवजित्यजितक्रोधस्तमचिंत्यपराक्रमः रावणंस
मेरहत्वाभर्तात्वामधिगमिष्यति २८ विक्रमिष्यतिरक्षःसुभर्तातेसहलक्ष्मणः यथाशत्रुषुशत्रुघ्नोवि
ष्णुनासहवासवः २९ आगतस्यहिरामस्यक्षिप्रमंकगतांसतीम् अहंद्रक्ष्यामिसिद्धार्थांत्वांशत्रौविनि
पातिते ३० अश्रूण्यानंदजानित्वंवर्तयिष्यसिजानकि समागम्यपरिष्वज्य तस्योरसिमहोरसः
३१ अचिरान्मोक्ष्यतेसीतेदेवितेजघनंगताम् धृतामेतांबहून्मासान्वेणींरामोमहाबलः ३२ तस्यदृ
ष्ट्वामुखंदेविपूर्णचंद्रमिवोदितम् मोक्ष्यसेशोकजंवारिनिर्मोकमिवपन्नगी ३३ रावणंसमरेह
त्वानचिराद्देवमैथिलि त्वयासमग्रंप्रियया सुखार्होलप्स्यतेसुखम् ३४ सभाजितात्वंरामेणमोदिष्य
सिमहात्मना सुवर्षेणसमायुक्ता यथासस्येनमेदिनी ३५ गिरिवरमभितोभिवर्त्तमानोहयइवमंडल

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा॰ बा॰ पु॰ माशुचः करोति तमिह प्रशमामभ्युपैहि देवि दिवसकरप्रभवो ह्ययं प्रजानाम् ॥३६॥ इत्यार्षे रामायणे वा
१०८ लकाण्डे त्रयस्त्रिंशः सर्गः ॥३३॥ अथ पतिं जातसंतापां तेन वाक्येन मोहिताम् सस्माल्हादयामास पृथि
वीं द्यौरिवांभसा १ ततस्तस्याहितं तस्य व्याख्यकीर्तीस्त्वी वचः उवाच कालेन कालज्ञा स्मितपूर्वा
भिभाषिणी २ उत्सहेयमहं गत्वा ल ह्याकाममसितेक्षणो निवेद्य कुशलं तस्मै प्रतिच्छन्ना निवर्तितुम्
३ नहि मे क्रममाणाया निगलं वै विहायसि समर्थो गन्तिमन्वेतुं पवनो गरुडोपि वा ४ एवं ब्रुवाणां
तां सीतां समरमामिदमब्रवीत् मधुरं श्लक्ष्णया वाचा पूर्वं शोकाभिपन्नया ५ समर्थो गगनं गन्तु
मपि च त्वां मातत्नम् अवश्यं च्छाम्यकर्तव्यं कर्तव्यं तेम दन्तरे ६ मत्प्रियं यदि कर्तव्यं यदि बुद्धिः स्थिरा
तव स्नातुमिच्छामि तं गत्वा किं करोतीति राघवः ७ स हि मायाबलः क्रूरो रावणः शत्रुरावणः मां मो
हयति दुष्टात्मा पीतमात्रेव वारुणी ८ तर्जयति मां नित्यं भर्त्सयति चासकृत् राक्षसीभिः सुघोरा
भिर्याभिर्रक्षति नित्यशः ९ उद्विग्ना शंकिता चास्मि न स्वस्थं च मनो मम तद्भयाच्चाहमुद्विग्ना
अशोकवनिकां गता १० यदि नाम कथा तस्य निश्चितं वापि यद्भवेत् निवेदयेथाः सर्वं तद्रामे राम॰
१०८

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

स्यादनुग्रहः ११ सात्वेवंब्रुवतींसीतांसरमामधुरभाषिणी उवाचवचनंतस्याःस्पृशंतीबाष्पविक्लवम्
१२ एषतेयद्यभिप्रायस्तस्माद्गच्छामिजानकि गृह्यशत्रोरभिप्रायमुपावृत्तांचपश्यमाम् १३ एवमु
क्त्वाततोगत्वासमीपंतस्यरक्षसः शुश्रावकथितंतस्यरावणस्यसमंत्रिणः १४ साश्रुत्वानिश्चयंत
स्यनिश्चयज्ञादुरात्मनः पुनरेवागमत्क्षिप्रमशोकवनिकांशुभाम् १५ साप्रविष्टापुनस्तत्रददर्श
जनकात्मजा प्रतीक्षमाणांस्वामेवभ्रष्टपद्मामिवश्रियम् १६ तांतुसीतापुनःप्राप्तांसरमांवल्गु
भाषिणीम् परिष्वज्यचसुस्निग्धंददौचस्वयमासनम् १७ इहासीनासुखंसर्वमाख्याहिममतत्व
तः क्रूरस्यनिश्चयंतस्यरावणस्यदुरात्मनः १८ एवमुक्तातुसरमासीतयावेपमानया कथितंसर्व
माचष्टरावणस्यसमंत्रिणः १९ जनन्याराक्षसेंद्रोवैत्वन्मोक्षार्थंमहद्वचः अविद्धेनचवैदेहिमंत्रिवृ
द्धेनचोदितः २० दीयतामभिसत्कृत्यमनुजेंद्रायमैथिली निदर्शनंतेपर्याप्तंजनस्थानेयदद्भुतम् त
२१ लंघनंचसमुद्रस्यदर्शनंचहनूमतः वधंचरक्षसांयुद्धेकःकुर्यान्मानुषोभुवि २२ एवंसमंत्रि
वृद्धेनमात्राचबहुबोधितः नत्वामुत्सहतेमोक्तुमर्थमर्थपरोयथा २३ नोत्सहत्यमृतोमोक्तुंयुद्धेत्वा

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

मितिमेयिलि सामात्यस्य च शासस्य निश्चयो ह्येष वर्त्तते २४ तदेषा सुस्थिरा बुद्धिर्मम लुब्धो भाद्दुवस्थि
ताभयार्न्न शक्रत्वामोक्तुमनिरस्तस्तुसंयुगे एष सूतानां च सर्व्वेषामात्मनश्च वधेन हि २५ निहत्य राव
णं संख्ये सर्व्वथा निशितैः शरैः प्रतिनेष्यति रामस्त्वामयोध्यामसितेक्षणे २६ एतस्मिन्नन्तरे शब्दो भे
रीशंखसमाकुलः श्रुतो वानरसैन्यानां कंपयन्धरणीतलम् ॥२७॥ श्रुत्वा तु तद्वानरसैन्यनादं लंका
गता राक्षसराजभृत्याः ॥ हतौजसो दैन्यपरीत्तचेष्टाः श्रेयो न पश्यंति नरेन्द्रदोषात् ॥२८॥ इत्यार्षे रामाय
णे युद्धकाण्डे वाल्मीकीये चतुर्व्विंशः सर्गः ॥२४॥ तेन शंखविमिश्रेण भेरीशब्देन राघवः उपयाति म
हाबाहुरामः परपुरंजयः १ तन्निनादं निशम्याथ रावणो राक्षसेश्वरः मुहूर्त्तं ध्यानमास्थाय सचिवानिद
मब्रवीत् २ अथ तान्सचिवांस्तत्र सर्व्वानाभाष्य रावणः सभां सन्नादयन्सर्व्वामित्युवाच महाबलः जग
त्संतापनः क्रूरो गर्हयन्हितवादिनः ३ तरणं सागरस्यास्य विक्रमं बलपौरुषम् यदुक्तवंतो रामस्य भवंत
स्तन्मया श्रुतम् ४ भवतश्चाप्यहं वेद्मि युद्धे सत्यपराक्रमान् तूष्णीकानीक्षतोन्योन्यं विदित्वा रामवि
क्रमम् ५ ततस्तु सुमहाप्राज्ञो माल्यवान्नाम राक्षसः रावणस्य वचः श्रुत्वा मातुः पैतामहोऽब्रवीत् ६।

द्विविंशोन्ह
वर्त्तमानक
थासमाप्ताः

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

विद्यास्वभिविनीतो यो राजा राज्यानुगः सप्राप्नोति चिरमैश्वर्यं यशश्च कुरुनन्दन ७ संदधानो हि का
लेन विग्रहं श्वारिमित्रह स्वपक्षो वर्धनं कुर्वन्महदैश्वर्यमश्नुते ८ हीयमानेन कर्त्तव्यो राज्ञा संधि
समेन च नेशत्रुमवमन्येत ज्यायान्कुर्वीत विग्रहम् ९ तन्महांशे च ते संधिस्तवामे राजावशा यदर्थम
मिथुक्कास्मसीतानासे द्रदीपताम् १० तस्पदेवर्षयः सर्वे गंधर्वाश्च जयैषिणः विरोधं मा गमत्तेन संधि
ह्तेन राचताम् ११ स्वयं जन्मदाशवान्यक्षौ हायेव हि पितामहः सुराणामसुराणां च धर्मो धर्मैति दाश्रयो
१२ धर्मो हि स्वप्रतेपक्षः प्रभवाणां महात्मनाम् अप्रधर्मो रक्षतां पक्षः प्रभुराणां चराचराः १३ धर्मो
वैगनसत्ते धर्मस्ततः कृतमभूद्युगम् अप्रधर्मोग्नसत्ते धर्मैस्तत्तत्तिष्यः प्रवर्तते १४ नत्वया चरता लोका
न्धर्मोपि निहतो महान् अप्रधर्मः प्रसृतो होतश्च तेनास्माहृत्तिनः परे १५ सप्रमादात्स्वकृत्तेऽधर्मो
हिग्नसत्ते हिनः विवर्द्धयति पक्षं च सुराणां सुरभावनः १६ विषयेषु प्रसक्तेन यत्किंचित्कारिणा त्व
या क्रूरबीराणामग्निकन्यानामुद्योजनितो महान् १७ तेषां प्रभावो दुर्द्धर्षः प्रदीप्त स्वपावकः तप
साभाविताल्मानो धर्मस्यानुग्रहेरताः १८ मत्व्ये पिज्ञैर्यजेसन्नेनित्यं तैस्तैर्हि जातयः जन्तुसग्नौ स्वविवि

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

ए० वा० पु० ११० धिवद्वेदांश्चोच्चैरधीमते १९ त्र[illegible]निभूयचा संतिब्रह्मघोषानुदीरयन् दिशो विप्रद्रुताः सर्वत्त
नायिन्नुरिवोत्तमो २० अपौनामग्निक न्याणामग्निहोत्रसमुत्थितः ग्रासत्तेरक्षसंतेजो धूमो व्या
प्य दिशो दश २१ तेषु तेषु च देशेषु व्रातपेष्वेव धत्तवतैः चर्यमाणे तपस्वी ब्रह्मसंताप यांतिराक्षसान् २२
देवदानवयक्षेभ्यो गृहीतश्च वरस्त्वया मानुषा वानरा ऋक्षा गोलांगूला महावलाः वलवंतरहागम्य
गर्जंति दृढविक्रमाः २३ उत्पातान्विविधान्दृष्ट्वा घोरान्वहुविधान्वहून् विनाशमनुपश्यामि सर्वेषां र
क्षसामहम् २४ खरामिलनिना घोरमेघाः प्रतिभयंकराः शोणितेनाभिवर्षंति लंकामुष्णेन सर्वतः २५
रुदतां वाहनानां च प्रपतंत्यस्रुविंदवः रजोध्वस्ता विवर्णाश्च नप्रभांति यथापुरम् २६ व्याला गोमा
युवो गृध्राश्च वाश्यंति च सुभैरवम् प्रविश्य लंकामनिशं समवायांश्च कुर्वते २७ कालिकाः पांडुरैर्द
तैः प्रहसंत्यग्रतःस्थिताः स्त्रियः स्वप्ने मुष्णंत्यो गृहाणि प्रतिभाष्य च २८ गृहाणां वलिकर्मा
णि श्वानः पर्युपसेवते खरा गोषु प्रजायंते मूषकान् कुलैषु च २९ मार्जारा द्वीपिभिः सार्द्धं सूकरा
शुनकैः सह किंनरा राक्षसैश्चापि समेयुर्मानुषैः सह ३० पांडुरा रक्तपादाश्च विहगाः कालचोदि एन० ११०

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

ताः राक्षसानां विना प्राय कपोता विचरंतीति च ३१ ची ची कूचीति वाश्यंतः शारिका वेश्मसु स्थिताः
पतंति मन्ये पिता श्चापि निर्जिताः कलहैर्द्विभिः ३२ पक्षिणश्च मृगाः सर्वे वैश्वस्यादि संहृदंतीति च ३३ करा
लो विकटो मुंडः पुरुषः कृष्णपिंगलः कालो गृहाणि सर्वेषां काले काले न्ववेक्षते ॥ ३४ ॥ एतान्यन्या
नि दुष्टानि निमित्तान्युत्पतंतीति च ३५ विष्णुं मन्यामहे रामं मानुषं रूपमाश्रितम ॥ नहि मानुषमात्रो
सौ राघवो दृढविक्रमः ३६ येन बद्धः समुद्रे च सेतुः परमाद्भुतः ॥ कुरुष्व नरराजेन संधिं रामेण रावण
ज्ञात्वावधार्य कर्माणि क्रियतामायतिक्षमम ॥ ३७ ॥ इदं वचस्तस्य निगद्य माल्यवान्परीक्ष्य रक्षोधिप
तेर्मनः पुनः अनुत्तमेषूत्तमपौरुषो बली बभूव तूष्णीं समवेक्ष्य रावणम ॥ ३८ ॥ इत्यार्षे रामायणे वा
ल्मीकीये युद्धकाण्डे पंचत्रिंशः सर्गः ॥ ३५ ॥ तत्तु माल्यवतो वाक्यं हितमुक्तं दशाननः न मर्षय
ति दुष्टात्मा कालस्य वशमागतः १ स बद्ध्वा भ्रुकुटीं वक्त्रे क्रोधस्य वशमागतः अमर्षात्परिवृत्ताक्षो
माल्यवंतमथाब्रवीत् २ हितबुद्ध्या यदहितं वचः परुषमुच्यते परपक्षं प्रविश्यैव नैतच्छ्रोत्रं गतं मम
३ मानुषं कृपणं राममेकं शाखामृगाश्रयम् समर्थं मन्यसे केन त्यक्तं पित्रा वनालयम् ४ रक्षसामी।

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

४ द्विधाभज्येयमप्येवंननमेयंतुकस्यचित् एषमेसहजोदोषःस्वभावोदुरतिक्रमः ११
रा०वा०यु० श्वरंमांचदेवानांचभयंकरं हीनंमांमन्यसेकेनश्रहीनंसर्वविक्रमैः ५ वीरद्वेषेणवाव्याघ्रांकेपद्मपातेन
१११ वारियोः त्वयाहंपरुषाण्युक्तःपरप्रोत्साहनेनवा ६ प्रभवंतंपदस्थंहिपरुषंकोभिभाषते पंडि
तःशास्त्रतत्त्वज्ञोविनाप्रोत्साहनेनवा ७ श्रानीयचवनात्सीतांपद्महीनामिवश्रियं किमर्थंप्रतिदा
स्यामिराघवस्यभयादहम् ८ वृतंवानरकोटीभिःससुग्रीवंसलक्ष्मणम् पश्यकैश्चिदहोभिश्च रा
घवंनिहतंमया ९ द्वंद्वेयस्यनतिष्ठंतिदैवतान्यपिसंयुगे सकस्माद्रावणोयुद्धेभयमाहारयिष्यति १०
४ यदितावत्समुद्रेतुसेतुर्बद्धोयदृच्छया रामेणविस्मयःकोत्रयेनतेभयमागतम् १२ ननुतीर्त्वार्णवंरा
मःसहवानरसेनया प्रतिजानामितेसत्यंनजीवन्प्रतियास्यति १३ एवंब्रुवाणंसंरब्धंरुष्टंविज्ञायरावण
म् व्रीडितोमाल्यवान्वाक्यंनोत्तरंप्रत्यपद्यत १४ जयाशिषाचराजानंवर्द्धयित्वायथोचितम् मा
ल्यवानभ्यनुज्ञातोजगामस्वंनिवेशनम् १५ रावणस्तुसहामात्योमंत्रयित्वाविमृश्यच लंकायास्तुतदा
गुप्तिंकारयामाससत्तमः १६ व्यादिदेशाचपूर्वस्यांप्रहस्तंद्वारिराक्षसम् दक्षिणस्यांमहावीर्यौमहा राम०
पार्श्वमहोदरौ १७ पश्चिमायामथद्वारिपुत्रमिंद्रजितंतदा व्यादिदेशमहामायंराक्षसैर्बहुभिर्वृतम् १११

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

१८ उत्तरस्यांपुरद्वारिव्यादिश्यपशुद्रकसारणौ स्वयंचात्रगमिष्यामिमंत्रिणस्तानुवाचह १९ राक्षसं
तुविरूपाक्षंमहावीर्यपराक्रमम् मध्यमेस्थापयद्गुल्मेबहुभिःसहराक्षसैः २० एवंविधानंलं
कायांकृत्वाराक्षसपुंगवः कृतकृत्यमिवात्मानंमन्यतेकालचोदितः २१ विसर्जयामासततःस
मंत्रिणोविधानमाज्ञायपुरस्यपुष्कलंजयाशिषा मंत्रिगणेनपूजितोविवेशसोन्तःपुरमृद्धिमन्म
हत् ॥ २२ ॥ इत्यार्षेयुद्धकांडेषट्त्रिंशःसर्गः ॥ ३६ ॥ नरवानरराजानौसतुवायुसुतःकपिः जांब
वान्ऋक्षराजश्चराक्षसश्चविभीषणः १ अंगदोवालिपुत्रश्चसौमित्रिःशरभःकपिः सुषेणःस
हदायादोमैंदोद्विविदएवच २ गजोगवाक्षःकुमुदोनलोथपनसस्तथा अमित्रविषयंप्राप्ताः
समवेताःसमर्थयन् ३ इयंसालक्ष्यतेलंकापुरीरावणपालिता सासुरोरगगंधर्वैःसर्वैरपिसुदु
र्जया ४ कार्यसिद्धिंपुरस्कृत्यमंत्रयध्वंविनिर्णये नित्यंसन्निहितोह्यत्ररावणोराक्षसाधिपः ५
अथतेषुब्रुवाणेषुरावणावरजोब्रवीत् वाक्यमग्राम्यपदवत्पुष्कलार्थंविभीषणः ६ अनलः
शरभश्चैवसंपातिःप्रघसस्तथा गत्वालंकांममामात्याःपुरींपुनरिहागताः ७ भूत्वाशकुनयः

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०वा०यु० सर्वं श्रविष्ठाम्यरिपोर्लंके विधानं विहितं यच्च तत्र दृष्ट्वा समुपस्थिताः ८ सं विधानं यदाहुस्ते रावणस्य दु
११२ रात्मनः राम तद्ब्रुवतः सर्वं यथातथ्येन मे शृणु ९ पूर्वं प्रहस्तः सबलो द्वारमासाद्य तिष्ठति दक्षि
णं च महावीर्यौ महापार्श्वमहोदरौ १० इन्द्रजित्पश्चिमद्वारं राक्षसैर्बहुभिर्वृतः पट्टिशासिधनुष्म
द्भिः शूलमुद्गरपाणिभिः ११ नानाप्रहरणैः शूरैरावृतो रावणात्मजः राक्षसानां सहस्रैस्तु बहु
भिः शस्त्रपाणिभिः १२ युक्तः परमसंविग्नो राक्षसैर्बहुभिर्वृतः उत्तरं नगरद्वारं रावणः स्वयमास्थि
तः १३ विरूपाक्षस्तु महता शूलखड्गधनुष्मता बलेन राक्षसैः सार्द्धं मध्यमं गुल्ममास्थि
तः १४ एतानेवंविधान्गुल्मांल्लंकायां समुदीक्ष्य ते मामकाः सचिवाः सर्वे शीघ्रं पुनरिहाग
ताः १५ गजानां च सहस्रं च रथानामयुतं तथा हयानामयुते द्वे च साग्रकोटिश्च रक्षसाम् १६ वि
क्रान्ता बलवन्तश्च संयुगेष्वाततायिनः इष्टा राक्षसराजस्य नित्यमेते निशाचराः १७ एकैकस्यात्र यु
द्धार्थे राक्षसस्य विशांपते परिवारः सहस्राणां सहस्रमुपतिष्ठते १८ एतां प्रवृत्तिं लंकायां मंत्रि
प्रोक्तां विभीषणः एवमुक्त्वा महाबाहू राक्षसांस्तानदर्शयत् १९ लंकायां सचिवैः सर्वं रामाय राम०
११२

प्रत्यवेदयत् रामं कमलपत्राक्षमिदमुत्तरमब्रवीत् रावणावरजः श्रीमान् रामप्रियचिकीर्षया
२० कुवेरं तु यदा राम रावणः प्रत्ययुध्यत षष्टिः शतसहस्राणि तदा निर्यान्ति राक्षसाः २१ पराक्र-
मेण वीर्येण तेजसा सत्त्वगौरवात् सदृशा ये ऽत्र दर्पेण रावणस्य दुरात्मनः २२ अत्र मन्युर्न कर्त्त-
व्यो राघवेत्वां न भीषये समर्थो ह्यसि वीर्येण सुराणामपि निग्रहे २३ तद्भवांश्चतुरंगेण बले-
न महता वृतम् व्यूह्येदं वानरानीकं निर्मथिष्यसि रावणम् २४ रावणावरजे वाक्यमेवं ब्रुवति
राघवः शत्रूणां प्रतिघातार्थमिदं वचनमब्रवीत् २५ पूर्वद्वारे तु लंकायां नीलो वानरपुंगवः
प्रहस्तप्रतियोद्धा स्याद्वानरैर्बहुभिर्वृतः २६ अंगदो वालिपुत्रस्तु बलेन महता वृतः दक्षिणेबा-
धितां द्वारे महापार्श्वमहोदरौ २७ हनूमान्पश्चिमद्वारे निपीड्य पवनात्मजः प्रविशत्वप्रमेयात्मा
बहुभिः कपिभिर्वृतः २८ दैत्यदानवसंघानाम् ऋषीणां च महात्मनाम् विप्रकारप्रियः क्षुद्रो वर-
दानबलान्वितः २९ परिक्रामति यः सर्वान्लोकान्संतापयन्प्रजाः तस्याहं राक्षसेंद्रस्य स्वय-
मेव वधे धृतः ३० उत्तरं नगरद्वारमहं सौमित्रिणा सह निपीड्याभिप्रवेक्ष्यामि सबलो यत्र रा-

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० वा० यु० बलाः ३१ वानरेंद्रश्च बलवान् सुराजश्च वीर्यवान् राक्षसेंद्रानुजश्चैव वसुदन्मेम बहुमध्यमे
११३ ३२ नचैव मानुषं रूपं कार्यं हरिभिराहवे एषा भवतु नः संज्ञा युद्धेस्मिन्वानरे बले ३३ वानरा एव नश्चि
ह्नं स्वजनेस्मिन् भविष्यति वयं तु मानुषेणैव सप्त योत्स्यामहे परान् ३४ अहमेव सह भ्रात्रा लक्ष्मणेन महौ
जसा आत्मना पंचमश्चायं सखा मम विभीषणः ३५ स रामः कृत्यसिद्ध्यर्थमेवमुक्त्वा विभीषणम् सु
वेलारोहणे बुद्धिं चकार मतिमान्मतिम् ३६ रमणीयतरं दृष्ट्वा सुवेलस्य गिरेस्तटम् ३७ ततस्तु
रामो महता बलेन प्रच्छाद्य सर्वां पृथिवीं महात्मा प्रहृष्टरूपोभिजगाम लंकां कृत्वा मतिं सोरिवधे
महात्मा ॥३८॥ इत्यार्षे रामायणे वाल्मीकीये युद्धकाण्डे सप्तत्रिंशः सर्गः ॥३७॥ स तु कृत्वा सुवेलस्य म
तिमारोहणं प्रति लक्ष्मणानुगतो रामः सुग्रीवमिदमब्रवीत् १ विभीषणं च धर्मज्ञमनुरक्तं निशाच
रम् मंत्रज्ञं च विधिज्ञं च श्लक्ष्णया परया गिरा २ सुवेलं साधु शैलेंद्रमिमं धातुशतैश्चितम् मरणांताय
हृता भार्या दुरात्मना ४ येन धर्मो न विज्ञातो न वृत्तं न कुलं तथा राक्षस्या नीचया बुद्ध्या येन तद्गर्हितं राम०
कृतम् ५ एवं समं च यन्नेवत्स क्रोधो एवरोहणं प्रति रामः सुवेलमासाद्य चित्रसानुमुपारुहत् ६ ७ ८ ११३
३ ष्चितम् अध्यारोहामहे सर्वे वत्स्यामोत्र निशामिमाम् ३ लंकां चालोकयिष्यामो निलयं तस्य रक्षसः येन

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

तोऽलक्ष्मणश्चैवमन्वगच्छत्समाहितः सशरं चापमुद्यम्य सुमहद्विक्रमे रतः ७ तमन्वरोहत्सुग्रीवः सा
मात्यः सविभीषणः हनूमानंगदो नीलो मैंदो द्विविद एव च ८ गजो गवाक्षो गवयः शरभो गंधमादनः
पनसः कुमुदश्चैव हरो रंभश्च यूथपः ९ जांबवांश्च सुषेणश्च ऋषभश्च महाकपिः दुर्मुखश्च महा
तेजास्तथा शतबलिः कपिः एते चान्ये च बहवो वानराः शीघ्रगामिनः १० ते वायुवेगप्रवणास्तं गिरिं
गिरिचारिणः अध्यारोहंत शतशः सुवेलं यत्र राघवः ११ ते त्वदीर्घेण कालेन गिरिमारुह्य सर्वतः
ददृशुः शिखरे तस्य विषक्तामिव खे पुरीम् १२ तां शुभां प्रवरद्वारां प्राकारवरशोभिताम् लंकां रा
क्षससंपूर्णां ददृशुर्हरियूथपाः १३ प्राकारचयसंस्थैश्च तथा नीलैर्निशाचरैः ददृशुस्ते हरिश्रे
ष्ठाः प्राकारमपरं कृतम् १४ ते दृष्ट्वा वानराः सर्वे राक्षसान्युद्धकांक्षिणः मुमुचुर्विविधान्ना
दांस्तत्र रामस्य पश्यतः १५ ततोऽस्तमगमत्सूर्यः संध्यया प्रतिरंजितः पूर्णचंद्रप्रदीप्ता च क्षपा सम
तिवर्तते १६ ततः स रामो हरिवाहिनीपतिर्विभीषणेन प्रतिनंद्य सत्कृतः सलक्ष्मणो यूथपयूथ
संवृतः सुवेलपृष्ठे न्यवसद्यथासुखम् ॥ १७ ॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये युद्धकांडे प्र

रा०बा०पु०त्रिंशः सर्गः ।। दृष्ट्वा तां लक्ष्मिसुखितां तत्र सुवेले हरियूथपाः । लंकायां ददृशुर्वीरा वनान्युपवनानि च
११४
१ समसौम्यानि रम्याणि विशालान्यायतानि च । दृष्टिरम्याणि ते दृष्ट्वा बभूवुर्जातविस्मयाः २
चंपकाशोकबकुलैः सालतालसमाकुलाः । तमालवनसंछन्ना नागमालासमावृता ३ हिंता
लैरर्जुनैर्नीपैः सप्तपर्णैः सुपुष्पितैः । तिलकैः कर्णिकारैश्च पाटलैश्च समंततः ४ शुशुभे पु
ष्पिताग्रैश्च लतापरिगतैर्द्रुमैः । लंका बहुविधैर्दिव्यैर्यथेंद्रस्यामरावती ५ विचित्रकुसुमोपेतै
रक्तकोमलपल्लवैः । शाद्वलैश्च तथा नीलैश्चित्राभिर्वनराजिभिः । गंधाढ्यान्यभिरम्याणि पुष्पा
णि च फलानि च । धारयंति नगास्तत्र भूषणानीव मानवाः ७ तच्चैत्ररथसंकाशं मनोज्ञं नंदनो
पमम् । वनं सर्वर्तुकं रम्यं शुशुभे षट्पदायुतम् ८ नत्यूहकोयष्टिबकैर्नृत्यमानैश्च बर्हिणैः । रु
तं परभृतानां च शुश्रुवे वननिर्झरे ९ नित्यमत्तविहंगानि भ्रमराचरितानि च । कोकिलाकुल
षंडानि विहंगाभिरुतानि च १० भृंगराजाभिगीतानि कुररैः सेवितानि च । कोयष्टिकविघुष्टा
नि सारसाभिरुतानि च ११ विविशुस्ते ततस्तानि वनान्युपवनानि च । हृष्टाः प्रमुदिता वीरा हर राम०
११८

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

पः कामरूपिणः १२ तेषांश्च विप्रानां तत्र वानराणां महौजसाम् शुश्रुवुस्तं गुरुभिर्वै घोषाणामसमो निस्वनः १३
गृन्थेस्तु हरिवीराणां पूर्यान्ति क्रम्य पूयपाः सुग्रीवेणाभ्यनुज्ञातास्तं लंकां जग्मुः पताकिनीम् १४ वित्रास
यंतो विहगान्त्रासयंतोमृगद्विजान् कंपयंतश्च तां लंकां नादैः स्वैर्नर्दतां वराः १५ कुर्वंतस्ते महा
वेगां महीं चरणपीडिताम् रजश्च महतसैवोर्ध्वं जगाम चरणोत्थितम् १६ ऋक्षाः सिंहा इव महि
षा वानराणां मृगाः खगाः तेन शब्देन वित्रस्ता जग्मुर्भीता दिशो दश १७ शिखरं तु त्रिकूटस्य प्रां
शु चैकं दिविस्पृशं समंतात्पुष्पसंछन्नं महारजतसन्निभम् १८ शतयोजनविस्तीर्णं विमलं
चारुदर्शनम् श्लक्ष्णं श्रीमन्महच्चैव दुःप्राप्यं शकुनैरपि मनसापि दुरारोहं किं पुनः कर्मणा जनैः
१९ निविष्टा तस्य शिखरे लंका रावणपालिता दशयोजनविस्तीर्णा तथा द्विगुणमायता २० सा ॥
पुरी गोपुरैरुच्चैः पांडुराम्बुदसन्निभैः कांचनेन च शालेन राजतेन च शोभते २१ प्रासादैश्च विमानैश्च
लंका परमभूषिता घनैरिवातपापाये मध्यमं वैष्णवं पदम् २२ यस्यां स्तंभसहस्रेण प्रासादः
समलंकृतः कैलासशिखराकारो दृश्यते खमिवोल्लिखन् २३ चैत्यः स राक्षसेन्द्रस्य बभूव पुरभूषणम्

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०वा०यु० प्रीतेन रक्षसां निमिषः समन्वेतार स्यते २४ मनोरमां काचनवतीं पर्वतैरुपशोभिताम् नानाधातुवि
११५ चित्रैश्च उद्यानोपवनाकुलाम् २५ नानाविहगसंघुष्टां नानामृगसमावृताम् ॥ नानाकुसुमसंछ
न्नां नानाराक्षससेविताम् २६ तां समृद्धां समृद्धार्थो लक्ष्मीवान्लक्ष्मणाग्रजः रावणस्य पुरीं रामो दद
र्श सह वानरैः २७ तां महात्मा महतीं वा धीं दृष्ट्वा लक्ष्मणपूर्वजः नगरीममरप्रख्यो विस्मयं प्राप वीर्यवा
न् २८ तां रत्नपूर्णां बहुसंविधानां प्रासादमालाभिरलंकृतां च पुरीं महायंत्रकपाटमुख्यां ददर्श रा
मो महता बलेन ॥ २९ ॥ इत्यार्षे रामायणे वाल्मीकीये युद्धकांडे एकोनचत्वारिंशः सर्गः ॥ ३९ ॥ सीताराम
ततो रामः सुवेलाग्रं योजनद्वयमंडलम् आरुरोह ससुग्रीवो हरियूथपसंवृतः १ स्थित्वा मुहूर्तं तत्रै
व दिशो दश विलोकयन् त्रिकूटशिखरे रम्ये निर्मितां विश्वकर्मणा २ ददर्श लंकां सुन्यस्तां रम्यका
ननशोभिताम् तस्यां गोपुरशृंगस्थं राक्षसेंद्रं दुरासदम् ३ श्वेतचामरपर्यंतं विजयच्छत्रशोभितम् र
क्तचंदनसंलिप्तं रक्ताभरणभूषितम् ४ नीलजीमूतसंकाशं हेमसंछादितांबरम् ऐरावतविषाणा
ग्रैरुत्कृष्टकिणवक्षसम् ५ शशलोहितरागेण संवीतं रक्तवाससा संध्यातपेन संछन्नं मेघरा रा०म०
११५

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

भ्रमिवांबरे ६ पश्यतां वानरेंद्राणां राघवस्यापि पश्यतः दर्शनाद्राक्षसेंद्रस्य सुग्रीवः सहसोत्थितः ७
क्रोधवेगेन संयुक्तः सत्वेन च बलेन च गिरिशृंगादथोत्थाय पुप्लुवे गोपुरस्थले ८ स्थित्वा मुहूर्तं सं
प्रेक्ष्य निर्भयेनांतरात्मना तृणीकृत्य च तद्रक्षः सोऽब्रवीत्परुषं वचः लोकनाथस्य रामस्य सखा दासोऽस्मि रा
क्षस न मया मोक्ष्यसेऽद्य त्वं पार्थिवेंद्रस्य तेजसा १० इत्युक्त्वा सहसोत्पत्य पुप्लुवे तस्य चोपरि आकृष्य मु
कुटं चित्रं पातयामास तद्भुवि ११ समीक्ष्य तूर्णमायांतं बभाषे तं निशाचरः सुग्रीवस्त्वं परोक्षं मे हीन
ग्रीवो भविष्यसि १२ इत्युक्त्वोत्थाय तं क्षिप्रं बाहुभ्यामाक्षिपत्तले कंदुवत्तं समुत्थाय बाहुभ्यामाक्षि
पद्धरिः १३ परस्परं स्वेदविदिग्धगात्रौ परस्परं शोणितरक्तदेहौ परस्परं श्लिष्टनिरुद्धचेष्टौ परस्परं शा
ल्मलिकिंशुकाविव १४ मुष्टिप्रहारैश्च तलप्रहारैररत्निघातैश्च कराग्रघातैः तौ चक्रतुर्युद्ध
मसह्यरूपं महाबलौ राक्षसवानरेंद्रौ १५ कृत्वा नियुद्धं भृशमुग्रवेगौ कालं चिरं गोपुरवेदिमध्ये
उत्क्षिप्य चोत्क्षिप्य विनम्य देहौ पदक्रमात्क्रो पुरवेदिलग्नौ १६ अन्योन्यमापीड्य विलग्नदेहौ तौ पे
ततुः सालनिखातमध्ये उत्पेततुर्भूतलमस्पृशंतौ स्थित्वा मुहूर्तं त्वभिनिःश्वसंतौ १७ आलिंग्य चा

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०वा०यु० स्तिंपच बाहुयोद्धैः संयोजयामासतुराहवे तौ समं भशिक्षाबलसंप्रयुक्तौ क्रमं न तौ जग्मतुराजि
११६ वीरौ १८ शार्दूलसिंहाविव जातदर्पौ गजेंद्रपोताविव संप्रवृद्धौ संहत्य संवेष्ट्य च तौ कराभ्यां तौ पेत
तुर्वै युगपद्धरायाम् १९ उद्यम्य चान्योन्यमधिक्षिपंतौ संचक्रमाते बहुयुद्धमार्गे व्यायामशिक्षा
बलसंप्रयुक्तौ क्रमं न तौ जग्मतुराशु वीरौ २० बाहूत्तमैर्वारणवारणाभैर्निवारयंतौ परवारणाभौ
चिरेण कालेन भृशं प्रयुक्तौ संचेरतुर्मंडलमार्गमाशु २१ तौ परस्परमासाद्य यत्तावन्योन्यसूदने मा
र्जारविव भक्षार्थे वितस्थाते मुहुर्मुहुः २२ मंडलानि विचित्राणि स्थानानि विविधानि च गोमू
त्रिकाणि चक्राणि चित्राण्यपगतानि च २३ तिरश्चीनगतान्येव तथा वक्रगतानि च परिमोक्षं प्रहारा
णां वर्जनं परिधावनम् २४ अभिद्रवणमाप्लावमास्थानं च सविग्रहं परावृत्तमपावृत्तमपद्रुतमवप्लुत
म् २५ उपन्यस्तमपन्यस्तं युद्धमार्गविशारदौ तौ विचेरतुरन्योन्यं वानरेंद्रश्च रावणः २६ एतस्मि
न्नंतरे रक्षो मायाबलमथात्मनः आरब्धुमुपसंपेदे ज्ञात्वा तं वानराधिपः २७ उत्पपात तदाकाशं
जितकाशी जितक्लमः रावणः स्थित एवात्र हरिराजेन वंचितः २८ अथ हरिवरनाथः प्राप्तसंग्राम रा०म०
११६

ध्रु

कीर्तिर्निशि चरपतिमाजौ योजयित्वा श्रमेण ॥ गगनमतिविपुलं त्वं चयित्वा कृतः तु हरिगणाव
रम्भेणाममपार्थं जगाम ॥२९॥ इति सकलविलसत्तुत्तवतत्कर्म कृत्वा पवनगतिरनीकं प्रावि प्राप्त
प्रहृष्टः ॥ रघुवरनिकटं तो वैदेहीं पन्नुद्ध हर्षवतः म गगनगमनखेचरैः पूज्यमानो हरीन्द्रः ॥ ३० ॥ इत्यार्षे श्रीम
द्रामायणे किष्किन्धाकांडे चत्वारिंशः सर्गः ॥ ४० ॥ अथ पानमिलिन्निमित्तानि दृष्ट्वा लक्ष्मणपूर्वजः सुग्रीवं संप
रिष्वज्य रामो वचनमब्रवीत् १ असंमंत्र्य मया सार्धं तदिदं साहसं कृतम् एवं साहसप्रक्रान्तानि न कुर्वीत जन
नेश्वराः २ संशयेस्थाप्य मां चेदं बलं च सविभीषणम् कथं कृतमिदं वीर साहसं साहसप्रियः ३ इदा
नीं मा कृथा वीर एवंविधमचिन्तितम् त्वयि किंचित्समापन्ने किं कार्यं सीतया मम ४ भरतेन महाबाहो
लक्ष्मणेन यवीयसा शत्रुघ्नेन च शत्रुघ्न स्वशरीरेण वा पुनः ५ त्वयि चानागते पूर्वमिति मे निश्चि
ता मतिः जानतश्चापि ते वीर्यं महेन्द्रवरुणोपमं ६ हत्वाहं रावणं युद्धे सपुत्रबलवाहनम् अभिषि
च्य च लंकायां विभीषणमथापि च ७ भरते राज्यमावेश्य त्यक्ष्ये देहं महाबल तमेवं वादिनं रामं सुग्रीवः
प्रत्यभाषत ८ तव भार्यापहर्तारं दृष्ट्वा राघव रावणम् मर्षयामि कथं वीर जानन्विक्रममात्मनः ९ इत्ये

रा० वा० यु० एवं वादिनं वीरमभिनंद्य स राघवः लक्ष्मणं लक्ष्मिसंपन्नमिदं वचनमब्रवीत् १० परिगृह्योदकं शीतं व
११७ नानि फलवंति च बलौघं संविभज्येमं व्यूह्य तिष्ठेम लक्ष्मण ११ लोकक्षयकरं भीमं भयं पश्याम्युप
स्थितम् निर्बर्हणं प्रवीराणामृक्षवानररक्षसाम् १२ वाता श्च कलुषा वांति कंपते च वसुंधरा पर्वताग्रा
णि वेपंते नदंति च महीरुहाः १३ मेघाः क्रव्यादसंकाशाः परुषाः परुषस्वनाः क्रूराः क्रूरं प्रवर्षंति मिश्रं
शोणितबिंदुभिः १४ रक्तचंदनसंकाशा संध्या परमदारुणा ज्वलच्च निपतत्येतदादित्यादग्नि
मंडलम् १५ आदित्यमभिवाश्यंति जनयंतो महद्भयम् दीनादीनस्वराः क्रूराः सर्वशो मृगपक्षिणः
१६ रजन्यामप्रकाशश्च संतापयति चंद्रमाः कृष्णरक्तांशुपर्यंतो लोकक्षयकरोदितः १७ ह्रस्वो
रूक्षोऽप्रशस्तश्च परिवेषः सुलोहितः आदित्यमंडले नीलं लक्ष्म लक्ष्मण दृश्यते १८ दृश्यंते न य
थावच्च नक्षत्राण्यभिवर्तते युगांतमिव लोकस्य पश्य शंसंति लक्ष्मण १९ काकाः श्येनास्तथा गृ
ध्रा नीचैः परिपतंति च शिवाश्चाप्यशिवान्नादान्वदंति महास्वनाः २० शैलैः शूलैश्च खड्गैश्च वि
मुक्तैः कपिराक्षसैः भविष्यत्यावृता भूमिर्मांसशोणितकर्दमा २१ क्षिप्रमद्यैव दुर्धर्षां पुरीं रावणपालिताम् रा०म० ११७

अभिषिप्राभजवैनैवसर्वतोहरिभिर्वृताः २२ इत्येवंप्रवदन्वीरोलक्ष्मणंलक्ष्मणाग्रजः तस्मादवतर
च्छीघ्रंप्रवीणागान्महाबलः २३ अवतीर्यतुधर्मात्मातस्माच्छैलात्तुराघवः पौरैःपरमदुर्द्धर्षैरददृशी
ज वलमात्मनः २४ सन्नह्यतुततस्सुग्रीवःकपिराधैर्बलंमहत् कालज्ञोराघवःकालेसंप्रगाप्राप्यचो
दयत् २५ ततःकालेमहाबाहुर्बलेनमहतावृतः प्रस्थितःपुरतोधन्वीलंकामभिमुखःपुरीम्
२६ तौविभीषणसुग्रीवौहनूमान्जांबवान्नलः ऋक्षराजस्तथानीलोलक्ष्मणश्चान्वयुस्तदा
२७ ततःपश्चात्तुमहतीपृतनर्क्षवनौकसाम् प्रच्छाद्यमहतींभूमिमनुयातिस्मराघवम् २८
शैलशृंगाणिशतशःप्रवृद्धांश्चमहीरुहान् जगृहुःकुंजरप्रख्यावानराःपरवारणाः २९ तौत्व
दीर्घेणकालेनभ्रातरौरामलक्ष्मणौ रावणस्यपुरींलंकामासेदतुररिंदमौ ३० पताकामालिनीं
रम्यामुद्यानवनशोभिताम् चित्रवप्रांसुदुष्प्रापामुच्चैःप्राकारतोरणाम् ३१ तांसुरैरपिदुर्द्धर्षां
रामवाक्यप्रचोदिताः यथानिदेशंसंपीड्यन्यविशंतवनौकसः ३२ लंकायास्तूत्तरद्वारंशैलशृं
गमिवोन्नतम् रामःसहानुजोधन्वीजुगोपचरुरोधच ३३ लंकामुपनिविष्टश्चरामोदशरथात्म

रा०वा०यु० ११८ ज्ञः लक्ष्मणानुचरो वीरः पुरीं रावणपालिताम् ३३ उत्तरद्वारमासाद्य यत्र तिष्ठति रावणः ३४ नान्यो
रामाद्धि तद्द्वारं समर्थः परिरक्षितुम् एवमाधिविहितं भीमं वहन्तीनेव सागरम् ३५ साध्वीएक्षैते भीमै
रभिगुप्तं सैमंततः लघूतां त्रासजननं पातालमिव दानवैः ३६ किन्पयानि च योधानां बहूनि विवि
धानि च ददर्श प्रधजालानि तथैव कवचानि च ३७ पूर्वं तु द्वारमासाद्य नीलो हरिचमूपतिः प्र
तिष्ठतु सहमैंदेन द्विविदेन च वीर्यवान् ३८ अंगदो दक्षिणं द्वारं जग्राह सुमहाबलः ऋषभेण गवा
क्षेण गजेन गवयेन च ३९ हनूमान्पश्चिमं द्वारं ररक्ष बलवान्कपिः प्रजंघतरसाभ्यां च वीरैर
न्यैश्च संगतः ४० मध्यमे च स्वयं गुल्मे सुग्रीवः समतिष्ठत सह सर्वैर्हरिश्रेष्ठैः सुपर्णपवनोपमैः
४१ वानराणां तु षट्त्रिंशत्कोट्यः प्रख्यातयूथपाः निपीड्योपनिविष्टाश्च सुग्रीवो यत्र वानरः ४२
शासनेन तु रामस्य लक्ष्मणः सविभीषणः द्वारे द्वारे हरीणां तु कोटिं कोटिं न्यवेशयत् ४३ पश्चिमेन
तु रामस्य सुषेणः सहजांबवान् अदूरान्मध्यमे गुल्मे तस्थौ बहुबलानुगः ४४ ते तु वानरशार्दूलाः राम०
शार्दूला इव दंष्ट्रिणः गृहीत्वा द्रुमशैलाग्रान्हृष्टाः प्रहरायतेस्थिरे ४५ सर्वे विकृतलांगूलाः स ११८

वैदेहश्चानलोपुधाः सर्वे विकृतचित्रांगाः सर्वे च विकृताननाः ४६ दशनागबलाः केचित्केचिद्दश
गुणोत्तराः केचिन्नागसहस्रस्य बभूवुस्तुल्यविक्रमाः ४७ संति चौघबलाः केचित्केचिच्छतगुणोत्त
राः अप्रमेयबलाश्चान्ये तत्रासन्हरियूथपाः ४८ अद्भुतश्च विचित्रश्च तेषामासीत्समाग
मः तत्र वानरसैन्यानां शलभानामिवोद्गमः ४९ प्रतिपूर्णमिवाकाशं संपूर्णेव च मेदिनी ले
कामुपनिविष्टैश्च संपतद्भिश्च वानरैः ५० शतं शतसहस्राणां पृथग्प्लवनौकसां लंकाद्वा
यो राण्युपयाजग्मुरन्ये योद्धुं समंततः ५१ आवृतः स गिरिः सर्वैस्तैः समंतात्प्लवंगमैः अयुतानां सहस्रं च
पुरीं तामभ्यवर्तत ५२ वानरैर्बलवद्भिश्च बभूवुर्द्रुमपाणिभिः सर्वतः संवृता लंका दुष्प्रवेशापि वायुना
५३ राक्षसा विस्मयं जग्मुः सहसाभिनिपीडिताः वानरैर्मेघसंकाशैः शक्रतुल्यपराक्रमैः ५४ महाञ्छब्दो
भवत्तत्र बलौघस्याभिवर्ततः सागरस्येव भिन्नस्य यथा स्यात्सलिलस्वनः ५५ तेन शब्देन महता सप्राका
रा सतोरणा लंका प्रचलिता सर्वा सशैलवनकानना ५६ रामलक्ष्मणगुप्ता सा सुग्रीवेण च वाहिनी ब
भूव दुर्द्धर्षतरा सर्वैरपि सुरासुरैः ५७ राघवः सन्निवेश्यैवं स्वसैन्यं रक्षसां वधे संमंत्र्य मंत्रिभिः सार्द्धं निश्चि

रा०वा०यु० सचपुनःपुनः ५८ आर्यानंतरमभिप्रेप्सुःक्रमयोगार्थतत्त्ववित् विभीषणस्यानुमते राजधर्ममनुस्मरन् अंग
११९ दंवालितनयंसमाहूयेदमब्रवीत् ५९ गत्वासौम्यदशग्रीवंब्रूहिमद्वचनात्कपे लंघयित्वापुरींलंकांभय
म्वक्तोगतव्यथः ६० भ्रष्टश्रीकगतैश्वर्यमुमूर्षोनष्टचेतनः ६१ ऋषीणांदेवतानांचगंधर्वाप्सरसां
तथा नागानामथयक्षाणांराज्ञांचरजनीचर ६२ यच्चपापंकृतंमोहादवलिप्तेनराक्षस तस्यपापस्यसं
प्राप्ताव्युष्टिरद्यदुरासदा नूनमद्यगतोदर्पः स्वयंभूवरदानजः ६३ यस्यदंडधरस्तेहंदाराहरणकर्षितः
दंडंधारयमाणस्तुलंकाद्वारेव्यवस्थितः ६४ पदवींदेवतानांचमहर्षीणांचराक्षस राजर्षीणांचस
र्वेषांगमिष्यसियुधिस्थितः ६५ बलेनयेनवैसीतांमाययाराक्षसाधममामतिक्रामयित्वात्वंहृतवांस्तद्वि
दर्शय ६६ अराक्षसमिमंलोकंकर्तास्मिनिशितैःशरैः नचेच्छरणमभ्येषितामादायचमैथिलीम्
६७ धर्मात्माराक्षसश्रेष्ठःसंप्राप्तोयंविभीषणः लंकैश्वर्यंध्रुवंश्रीमानयंप्राप्नोत्यकंटकम् ६८ न
हिराज्यमधर्मेणभोक्तुंक्षणमपित्वयाशक्यंमूर्खसहायेनपापेनाविदितात्मना ६९ युध्यस्ववाधृतिं
कृत्वाशौर्यमालंब्यराक्षस मच्छरैस्त्वंरणेशांतस्ततःपूतोभविष्यसि ७० यद्याविशसिलोकांस्त्रीन्पक्षि राम० ११९

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

भूतोनिशाचर ममचक्षुःपथंप्राप्यनजीवन्सगमिष्यति ७१ ब्रवीमित्वांहितंवाक्यंक्रियतामौर्ध्वदैहिकम्
स्वदेष्वाक्रियतांत्वंकाजीवितंतेमयिस्थितम् ७२ इत्युक्तःसतुतारेयोरामेणाक्लिष्टकर्मणा जगामाका
शमाविश्यमूर्तिमानिवहव्यवाट् ७३ सोतिपत्यमुहूर्तेन श्रीमानरावणमंदिरम् ददर्शासीनमव्यग्रं
रावणंसचिवैःसह ७४ ततस्तस्याविदूरेसनिपत्यहरिपुंगवः दीप्ताग्निसदृशस्तस्थावंगदःकनकांगदः ७५
तद्रामवचनंसर्वमन्यूनाधिकमुत्तमम् सामात्यंश्रावयामाससनिवेद्यात्मनामना ७६ दूतोहंकोस
लेंद्रस्यरामस्याक्लिष्टकर्मणः वालिपुत्रोंगदोनामयदितेश्रोत्रमागतः ७७ आहत्वांराघवोरामः
कौशल्यानंदवर्धनः निष्पत्यप्रतियुध्यस्व नृशंसपुरुषोभव ७८ हंतास्मित्वांसहामात्यंसपुत्रज्ञाति
बांधवम् निरुद्विग्नास्त्रयोलोकाभविष्यंतिहतेत्वयि ७९ देवदानवयक्षाणांगंधर्वोरगरक्षसाम्
शत्रुमद्योद्धरिष्यामित्वामृषीणांचकंटकम् ८० विभीषणस्यचैश्वर्यंभविष्यतिहतेत्वयि नचेत्स
त्कृत्यवैदेहींप्रणिपत्यप्रदास्यसि ८१ इत्येवंपरुषंवाक्यंब्रुवाणेहरिपुंगवे अमर्षवशमापन्नोनि
शाचरगणेश्वरः ८२ ततःसरोषताम्राक्षःशशाससचिवांस्तदा गृह्यतामितिदुर्मेधावध्यता

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा॰ वा॰ सुं॰ मिति चास्य कृतं ८३ एवमस्य वचः श्रुत्वा दीप्ताग्निमिव तेजसा । जगृहुस्तं ततो घोरा ध्वस्त्वा
१२० तोरजनीचराः ८४ व्याहृत्यामास तारेयः स्वयमात्मानमात्मवान् बलं दर्शयितुं वीरो यातुधानग
णांस्तदा ८५ स तान्बाहुद्वये सक्तानादाय हरिपुङ्गवः प्रासादं शैलसंकाशमुत्पपातांगदस्त
दा ८६ तस्योत्पतनवेगेन निर्धूतास्तत्र राक्षसाः भूमौ निपतिताः सर्वे राक्षसेंद्रस्य पश्यतः ८७
ततः प्रासादशिखरं शैलशृंगमिवोन्नतं चक्राम रक्षसेंद्रस्य वालिपुत्रः प्रतापवान् ८८ त
स्य पादाभिपदाक्रांतं दशग्रीवस्य पश्यतः पुरा हिमवतः शृंगं वज्रेणेव विदारितम् ८९ भंक्त्वा
८ प्रासादशिखरं नाम विश्राव्य चात्मनः विनद्य सुमहानादमुत्पपात विहायसम् ९० व्यथयन् र
क्षसान्सर्वान्हर्षयंश्चापि वानरान् स वानराणां मध्ये तु रामपार्श्वमुपागतः ९१ रावणस्तु परं
चक्रे क्रोधं प्रासादधर्षणात् विनाशं चात्मनः पश्यन्निश्वासपरमोभवत् ९२ रामस्तु बहु
भिर्हृष्टैर्विनदद्भिः प्लवंगमैः वृतो रिपुवधाकांक्षी युद्धायैवाभिवर्तत ९३ सुषेणस्तु महावी राम॰
र्यो गिरिकूटोपमो हरिः बहुभिः संवृतस्तत्र वानरैः कामरूपिभिः ९४ स तु द्वाराणि सर्वाणि तु १२०

ग्रीववचनात्कपिः पर्यक्रमत दुर्द्धर्षो नक्षत्राणीव चंद्रमाः ९५ तेषामक्षौहिणिप्रान्ते समवेक्ष्य वनौक
साम् लंकामुपनिविष्टानां सागरं चाभिवर्त्ततां ९६ राक्षसा विस्मयं जग्मुस्त्रासं जग्मुस्तथापरे अपरे
समरोद्धर्षाद्धर्षमेवोपपेदिरे ९७ कृत्स्नं हि कपिभिर्व्याप्तं प्राकारपरिखांतरम् ददृशू राक्षसा दीनाः ।
प्राकारं वानरीकृतम् ९८ हाहाकारमकुर्वंत राक्षसा भयमागताः ९९ तस्मिन्महाभीषणके प्रवृत्ते
कोलाहले राक्षसराजधान्यां प्रगृह्य रक्षांसि महायुधानि युगांतवाता इव संविचेरुः ॥१००॥ इत्यार्षे श्री
मद्रामायणे वाल्मीकीये युद्धकाण्डे एकचत्वारिंशः सर्गः ॥४१॥ ततस्ते राक्षसास्तत्र गत्वा रावणमंदिर
म् न्यवेदयन्पुरीं रुद्धां रामेण सह वानरैः १ रुद्धां तु नगरीं श्रुत्वा जातक्रोधो निशाचरः विधानं द्वि
गुणं कृत्वा प्रासादं सोऽध्यरोहत २ स ददर्शावृतां लंकां सशैलवनकाननाम् असंख्येयैर्हरिगणैः सर्व
तो युद्धकांक्षिभिः ३ स दृष्ट्वा वानरैः सर्वां वसुधां कपिलीकृताम् कथं क्षपयितव्याः स्युरिति चिंतापरो
भवत् ४ स चिंतयित्वा सुचिरं धैर्यमालंब्य रावणः राघवं हरियूथांश्च ददर्शायतलोचनः ५ राघवः स
हसैन्येन मुदितो नाम युयुवे लंकां ददर्श गुप्तां वै सर्वतो राक्षसैर्वृताम् ६ दृष्ट्वा दाशरथिर्लंकां चित्रध्व

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

जपताकिनीम् जगाममनसासीतांदूयमानेनचेतसा ७ तत्रसामृगशावाक्षीमत्कृतेजनकात्मजा पी
ड्यतेशोकसंतप्ताकृशास्थंडिलशायिनीम् ८ सपीड्यमानांधर्मात्मावैदेहीमनुचिंतयन् क्षिप्रमाज्ञा
पयामासवानरान्द्विषतांवधे ९ एवमुक्तेतुवचनेरामेणाक्लिष्टकर्मणा संहर्षमाणाःप्लवगाःसिंह
नादैरपूरयन् १० शिखरैर्विकिरामैनांलंकांमुष्टिभिरेववा इतिस्मदधिरेसर्वेमनांसिहरियूथपाः ११
उद्यम्यगिरिशृंगाणिशिखराणिमहांतिच तरूंश्चोत्पाट्यविविधांस्तिष्ठंतिहरियूथपाः १२ प्रेक्षतोरा
क्षसेंद्रस्यतान्यनीकानिभागशः राघवप्रियकामार्थंलंकामारुरुहुस्तदा १३ तेताम्रवक्त्राहेमाभा
रामार्थेत्यक्तजीविताः लंकामेवाभ्यवर्तंतसालतालशिलायुधाः १४ तेद्रुमैःपर्वताग्रैश्चमुष्टिभिश्चप्लवं मि
गमाः प्राकारगोपुराण्युच्चानिममंथुस्तोरणानिच १५ परिखाःपूरयंतिस्मप्रसन्नसलिलायुताः पांसु
भिःपर्वताग्रैश्चतृणैःकाष्ठैश्चवानराः १६ ततःसहस्रयूथाश्चकोटियूथाश्चयूथपाः कोटियूथश
ताश्चान्येलंकामारुरुहुस्तदा १७ कांचनानिप्रमृद्नंतस्तोरणानिप्लवंगमाः कैलासशिखराभानि
गोपुराणिप्रमथ्यच १८ आप्लवंतःप्लवंतश्चगर्जंतश्चप्लवंगमाः लंकातामभिधावंतिमहावारणस

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

न्निभाः १९ जयश्च रुवलो नामो नलश्च साम्बमहाबलः राजा जयति सुग्रीवो राघवेणाभिपालिताः २० ३
स्त्वेवं घोषयंतश्च गर्जंतश्च प्लवंगमाः अभ्यधावंत लंकायाः प्राकारं कामरूपिणः २१ वीरबाहुः सुबाहु
श्च नलश्च पनसस्तथा निपीड्योपनिविष्टास्ते प्राकारं हरियूथपाः एतस्मिन्नंतरे चक्रुः स्कंधावारनिवे
शनम् २२ पूर्वद्वारं तु कुमुदः कोटिभिर्दशभिर्वृतः आवृत्य बलवांस्तस्थौ हरिभिर्जितकाशिभिः २३
महापार्श्वे तु तस्यैव नितिष्ठः प्रघसो हरिः पनसश्च महाबाहुर्वीनैरैरभिसंवृतः २४ दक्षिणद्वारमासाद्य
वीरः शतवलिः कपिः आवृत्य बलवांस्तस्थौ विंशत्या कोटिभिर्वृतः २५ सुषेणः पश्चिमद्वारं गत्वा तस्मा
त्पिता बली आवृत्य बलवांस्तस्थौ हरिकोटिभिरावृतः २६ उत्तरद्वारमासाद्य रामः सौमित्रिणा स
ह आवृत्य बलवांस्तस्थौ सुग्रीवश्च हरीश्वरः २७ गोलांगूलो महाकायो गवाक्षो भीमदर्शनः वृतः
कोट्या महावीर्यस्तस्थौ रामस्य पार्श्वतः २८ ऋक्षाणां भीमकोपानां धूम्रः शत्रुनिवर्हणः वृतः कोट्या
महावीर्यस्तस्थौ रामस्य पार्श्वतः २९ संनद्धस्तु महावीर्यो गदापाणिर्विभीषणः वृतो यत्तैस्तु सचिवैस्त
स्थौ तत्र महाबलः ३० गजो गवाक्षो गवयः शरभो गंधमादनः समंतात्परिधावंतो ररक्षुर्हरिवाहिनीम्

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०वा०यु० ३१ ततः कोपपरीतात्मा रावणो राक्षसेश्वरः निर्याणं सर्वसैन्यानां द्रुतमाज्ञापयत्तदा ३२ एतच्छ्रुत्वा तदा
१२२ वाक्यं रावणस्य मुखेरितम् सहसा भीमनिर्घोषमुद्घुष्टं रजनीचरैः ३३ ततः प्रचोदिता भेर्यः चंद्रपांडुर
पुष्कराः हेमकोणाहता भीमा राक्षसानां समंततः ३४ विनेदुश्च महाघोषाः शंखाः शतसहस्रशः
राक्षसानां सुघोराणां मुखमारुतपूरिताः ३५ ते बभुः शुभनीलांगाः सशंखा रजनीचराः विद्युन्मंड
लसन्नद्धाः सबलाका इवांबुदाः ३६ निष्पतंति ततः सैन्या हृष्टा रावणचोदिताः समये पूर्यमाणस्येव
गास्येव महोदधेः ३७ ततो वानरसैन्येन मुक्तो नादः समंततः सुवेलः पूरितो येन ससानुप्रस्थकंदरः
३८ शंखदुंदुभिनिर्घोषैः सिंहनादैस्तरस्विनाम् पृथिवीं चांतरिक्षं च सागरं चाभ्यनादयत् ३९ ग
जानां बृंहितैः सार्द्धं हयानां हेषितैरपि रथानां नेमिनिर्घोषैः रक्षसां पदनिस्वनैः ४० एतस्मिन्नं
तरे संप्रवृत्तः संग्रामः समपद्यत रक्षसां वानराणां च यथा देवासुरे पुरा ४१ ते गदाभिः प्रदीप्ताभिः शा
क्तिशूलपरश्वधैः निजघ्नुर्वानरान्सर्वान्कथयंतः स्वविक्रमान् ४२ तथा वृक्षैर्महाकायाः पर्व
ताग्रैश्च वानराः निजघ्नुस्तानि रक्षांसि नखैर्दंतैश्च वेगिताः ४३ राजा जयति सुग्रीव इति शब्दो महा रा०म०
१२२

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

नभूत् राज जयजेत्युक्त्वा स्वस्वनामकथां ततः ४४ राक्षसास्त्वपरे भीमाः प्राकारस्था महीं गतान्
वानरान्भिंडिपालैश्च शूलैश्चैव व्यदारयन् ४५ वानराश्चापि संक्रुद्धाः प्राकारस्थान्महीं गताः रा
मा क्षसान्पातयामासुः समाप्लुत्य स्वबाहुभिः ४६ स संप्रहारस्तुमुलो मांसशोणितकर्दमः रक्षसां वानरा
णां च संबभूवाद्भुतोपमः ॥४७॥ इत्यार्षे रामायणे युद्धकांडे द्विचत्वारिंशः सर्गः ॥४२॥ युध्यतां
तु ततस्तेषां वानराणां महात्मनां रक्षसां संबभूवाथ बलकोपः सुदारुणः १ ते हयैः कांचनापीडै
र्ध्वजैश्चाग्निशिखोपमैः रथैश्चादित्यसंकाशैः कवचैश्च मनोरमैः २ निर्ययू राक्षसा वीरा ना
दयंतो दिशो दश राक्षसा भीमकर्माणो रावणस्य जयैषिणः ३ वानराणामपि चमूर्वृहती जयमि
च्छतां अभ्यधावत तां सेनां रक्षसां घोरकर्मणाम् ४ एतस्मिन्नंतरे तेषामन्योन्यमभिधावताम्
रक्षसां वानराणां च द्वंद्वयुद्धमवर्त्तत ५ अंगदेनेंद्रजित्सार्द्धं वालिपुत्रेण राक्षसः अयुद्ध्यत
त महातेजास्त्र्यंबकेन यथांधकः ६ प्रजंघेन च संपातिर्नित्यं दुर्मर्षणो रणे जंबुमालिनमार
ब्धो हनूमानपि वानरः ७ संगतः सुमहत्क्रोधाद्राक्षसो रावणानुजः समरे तीक्ष्णवेगेन मित्रघ्नेन

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

 विभीषणः तपनेन गजः सार्द्धं राक्षसेन महाबलः निकुंभेन महातेजा नीलोपि समयुध्यत ९ वानरेंद्रस्तु
 सुग्रीवः प्रघसेन सुसंगतः संगतः समरे श्रीमान् विरूपाक्षेण लक्ष्मणः १० अग्निकेतुश्च दुर्द्धर्षो
रश्मिकेतुश्च राक्षसः मित्रघ्नो यज्ञकोपश्च रामेण सह संगताः ११ वज्रमुष्टिश्च मैंदेन द्विविदे
नाशनिप्रभः राक्षसाभ्यां सुघोराभ्यां कपिमुख्यौ समागतौ १२ वीरः प्रतपनो घोरो राक्षसो रण
दुर्द्धरः समरे तीक्ष्णवेगेन नलेन समयुध्यत १३ धर्मस्य पुत्रो बलवान् सुषेण इति विश्रुतः स विद्युन्मालि
नासार्द्धमयुध्यत महाकपिः १४ वानराश्चापरे घोरा राक्षसैश्चापरैः सह द्वंद्वं समीयुः सहसा युद्धाय
बहुभिः सह १५ तत्रासीत्सुमहद्युद्धं तुमुलं रोमहर्षणम् रक्षसां वानराणां च वीराणां जयमिच्छताम्
१६ हरिराक्षसदेहेभ्यः प्रसृताः केशशाद्वलाः शरीरसंघातवहाः प्रसुस्रुः शोणितापगाः १७ आ
जघानेंद्रजित्क्रुद्धो वज्रेणेव शतक्रतुः अंगदं गदया वीरः शत्रुसैन्यविदारणम् १८ तस्य कांचनचि
त्रांगं रथं साश्वं ससारथिम् जघान समरे श्रीमानंगदो वेगवान् हरिः १९ संपातिस्तु त्रिभिः प्रजंघेन त्रि
भिर्बाणैः समाहतः निजघानाश्वकर्णेन प्रजंघं रणमूर्द्धनि २० जंबुमाली रथस्थस्तु रथशक्त्या महाबलः

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

विभेदसमरेक्रुद्धोहनूमंतंतदांतरे २१ तस्यैतंरथमास्थायहनूमान्मारुतात्मजः प्रममाथतलेनाशुसहतेनै
वराक्षसा २२ नदन्प्रतपनोघोरोनलंसोप्यनुधावतः नलःप्रतपनस्याशुपातयामासचक्षुषी भिन्न
गात्रःशरैस्तीक्ष्णैःक्षिप्रहस्तेनराक्षसा २३ ग्रसंतमिवसैन्यानिप्रघसंवानराधिपः सुग्रीवःसप्तपर्णेन
निजघानजवेनच २४ प्रपीड्यशरवर्षेणराक्षसंभीमदर्शनम् निजघानविरूपाक्षंशरेणैकेनलक्ष्म
णस्तदा २५ अग्निकेतुश्चदुर्धर्षोरश्मिकेतुश्चराक्षसः सुप्तघ्नोयज्ञकोपश्चरामंनिर्बिभिदुःश
रैः २६ तेषांचतुर्णांरामस्तुशिरांसिसमरेशरैः क्रुद्धश्चतुर्भिश्चिच्छेदघोरैरग्निशिखोपमैः २७
वज्रमुष्टिस्तुमैंदेनमुष्टिनानिहतोरणे पपातसरथःसाश्वःसुराट्टइवभूतले २८ निकुंभस्तुरणे
नीलंनीलांजनचयप्रभम् निर्बिभेदशरैस्तीक्ष्णैःकरैर्मेघमिवांशुमान् २९ पुनःशरशतेनाथक्षिप्र हस्तो
निशाचरः विभेदसमरेनीलंनिकुंभःप्रजहासच ३० तस्यैवरथचक्रेणनीलोविष्णुरि
वाहवे शिरश्चिच्छेदसमरेनिकुंभस्यचसारथेः ३१ वज्राशनिसमस्पर्शोद्विविदश्चाशनि
प्रभम् जघानगिरिशृंगेणमिषतांसर्वरक्षसाम् ३२ द्विविदंवानरेंद्रंतंद्रुमयोधिनमाहवे शरैरश

रा०वा०यु० निहसंकाशेः सविद्याधाशनिप्रभः ३३ स शरैरभिविद्धांगो द्विविदः क्रोधमूर्छितः सालेन सरथं सा
१२८ श्वं निजघानाशनिप्रभम् ३४ विद्युन्माली रथस्थस्तु शरैः कांचनभूषणैः सुषेणं ताडयामास ननना
द च मुहुर्मुहुः ३५ तं रथस्थमथो दृष्ट्वा सुषेणो वानरोत्तमः गिरिशृंगेण महता रथमाशुन्यपात
यत ३६ लाघवेन तु संयुक्तो विद्युन्माली निशाचरः अपक्रम्य रथात्तूर्णं गदापाणिः क्षितौ स्थितः ३७
ततः क्रोधसमाविष्टः सुषेणो हरिपुंगवः शिलां सुमहतीं गृह्य निशाचरमभिद्रवत् ३८ तमापतंतं
गदया विद्युन्माली निशाचरः वक्षस्यभिजघानाशु सुषेणं हरिपुंगवम् ३९ गदाप्रहारं तं घोरम
त चिंत्य प्लवगोत्तमः तां शिलां पातयामास तस्योरसि महामृधे ४० शिलाप्रहाराभिहतो विद्युन्माली
निशाचरः निष्पिष्टहृदयो भूमौ गतासुर्निपपात ह ४१ एवं ते वानरैः शूरैः शूरास्ते रजनीचराः द्वंद्वे
विमर्दितास्तत्र दैत्या इव दिवौकसैः ४२ भल्लैः खड्गैर्गदाभिश्च शक्तितोमरपट्टिशैः अपविद्धैश्च
भिन्नैश्च रथैः सांग्रामिकैर्हयैः ४३ निहतैः कुंजरैर्मत्तैस्तथा वानरराक्षसैः चक्राक्षयुगदंडैश्च भग्नै
र्धरणिसंश्रितैः ४४ बभूवायोधनं घोरं गोमायुगणसंकुलम् कबंधानि समुत्पेतुर्दिक्षु वानररा रा०म०
१२८

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

क्षसाम् ४५ विमर्दे तुमुले तस्मिन्देवासुररणोपमे ४६ निहन्यमाना हरिपुंगवैस्तदा निशाचराः शोणित
दिग्धगात्राः पुनश्च युद्धं तरसा समाश्रिता दिवाकरस्यास्तमयाभिकांक्षिणः ॥४७॥ इत्यार्षे श्रीमद्रामायणे
युद्धकांडे त्रिचत्वारिंशः सर्गः ॥४३॥ युध्यतामेव तेषां तु तदा वानररक्षसाम् रविरस्तंगतो रात्रिः प्रवृत्ता प्राण
हारिणी १ अन्योन्यं बद्धवैराणां घोराणां जयमिच्छताम् संप्रवृत्तं निशायुद्धं तदा वानररक्षसाम् २ रा
क्षसोसीति हरयो हरिरस्मीति राक्षसाः अन्योन्यं समरे जघ्नुस्तस्मिंस्तमसि दारुणे ३ हत दारय चैही
ति कथं विद्रवसीति च एवं सुतुमुलः शब्दस्तस्मिन्सैन्ये तु शुश्रुवे ४ कालाः कांचनसन्नाहास्तस्मिं
स्तमसि राक्षसाः संप्रदृश्यंत शैलेन्द्रा दीप्तौषधिवना इव ५ तस्मिंस्तमसि दुष्पारे राक्षसाः क्रोधमूर्छि
ताः परिपेतुर्महावेगा भक्षयंतः प्लवंगमान् ६ ते हयान्कांचनापीडान्गजांश्चाग्निशिखरोपमान् आप्लु
त्य दशनैस्तीक्ष्णैर्भीमकोपा व्यदारयन् ७ वानरा बलिनो युद्धे क्षोभयन्राक्षसीं चमूम् कुंजरान्कुं
जरारोहान्पताकाध्वजिनो रथान् चकर्षुश्च ददंशुश्च दशनैः क्रोधमूर्छिताः ८ लक्ष्मणश्चा
पि रामश्च शरैराशीविषोपमैः दृश्यानि रक्षांसि प्रवराणि निजघ्नतुः ९ तुरंगखुरविध्वस्तं रथनेमि

दृश्या

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

 समुत्थितम् रुरोध कर्णनेत्राणि प्रध्यतां धरणीरजः १० वर्त्तमाने तथा घोरे संग्रामे लोम
१२५ हर्षणे रुधिरौघा महाघोरा नद्यस्तत्र प्रसुस्रुवुः ११ ततो भेरीमृदङ्गानां पणवानां च निस्वनः शंख
वेणुस्वनैर्मिश्रः संबभूवाद्भुतोपमः १२ विमर्दे तुमुले तस्मिन् देवासुररणोपमे हतानां स्तनमा
नानां राक्षसानां च निस्वनः शाखानां वानराणां च संबभूवात्र दारुणः १३ हतैर्वानरमुख्यैश्च
शक्तिशूलपरश्वधैः निहतैः पर्वताकारै राक्षसैः कामरूपिभिः १४ शस्त्रपुष्पोपहारा च तत्रा
सीद्युद्धमेदिनी दुर्ज्ञेया दुर्निवेशा च शोणितास्रावकर्द्दमा १५ सा बभूव निशा घोरा हरिराक्ष
सहारिणी कालरात्रीव भूतानां सर्वेषां दुरतिक्रमा १६ ततस्ते राक्षसास्तत्र तस्मिंस्तमसि दारुणे
राममेवाभ्यवर्त्तन्त संहृष्टाः शरवृष्टिभिः १७ तेषामापततां शब्दः क्रुद्धानामभिगर्जताम् उद
र्त इव सप्तानां समुद्राणामभूत्स्वनः १८ तेषां रामः शरैः षड्भिः षट् जघान निशाचरान् निमेषां
तरमात्रेण शरैरग्निशिखोपमैः १९ यज्ञशत्रुश्च दुर्धर्षो महापार्श्वमहोदरौ वज्रदंष्ट्रो महाका
यस्तौ चोभौ शुकसारणौ २० ते तु रामेण बाणौघैः सर्वमर्मसु ताडिताः युद्धादपसृतास्त्रस्ताः सा

वक्रोषापुषोभवत् २१ निमेषांतरमात्रेण घोरैरग्निशिखोपमैः दिग्राश्च कारविमलाः प्रदि
ग्धाश्च महारथः २२ पेतुस्ते राक्षसा वीरा रामस्याभिमुखे स्थिताः ते ऽपि नष्टाः समासाद्य पतंगा इव पा
कम् २३ सुवर्णपुंखैर्विशिखैः संपतद्भिः समंततः बभूव रजनी चित्रा खद्योतैरिव शारदी २४
राक्षसानां च निनदैर्हेमानां चैव निस्वनैः सा बभूव निशा घोरा भूयो घोरतरा तदा २५ तेन शब्दे
न महता प्रवृद्धेन समंततः त्रिकूटः कंदराकीर्णः प्रव्याहरदिवाचलः २६ गोलांगूला महाकाया
स्तमसा तुल्यवर्चसः संपरिष्वज्य बाहुभ्यां भक्षयन् रजनीचरान् २७ अंगदस्तु रणे शत्रून् निहं
तुं समुपस्थितः रावणेर्निजघानाशु सारथिं च हयानपि २८ इंद्रजित्तु रथं त्यक्त्वा हताश्वो हत
सारथिः अंगदेन महामायस्तत्रैवांतरधीयत २९ तत्कर्म वालिपुत्रस्य सर्वे देवाः सहर्षिभिः तुष्टुवुः
पूजनार्हस्य तौ चोभौ रामलक्ष्मणौ ३० प्रभावं सर्वभूतानि विदुरिंद्रजितो युधि ततस्तेन महात्मानं
दृष्ट्वा तुष्टाः प्रधर्षितम् ३१ ततः प्रहृष्टाः कपयः ससुग्रीवविभीषणाः साधु साध्विति नेदुश्च दृष्ट्वा
शत्रुं पराजितम् ३२ इंद्रजित्तु तदा तेन निर्जितो भीमकर्मणा संयुगे वालिपुत्रेण क्रोधं चक्रे सुदारुण

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

ताम् ३३ सोंतर्द्धानगतः पापो रावणिः क्रोधमूर्छितः ३४ ब्रह्मदत्तवरो वीरो रावणिः क्रोधमूर्छितः अदृश्यो नि
शितान्बाणान् मुमोचाशनिसन्निभान् ॥ ३५ ॥ रामं च लक्ष्मणं चैव घोरैर्नागमयैः शरैः बिभेद समरे क्रुद्धः
सर्वगात्रेषु राक्षसः ॥ ३६ ॥ मायया संवृतस्तत्र मोहयन् राघवौ युधि अदृश्यः सर्वभूतानां कूटयोधी निशाचरः
बबंध शरबंधेन भ्रातरौ रामलक्ष्मणौ ॥ ३७ ॥ तौ तेन पुरुषव्याघ्रौ क्रुद्धेनाशीविषैः शरैः ॥ सहसाभिहतौ वीरौ
तदा प्रेक्षंत वानराः ॥ ३८ ॥ प्रकाशरूपस्तु यदा न शक्तस्तौ बाधितुं राक्षसराजपुत्रः ॥ मायां प्रयोक्तुं समुपाजगाम
बबंध तौ राजसुतौ दुरात्मा ॥ ३९ ॥ इत्यार्षे रामायणे युद्धकांडे चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥ स तस्य गतिम
न्विच्छन् राजपुत्रः प्रतापवान् दिदेशातिबलो रामो दश वानरयूथपान् १ द्वौ सुषेणस्य दायादौ नीलं
च प्लवगाधिपम् अंगदं वालिपुत्रं च शरभं च तरस्विनम् २ विनतं जाम्बवन्तं च सानुप्रस्थं महाबलम्
ऋषभं चर्षभस्कंधमादिदेश परंतपः ३ ते संप्रहृष्टा हरयो भीमानुद्यम्य पादपान् आकाशं विविशुः
सर्वे मार्गमाणा दिशो दश ४ तेषां वेगवतां वेगमिषुभिर्वेगवत्तरैः अस्त्रवित्परमास्त्रेण वारयामास रा
वणिः ५ ते वारितास्तु हरयो नाराचैः क्षतविक्षताः अंधकारे न ददृशुर्मेघैः सूर्यमिवावृतम् ६

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रामलक्ष्मणयोरेवं सर्वदेहभिदः शरान् सक्तामावेशयामास रावणिः समितिंजयः ७ निरंतर
शरीरौ तु तावुभौ रामलक्ष्मणौ क्रुद्धेनेंद्रजिता वीरौ पन्नगैः शरतां गतैः ८ तयोः क्षतजमार्गे
ण सुस्राव रुधिरं बहु तावुभौ च प्रकाशेते पुष्पिताविव किंशुकौ ९ ततः पर्यंतरक्ताक्षो भिन्नां
जनचयोपमः रावणिर्भ्रातरौ वाक्यमंतर्धानगतोऽब्रवीत् १० ततो विभिन्न सर्वांगौ शर ... शल्या
चितौ हतौ ध्वजाविव महेंद्रस्य रज्जुमुक्तौ प्रकंपितौ युद्ध्यमानमनालक्ष्यं शक्रोपि त्रिदशेश्वरः द्रष्टु
मासादितुं वापि न शक्तः किं पुनर्युवाम् ११ प्रावृताविषुजालेन राघवौ कंकपत्रिणा एष रोषपरी
तात्मा नयामि यमसादनम् १२ एवमुक्त्वा तु धर्मज्ञौ भ्रातरौ रामलक्ष्मणौ निर्बिभेद शितैर्बा
रैः प्रतोदैरिव कुंजरौ १३ भिन्नांजनचयः श्यामो विस्फार्य विपुलं धनुः भूयो भूयः शरान्घो
रान् विससर्ज महामृधे १४ ततो मर्मसु मर्मज्ञो मज्जयन्निशितान् शरान् रामलक्ष्मणयो
र्वीरो ननाद च मुहुर्मुहुः १५ बद्धौ तु शरबंधेन तावुभौ रणमूर्द्धनि निमेषांतरमात्रेण न शेक
तुरुदीक्षितुम् ततो विभिन्नसर्वांगौ शरशल्याचितौ हतौ ध्वजाविव महेंद्रस्य रज्जुमुक्तौ प्रक

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०वा०यु० कंपितौ १७ तौ संप्रचलितौ वीरौ मर्मभेदेन कर्षितौ निपेततुर्महेष्वासौ जगत्यां जगतीपती १८ तौ वीर
१२७ शयने वीरौ शयानौ रुधिरोक्षितौ शरवेष्टितसर्वांगावार्त्तौ परमपीडितौ १९ नह्यविद्धं तयोर्गात्रं बभूवां
गुलमात्रकम् नानिर्भिन्नं चानस्तब्धमा कराग्रादजिह्मगैः २० तौ तु क्रूरेण निहतौ रक्षसा कामरूपिणा
असृक्सुस्रुवतुस्तीव्रं जलं प्रस्रवणाविव २१ पपात प्रथमं रामो विद्धो मर्मसु मार्गणैः क्रोधादिंद्रजिता
येन पुरा शक्रो विनिर्जितः २२ रुक्मपुंखैः प्रसन्नाग्रैरजोगतिभिराशुगैः नाराचैरर्द्धनाराचैर्भल्लैरंजलि
कैरपि विव्याध वत्सदंतैश्च सिंहदंष्ट्रैः क्षुरैस्तथा २३ स वीरशयने शिश्ये विज्यमादाय कार्मुकम्
भिन्नमुष्टिपरीणाहं त्रिनतं रुक्मभूषितम् २४ बाणपातांतरे रामं पातितं पुरुषर्षभम् स तत्र लक्ष्मणो
दृष्ट्वा निराशो जीवितेऽभवत् २५ रामं कमलपत्राक्षं शरतल्पं रणतोषितम् शुशोच भ्रातरं दृष्ट्वा
पतितं धरणीतले २६ हरयश्चापि तं दृष्ट्वा संतापं परमं गताः शोकार्त्ताश्चुक्रुशुर्घोरमश्रुपूरित
लोचनाः २७ बद्धौ तु तौ वीरशये शयानौ ते वानरास्संपरिवार्य तस्थुः समागता वायुसुतप्रमुख्या
विषादमार्त्ताः परमं च जग्मुः ॥ २८ ॥ इत्यार्षे रामायणे युद्धकांडे पंचचत्वारिंशः सर्गः ॥ ४५ ॥ ततो द्यां राम०
१२७

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

पथिवीं चैव वीक्षमाणा वनौकसः ददृशुः संततौ बाणैर्भ्रातरौ रामलक्ष्मणौ १ वृष्टेवोपरते देवे
कृतकर्मणि राक्षसे आजगामाथ तं देशं ससुग्रीवो विभीषणः २ नीलद्विविदमैंदाः सुषेणः कु
मुदोंगदः तूर्णं हनुमता सार्द्धमन्वशोचंत राघवौ ३ अचेष्टौ मंदनिश्वासौ शोणितेन परिप्लुतौ श
रजालाचितौ स्तब्धौ शयानौ शरतल्पयौ ४ निश्वसंतौ यथा सर्पौ निश्चेष्टौ दीनविक्रमौ रुधिरस्रा
वदिग्धांगौ तपनीयाविव ध्वजौ ५ तौ वीरशयने वीरौ शयानौ मंदचेष्टितौ यूथपैस्तैः परिवृतौ
बाष्पव्याकुललोचनैः ६ राघवौ पतितौ दृष्ट्वा शरजालसमन्वितौ बभूवुर्व्यथिताः सर्वे वानराः सवि
भीषणाः ७ अंतरिक्षं निरीक्षंतो दिशः सर्वाश्च वानराः न चैनं मायया छन्नं ददृशू रावणिं रणे ८ तं
तु मायाप्रतिच्छन्नं माययैव विभीषणः वीक्षमाणो ददर्शाग्रे भ्रातुः पुत्रमवस्थितम् ९ तमप्रतिमकर्मा
णमप्रतिद्वंद्वमाहवे ददर्शांतर्हितं वीरं वरदानाद्विभीषणः तेजसा यशसा चैव विक्रमेण च संयुतः
१० इंद्रजित्त्वात्मनः कर्म तौ शयानौ समीक्ष्य च उवाच परमप्रीतो हर्षयन्सर्वराक्षसान् ११ दूषणस्य
च हंतारौ खरस्य च महाबलौ सादितौ मामकैर्बाणैर्भ्रातरौ रामलक्ष्मणौ १२ नेमौ मोक्षयितुं शक्या

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० उ० ७० वेतस्मादिषुबंधनात् सर्वैरपिसमागम्यसर्पितैर्घैः सुरासुरैः १३ पुत्रकृते चिंतयानस्य शोकार्तस्य
१२८ पितुर्मम रक्षस्व पुत्रशयनं गत्वा त्रियामा याति शर्वरी १४ कृतंनेयंदुकृतेनेकानदीवर्षोस्थि-
वीकुल्या सोयंमूलहतोनर्थः सर्वेषां प्राप्तितो मया १५ तमसम्यग्दृष्ट्वासैव सर्वेषांच वनौकसां विक्र
मानिष्फलाः सर्वे प्रयाशरदितोयदाः १६ एवमुक्त्वातु तान्सर्वान्राक्षसान्परिवारितः पूय
मानपितान्सर्वान्सत्त्वाइवमामासरावणिः १७ नीलंनवमिराहसमैं दंष्ट्राढविदंतथा त्रिभिस्त्रिभि
रमित्रघ्नस्तांतापपरमेषुभिः १८ जांबवंतंमहेष्वासोविध्वावाक्येनवक्षसि हनूमतोवेगवतोवि
ससर्जेप्राणान्दश १९ गवाक्षं शरभंचैव तावप्यमिततविक्रमौ द्वाभ्यांद्वाभ्यांमहावेगोविव्याधयुधिराव
णिः २० गोलनांगूलमृषभंचैव वालिपुत्रमथांगदं विव्याधबहुभिर्बाणैस्त्वरमाणोथरावणिः २१ तान्वा
नरवरान्भित्वा शरैरग्निशिखोपमैः ननादबलवांस्तत्रमहासत्त्वः सरावणिः २२ तानर्दयित्वाबाणौघै
स्त्रासयित्वाचवानरान् प्रजहासमहाबाहुर्वचनंचेदमब्रवीत् २३ शरबंधेनघोरेणमयाबद्धौचमूमु
खे सहितौभ्रातरावेतौनिशामयतराक्षसाः २४ एवमुक्तास्तुतेसर्वेराक्षसाः कूरयोधिनः परंविस्मय राम० १२८

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

माजग्मुः कर्मणा तेन हर्षिताः २५ विनेदुश्च महानादान् सर्वे ते जलदोपमाः हतो राम इति ते रावणिं ह
मपूजयन् २६ निष्पंदौ तु तदा दृष्ट्वा भ्रातरौ रामलक्ष्मणौ वसुधायां निरुच्छ्वासौ हतावित्यन्वम
न्यत २७ हर्षेण तु समाविष्ट इंद्रजित्समितिंजयः प्रविवेश पुरीं लंकां हर्षयन् सर्वनैरृ
तान् २८ रामस्य लक्ष्मणस्यापि दृष्ट्वा शरीरे सायकैश्चितैः सर्वाणि चांगोपांगानि सुग्री
वं भयमाविशत् २९ तमुवाच परित्रस्तं वानरेंद्रं विभीषणः सबाष्पवदनं दीनं क्रोधव्याकु
ललोचनम् ३० अलं त्रासेन सुग्रीव बाष्पवेगो निगृह्यताम् एवं प्रायाणि युद्धानि विजयो
नास्ति नैष्ठिकः ३१ सभाग्यशेषताऽस्माकं यदि वीर भविष्यति मोहमेतौ प्रहास्येते महात्मा
नौ महाबलौ ३२ पर्यवस्थापयात्मानमनाथं मां च वानर सत्यधर्माभिरक्तानां नास्ति मृत्यु
कृतं भयम् ३३ एवमुक्त्वा ततस्तस्य जलक्लिन्नेन पाणिना सुग्रीवस्य शुभे नेत्रे प्रममार्ज
विभीषणः ३४ ततः सलिलमादाय विद्यया परिजप्य च सुग्रीवनेत्रे धर्मात्मा प्रममार्ज
विभीषणः ३५ विमृज्य वदनं तस्य कपिराजस्य धीमतः अब्रवीत्कालसंप्राप्तमसंभ्रांतमिदं वचः

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० वा०पु० ३६ नकालः कपिराजेंद्र वैक्लव्यमवलंबितुम् ध्रुतिहेतुस्त्वकालोस्मिन्मरणायोपकल्प्यते ३७ तस्माद्वत्स
१२९ त्यवैक्लव्यं सर्वकार्यविनाशनम् हितं तन्मम पुरोगाणां सैन्यानामनुचिंतय ३८ एवमेवार्क्ष्यपतां रामोया
वत्संस्थाविपर्ययः लब्धसंज्ञो हि काकुत्स्थो भयं नो व्यपनेष्यति ३९ नैतत्किंचन रामस्य न च रामो
मुमूर्षति न ह्येनं हास्यते लक्ष्मीर्दुर्लभा या गतायुषाम् ४० तस्मादाश्वासयात्मानं बलं चाश्वास
यस्व कम् यावत्सैन्यानि सर्वाणि पुनः संस्थापयाम्यहम् ४१ एते हि फुल्लनयनास्त्रासादागतसाध्व
साः कर्णे कर्णे प्रकथिता हरयो हरिपुंगवाः ४२ मां तु दृष्ट्वा प्रधावंतमनीकं संप्रहर्षितुम् त्यजंतु
हरयस्त्रासं भुक्तपूर्वामिव स्रजम् ४३ समाश्वास्य तु सुग्रीवं राक्षसेंद्रो विभीषणः विद्रुतं वान
रानीकं तत्समाश्वासयत्पुनः ४४ इंद्रजितु महामायः सर्वसैन्यसमावृतः विवेश नगरीं लंकां
पितरं चाभ्युपागमत् ४५ तत्र रावणमासाद्य अभिवाद्य कृतांजलिः आचचक्षे प्रियं पित्रे नि
बहुव्रणस्तमानुं श्रमहृद्विक्षेपनिशाचराय तमापतंतं सहसा समीक्ष्य चिच्छेद बाणैस्तपनीयपुंखैः ३७ तस्मि
न्स्वबाहोत्तमसानुबंधे शृंगे विकीर्णे पतिते पृथिव्याम् महाहिकल्पं शरमंतकाभं समाददे राक्षसलोकनाथः ३८
स तं गृहीत्वानिलतुल्यवेगं सविस्फुलिंगं ज्वलनप्रकाशम् बाणं महेंद्राशनितुल्यवेगं चिक्षेप सुग्रीववधा
य रुष्टः ३९ स सायको रावणबाहुमुक्तः शक्राशनिप्रख्यवपुः शिताग्रः सुग्रीवमासाद्य विभेद वेगा
द्गुहेरिता क्रौंचमिवोग्रशक्तिः ४० स सायकार्त्तो विपरीतचेताः कूजन्पृथिव्यां निपपात वीरः तं प्रेक्ष्य भू
मौ पतितं विसंज्ञं नेदुः प्रहृष्टा युधि यातुधानाः ४१ ततो गवाक्षो गवयः सुदंष्ट्रस्तथर्षभो ज्योतिमुखो
नलश्च शैलान्समुद्यम्य विवृद्धकायाः प्रदुद्रुवुः संप्रति राक्षसेंद्रम् ४२ तेषां प्रहारान्स चकार मोघा
न्रक्षोधिपो बाणगणैः शिताग्रैः तान्वानरेंद्रानपि बाणजालैर्बिभेद जांबुनदचित्रपुंखैः ४३ ते वा
नरेंद्रास्त्रिदशारिबाणैर्भिन्ना निपेतुर्भुवि भीमरूपाः ततस्तु तद्वानरसैन्यमुग्रं प्रच्छादयामास स बा
णजालैः ४४ ते वध्यमानाः पतिताश्च वीरा नानद्यमाना भयशल्यविद्धाः शाखामृगा रावणसायका
र्त्ता जग्मुः शरण्यं शरणं स्म रामम् ४५ ततो महात्मा स धनुर्धनुष्मानादाय रामः सहसा जगाम तं लक्ष्म

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०वा०यु०॥ प्रांजलिरभ्युपेत्य उवाच वाक्यं परमार्थयुक्तम् ४ कामं ममायं तु पशीघ्रो वधार्हास्य दुरात्मनः विधमिष्याम्य
१५२ हंतीच मनुजानीहि मां प्रभो ४७ तमब्रवीन्महातेजा रामः सत्यपराक्रमः ॥ कृयत्नपरश्चापि भवान्लक्ष्मणसंयुगे
४८ रावणोहि महावीर्यो रणेऽद्भुतपराक्रमः त्रैलोक्येनापि संक्रुद्धो दुःप्रसह्यो न संशयः ४९ तस्यच्छिद्रा
णिमार्गस्व स्वच्छिद्राणि च लक्षय चक्षुषा धनुषा यत्नाद्रक्षात्मानं समाहितः ५० राघवस्य वचः श्रुत्वा
संपरिष्वज्य पूज्य च अभिवाद्य ततो रामं ययौ सौमित्रिराहवम् ५१ स रावणं वारणहस्तबाहुर्ददर्श दीप्तो
द्यतभीमचापम् प्रच्छादयंतं शरवृष्टिजालैस्तान्वानरान्भिन्नविकीर्णदेहान् ५२ तमालोक्य महाते
जा हनूमान्मारुतात्मजः निवार्य शरजालानि प्रदुद्राव स रावणम् ५३ रथं तस्य समासाद्य बाहुमुद्यम्य
दक्षिणम् त्रासयन्रावणं धीमान्हनूमान्वाक्यमब्रवीत् ५४ देवदानवगंधर्वा यक्षाश्च सह राक्षसैः अ
वध्यत्वं त्वया प्राप्तं वानरेभ्यस्तु ते भयम् ५५ एष मे दक्षिणो बाहुः पंचशाखः समुद्यतः विधमिष्यति ते
देहात् भूतात्मानं चिरोषितम् ५६ श्रुत्वा हनुमतो वाक्यं रावणो वाक्यमब्रवीत् संरक्तनयनः क्रोधाद्राक्ष
सो भीमविक्रमः ५७ क्षिप्रं प्रहर निःशंकं स्थिरां कीर्तिमवाप्नुहि ततस्त्वां ज्ञातविक्रांतं नाशयिष्याम्यहं वा रा०म० १५२

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रावणस्यवचःश्रुत्वावायुसूनुर्वचोब्रवीत् प्रहृतंहिमयापूर्वमक्षंस्मरसुतंतव ५९ एवमुक्तोमहातेजारावणो
राक्षसेश्वरः आजघानानिलसुतंतलेनोरसिवीर्यवान ६० सतलाभिहतस्तेनचचालचमहाहरिः स्थित्वा
मुहूर्तंतेजस्वीस्थैर्यंकृत्वामहामतिः आजघानाभिसंक्रुद्धस्तलेनामरवैरिणम ६१ ततस्तलेनाभिहतोवान
रेणमहात्मना दशग्रीवःसमाधूतोयथाभूमिचलेचलः ६२ संग्रामेतंतथादृष्ट्वारावणंतलताडितम् ऋ
षयोवानराःसिद्धानेदुर्देवाःसुरासुराः ६३ अथाश्वास्यमहातेजारावणोवाक्यमब्रवीत् साधुवानरवी
र्येणश्लाघनीयोसिमेरिपुः ६४ रावणेनैवमुक्तस्तुमारुतिर्वाक्यमब्रवीत् धिगस्तुममवीर्यस्ययस्त्वंजीव
सिरावण ६५ सकृत्तुप्रहरेदानींदुर्बुद्धेकिंविकत्थसे ततस्त्वांमामकोमुष्टिर्नयिष्यतियमक्षयम् ६६ ततो
मारुतिवाक्येनकोपस्तस्यतदाज्वलत् ६७ संरक्तनयनःक्रोधान्मुष्टिमावर्त्यदक्षिणम् पातयामासवेगेनवा
नरोरसिवीर्यवान् ६८ हनूमान्वक्षसिव्यूढेसंचचालहतःपुनः विह्वलंतंतदादृष्ट्वाहनूमंतंमहाबलम्
६९ रथेनातिरथःशीघ्रंनीलंप्रतिसमभ्ययात् राक्षसानामधिपतिर्दशग्रीवःप्रतापवान् २७० पन्न
गप्रतिमैर्भीमैःपरमर्माभिभेदिभिः शरैरादीपयामासनीलंहरिचमूपतिम ७१ सशरौघसमायस्तोनीलः

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

प

रा० वा० यु० कपिचमूपतिः करेणैकेन शैलाग्रं रक्षोधिपतयेऽसृजत् ७२ हनूमानपि तेजस्वी समाश्वस्तो महामनाः विप्रे
१५३ क्षमाणो युद्धेप्सुः सरोषमिदमब्रवीत् ७३ नीलेन सह संयुक्तं रावणं राक्षसेश्वरम् अन्येन युध्यमानस्य न
युक्तमभिधावनम् ७४ राघवोपि महातेजास्तं शृंगं सप्तभिः शरैः आजघान सुतीक्ष्णाग्रैस्तद्विकीर्णं पपात ह
७५ तद्विकीर्णं गिरेः शृंगं दृष्ट्वा हरिचमूपतिः कालाग्निरिव जज्वाल कोपेन परवीरहा ७६ सोश्व
कर्णान्धवान्सालांश्चूतांश्चापि सुपुष्पितान् अन्यांश्च विविधान्वृक्षान्नीलश्चिक्षेप संयुगे ७७
स तान्वृक्षान्समासाद्य प्रतिचिच्छेद रावणः अभ्यवर्षच्च घोरेण शरवर्षेण पावकिम् ७८ अभिवृष्टः
शरौघेण मेघेनेव महाचलः ह्रस्वं कृत्वा तदात्मानं ध्वजाग्रे निपपात ह ७९ पावकात्मजमालोक्य ध्व
जाग्रे समवस्थितम् जज्वाल रावणः क्रोधात्ततो नीलो ननाद ह ८० ध्वजाग्रे धनुषश्चाग्रे किरीटाग्रे
च तं हरिम् लक्ष्मणोथ हनूमांश्च दृष्ट्वा रामश्च विस्मिताः ८१ रावणोपि महातेजाः कपिलाघवविस्
मितः अस्त्रमाहारयामास दीप्तमाग्नेयमद्भुतम् ८२ ततस्ते चुक्रुशुर्हृष्टा लब्धलक्षाः प्लवंगमाः नी
ललाघवसंभ्रांतं दृष्ट्वा रावणमाहवे ८३ वानराणां च नादेन संरब्धो रावणस्तदा संभ्रमाविष्टहृदयो न किं राम०
१५३

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

चित्रसपद्यत ८४ स्थानि यास्त्रसमायुक्तं गृहीत्वा रावणः शरम् ध्वजशीर्षस्थितं नीलमुद्वीक्ष्य निशा
चरः ८५ ततोऽब्रवीन्महातेजा रावणो राक्षसेश्वरः कपे लाघवयुक्तोसि मायया परयानघ ८६ जीवितं
खलु रक्षस्व यदि शक्नोषि वानर तानि तान्यात्मरूपाणि सृजसि त्वमनेकशः ८७ तथापि त्वां मया मुक्तः
सायकोस्त्रप्रयोजितः जीवितं परिरक्षंतं जीविताद्भ्रंशयिष्यति ८८ एवमुक्त्वा महाबाहू रावणो राक्षसेश्वरः
संधाय बाणमस्त्रेण चमूपतिमताडयत् ८९ सोस्त्रयुक्तेन बाणेन नीलो वक्षसि ताडितः निर्दह्यमानः
सहसा निपपात महीतले ९० पितृमाहात्म्यसंयोगादात्मनश्चापि तेजसा जानुभ्यामपतद्भूमौ न तु
प्राणैर्व्ययुज्यत ९१ विसंज्ञं पतितं दृष्ट्वा दशग्रीवो रणोत्सुकः रथेनांबुदनादेन सौमित्रिमभिदुद्रुवे
९२ आसाद्य रणमध्ये तु वारयित्वा स्थितो ज्वलन् धनुर्विस्फारयामास राक्षसेंद्रः प्रतापवान् ९३
तमाह सौमित्रिरदीनसत्त्वो विस्फारयन्तं धनुरप्रमेयम् अन्वेहि मामेव निशाचरेंद्र न वानरांस्त्वं प्रति
योद्धुमर्हसि ९४ स तस्य वाक्यं प्रतिपूर्णघोषं ज्याशब्दमुग्रं च निशम्य राजा आसाद्य सौमित्रिमवस्थि
तं तं कोपान्वितं वाक्यमुवाच रक्षः ९५ दिष्ट्यासि मे राघव दृष्टिमार्गं प्राप्तोन्तकामी विपरीतचेताः अ

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०वा०यु० स्मिन्क्षणे यास्यसि मृत्युदेशं संसाद्यमानो मम बाणजालैः ९६ तमाह सौमित्रिरविस्मयानो गर्जंतमुद्वृ
१५४ त्तसिताग्रदंष्ट्रम् राजन्न गर्जंति महाप्रभावा विकत्थसे पापकृतां वरिष्ठ ९७ जानामि वीर्यं तव राक्ष
सेंद्र बलं प्रतापं च पराक्रमं च अवस्थितोहं शरचापपाणिरागच्छ किं मोघविकत्थनेन ९८ स एवमुक्तः
कुपितः ससर्ज रक्षोधिपः सप्त शरान्सुपुंखान् तान्लक्ष्मणः कांचनचित्रपुंखैश्चिच्छेद बाणैर्निशिता
ग्रधारैः ९९ तान्प्रेक्षमाणः सहसा निकृत्तान्निकृत्तभोगानिव पन्नगेंद्रान् लंकेश्वरः क्रोधवशं जगाम
ससर्ज चान्यान्निशितान्पृषत्कान् १०० स बाणवर्षं तु ववर्ष तीव्रं रामानुजः कार्मुकसंप्रयुक्तम् क्षु
रार्धचंद्रोत्तमकर्णिभल्लैः शरांश्च चिच्छेद न चुक्षुभे च १०१ स बाणजालान्यपि तानि तानि मोघानि
पश्यंस्त्रिदशारिराजा विसिस्मिये लक्ष्मणलाघवेन पुनश्च बाणान्निशितान्मुमोच १०२ स लक्ष्मणा
श्चापि शरांछितान्महेंद्रवज्राशनितुल्यवेगान् संधाय चापे ज्वलनप्रकाशान्ससर्ज रक्षोधिपते
र्वधाय १०३ स तान्प्रचिच्छेद निशाचरेंद्रः छित्वा च तान्लक्ष्मणमाजघान शरेण कालाग्निसमप्र रामं०
भेण स्वयंभुदत्तेन ललाटदेशे १०४ स लक्ष्मणो रावणसायकार्तश्चचाल चापं शिथिलं प्रगृह्य १५४

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

पुनश्च संज्ञां प्रतिलभ्य कृच्छ्रात् चिच्छेद चापं त्रिदशेन्द्रशत्रोः १०५ निकृत्तचापं त्रिभिराजघान बाणैस्त
दा दाशरथिः शिताग्रैः स सायकार्त्तो विचचाल राजा कृच्छ्राच्च संज्ञां पुनराससाद ६ स कृत्तचापः शरताडि
तश्च मेदार्द्रगात्रो रुधिरावसिक्तः जग्राह शक्तिं स्वयमुग्रशक्तिः स्वयंभुदत्तां युधि देवशत्रुः १०७ स तां स
धूमानलसन्निकाशां वित्रासिनीं संयति वानराणाम् चिक्षेप शक्तिं तरसा ज्वलन्तीं सौमित्रये राक्षसराष्ट्रना
थः १०८ तामापतन्तीं भरतानुजोऽस्त्रैर्जघान बाणैश्च हुताग्निकल्पैः तथापि सा तस्य विवेश शक्तिर्भु
जान्तरं दाशरथेर्विशालम् १०९ स शक्तिमान् शक्तिसमाहतः सन् पपात भूमौ स रघुप्रवीरः तं
विह्वलन्तं सहसाभ्युपेत्य जग्राह राजा तरसा भुजाभ्याम् ११० हिमवान्मन्दरो मेरुस्त्रैलोक्यं वा सहामरैः
शक्यं भुजाभ्यामुद्धर्तुं न शक्यो भरतानुजः १११ शक्त्या ब्राह्म्यापि सौमित्रिस्ताडितस्तु स्तनान्तरे विष्णो
रचिन्त्यं स्वं भागमात्मानं प्रत्यनुस्मरन् ११२ ततो दानवदर्पघ्नं सौमित्रिं देवकण्टकः तं पीडयि
त्वा बाहुभ्यामप्रभुर्लङ्घनेऽभवत् ११३ अथ वायुसुतः क्रुद्धो रावणं समभिद्रवत् आजघानोरसि क्रु
द्धो वज्रकल्पेन मुष्टिना ११४ तेन मुष्टिप्रहारेण रावणो राक्षसेश्वरः जानुभ्यामगमद्भूमौ चचाल च

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०वा०यु० चपपात ११५ आस्येसनेत्रश्रवणैर्वमन्रुधिरंबहु ११६ विघूर्णमानोनिश्चक्राम रथोपस्थउपाविशत
१५५ विसंज्ञोमूर्छितश्चासीन्नचस्थानंसमालभत् ११७ विसंज्ञंरावणंदृष्ट्वासमरेभीमविक्रमम् ऋषयोवानराः
सिद्धानेदुर्देवाःसवासवाः ११८ हनूमानपितेजस्वीलक्ष्मणंरावणार्दितम् आनयद्राघवाभ्यासंबा
हुभ्यांपरिगृह्यतम् ११९ वायुसूनोःसुहृत्त्वेनभक्त्यापरमयाचसः शत्रूणामप्रकंप्योपिलघुत्वमगम
त्कपेः १२० तंसमुत्सृज्यसाशक्तिःसौमित्रिंयुधिदुर्जयम् रावणस्यरथेतस्मिन्स्थानंपुनरुपागता १२१
रावणोपिमहातेजाःप्राप्यसंज्ञांमहाहवे आददेनिशितान्बाणान्जग्राहचमहद्धनुः १२२ आश्वस्त
श्चविशल्यश्चलक्ष्मणःशत्रुसूदनः विष्णोर्भागममीमांस्यमात्मनःप्रतिसंस्मरन् १२३ निपाति
तमहावीरांवानराणांमहाचमूम् राघवस्तुरणेदृष्ट्वारावणंसमभिद्रवत् १२४ अथैनमुपसंगम्यहनू
मान्वाक्यमब्रवीत् ममपृष्ठंसमारुह्यरावणंशास्तुमर्हसि १२५ विष्णुर्यथागरुत्मंतमारुह्यामरवैरि
णाम् तच्छ्रुत्वाराघवोवाक्यंवायुपुत्रेणभाषितम् १२६ आरुरोहमहावीरोहनूमंतंमहाकपिम् रथस्थं राम०
रावणंसंख्येददर्शमनुजाधिपः १२७ तमालोक्यमहातेजाःप्रदुद्रावसराघवः वैरोचनिमिवक्रुद्धोविष्णु १५५

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रम्युद्यतायुधः १२८ ज्याशब्दमकरोत्तीव्रं ज्यानिर्घोषनिष्ठुरं गिरागंभीरयारामो राक्षसेंद्रमुवाचह १२९
तिष्ठतिष्ठममत्वंहि कृत्वाविप्रियमीदृशम् क्वनुराक्षसशार्दूलगत्तोमोक्षमवाप्स्यसि १३० यदींद्रवैव
स्वतभास्करान्वास्वयंभुवैश्वानरशंकरान्वागमिष्यसित्वं दशवादिशोवातथापिमेनाद्यगतोविमोक्ष्य
से १३१ यश्चैषशक्त्याविहतस्त्वयाद्यगच्छन्विषादं सहसाभ्युपेतः सएषरक्षोगणराजमृत्युः सपुत्रदा
रस्यतवाद्ययुद्धे १३२ एतेनचात्यद्भुतदर्शनानिशरैर्जनस्थानकृतालयानि चतुर्दशान्यात्तवरायुधा
निरक्षःसहस्राणिनिषूदितानि १३३ राघवस्यवचः श्रुत्वाराक्षसेंद्रोमहाकपिम् वायुपुत्रंमहात्मानं
वहंतंराघवंरणे १३४ रोषेणमहताविष्टः पूर्ववैरमनुस्मरन् आजघानशरैर्दीप्तैःकालानलशि
खोपमैः १३५ राक्षसेनाहतस्यापिताडितस्यापिसायकैः स्वभावतेजोयुक्तस्यभूयस्तेजोभ्यवर्द्धत १
३६ ततोरामोमहातेजाराक्षणोनकृतव्रणं दृष्ट्वाप्लवगशार्दूलं क्रोधस्यवशमेयिवान् १३७ तस्याभिसंक्र
म्यरथंसचक्रंसाश्वध्वजच्छत्रमहापताकं ससारथिंसाशनिशूलखड्गंरामःप्रचिच्छेदशरैःसुपुंखैः
१३८ अथेंद्रशत्रुंतरसाजघानवाणेनवज्राशनिसन्निभेन भुजांतरेव्यूढसुजातरूपेवज्रेणमेरुं

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० वा० कु० भगवान्निर्बिद्धः १३९ सोऽवज्ञया तातशरानिरस्तान्निपातितान्न चुक्षुभे नापि च चाल राजा स तान्बाणानभिहतोऽभ्य
१५६ श्यात्तैश्च चाल न चापं च मुमोच वीरः १४० तं विक्रमन्तं प्रसमीक्ष्य रामः समाददे दीप्तमथार्द्धचंद्रं तेनार्कवर्णं स
हसा किरीटं चिच्छेद रक्षोधिपतेर्महात्मा १४१ तं निर्विषाशीविषसन्निकाशं शान्तार्चिषं सूर्यमिवाप्रका
शम् गतश्रियं कृत्तकिरीटकूटमुवाच रामो युधि राक्षसेंद्रम् १४२ कृतं त्वया कर्म महत्सुभीमं हतप्रवी
रश्च कृतस्त्वयाहम् तस्मात्परिश्रान्त इति व्यवस्यन्न त्वां शरैर्मृत्युवशं नयामि १४३ गच्छानुजानामि र
णार्दितस्त्वं प्रविश्य रात्रिंचरराज लंकाम् आश्वास्य निर्याहि रथी स धन्वी तदा बलं प्रेक्ष्यसि मे रथस्थः
१४४ स एवमुक्तो हतदर्पहर्षो निकृत्तचापो निहताश्वसूतः शरार्दितः कृत्तकिरीटकूटो विवेश लंकां सह
सा स राजा १४५ तस्मिन्प्रविष्टे रजनीचरेंद्रे महाबले दानवदेवशत्रौ हरीन्विशल्यान्सह लक्ष्मणेन चका
र रामः परमाहवाग्रे १४६ तस्मिन्प्रभग्ने त्रिदशेंद्रशत्रौ सुरासुरा भूतगणा दिशश्च ससागराः सर्षिमहोरगाश्च तथ
थैव भूम्यम्बुचराः प्रहृष्टाः ॥१४७॥ इत्यार्षे रामायणे युद्धकाण्डे एकोनषष्टितमः सर्गः ॥५९॥ स प्रविश्य राम०
पुरीं लंकां रामबाणभयार्दितः भग्नदर्पस्तदा राजा बभूव व्यथितेन्द्रियः १ मातंग इव सिंहेन गरुडेनेव पन्न १५६

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

गः अभिभूतोभवद्राजा राघवेण महात्मना २ ब्रह्मदंडप्रकाशानां विद्युच्चलितवर्चसाम् स्मरन्राघवबा
णानां विव्यथे राक्षसेश्वरः ३ स कांचनमयं दिव्यमाश्रित्य परमासनम् विप्रेक्षमाणो रक्षांसि रावणो वा
क्यमब्रवीत् ४ सर्वं तत्खलु मे मोघं यत्तप्तं परमं तपः यत्समानो महेंद्रेण मानुषेणास्मि निर्जितः ५ इ
दं तद्ब्रह्मणो घोरवाक्यं मामभ्युपस्थितम् मानुषेभ्यो विजानीहि भयं त्वमिति तत्तथा ६ देवदानवगंध
र्वयक्षराक्षसपन्नगैः अवध्यत्वं मया प्रोक्तं मानुषेभ्यो न याचितम् ७ विदितं मानुषं मन्ये रामं दशरथा
त्मजम् इक्ष्वाकुकुलजातेन ह्यनरण्येन यत्पुरा ८ उत्पत्स्यति हि मद्वंशे पुरुषो राक्षसाधम यस्त्वां
सपुत्रं सामात्यं सबलं साश्वसारथिम् ९ निहनिष्यति संग्रामे त्वां कुलाधम दुर्मते शप्तोहं वेदवत्या च यदा सा
धर्षिता पुरा १० सेयं सीता महाभागा जाता जनकनंदिनी उमा नंदीश्वरश्चापि रंभा वरुणकन्यका ११ य
थोक्तास्तपसा प्राप्तं न मिथ्या ऋषिभाषितम् एतदेव समागम्य यत्नं कर्तुमिहार्हथ १२ राक्षसाश्चापि
तिष्ठंतु चर्यागोपुरमूर्द्धसु १३ स चाप्रतिमगंभीरो देवदानवदर्पहा ब्रह्मशापाभिभूतस्तु कुंभकर्णो विबो
ध्यतां १४ स पराजितमात्मानं प्रहस्तं च निषूदितम् ज्ञात्वा रक्षोबलं भीममादिदेश महाबलः १५ द्वारेषु

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० वा० यु० त्वेः क्षिप्रतां प्राकारश्चाधिरुह्यताम् निद्रावशसमाविष्टः कुंभकर्णो विबोध्यताम् सुखं स्वपिति निश्चिं
१५७ तः कामोपहतचेतनः १६ नव सप्त दश चाष्टौ च मासान्स्वपिति राक्षसः मंत्रं कृत्वा प्रसुप्तोयमितस्तु नवमे
हनि १७ तं हि संबोधय महाबाहुः ककुदः सर्वरक्षसाम् वानरान्राजपुत्रौ च क्षिप्रमेव हनिष्यति १८ एष केतुः
परः संख्ये मुख्यो वै सर्वरक्षसाम् कुंभकर्णः सदा शेते मूढो ग्राम्यसुखे रतः १९ रामेणापि निरस्तस्य संग्रामे
स्मिन्सुदारुणे भविष्यति न मे शोकः कुंभकर्णे निबोधिते २० किं करिष्याम्यहं तेन शक्रतुल्यबलेन हि
ईदृशे व्यसने प्राप्ते यो न साह्याय कल्पते २१ ते तु तद्वचनं श्रुत्वा राक्षसा रावणस्तया जग्मुः परमसंभ्रां
ताः कुंभकर्णनिवेशनम् २२ ते रावणसमादिष्टा मांसशोणितभोजनाः गंधमाल्यांस्तदा भक्ष्यानादाय
सहसा ययुः २३ तां प्रविश्य महाद्वारां सर्वतो योजनायताम् कुंभकर्णगुहां रम्यां पुष्पगंधप्रवाहिनीम्
२४ कुंभकर्णस्य निश्वासादवधूता महाबलाः प्रतिष्ठमानाः कृच्छ्रेण यत्नात्प्रविविशुर्गुहाम् २५ तां प्रवि
श्य गुहां रम्यां शुभ्रां कांचनकुट्टिमां ददृशुर्नैर्ऋतव्याघ्राः शयानं भीमविक्रमम् २६ ते तु तं विकृतं
सुप्तं विकीर्णमिव पर्वतम् कुंभकर्णं महानिद्रं सहिताः प्रत्यबोधयन् २७ ऊर्ध्वलोमाचिततनुं श्वसंतमि रा०म०
१५७

वपन्नगम् त्रासयंतंमहाकायंप्रायानंभीमदर्शनम् २८ भीमनासापुटंतंतुपातालविपुलाननम् शयनेन्यस्त
सर्वांगंमेदोरुधिरगंधिनम् २९ कांचनांगदनद्धांगंकिरीटिनमरिंदमम् ददृशुर्नैरृतव्याघ्रंकुंभकर्णम
हाबलम् ३० ततश्चक्रुर्महात्मानःकुंभकर्णाग्रतस्तदा मांसानांमेरुसंकाशंराशिंपरमतर्पणम् ३१ म
गाणांमहिषाणांचवराहाणांचसंचयान् चक्रुर्नैरृतशार्दूलाराशिमन्नस्यचाद्भुतम् ३२ ततःशो
णितकुंभांश्चमद्यानिविविधानिच पुरस्तात्कुंभकर्णस्यचक्रुस्त्रिदशशात्रवः ३३ लिलिपुश्चप
रार्ध्येनचंदनेनपरंतपम् दिव्यैराच्छादयामासुर्माल्यैर्गंधैःसुगंधिभिः ३४ धूपंगंधांश्चससृजुस्तुष्टु ९
श्चपरंतपम् जलदाइवचोन्नेदुर्यातुधानास्ततस्ततः ३५ शंखानापूरयामासुःशशांकस
दृशप्रभान् तुमुलंयुगपच्चापिविनेदुश्चाप्यमर्षिताः ३६ नेदुरास्फोटयामासुश्चिक्षिपुस्तेनि
शाचराः कुंभकर्णविबोधार्थंचक्रुस्तेविपुलंस्वनम् ३७ सशंखभेरीपणवप्रणादमास्फोटितक्ष्वेलि
तसिंहनादम् दिशोद्रवंतस्त्रिदिवंकिरंतःश्रुत्वाविहंगाःसहसानिपेतुः ३८ यदाभृशंतैर्निनदैर्म
हात्मानकुंभकर्णोबुबुधेप्रसुप्तः ततोभुशुंडीमुसलानिसर्वेरक्षोगणास्तेजगृहुर्गदाश्च ३९ ।

रा० बा० पु० तं शैलेन शृंगैर्मुसलैर्गदाभिर्वृक्षैर्मुहुर्मुद्गरमुष्टिभिश्च सुखप्रसुप्तं भुवि कुंभकर्णं रक्षांस्युदग्राणि त
१५८ दा निजघ्नुः ४० तस्यानिश्वासवातेन कुंभकर्णस्य रक्षसः राक्षसा बलवंतोपि स्थातुंना शक्नुवन्पुरः ४१
ततः परिहिता गाढं राक्षसा भीमविक्रमाः मृदंगपणवान्भेरीः शंखकुंभगणांस्तदा ४२ दश राक्षससा
हस्त्रं युगपत्पर्यवादयन् नीलांजनचयाकारं ते तु तं प्रत्यबोधयन् ४३ अभिघ्नंतो नदंतश्च नैव संबुबुधे
तु सः यदा चैनं न शेकुस्ते प्रतिबोधयितुं तदा ४४ ततो गुरुतरं यत्नं दारुणं समुपाक्रमन् अश्वानु
ष्ट्रान् खरान्नागान्जघ्नुर्दंडकशांकुशैः ४५ भेरीशंखमृदंगांश्च सर्वप्राणैरवादयन् निजघ्नुश्चा
स्य गात्राणि महाकाष्ठकटंकरैः ४६ मुद्गरैर्मुसलैश्चापि सर्वप्राणैः समुद्यतैः तेन नादेन महता लंका
सर्वा प्रपूरिता सपर्वतवनाः सर्वा सोपि नैव प्रबुध्यते ४७ ततो भेरीसहस्रं तु युगपत्समहन्यत मृष्टकांच
नकोणानामासक्तानां समंततः ४८ एवमप्यतिनिद्रस्तु यदा नैव प्रबुध्यते शापस्य वशमापन्नस्ततः
क्रुद्धा निशाचराः ४९ ततः कोपसमाविष्टाः सर्वे भीमपराक्रमाः तद्रक्षो बोधयिष्यंतश्चक्रुरन्ये पराक्र राम०
मम् ५० अन्ये भेरीः समाजघ्नुरन्ये चक्रुर्महास्वनम् केशानन्ये प्रलुलुपुः कर्णावन्ये दशंति च ५१ ८ १५८

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

उरकुंभश्रोत्रान्यन्ये समसिंचत्त कर्णयोः न कुंभकर्णः प्रास्पदन्महानिद्रावशंगतः ५२ अन्येच बलिनस्त
स्य कूटमुद्गरपाणयः मूर्द्धि वक्षसि गात्रेषु पातयन्कूटमुद्गरान् ५३ रज्जुबंधनबद्धाभिः शतघ्नीभिश्च
सर्वशः वध्यमानो महाकायो न प्राबुध्यत राक्षसः ५४ वारणानां सहस्रं च शरीरे स्य प्रधावितं कुंभ
कर्णस्तदा बुद्धः स्पर्शं परममन्यत ५५ स पात्यमानैर्गिरिशृंगवृक्षैरचिंतयंस्तान्विपुलान्प्रहारान् निद्राक्षया
त्क्षुद्भयपीडितश्च विजृंभमाणः सहसोत्पपात ५६ स नागभोगाचलशृंगकल्पौ विक्षिप्य बाहू जितव
ज्रसारो विवृत्य वक्त्रं वडवामुखाभं निशाचरोऽसौ विकृतं जजृंभे ५७ तस्य जाजृंभमाणस्य वक्त्रं पातालसन्नि
भम ददृशे मेरुशृंगाग्रे दिवाकर इवोदितः ५८ स जृंभमाणोतिबलः प्रवुद्धो रजनीचरः निश्वास
श्चास्य तो जज्ञे पर्वतादिव मारुतः ५९ रूपमुत्तिष्ठतस्तस्य कुंभकर्णस्य तद्बभौ युगांते सर्वभूतानि कालस्
येव दिधक्षतः ६० तस्य दीप्ताग्निसदृशो विद्युत्सदृशवर्चसी ददृशाते महानेत्रे दीप्ताविव महाग्रहौ
६१ ततस्त्वदर्शयन्भक्ष्यान्सर्वान्विविधान्बहून् वराहान्महिषांश्चैव बभक्ष स महाबलः ६२ अदद्बु
भुक्षितो मांसं शोणितं तृषितोपिबत् मेदःकुंभांश्च मद्यकुंभान्कुंभकर्णस्तदापिबत् ६३ ततस्तृप्त इति ज्ञात्वा

वे

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०वा०यु० समुपेतुर्निशाचराः शिरोभिश्च प्रणम्यैनं सर्वतः पर्यवारयन् ६४ निद्राविशदनेत्रस्तु कलुषीकृतलोचनः
१५९ चारयन्सर्वतो दृष्टिं तान्ददर्श निशाचरान् ६५ स सर्वान्सान्त्वयामास नैरृतान्नैरृतर्षभः बोधनाद्वि
स्मितश्चापि राक्षसानिदमब्रवीत् ६६ किमर्थमहमादृत्य भवद्भिः प्रतिबोधितः कच्चित्सुकुशलं राज्ञो
भयं वा नेह किंचन ६७ अथवा ध्रुवमन्येभ्यो भयं परमुपस्थितम् यदर्थमेवं त्वरितैर्भवद्भिः प्रतिबोधितः
६८ अद्य राक्षसराजस्य भयमुत्पाटयाम्यहम् पातयिष्ये महेन्द्रं वा शातयिष्ये तथानलम् ६९ न ह्यल्पका
रणे सुप्तं बोधयिष्यति मां प्रभुः तदाख्यातार्थतत्त्वेन मत्प्रबोधनकारणम् ७० एवं ब्रुवाणं संरब्धं कुम्भकर्ण
मरिंदमम् यूपाक्षः सचिवो राज्ञः कृताञ्जलिरभाषत ७१ न नो देव कृतं किंचिद्भयमस्ति कदाचन मानु
षान्नो भयं राजन् तुमुलं संप्रबाधते ७२ न दैत्यदानवेभ्यो वा भयमस्तीह तादृशम् यादृशं मानुषं राजन्भ
यमस्मानुपस्थितम् ७३ वानरैः पर्वताकारैर्लङ्केयं परिवारिता सीताहरणसंतप्ताद्रामान्नस्तुमुलं भयम्
७४ एकेन वानरेणेयं पूर्वं दग्धा महापुरी कुमारो निहतश्चाक्षः सानुयात्रः सकुञ्जरः ७५ स्वयं रक्षोधिप
श्चापि पौलस्त्यो देवकण्टकः व्रजेति संयुगे मुक्तो रामेणादित्यवर्चसा ७६ यन्न देवैः कृतो राजा नापि दैत्यै राम० १५९

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

नैदानवैः कृतः सद्यहतमेणाविमुक्तः प्राणासंशयात् ७७ सरूपाक्षवचः श्रुत्वाभ्रातुर्युधिपराजयम् कुंभक
र्णो विवृताक्षो रूपाक्षमिदमब्रवीत् ७८ सर्वमद्यैव रूपाक्ष हरिसैन्यं सलक्ष्मणम् राघवं च रणे हत्वा ततो द्र
क्ष्यामि रावणम् ७९ राक्षसांस्तर्पयिष्यामि हरीणां मांसशोणितैः रामलक्ष्मणयोश्चापि स्वयं पास्यामि शोणि
तम् ८० तत्तस्य वाक्यं ब्रुवतो निशम्य सगर्वितं रोषविवृद्धदोषम् महोदरो नैरृतयोधमुख्यः कृतांजलिर्वा
क्यमिदं बभाषे ८१ एवमस्य वचः श्रुत्वा गुणदोषौ विमृश्य च पश्चादपि महाबाहो शत्रून्युधि विजेष्य
सि ८२ महोदरवचः श्रुत्वा राक्षसैः परिवारितः कुंभकर्णो महातेजाः संप्रतस्थे महाबलः ८३ सुप्तमुत्थाप्य
भीमाक्षं भीमरूपपराक्रमम् राक्षसास्त्वरिता जग्मुर्दशग्रीवनिवेशनम् ८४ तेभिगम्य दशग्रीव
मासीनं परमासने ऊचुर्बद्धांजलिपुटाः सर्वराव निशाचराः ८५ कुंभकर्णः प्रबुद्धोसौ भ्राता ते राक्षसेश्वर
कथं तत्रैव निर्यातु द्रक्ष्यसे तमिहागतम् ८६ रावणस्त्वब्रवीद्धृष्टो राक्षसांस्तानुपस्थितान् द्रष्टुमेनमिहे
च्छामि यथान्यायं च पूज्यताम् ८७ तथेत्युक्त्वा तु ते सर्वे पुनरागम्य राक्षसाः कुंभकर्णमिदं वाक्यमूचू राव
णचोदिताः ८८ द्रष्टुं त्वां कांक्षते राजा सर्वराक्षसपुंगवः गमने क्रियतां बुद्धिर्भ्रातरं संप्रहर्षय ८९ कुं

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०वा०यु० भक्ष्यंस्तु दुर्द्धर्षो भ्रातुराज्ञाय शासनम् तच्चैव सुक्रमहावीर्यैः शायनादुत्पपात ह ९० प्रक्षाल्य वदनं हृ
१९० ष्टः स्नातः परमहर्षितः पिपासुस्त्वरयामास पानं बलसमीरणम् ९१ ततस्ते त्वरितास्तत्र राक्षसा रावणाज्ञा
१६० तया मद्यं भक्ष्यांश्च विविधान्क्षिप्रमेवोपहारयन् ९२ पीत्वा घटसहस्रे द्वे गमनायोपचक्रमे ईष
त्समुत्कटो मत्तस्तेजोबलसमन्वितः कुंभकर्णो बभौ हृष्टः कालान्तकयमोपमः ९३ भ्रातुः स भवनं गच्छ
न् रक्षोभिः परिवारितः कुंभकर्णः पदन्यासैरकंपयत मेदिनीम् ९४ स राजमार्गं वपुषा प्रकाशयन्स
हस्ररश्मिर्धरणीमिवांशुभिः जगाम तत्रांजलिमालया वृतः शतक्रतुर्गेहमिव स्वयंभुवः ९५ तं रा
जमार्गस्थममित्रघातिनं वनौकसस्ते सहसा बहिः स्थिताः दृष्ट्वाप्रमेयं गिरिशृंगकल्पं वितत्रसुस्ते हरि
यूथपालाः ९६ केचिच्छरण्यं शरणं स्म रामं व्रजंति केचिद्व्यथिताः पतंति केचिद्दिशश्च व्यथिताः प्रयांति
केचिद्भयार्त्ता भुवि शेरते स्म ९७ तमद्रिशृंगप्रतिमं किरीटिनं स्पृशंतमादित्यमिवात्मतेजसा वनौक
म सः प्रेक्ष्य विवृद्धमद्भुतं भयार्द्दिता दुद्रुविरे ततस्ततः ९८ ॥ इति षष्ठितमः सर्गः ॥ ६० ॥ ततो रामो महातेजा धनु राम०
रादाय वीर्यवान् किरीटिनं महाकायं कुंभकर्णं ददर्श ह १ तं दृष्ट्वा राक्षसश्रेष्ठं पर्वताकारदर्शनम् १९०

१६०

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

क्रममाणमिवाकाशं पुरा नारायणं प्रभुम् २ सतोयांबुदसंकाशं कांचनांगदभूषणाम् दृष्ट्वा पुनः प्रदुद्राववा
नराणांमहाचमूः ३ विद्रुतांवाहिनीं दृष्ट्वा वर्द्धमानंच राक्षसंम् सविस्मयमिदं रामो विभीषणमुवाच ह ४
कोसौपर्वतसंकाशः कीरीटी हरिलोचनः लंकायां दृश्यते वीरः सविद्युदिव तोयदः ५ पृथिव्याः के
तुभूतोसौ महानेकोत्र दृश्यते यं दृष्ट्वा वानराः सर्वे विद्रवंति ततस्ततः ६ आचक्ष्वमे महान्कोसौ रक्ष
सो यदि वासुरः नमयैवंविधंभूतं दृष्टंपूर्वं कदाचनः ७ सपृष्टो राजपुत्रेणा रामेणाक्लिष्टकर्मणा वि
भीषणोमहाप्राज्ञः काकुत्स्थमिदमब्रवीत् ८ येनवैवस्वतोयुद्धे वासवश्च पराजितः सैषविश्रवसः पु
त्रः कुंभकर्णः प्रतापवान् यस्य प्रमाणेन समो राक्षसोन्योनविद्यते ९ एतेनदेवायुधिदानवाश्च य
क्षाभुजंगाः पिशिताशनाश्च गंधर्वविद्याधरकिन्नराश्च सहस्रशो राघवसंप्रभग्नाः १० शूल
पाणिं विरूपाक्षं कुंभकर्णं महाबलं हंतुंनशेकुस्त्रिदशाः कालोयमिति मोहिताः ११ प्रकृत्या ह्ये
ष तेजस्वी कुंभकर्णो महाबलः अन्येषां राक्षसानां तु वरदानकृतंबलम् १२ एतेनजातमात्रेण
क्षुधार्तेन महात्मना भक्षितानि सहस्राणि सत्वानां सुबहून्यपि १३ तेषुसंभक्ष्यमाणेषु प्रजाभ

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० वा० यु० १९१ १६१

पनिपीडिताः यांतिस्म शरणं शक्रं तमप्यर्थंन्यवेदन् १४ सकुंभकर्णं कुपितोमहेंद्रोजघान
वज्रेणशितेनवज्री सशक्रवज्राभिहतोमहात्माचचालकोपाच्चभृशन्ननाद १५ तस्य
नानद्यमानस्यकुंभकर्णस्यरक्षसः श्रुत्वानिनादंवित्रस्ताभूयोभूमिर्वितत्रसे १६ ततःकोपा
न्महेंद्रस्यकुंभकर्णोमहाबलः निष्कृष्यैरावताद्दंतंजघानोरसिवासवम् १७ कुंभकर्णप्रहारार्तोवि
जज्वालसवासवः ततोविषेदुःसहसादेवागंधर्वदानवाः १८ प्रजाभिस्सहसंशक्रोययौस्था
नंस्वयंभुवः कुंभकर्णस्यदौरात्म्यंशशंसुस्तेप्रजापतेः १९ प्रजानांभक्षणंचैवदेवानांचापि
धर्षणम् आश्रमध्वंसनंचापिपरस्त्रीहरणंभृशम् २० एवंप्रजायदिह्येषभक्षयिष्यतिनि
त्यशः अचिरेणैवकालेनशून्योलोकोभविष्यति २१ वासवस्यवचःश्रुत्वासर्वलोकपितामहः
रक्षांस्यावाहयामासकुंभकर्णंददर्शह २२ कुंभकर्णंसमीक्ष्यैववितत्रासप्रजापतिः कुंभकर्णम
थाश्वास्यस्वयंभूरिदमब्रवीत् २३ ध्रुवंलोकविनाशायपौलस्त्येनासिनिर्मितः तस्मात्त्वमद्यप्र
भृतिमृतकल्पःशयिष्यसे २४ ब्रह्मशापाभिभूतस्तुनिपपातास्यतःप्रभो ततःपरमसंभ्रांतोरावणोवा

राम० १९१ १६१

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

क्यमब्रवीत् २५ विवृद्धः कांचनोवृक्षः फलकालेनिकृत्यते नतन्नाशंस्वकंन्यायमेवंप्राप्नुंप्रजानाति
२६ नमिथ्याप्रवचनश्चैतत्त्वस्यात्सेचनस्त्रेप्रायः कालेनतुक्रियतामस्य प्रायनेजागरे तथा २७ एव
मस्यवचःश्रुत्वास्वप्नेसूरिदमब्रवीत् शायिताह्येषषसमासान्नेकाहंजागरिष्यति २८ एकेनाह्नात्वसौ
वीरःचरन्भूमिंबुभुक्षितः व्यात्तास्योभक्षयेत्क्रौ कान्संक्रुद्ध इवपावकः २९ सोसौव्यसनमापन्नःकुं
भकर्णमबोधयत् त्वत्पराक्रमभीतोहि राजासंप्रतिराघवात् ३० सएषनिर्गतोवीरः शिबिराद्भीम
विक्रमः वानरान्भ्रशसंक्रुद्धोभक्षयन्परिधावति ३१ कुंभकर्णसमीक्ष्यैवहरयोद्यप्रदुद्रुवुः
कथमेनंरणेक्रुद्धंवारयिष्यन्तिवानराः ३२ उच्यंतांवानराःसर्वेयंत्रमेतत्समुच्छ्रितम् इतिविज्ञायह
रयोभविष्यंतीहनिर्भयाः ३३ विभीषणवचःश्रुत्वाहेतुमत्सुमुखोद्गतम् उवाचराघवोवाक्यंनीलं
सेनापतिंतदा ३४ गच्छसैन्यानिसर्वाणिव्यूह्यतिष्ठस्वपावकेम् द्वाराणपादायलंकायाश्चर्याश्चा
प्यपसंक्रमान् ३५ शैलशृंगाणिवृक्षांश्चशिलाश्चाप्युपसंहरन् तिष्ठंतुवानराः सर्वेसायुधाः
शैलपाणयः ३६ राघवेणसमादिष्टोनीलोहरिचमूपतिः शशासवानरानीकं यथावत्कपिकुंजरः

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा॰ वा॰ यु॰ ३७ ततो गवाक्षः शरभो हनूमानंगदस्तथा ॥ शैलशृंगाणि शैलाभा गृहीत्वा द्वारमभ्ययुः ॥ ३८ ॥ रामवाक्य
१९२ मुपश्रुत्य हरयो जितकाशिनः ॥ पादपैरर्दयन्वीरा वानराः परवाहिनीम् ॥ ३९ ॥ ततो हरीणां तदनीकमुग्रं र
राज शैलोद्यतदीप्तहस्तम् ॥ शिरः समीपानुगतं यथैव महन्महांभोधरजालमुग्रम् ॥ ४० ॥ इत्यार्षे रामा
१६२ यणे युद्धकांडे एकषष्टितमः सर्गः ॥ ६१ ॥ स तु राक्षसशार्दूलो निद्रामदसमाकुलः राजमार्गं श्रियायुक्तं
ययौ विपुलविक्रमः १ राक्षसानां सहस्रैस्तु वृतः परमदुर्जयः गृहेभ्यः पुष्पवर्षेण कीर्यमाणस्तदाय
यौ २ स हेमजालविततं भानुभास्वरदर्शनम् ददर्श विपुलं रम्यं राक्षसेंद्रनिवेशनम् ३ स तत्तथा सूर्य इ
वाभ्रजालं प्रविश्य रक्षोधिपतेर्निवेशनम् ददर्श दूरेग्रजमासनस्थं स्वयंभुवं शक्र इवासनस्थम् ४
भ्रातुः स भवनं गच्छन्रक्षोगणसमन्वितः कुंभकर्णः पदन्यासैरकंपयत मेदिनीम् ५ सोभिगम्य गृ
हं भ्रातुः कक्ष्यामभिविगाह्य च ददर्शोद्विग्नमासीनं विमाने पुष्पके गुरुम् ६ अथ दृष्ट्वा दशग्रीवः
कुंभकर्णमुपस्थितम् तूर्णमुत्थाय संहृष्टः संनिकर्षमुपानयत् ७ अथासीनस्य पर्यंके कुंभकर्णो महाब
लः भ्रातुर्ववंदे चरणौ किं कृत्यमिति चाब्रवीत् पुनः समुदितो भ्रात्रा रावणः परिष्वजे ८ स भ्रात्रा त्रासे रा॰ १९२
१६२

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

परिष्वक्तोप्रयभ्रात्राभिनंदितः कुंभकर्णः शुभंदिव्यंप्रपेदेवरमासनम् ९ सतदासनमाश्रित्यकुंभकर्णो
महावलः संरक्तनयनः क्रोधाद्रावणंवाक्यमब्रुवीत् १० किम[illegible]र्थमहमादृत्यत्वयाराजन्प्रबोधितः शं
सकस्मात्भयंतेस्तिकोद्यप्रेतोभविष्यति ११ भ्रातरंरावणः क्रुद्धंकुंभकर्णमुपस्थितम् रोषेणपरिवृ
त्ताभ्यांनेत्राभ्यांवाक्यमब्रवीत् १२ अद्यतेसुमहान्कालः शयानस्यमहाबलः सुखितस्त्वंनजानीषेम
मरामकृतंभयम् १३ एषदाशरथीरामःसुग्रीवसहितोवली समुद्रंसबलस्तीर्त्वामूलंनःपरिकृंतति
१४ हंतपश्यस्वलंकायावनान्युपवनानिच सेतुनासुखमागम्यवानरैरेकार्णवंकृतम् १५ येराक्ष
सामुख्यतमाहतास्तेवानरैर्युधि वानराणांक्षयंयुद्धेनपश्यामिकदाचन १६ नचापिवानरायुद्धेजि
तपूर्वाःकदाचन १७ तदेतद्भयमुत्पन्नंत्रायस्वास्मान्महाबल नाशयत्वमिमानद्ययदर्थंबोधितोभ
वा १८ सर्वक्षपितकोशंचसत्वमभ्यवपद्यमाम् त्रायस्वेमांपुरींलंकांबालवृद्धावशेषिताम् भ्रातुर
र्थेमहाबाहोकुरुकर्मसुदुष्करम् १९ मयैवंनोक्तपूर्वोहिभ्राताकश्चित्परंतप मय्यस्तितुतवस्नेहः
परासंभावनाचमे २० देवासुरेषुयुद्धेषुवहुशःप्राणसंक्षयम् त्वयादेवाःप्रतिव्यूह्यनिर्जिताश्चासुरायुधि

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

विपुल

रा० वा० यु० २१ तदेतत्सर्वमातिष्ठ वीर्येण विक्रमेन हि ते सर्वभूतेषु दृश्यते सदृशो बली ॥२२॥ कुरुष्व मे प्रियहितमेतदुत्तमं

१९३ यथाप्रियं प्रियरण बांधवप्रिय स्वतेजसा वि॥ धमसपत्नवाहिनीं शरद्घनं पवनइवोद्यतो महान् ॥२३॥ **इत्या**

१६३ **र्षे युद्धकाण्डे द्विषष्टितमः सर्गः** ॥६२॥ तस्य राक्षसराजस्य निशम्य परिदेवितम् कुंभकर्णो बभाषेथ वच

नं प्रजहास च १ दृष्टो दोषो हि यो स्माभिः पुरा मंत्रविनिर्णये हितेष्वनभियुक्तेन सोयमासादितस्त्वया २

शीघ्रं खल्वभ्युपेतं त्वां फलं पापस्य कर्मणः निरयेष्वेव पतनं यथा दुष्कृतकर्मणः ३ प्रथमं वै महाराज कृ

त्यमेतदचिंतितम् केवलं वीर्यदर्पेण नानुबंधो विचारितः ४ यः पश्चात्पूर्वकार्याणि कुर्यादैश्वर्यमा

स्थितः पूर्वं चोत्तरकार्याणि न स वेद नयानयौ ५ देशकालविहीनानि कर्माणि विपरीतवत् क्रियमाणा

नि दुष्यंति हवींष्यप्रयतेष्विव ६ त्रयाणां पंचधा योगं कर्मणां यः प्रपश्यति सचिवैः समयं कृत्वा स सभ्ये पथि

वर्तते ७ यथागमं च यो राजा समयं विचिकीर्षति बुध्यते सचिवान्बुद्ध्या सुहृदश्चानुपश्यति ८ धर्ममर्थं

हि कामं वा सर्वान्वा रक्षसां पते भजते पुरुषः काले त्रीणि द्वंद्वानि वा पुनः ९ त्रिषु चैतेषु यच्छ्रेष्ठं श्रुत्वा तं ना

वबुध्यते राजा वा राजमात्रो वा व्यर्थं तस्य बहुश्रुतम् १० उपप्रदानं सांत्वं वा भेदं काले च विक्रमम् योगं च रक्ष राम० १९३

१६३

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

सांश्लेषताउमौचनयानसौ ११ कालेधर्मार्थकामान्यः समंत्र्यसचिवैःसह निषेवेतात्मवान् राजानसव्यसनमा
प्नुयात् १२ हितानुबंधमालोच्यकार्याकार्यमिहात्मनः राजासर्वार्थतत्त्वज्ञैःसचिवैर्बुद्धिजीविभिः १३ अन
भिज्ञायशास्त्रार्थान्पुरुषाः पशुबुद्धयः प्रागल्भ्याद्वक्तुमिच्छंतिमंत्रेष्वभ्यंतरीकृताः १४ अशास्त्रविदुषां
तेषांनकार्यमहितंवचः अर्थशास्त्रानभिज्ञानांविपुलांश्रियमिच्छताम् १५ अहितंचहिताकारंधार्ष्ट्या
ज्जल्पंतियेनराः अवेक्ष्यमंत्राद्बाह्यास्तेकर्तव्याःकृत्यदूषकाः १६ विनाशायंतोभर्तीयंसहिताः शत्रुभिर्बु
धैः विपरीतानिकृत्यानिकारयंतिचमंत्रिणः १७ तान्भर्तामित्रसंकाशानमित्रान्मंत्रनिर्णये व्यवहा
रेणजानीयात्सचिवानुपसंहितान् १८ चपलस्येहकृत्यानिसहसानुप्रधावतः छिद्रमन्येप्रपद्यंतेक्रौं
चस्येवमिवद्विजाः १९ योहिशत्रुमवज्ञायह्यात्मानंनाभिरक्षति अवाप्नोतिहिसोनर्थान्स्था ।
नाच्चव्यवरोप्यते २० सदुक्तंमिह्नोपूर्वंप्रियप्रातित्वजेनच तदेवमोहितंवाक्यंयदि कुर्वितयाकुरु २१
एतत्कुत्वादशग्रीवः कुंभकर्णस्यभाषितम् भ्रुकुटींचैवसंचक्रे क्रुद्धश्चैनमुवाचह २२ मान्योगुरुरि
वाचार्यः किंमांत्वमनुशाससि किमेवंवाक्श्रमंकृत्वाकालेयुक्तंविधीयताम् २३ विभ्रमाच्चित्तमोहा

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

 द्यावत्तवीर्याश्रयेण वा नाभिपन्नं पुरेदानीं व्यपोत्तस्य पुनः कथाः २४ अस्मिन्कालेतु यद्युक्तं त
 दिदानीं विधीयताम् गतं तु नानुशोचेत गतं तु गतमेव हि ममापनयजं दोषं विक्रमेणासमीकुरु २५ यदि
 खल्वाप्तिमेस्मेहो विक्रमं वाधिगच्छसि यदि वा कार्यमेतत्ते हृदि कार्यतमं मतम् २६ सस्तु हृष्टो विपन्नार्थं
दीनमभ्युपपद्यते स बंधुर्योपनीतेषु सहाहाय्यायोपकल्पते २७ तमथैनं तु वाणांस वचनं धीरदारु
णो रुष्टोरमिति विस्वासयच्छनैः श्लक्ष्णमनु वाचह २८ तमतीवसमालक्ष्य भ्रातरं पुनुं मितेंद्रियम् कुं
म करीः शनैर्वीक्यं वभाषे परिसांत्वयन् २९ अलं ते राक्षसराजेंद्र संतापमुपपद्यावै रोषं च संपरि
त्यज्यत्वस्थो भवितुमर्हसि ३० नैतन्मनसि कर्तव्यं मयि जीवति पार्थिव तमहं नाशयिष्यामि यत्कृतेप
रितप्यसे ३१ अवश्यं चाहितं वाक्यं स वीवस्यात्सुत्तेमया बंधुभावादभिहितं भ्रातृस्नेहाच्च पार्थिव ३२
सहृद्यंप्रस्तु कालेस्मिन्कर्तुं स्निग्धेन बंधुना शत्रूणां कदनेपश्यक्षिप्रमाराणं मयारणे ३३ अद्य पश्य म
हावाहोमयापास मरमूर्द्धनि हतेरामे सहभ्रात्राद्रवंतीं हरिवाहिनीम् ३४ अद्य राममभित्रोदृष्ट्वा मयानी
तं रणाजिरात् सुखी भव महाबाहो सीताभवतु दुःखिताः ३५ अद्य राममसपश्यंतु निधनस्तु महस्त्रियम

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

लंकायां राक्षसाः सर्वे ये ते निहतबांधवाः ३६ अद्य शोकपरीतानां स्वबंधुवधकारणात् शत्रोर्युधि विना
शेन करोम्यश्रुप्रमार्जनम् ३७ अद्य पर्वतसंकाशं ससूर्यमिव तोयदम् विकीर्णं पश्य समरे सुग्रीवं प्ल
वगोत्तमम् ३८ कथं त्वं राक्षसैरेभिर्मया च परिरक्षितः जिघांसुभिर्दाशरथिं व्यथसे त्वं सदानघ ३९
मां निहत्य किल त्वां हि निहनिष्यति राघवः नाहमात्मनि संतापं गच्छेयं राक्षसाधिप ४० कामं त्विदानी
मपि मामादिश त्वं परंतप न परः प्रेक्षणीयस्ते युद्धायातुलविक्रम ४१ अहमुत्सादयिष्यामि शत्रूंस्तव
महाबल ४२ यदि शक्रो यदि यमो यदि पावकमारुतौ तानहं योधयिष्यामि कुबेरवरुणावपि ४३ गि
रिमात्रशरीरस्य शितशूलधरस्य मे नदतस्तीक्ष्णदंष्ट्रस्य बिभियाद्वै पुरंदरः ४४ अथवा त्यक्तशस्त्रस्य मृ
द्नतस्तरसा रिपून् न मे प्रतिमुखे कश्चित्स्थातुं शक्तो जिजीविषुः ४५ नैव शक्त्या न गदया नासिना न शि
तैः शरैः हस्ताभ्यामेव संरब्धो हनिष्यामि सवज्रिणम् ४६ यदि मे मुष्टिवेगं स राघवोऽद्य सहिष्यति ततः
पास्यंति बाणौघा रुधिरं राघवस्य तु ४७ अचिंतयित्वा बाणौघान् रुधिरं राघवस्य च लक्ष्मणस्य च पा
स्यामि चिरकालपिपासितः ४८ चिंतया तप्यसे राजन् किमर्थं मयि तिष्ठति सोहं शत्रुविनाशाय प्राप्तय नि

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०वा०यु० र्यातु मुदायुतः ४९ सुंचरामात्स्मद्भयं घोरं निहनिष्यामि संयुगे राघवं लक्ष्मणं चैव सुग्रीवं च महाबलम् ५०
१९५ हनूमंतं च रक्षोघ्नं लंका येन प्रदीपिता हरींश्च भक्षयिष्यामि संयुगे समुपस्थितान् ५१ असाधारणा
१६५ मिच्छामि तव दातुं महद्यशः यदि चेंद्राद्भयं राजन् यदि चापि स्वयंभुवः ५२ ततोहं ताः शमयिष्यामि नैशं
तम इवांशुमान् अपि देवाः शयिष्यंते मयि क्रुद्धे महीतले ५३ यमं च शमयिष्यामि भक्षयिष्या
मि पावकम् ॥ आदित्यं पातयिष्यामि सनक्षत्रं महीतले ५४ शतक्रतुं वधिष्यामि पास्यामि वरुणा
लयम् ॥ पर्वतांश्चूर्णयिष्यामि दारयिष्यामि मेदिनीम् ५५ दीर्घकालं प्रसुप्तस्य कुंभकर्णस्य विक्र
मम् ॥ अद्य पश्यंतु भूतानि भक्ष्यमाणानि सर्वशः ५६ नन्विदं त्रिदिवं सर्वमाहारो मम पूर्यते ५७
वधेन ते दाशरथेः सुखावहं सुखं समाहर्तुमहं व्रजामि निहत्य रामं सह लक्ष्मणेन खादामि सर्वान्
हरियूथमुख्यान् ॥ ५८ ॥ रमस्व कामं पिब चाद्य वारुणीं कुरुष्व कृत्यानि विनीयतां दुःखं मयाद्य रामे ग
मिते यमक्षयं चिराय सीता वशगा भविष्यति ॥ ५९ ॥ इत्यार्षे रामायणे वाल्मीकीये युद्धकांडे त्रिष
ष्टितमः सर्गः ॥ ६३ ॥ तदुक्तमतिकायस्य बलिनो बाहुशालिनः कुंभकर्णस्य वचनं श्रुत्वोवाच महोदरः रामा० १९५

१६५

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

ॐ

१ कुंभकर्णा कुले जातो धृष्टः प्राकृतदर्शनः अवलिप्तो न शक्नोषि कृत्यं सर्वत्र वेदितुम् २ नहि राजान
जानीते कुंभकर्णा नयानयौ त्वंतु कैशोरकाद् धृष्टः केवलं वक्तुमिछसि ३ स्थाने वृद्धिं च हानिं च देशका
लविभागवित् आत्मनश्च परेषां च बुध्यते राक्षसेश्वराः ४ यत्तु शक्यं बलवता कर्तुं प्राकृतबु
द्धिना अनुपासितवृद्धेन कः कुर्यात्तादृशं बुधः ५ यांस्तु धर्मार्थकामांस्त्वं ब्रवीषि पृथगाश्रयान्
अनुबोद्धुं स्वभावेन न हि लक्षणमस्ति तान् ६ कर्म चैव हि सर्वेषां कारणानां प्रयोजनम् श्रेयः पापी
यसां चात्र फलं भवति कर्मणाम् ७ निश्रेयसफलावेव धर्मार्थावितरावपि अधर्मानर्थयोः प्राप्तिः फलं
च प्रात्यवायिकम् ८ ऐहलौकिकपारत्र्यं कर्म पुंभिर्निषेव्यते कर्माण्यपि तु कल्प्यानि लभते काम
मास्थितः ९ तत्र क्लृप्तमिदं राज्ञा हृदि कार्यं मतं च नः शत्रौ हि साहसं यत्तत्स्यात्किमिवात्रापनीयते
१० एकस्य गमने तत्र हेतवः प्रकृतास्त्वया तत्राप्यनुपपन्नं ते वाक्षामि यदसाधु च ११ येन पूर्वं ज
नस्थाने बहवोतिबला हताः राक्षसा राघवं तं त्वं कथमेको जयिष्यसि १२ ये पूर्वं निर्जितास्तेन जनस्था
ने महौजसः राक्षसास्तान्पुरे सर्वान्भीतानद्यापि पश्यसि १३ तं सिंहमिव संक्रुद्धं रामं दशरथात्मजम्

रा० वा० यु० सर्प्पंसुप्तमहोतुं व्याघ्रंबोधयितुमिच्छसि १४ ज्वलंतंतेजसानित्यंक्रोधेनचदुरासदम् कस्तंमृत्यु
१९६ मिवासह्यमासादयितुमर्हति १५ संशयस्थमिदंसर्वंशत्रोःप्रतिसमासने एकस्यगमनंतत्रनहिमे
१६६ रोचतेभ्रशम् १६ हीनार्थस्तुसमृद्धार्थं समृद्धार्थंकोरिपुंप्राकृतंयथा निश्चितंजीवितत्यागेव
शमानेतुमिच्छति १७ यस्यनास्तित्रिलोकेषुसदृशोराक्षसोत्तम कथमाशंससेयोद्धुंतुल्येनैंद्र
विवस्वतोः १८ एवमुक्त्वातुसंरब्धःकुंभकर्णंमहोदरः उवाचरक्षसांमध्येरावणंलोकरावण
णम् १९ लब्ध्वापुरस्ताद्वैदेहींकिमर्थंपरितप्यसे यदेच्छसितदासीतावशगातेभविष्यति २० दृ
ष्टःकश्चिदुपायोमेसीतोपस्थानकारकः रुचिरश्चेत्स्वयाबुध्याराक्षसेंद्रततःशृणु २१ अहंद्वि
जिव्हःसंह्रादीकुंभकर्णोवितर्द्दनः पंचरामवधायैतेनिर्यांतीत्यवघोषय २२ ततोगत्वावयं
युद्धंदास्यामस्तस्ययत्नतः जेष्यामोयदितेशत्रून्नोपायैःकृत्यमस्तिनः २३ अथजीवतितेशत्रुर्वयं
चकृतसंयुगाः ततःसमभिपत्स्यामोमनसायत्समीक्षितम् २४ वयंयुद्धादिहेष्यामोरुधिरेणसमु
क्षिताः विदार्य स्वतनूर्बाणैरामनामांकितैःशरैः २५ राघवोभक्षितोस्माभिर्लक्ष्मणश्चे रामं० १९६
नौ
१६६

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

निवारितः तव पादौ महीध्यामत्त्वन्नः कामं प्रपूरय २६ ततो वघोषय द्रेगजस्कंधेन पार्थिव हतो रामः
सह भ्रात्रा सत्सैन्य इति सर्वतः २७ प्रीतो नाम ततो भूत्वा भृत्यानां त्वमरिंदम भोगांश्च परिवारांश्च का
मान्वसु चेदापय २८ ततो माल्यानि वासांसि भूषणान्यनुलेपनम् पेयं च वहु योधेभ्यः स्वयं च मुदि
तः पिव २९ ततोस्मिन्वहुलीभूते कौलीने सर्वतो गते भक्षितः ससुहृद्रामो राक्षसैरिति विश्रुते ३० प्र
विश्याश्वास्य चापि त्वं सीतां रहसि संलप धनधान्यैश्च रत्नैश्च कामैरेनां प्रलोभय ३१ अनयोप
धया राजन्भूयः शोकानुबंधया अकामा त्वद्वशं सीता नष्टनाथा गमिष्यति ३२ रमणीयं हि भर्तारं
विनष्टमवगम्य सा नैराश्यात् स्त्रीलघुत्वाच्च त्वद्वशं प्रतिपत्स्यते ३३ सा पुरा सुखसंवृद्धा सुखार्हा दुः
खकर्शिता त्वदधीनं सुखं ज्ञात्वा सर्वथोपगमिष्यति ३४ एतत्सुनीतं मम दर्शनेन रामं हि दृष्ट्वैव भवे
दनर्थः इहैव ते सेत्स्यति मोत्सुको भूर्महानयुद्धेन सुखस्य लाभः ३५ अनष्टसैन्यो ह्यनवाप्तसंशयो
रिपूनयुद्धेन जयन्जनाधिपः यशश्च पुण्यं च महान्महीपतिः श्रियं च कीर्तिं च चिरं समश्नुते ३६
इत्यार्षे श्रीमद्रामायणे युद्धकांडे चतुःषष्ठितमः सर्गः ॥६४॥ एवमुक्तस्तु निर्भर्त्स्य कुंभकर्णो महो

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०वा०यु० प्रगृह्य च्यांन्महाकायाः सान् निसुमहांतिच वानरास्तूर्णमुद्यम्य कुंभकर्णमभिद्रुवन् ४ स कुंभकर्णः सं
६०१ क्रुद्धो गदामुद्यम्य वीर्यवान् अर्दयत्सुमहाकायः समंताद्व्याक्षिपद्विषून् ५ शतानि सप्त चाष्टौ च सहस्राणि
च वानराः प्रकीर्णाः शेरते भूमौ कुंभकर्णेन योधिताः ६ षोडशाष्टौ च दश च दश च विंशत्रिंशत्तथैव
च परिक्षिप्य च बाहुभ्यां खादन्सपरिधावति भक्षयन्भृशसंक्रुद्धो गरुडः पन्नगानिव ७ कृच्छ्रेण च
समाश्वस्ताः संगम्य च ततस्ततः वृक्षाद्रिहस्ता हरयस्तस्थुः संग्राममूर्द्धनि ८ ततः पर्वतमुत्पाट्य द्वि
विदः प्लवगर्षभः दुद्राव गिरिशृंगाभो विलंबमिव तोयदः ९ तं समुत्पत्य चिक्षेप कुंभकर्णाय वानरः
तमप्राप्तो महाशैलस्तत्सैन्ये ऽपतत्तदा १० ममर्दाश्वान् गजांश्चैव रथांश्चैव नगोत्तमः तानि चान्या
नि रक्षांसि पुनरन्यद्गिरेः शिरः ११ तच्छैलवेगाभिहतं हताश्वं हतसारथिम् रक्षसां रुधिरक्लिन्नं ब
भूवायोधनं महत् १२ रथिनो वानरेन्द्राणां शरैः कालांतकोपमैः शिरांसि नर्दतां जह्रुः सहसा भीमविक्रमाः
१३ वानराश्च महात्मानः समुत्पाट्य महाद्रुमान् रथानश्वान्गजानुष्ट्रान्राक्षसानभ्यसूदयन् १४ राम०
हनूमान् शैलशृंगाणि वृक्षांश्च विविधान्बहून् ववर्ष कुंभकर्णस्य शिरस्यंबरमास्थितः १५ तानि ६०१

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा॰यु॰७० कुर्याद्विज्यां शतक्रतुः २९ ॥अधर्मसंश्रितो धर्मो विनाशयति राघव सर्वमेतद्यथाकामं काकुत्स्थ कु
२१६ रुते नरः ३० ममचेदं मतं तात धर्मोयमिति राघव धर्ममूलं त्वया छिन्नं राज्यमुत्सृजता त्वया ३१ ॥अ
र्थेभ्यो विवृद्धेभ्यः संवृत्तेभ्यस्ततस्ततः क्रियाः सर्वाः प्रवर्त्तन्ते पर्वतेभ्य इवापगाः ३२ ॥अर्थेन हि
वियुक्तस्य पुरुषस्याल्पतेजसः विच्छिद्यन्ते क्रियाः सर्वा ग्रीष्मे कुसरितो यथा ३३ सोयमर्थं परित्य
ज्य सुखकामः सुखैधितः पापमाचरते कर्त्तुं ततो दोषः प्रवर्त्तते ३४ यस्यार्थास्तस्य मित्राणि यस्या
र्थास्तस्य बांधवाः यस्यार्थः स पुमांल्लोके यस्यार्थः स च पंडितः ३५ यस्यार्थः स च विक्रांतो यस्या
र्थः स च बुद्धिमान् यस्यार्थः स महाबाहुर्यस्यार्थः स गुणाधिकः ३६ ॥अर्थस्यैते परित्यागे दोषाः प्रव्या
हृता मया राज्यमुत्सृजता वीर येन बुद्धिस्त्वया कृता ३७ यस्यार्थो धर्मकामार्थास्तस्य सर्वं प्रदक्षि
णम् ॥अधनेनार्थकामेन नार्थः शक्यो विचिन्वता ३८ हर्षः कामश्च दर्पश्च धर्मः क्रोधः शमो
दमः अर्थादेतानि सर्वाणि प्रवर्त्तन्ते नराधिप ३९ येषां नश्यत्ययं लोकश्चरतां धर्मचारिणाम्
तेर्थास्त्वयि न दृश्यन्ते दुर्दिनेषु यथा ग्रहाः ४० त्वयि प्रव्रजिते वीर गुरोश्च वचने स्थिते रक्षसाप राम॰ २१६

महात्मानं

हृता भार्या प्राणैः प्रियतरा तव ॥४१॥ तदद्य विपुलं वीर दुःखमिंद्रजिता कृतम् ॥ कर्मणा व्यपनेष्यामि तस्मा
दुत्तिष्ठ राघव ॥४२॥ उत्तिष्ठ नरशार्दूल दीर्घबाहो धृतव्रत ॥ किमात्मानं महात्मन्नाववुध्यसे ॥४३॥ एव
मनघस्तवोदितः ॥ प्रियार्थं जनकसुतानिधनं निरीक्ष्य रुष्टः ॥ सरथगजहयां सराक्षसेंद्रां भृशमिषु
भिर्विनिपातयामि लंकाम् ॥४४॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये युद्धकाण्डे त्र्यशीतितमः सर्गः
॥८३॥ राममाश्वासमाने तु लक्ष्मणे भ्रातृवत्सले निक्षिप्य गुल्मान्स्वस्थाने तत्रागच्छद्विभीषणः १
नानाप्रहरणैर्वीरैश्चतुर्भिः सचिवैर्वृतः नीलांजनचयाकारैर्मातंगैरिव यूथपः २ सोऽभिगम्य म
हात्मानं राघवं शोकलालसम् वानरांश्चापि ददृशे बाष्पपर्याकुलेक्षणान् ३ राघवं च म
हात्मानमिक्ष्वाकुकुलनंदनम् ददर्श मोहमापन्नं लक्ष्मणस्योकमाश्रितम् ४ व्रीडितं शोक
संतप्तं दृष्ट्वा रामं विभीषणः अंतर्दुःखेन दीनात्मा किमेतदिति सोऽब्रवीत् ५ विभीषणमुखं दृ
ष्ट्वा सुग्रीवं तांश्च वानरान् लक्ष्मणो वाचमंदार्थमिदं बाष्पपरिप्लुतः ६ हता मिंद्रजिता
सीतामिह श्रुत्वैव राघवः हनुमद्वचनात्सौम्य ततो मोहमुपाश्रितः ७ कथयंतं तु सौमित्रिं सन्नि

रा० वा० यु० वार्यविभीषणः पुष्कलार्थमिदंवाक्यंविसंज्ञंराममब्रवीत् ८ मनुजेंद्रार्तरूपेणयदुक्तस्त्वंहनूमता
२१७ तदयुक्तमहंमन्येसागरस्येवशोषणम् ९ अभिप्रायंतुजानामिरावणस्यदुरात्मनः सीतांप्रतिम
हाबाहोनचघातंकरिष्यति १० याच्यमानंसुबहुशोमयाहितचिकीर्षुणा वैदेहीमुत्सृजस्वेति
नचतत्कृतवान्वचः ११ नैवसाम्नानदानेननभेदेनकुतोयुधा साद्रष्टुमपिशक्येतनैवचा
न्येनकेनचित् १२ वानरान्मोहयित्वातुप्रतियातःसराक्षसः चैत्यंनिकुंभिलानामयत्रहोमंकरि
ष्यति १३ हुतवानुपयातोहिसर्वैरपिसवासवैः दुराधर्षोभवत्येषःसंग्रामेरावणात्मजः १४ तेन
मोहयतानूनमेषामायाप्रयोजिता विघ्नमन्विच्छतातातवानराणांपराक्रमे १५ ससैन्यास्तत्रगच्छा
मोयावत्तन्नसमाप्यते त्यजेमन्नरशार्दूलमिथ्यासंतापमागतम् १६ सीदतेहिबलंसर्वंदृष्ट्वा
त्वांशोककर्शितं इहत्वंस्वस्थहृदयस्तिष्ठसत्वसमुच्छ्रितः १७ लक्ष्मणंप्रेषयास्माभिःसहसै
न्यानुकर्षिभिः १८ एषतंनरशार्दूलोरावणिंनिशितैःशरैः त्याजयिष्यतितत्कर्मततोवध्योभवि
ष्यति १९ तस्यैतेनिशितास्तीक्ष्णाःपत्रिपत्रांगवाजिनः पतत्रिणइवासौम्याःशराःपास्यंतिशोणितम् राम०
२१७

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

तम् २० ततस्तेदिशमहाबाहोलक्ष्मणंशुभलक्ष्मणम् राक्षसस्यविनाशायवज्रंवज्रधरोयथा
२१ मनुजवरनकालविप्रकर्षोरिपुनिधनंप्रतियत्क्षमोद्यकर्तुम् त्वमतिसृजरिपोर्वधायवाणी
ममरिपुरपियोनिधनेयथामहेन्द्रः २२ समाप्तकर्माहितदाराक्षसेन्द्रोभवत्यदृश्यःसमरेसुरासुरैः युयुत्सुनातेन
समाप्तकर्मणाभवेत्सुराणामपिसंशयोमहान् ॥२३॥ इत्यार्षेश्रीमद्रामायणेयुद्धकाण्डेचतुरशीतित
मःसर्गः॥८४॥ तस्यतद्वचनंश्रुत्वाराघवःशोककर्षितः नोपधारयतेव्यक्तंयदुक्तंतेनरक्षसा
१ ततोधैर्यमवष्टभ्यरामःपरपुरंजयः विभीषणमुपासीनमुवाचकपिसंनिधौ २ नैरृताधि
पतेवाक्यंयदुक्तंतेविभीषण भूयस्तच्छ्रोतुमिच्छामिब्रूहियत्तेविवक्षितम् ३ राघवस्यवचः
श्रुत्वावाक्यंवाक्यविशारदः यत्तत्पुनरिदंवाक्यंबभाषेसविभीषणः ४ यथाज्ञप्तंमहाबाहो
त्वयागुल्मनिवेशनम् तत्तथानुष्ठितंवीरत्वद्वाक्यसमनंतरम् ५ तान्यनीकानिसर्वाणि
विभक्तानिसमंततः विन्यस्तायूथपाश्चैवयथान्यायंविभागशः ६ भूयस्तुममविज्ञाप्यंतच्छृ रा०म०
णुष्वमहाप्रभो त्वय्यकारणसंतप्तेसंतप्तहृदयावयम् ७ त्यजराजन्निमंशोकंमिथ्यासंतापं २५

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा० वा० यु० मागतम् तदियं त्यज्यतां चिंता शत्रुहर्षविवर्द्धनीम् ८ उद्यमः क्रियतां वीर हर्षः समुपसेव्यताम्
२१८ प्राप्तव्या यदि ते सीता हंतव्याश्च निशाचराः ९ रघुनंदन वक्ष्यामि श्रूयतां मे हितं वचः साध्वयं
यातु सौमित्रिर्बलेन महता वृतः १० निकुंभिलायां संप्राप्य हंतुं रावणिमाहवे धनुर्मंडलनिर्मु
क्तैराशीविषविषोपमैः ११ तेन वीरेण तपसा वरदानात्स्वयंभुवः अस्त्रं ब्रह्मशिरः प्राप्तं का
मगाश्च तुरंगमाः १२ स एष सह सैन्येन प्राप्तः किल निकुंभिलाम् यद्युत्तिष्ठेत्कृतं कर्म हतान्
सर्वाश्च विद्धि नः १३ निकुंभिलामसंप्राप्तमहुताग्निं च यो रिपुः त्वामाततायिनं हन्यादि
द्रशत्रो स ते वधः १४ वरो दत्तो महाबाहो सर्वलोकेश्वरेण वै इत्येवं विहितो राजन्वधस्तस्यै
व धीमतः १५ वधायेंद्रजितो राम संदिशस्व महाबल हते तस्मिन्हतं विद्धि रावणं ससुहृद्ग
णम् १६ विभीषणवचः श्रुत्वा रामो वाक्यमथाब्रवीत् जानामि तस्य रौद्रस्य मायां सत्य
पराक्रम १७ स हि ब्रह्मास्त्रवित्प्राज्ञो महामायो महाबलः करोत्यसंज्ञान्संग्रामे देवान्सव राम०
रुणानपि १८ तस्यांतरिक्षे चरतः रथस्थस्य महायशः न गतिर्ज्ञायते वीर सूर्यस्येवाभ्रसंप्लवे १९ २१८

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

राघवस्तु रिपोस्त्रीत्वा मायावीर्यं दुरात्मनः लक्ष्मणं कीर्तिसंपन्नमिदं वचनमब्रवीत् २० यद्वानरेंद्र
स्य बलं तेन सर्वेण संवृतः हनूमत्प्रमुखैश्चैव यूथपैश्च स लक्ष्मण २१ जांबवतर्क्षपतिना सह सै
न्येन संवृतः जहि तं राक्षससुतं मायाबलसमन्वितम् २२ अयं त्वां सचिवैः सार्द्धं महात्मा रजनीचरः
अभिज्ञस्तस्य देशस्य पृष्ठतोऽनुगमिष्यति २३ राघवस्य वचः श्रुत्वा लक्ष्मणः सविभीषणः जग्राह
कार्मुकश्रेष्ठमन्यद्भीमपराक्रमः २४ सन्नद्धः कवची खड्गी सशरी वामचापभृत् रामपादावुप
स्पृश्य हृष्टः सौमित्रिरब्रवीत् २५ अद्य मत्कार्मुकान्मुक्ताः शरा निर्भिद्य रावणिम् लंकामभि
पतिष्यंति हंसाः पुष्करिणीमिव २६ अद्यैव तस्य रौद्रस्य शरीरं मामकाः शराः विधमिष्यंति भित्वा
तं महाचापगुणच्युताः २७ एवमुक्त्वा तु वचनं द्युतिमान्भ्रातुरग्रतः स रावणिवधाकांक्षी लक्ष्म
णस्त्वरितो ययौ २८ सोऽभिवाद्य गुरोः पादौ कृत्वा चापि प्रदक्षिणम् निकुंभिलामभिययौ चैत्यं राव
णिपालितम् २९ विभीषणेन सहितो राजपुत्रः प्रतापवान् कृतस्वस्त्ययनो भ्रात्रा लक्ष्मणस्त्वरि
तो ययौ ३० वानराणां सहस्रैस्तु हनूमान्बहुभिर्वृतः विभीषणश्च सामात्यो लक्ष्मणं त्वरितं ययौ

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० यु० ३१ महता हरिसैन्येन सवेगमभिसंवृतः । अक्षराजबलं चैव ददर्श पथि विष्ठितम् ३२ स गत्वा दूरम
२१९ ध्वानं सौमित्रिर्मित्रनंदनः । राक्षसेंद्रबलं दूराद् अपश्यद् व्यूहमाश्रितम् ३३ स संप्राप्य धनुष्पाणिर्मायायो
गमरिंदमः । तस्थौ ब्रह्मविधानेन जेतुं तं रघुनंदनः ३४ विभीषणेन सहितो राजपुत्रः प्रतापवान् । अंग
देन च वीरेण तथानिलसुतेन च ३५ विविधममलशस्त्रभास्वरं तद् ध्वजगहनं विपुलं महारथैश्च ।
प्रतिभयतममप्रमेयवेगं तिमिरमिव द्विषतां बलं विवेश ।।३६।। इत्यार्षे श्रीमद्रामायणे युद्धकांडे पं
चाशीतितमः सर्गः ।।८५।। अथ तस्मिन्नवस्थायां लक्ष्मणं रावणानुजः । परेषामहितं वाक्यमर्थसा
धकमब्रवीत् १ यदेतद् राक्षसानीकं मेघश्यामं विलोक्यते । एतदायोध्यतां शीघ्रं कपिभिश्च
शिलायुधैः २ अस्यानीकस्य महतो भेदने यत लक्ष्मण । राक्षसेंद्रसुतोप्यत्र भिन्ने दृश्यो भविष्यति
३ स त्वमिंद्राशनिप्रख्यैः शरैरवकिरन् परान् । अभिद्रवाशु यावद्वै नैतत्कर्म समाप्यते ४ जहि वी
पर र दुरात्मानं मायापरमधार्मिकम् । रावणिं क्रूरकर्माणं सर्वलोकभयावहम् ५ विभीषणवचः श्रुत्वा
लक्ष्मणः शुभलक्षणः । ववर्ष शरवर्षाणि राक्षसेंद्रसुतं प्रति ६ ऋक्षाः शाखामृगाश्चैव द्रु रा०म० २१९

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

मप्रवरक्रोधिनः अभ्यधावंतसहितास्तदनीकमवस्थितम् ७ राक्षसाश्च शितैर्बाणैरसिभिः शक्तितो
मरैः अभ्यवर्त्तत समरे कपिसैन्यं जिघांसवः ८ ततः प्रहारस्तुमुलः संजज्ञे कपिरक्षसाम् शब्देन म
हताऽनेकाना दुर्मन्वैःसमंततः ९ शक्तिभिश्च विविधाकारैः शितैर्बाणैश्च पादपैः उद्यतैर्गिरिशृंगे
श्च घोरैराकाशमावृतम् १० राक्षसा वानरेंद्रैस्तु विकृतानन वाहवः निवेशायंतः शस्त्राणि चक्रु
स्ते सुमहद्भयम् ११ तथैव सकलैर्वृक्षैर्गिरिशृंगैश्च वानराः अभिजग्मुश्च जघ्नुश्च समरे सर्व
राक्षसान् १२ ऋक्षवानरमुख्यैश्च महाकायैर्महाबलैः रक्षसां युध्यमानानां महद्भयमजाय
त १३ स्वमनीकं विषण्णं तु श्रुत्वा शत्रुभिरर्दितम् उदतिष्ठत दुर्धर्षस्तत्कर्मण्यननुष्ठिते १४
वक्षोध कारान्निर्गम्य जानन्क्रोधः सरावणिः आरुरोह रथं सज्जं पूर्वयुक्तं सुसंयुतम् १५ सभीम
कार्मुकशरः कृष्णांजननचयोपमः रक्तास्यनयनः क्रूरो बभौ मृत्युरिवांतकः १६ १६ दृष्ट्वैव तु रथ
स्थं तं पर्यवर्त्तत तद्बलं रक्षसां भीमवेगानां लक्ष्मणेन युयुत्सताम् १७ तस्मिन्काले तु हनुमानुद्यम्य
सुदुरासदं धरणीधरसंकाशो महावृक्षमरिंदमः १८ स राक्षसानां तत्सैन्यं कालाग्निरिव निर्दहन्

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०वा०यु० चकारच हुमिर्द्धैर्लिःसंजंप्रधिवानरः १९ विध्वंसयंतंतरसाद्दृष्ट्वैवपवनात्मजम् राक्षसानांसह
२२० स्राणिहनूमंतमवाकिरन् २० शितशूलधराःशूलैरसिभिश्चासिपाणयः शक्तिहस्ताश्चशक्तिभिःप
ट्टिसैःपट्टिसायुधाः २१ परिघैश्चगदाभिश्चकुंतैश्चशुभदर्शनैः शतशश्चशतघ्नीभिरायसैरपिमु
द्गरैः २२ घोरैःपरशुभिश्चैवभिंडिपालैश्चराक्षसाः मुष्टिभिर्वज्रवेगैश्चतलैरशनिसन्निभैः २३
अभिजघ्नुःसमासाद्यसमंतात्पर्वतोपमम् तेषामपिचसं क्रुद्धश्चकारकदनंमहत् २४ सददर्श
कपिश्रेष्ठम्‌चलंतमभिंद्रजित् सूदयानममित्रघ्नममित्रान्पवनात्मजम् २५ ससारथिमुवाचे
दंयाहियत्रैषवानरः क्षयमेवाहिनःकुर्यात्राक्षसानामुपेक्षितः २६ इत्युक्तःसारथिस्तेनययौय
त्रसमारुतिः वहन्परमदुर्द्धर्षंस्थितमिंद्रजितंरथे २७ सोभ्युपेत्यशरान्खड्गान्पट्टिशासिपरश्व
धान् अभ्यवर्षत्तदुर्धर्षःकपिमूर्द्धनिराक्षसः २८ तानिशस्त्राणिघोराणिप्रतिगृह्यसमारुतिः
रोषेणमहताविष्टोवाक्यंचेदमुवाचह २९ युध्यस्वयदिशूरोसिरावणात्मजदुर्मते वायुपुत्रंस
मासाद्यनजीवन्प्रतियास्यसि ३० बाहुभ्यांसंप्रयुध्यस्वयदिमेद्वंद्वमाहवे वेगंसहस्वदुर्बुद्धेततस्त्वं राम० २२०

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रक्षसांवरः ३१ हनूमंतंजिघांसंतंसमुद्यतशरासनम रावणात्मजमाचष्टेलक्ष्मणायविभीषणः ३२
पःसवासवनिर्जेतारावणस्यात्मसंभवः सभूतोरथमास्थायहनूमंतंजिघांसति ३३ तमप्रतिमसंस्था
नैःशरैःशत्रुनिवारणैः जीवितांतकरैर्घोरैःसौमित्रेरावणिंजहि ३४ इत्येवमुक्तस्तुतदामहात्मा
विभीषणेनारिविभीषणेन ददर्शतंपर्वतसन्निकाशंरथस्थितंभीमबलंदुरासदम॥३५॥इत्यार्षेश्री
मद्रामायणेयुद्धकाण्डे षडशीतितमःसर्गः॥८६॥एवमुक्त्वातुसौमित्रिंजातहर्षोविभीषणः धनुः
पाणिनमादायत्वरमाणोजगामसः १ अविदूरंततोगत्वाप्रविश्यतुमहद्वनम् अदर्शयतत्तत्क
र्मलक्ष्मणायविभीषणः २ नीलजीमूतसंकाशंन्यग्रोधंभीमदर्शनम तेजस्वीरावणभ्राताल
क्ष्मणायन्यवेदयत् ३ इहोपहारंभूतानांबलवान्रावणात्मजः उपहृत्यततःपश्चात्संग्राममम
भिवर्तते ४ अदृश्यःसर्वभूतानांततोभवतिराक्षसः निहंतिसमरेशत्रून्बध्नातिचशरोत्तमैः ५
तमप्रविष्टंन्यग्रोधंबलिनंरावणात्मजम् विध्वंसयशरैस्तीक्ष्णैःसरथंसाश्वसारथिम् ६ तथे
त्युक्त्वामहातेजाःसौमित्रिर्मित्रवत्सलः बभूवावस्थितस्तत्रचित्रंविस्फारयन्धनुः ७ सरथेनाग्निव

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

पर्वतशृंगाग्राच्छूलात्तेनविभेदसः । बभंजवृक्षवर्षंच कुंभकर्णोमहाबलः १६ ततोहरीणांतदनीक
मुग्रंदुद्राव शूलंनिशितंप्रगृह्य तस्थौततोस्यापततः पुरस्तान्महीधराग्रंहनुमान्प्रगृह्य १७ सकुं
कर्णंकुपितोजघानवेगेन शैलोत्तमभीमकायम् सचुक्षुभेतेनतदाभिभूतो मेदार्द्रगात्रोरुधिरावसि
क्तः १८ सशूलमाविध्यतडित्प्रकाशंगिरिर्यथाप्रज्वलिताग्रशृंगं बाह्वंतरेमारुतिमाजघानगुहोचलं
क्रौंचमिवोग्रशक्त्या १९ सशूलनिर्भिन्नमहाभुजांतरः प्रविह्वलः शोणितमुद्वमन्मुखात्
ननाद भीमंहनुमान्महाहवे युगांतमेघस्तनितस्वनोपमम् २० ततोविनेदुःसहसाप्रहृष्टारक्षोगणास्तं
व्यथितंसमीक्ष्य प्लवंगमास्तुव्यथिताभयार्त्ताः प्रदुद्रुवुः संयति कुंभकर्णात् २१ ततस्तुनीलोबलवान्प
र्यवस्थापयन्बलम् नीलःक्षिक्षेपशैलाग्रंकुंभकर्णायधीमते २२ तमापतंतंसंप्रेक्ष्यमुष्टिनाभिज
घानह मुष्टिप्रहाराभिहतंतच्छैलाग्रंव्यशीर्यत सविस्फुलिंगंसज्वालंनिपपातमहीतले २३ ऋषभः
शरभोनीलोगवाक्षोगंधमादनः पंचवानरशार्दूलाः कुंभकर्णमुपाद्रवन् २४ शैलैर्वृक्षैस्तलैःपादै
र्मुष्टिभिर्जानुभिस्तदा कुंभकर्णंमहाकायंनिजघ्नुस्तेमहाबलाः २५ स्पर्शानिवप्रहारांस्तान्वेदयानोन

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० वा० यु० तेनिवक्त्नवान्रावणात्मजः इंद्रजित्कवचीधन्वीसध्वजः प्रत्यदृश्यत ८ तमुवाचमहातेजाः
२२१ पौलस्त्यमपराजितम् समाहूयेत्वांसमरे सम्यग्युद्धंप्रपश्यमे ९ एवमुक्तो महातेजामनस्वीरावणात्म
जः अब्रवीत्परुषंवाक्यंतत्रदृष्ट्वाविभीषणम् १० इहत्वं जातसंवृद्धः साक्षाद्भ्रातापितुर्मम कथं
द्रुह्यसिपुत्रस्यपितृव्योममराक्षस ११ नज्ञातित्वंनसौहार्दंनजातिस्तवदुर्मते प्रमाणंनचसोदर्यंन
धर्मोधर्मदूषण १२ शोच्यस्त्वमसिदुर्बुद्धिनिंदनीयश्चसाधुभिः यस्त्वंस्वजनमुत्सृज्यपरभृत्यत्वमागा
तः १३ नैतच्छिथिलयाबुध्यात्वंवेत्सिमहदंतरम् क्वचस्वजनसंवासः क्वचनीचपराश्रयः १४ गु
णवान्वापरजनःस्वजनोनिर्गुणोपिवा निर्गुणःस्वजनःश्रेयान्यःपरःपरएवसः १५ यःस्वपक्षंप
रित्यज्यपरपक्षंनिषेवते सस्वपक्षेक्षयंयातेपश्चात्तैरेवहन्यते १६ निरनुक्रोशताचेयंयादृक्प्री
तेनिशाचर स्वजनेनत्वयाशक्यंपौरुषंरावणानुज १७ इत्युक्तोभ्रातृपुत्रेणप्रत्युवाचविभी
षणः अजाननिवमच्छीलंकिंराक्षसविकत्थसे १८ राक्षसेंद्रसुतासाधोपारुष्यंत्यजगौरवात्
कुलेयद्यप्यहंजातोरक्षसांक्रूरकर्मणाम् गुणोयःप्रथमोनृणांतन्मेशीलमराक्षसम् १९ नरमे रा० म० २२१

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

दारुणोसौनाहंत्वाधर्मेतावैरमे भ्रात्राविषमशीलोपि कथंभ्राता निरस्यते २० धर्मात्प्रच्युतशीलंहि
पुरुषंपापनिश्चयम् सन्त्रासुखमवाप्नोतिहस्तादाशीविषंयथा २१ परस्वहरणेयुक्तंपरदाराभि
मर्षणम् त्याज्यमाहुर्दुराचारंवेश्मप्रज्वलितंयथा २२ परस्वानांचहरणंपरदाराभिमर्षणम्
सुहृदामतिशंकाचत्रयोदोषाःक्षयावहाः २३ महर्षीणांवधोघोरःसर्वदेवैश्चविग्रहः अभि
मानश्चरोषश्चवैरत्वंप्रतिकूलता २४ एतेदोषाममभ्रातुर्जीवितैश्वर्यनाशनाः गुणान्प्रच्छाद
यामासुःपर्वतानिवतोयदाः २५ दोषैरेतैःपरित्यक्तोमयाभ्रातापितातव नेयमस्तिपुरीलंका
नचत्वंनचतेपिता २६ अतिमानीचबालश्च दुर्विनीतश्चराक्षस बद्धस्त्वंकालपाशेन ब्रू
हिमांयद्यदिच्छसि २७ अद्यतेव्यसनंप्राप्तंकिंमांत्वंचनवक्ष्यसि प्रवेष्टुंनत्वयाशक्योन्यग्रो
धोराक्षसाधम २८ धर्षयित्वाचकाकुत्स्थौनशक्यंजीवितुंत्वया युध्यस्वनरदेवेनलक्ष्मणेन
रणेसह २९ हतस्त्वंदेवताकार्यंकरिष्यसियमक्षये २९ निदर्शयस्वात्मबलंसमुद्यतंकुरुष्वसर्वा
युधसायकव्ययं नलक्ष्मणस्यैत्यहिबाणगोचरम् त्वमद्यजीवन्सबलोगमिष्यसि॥३०॥इत्यार्षेश्रीमद्रा

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०वा०यु मायणेयुद्धकांडेसप्ताशीतितमःसर्गः॥ ८७॥ विभीषणवचः श्रुत्वा रावणिः क्रोधमूर्छितः अब्रवी
२२२ त्परुषं वाक्यं क्रोधेनाभ्युत्पपात च १ उद्यतायुधनिस्त्रिंशो रथे तु समलंकृते कालाश्वयुक्ते म
हति स्थितः कालांतकोपमः २ महाप्रमाणमुद्यम्य विपुलं वेगवद्दृढम् धनुर्भीमं परामृश्य शरां
श्चामित्रशातनान् ३ तं ददर्श महेष्वासो रथस्थः समलंकृतः अलंकृतममित्रघ्नो राघवस्यात्म
जो बली ४ हनूमत्पृष्ठमासीनमुदयस्थरविप्रभम् उवाचैनं सुसंरब्धः सौमित्रिं सविभीषणम्
तांश्च वानरशार्दूलान् पश्यध्वं मे पराक्रमम् ५ अद्य मत्कार्मुकोत्सृष्टं शरवर्षं दुरासदम् मुक्तं
वर्षमिवाकाशे धारयिष्यथ संयुगे ६ अद्य वो मामका बाणा महाकार्मुकनिःसृताः विध
मिष्यंति गात्राणि तूलराशिमिवानलः ७ तीक्ष्णसायकनिर्भिन्नान् शूलशक्त्यृष्टिपट्टिशैः अ
द्य वो गमयिष्यामि सर्वानेव यमक्षयम् ८ सृजतः शरवर्षाणि क्षिप्रहस्तस्य मे युधि जीमूतस्ये
व नदतः कः स्थास्यति ममाग्रतः ९ रात्रियुद्धे तदा पूर्वं वज्राशनिसमैः शरैः शायितौ स्थो म
या भूमौ विसंज्ञौ सपुरःसरौ १० स्मृतिर्न तेऽस्ति वा मन्ये व्यक्तं वा यमसादनम् आशीविषसमं राम०
२२२

क्रुद्धं प्रत्यायो योद्धुमुपस्थितः ११ तच्छ्रुत्वा राक्षसेंद्रस्य गर्जितं राघवस्तदा । अभीतवदनः क्रुद्धो रावणिं
वाक्यमब्रवीत् १२ उक्तश्च दुर्गमः पारः कार्याणां राक्षस त्वया कार्याणां कर्मणा पारं यो गच्छति स
बुद्धिमान् १३ स त्वमर्थस्य हीनार्थो दुरवापस्य केनचित् वाचा व्याहृत्य जानीषे कृतार्थोस्मीति दुर्म
ते १४ अंतर्धानगतेनाजौ यत्त्वया चरितः पुरा तस्कराचरितो मार्गो नैष वीरनिषेवितः १५ यथा
बाणपथं प्राप्य स्थितोस्मि तव राक्षस दर्शयस्वाद्य तत्तेजो वाचा त्वं किं विकत्थसे १६ एवमुक्तो धनुर्भी
मं परामृश्य महाबलः ससर्ज निशितान्बाणानिंद्रजित्समितिंजयः १७ तेन सृष्टा महावेगाः शराः
सर्पविषोपमाः संप्राप्य लक्ष्मणं पेतुः श्वसंत इव पन्नगाः १८ शरैरतिमहावेगैर्वेगवान्रावणात्
मजः सौमित्रिमिंद्रजिद्युद्धे विव्याध शुभलक्षणम् १९ स शरैरतिविद्धांगो रुधिरेण समुक्षितः
शुशुभे लक्ष्मणः श्रीमान्विधूम इव पावकः २० इंद्रजित्वात्मनः कर्म प्रसमीक्ष्याभिगम्य च विन
द्य सुमहानादमिदं वचनमब्रवीत् २१ पत्रिणः शितधारास्ते शरा मत्कार्मुकच्युताः आदास्यंते
द्य सौमित्रे जीवितं जीवितांतकाः २२ अद्य गोमायुसंघाश्च श्येनसंघाश्च लक्ष्मण । गृध्राश्च नि

रा० वा० यु० पत्तंतुत्वांगतासुंनिहतंमया २३ स्वत्रवंधुःसदानार्यैस्तमःपरमदुर्मतिः भक्तंभ्रातरमद्यत्वांद्रक्ष्य
२२२ त्निहतंमया २४ विध्वस्तकवचंभूमौव्यपविद्धशरासनम् हतोत्तमांगंसौमित्रेत्वामद्यनिहतंमया २५
इतिब्रुवाणंसौमित्रिःपरुषंरावणात्मजम् हेतुमद्वाक्यमर्थज्ञोलक्ष्मणःप्रत्युवाचह २६ वाग्बलंत्यज
६ दुर्बुद्धेक्रूरकर्मन्हिराक्षस अथकस्माद्वदस्येतत्संपादयसुकर्मणा २७ अकृत्वाकत्थसेकर्मकिमर्थ
मिहराक्षस कुरुतत्कर्मयेनाहंश्रद्दध्यांतवकत्थनम् २८ अनुक्त्वापरुषंवाक्यंकिंचिदप्यनवक्षि
पन् अविकत्थन्वधिष्यामित्वामद्यपुरुषादक २९ इत्युक्त्वापंचनाराचानाकर्णापूरितान्क्षि
तान् निजघानमहावेगान्लक्ष्मणोराक्षसोरसि ३० सुपत्रवाजितावाणाज्वलिताइवपन्नगाः
नैर्ऋतोरस्यभासंतसवितूरश्मयोयथा ३१ सशरैराहतस्तेनसरोषोरावणात्मजः सुप्रयुक्तैस्त्रिभि
र्वाणैःप्रतिविव्याधलक्ष्मणम् ३२ सबभूवमहाभीमोनरराक्षससिंहयोः विमर्दस्तुमुलोयुद्धेपरस्प
रजयैषिणोः ३३ उभौहिबलसंपन्नावुभौविक्रमशालिनौ उभावपिसुविक्रांतौसर्वशस्त्रकोवि
दौ ३४ उभौपरमदुर्जयावतुल्यबलतेजसौ युयुधातेतदावीरौग्रहाविवनभोगतौ ३५ बलवृ राम० २२३

ला

ज्ञाविव हि तौ युधि तौ दुष्प्रधर्षौ तौ युयुधाते महात्मानौ तदा केसरिणाविव ३६ बहून् अवसृजंतौ हि
मार्गणौघान् अवस्थितौ नरराक्षसमुख्यौ तौ प्रहृष्टाव् अभ्ययुध्यताम् ६३७ सुसंप्रहृष्टौ नरराक्षसौ तौ
जयैषिणौ मार्गणचापधारिणौ परस्परं तौ प्रववर्षतुर्भृशं शरौघवर्षेण बलाहकाविव ३८ अभ्य
प्रयुक्तौ युधि युद्धकोविदौ शरासिचंडौ शितशस्त्रधारिणौ अभीक्ष्णमाविव्यधतुर्महाहवे शंबरवास
वोपमौ ॥ ३९ ॥ इत्यार्षे श्रीमद्रामायणे युद्धकांडे अष्टाशीतितमः सर्गः ॥ ८८ ॥ ततः शरं दाशरथिः सं
धायामित्रकर्षणः ससर्ज राक्षसेंद्राय क्रुद्धः सर्प इव श्वसन् १ तस्य ज्यातलनिर्घोषं संश्रुत्वा राक्षसा
धिपः विवर्णवदनो भूत्वा लक्ष्मणं समुदैक्षत २ तं विषण्णमुखं दृष्ट्वा राक्षसं रावणात्मजम् सौ
मित्रिं मित्रसंपन्नं प्रत्युवाच विभीषणः ३ निमित्तान्यनुपश्यामि यान्यस्मिन् रावणात्मजे त्वरतेन
महाबाहो भग्न एष न संशयः ४ ततः संधाय सौमित्रिः शरान् अग्निशिखोपमान् मुमोच निशितांस्त
स्मै सर्पानिव विषोल्बणान् ५ शक्राशनिसमस्पर्शैर् लक्ष्मणेनाहतः शरैः मुहूर्त्तमभवन्मूढः
सर्वसंक्षुभितेंद्रियः ६ उपलभ्य मुहूर्त्तेन संज्ञां प्रत्यागतेंद्रियः ददर्शावस्थितं वीरम् आजौ दशर

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०वा०यु० ध्यामजम् ७ सोमिचक्रामसौमित्रिं रोषात्संरक्तलोचनः । अब्रवीच्चैनमासाद्य पुनः सपरुषं वचः ८
२२४ किन्नस्मरसितद्युद्धे प्रथमेमत्पराक्रमम निबद्धस्त्वं सह भ्रात्रा यदा युधि विचेष्टसे ९ युवां खलु
महायुद्धे शक्रजिद्बाणैः शरैः शायितौ प्रथमं भूमौ विसंज्ञौ सपुरःसरौ १० स्मृतिर्वा नास्ति ते मन्ये
व्यक्तं वा यमसादनम् गन्तुमिच्छसि यन्मां त्वमाधर्षयितुमिच्छसि ११ यदि ते प्रथमे युद्धे न दृष्टो म
त्पराक्रमः । अद्य त्वां दर्शयिष्यामि तिष्ठेदानीं व्यवस्थितः १२ इत्युक्त्वा सप्तभिर्बाणैरभिविव्याध
लक्ष्मणम् दशभिस्तु हनूमन्तं तीक्ष्णधारैः शरोत्तमैः १३ ततः शरप्रतानेन सुप्रयुक्तेन वीर्य
वान् क्रोधाद्विगुणसंरब्धो निर्बिभेद विभीषणम् १४ तद्दृष्ट्वा दुर्जितः कर्म कृतं रामानुजस्तदा
अचिन्तयित्वा प्रहसन् नैतत्किंचिदिति ब्रुवन् १५ मुमोच च शरान्घोरान् संगृह्य नरपुंगवः । अ
भीतवदनः क्रुद्धो रावणिं लक्ष्मणो युधि १६ नैवं रणगताः शूराः प्रहरन्ति निशाचर लघवश्चाल्प
वीर्याश्च शरा हीमे सुखास्तव १७ नैवं शूरास्तु युध्यन्ते समरे युद्धकांक्षिणः इत्येवं तं ब्रुवन्धन्वी रा०म०
शरैरभिववर्ष ह १८ तस्य बाणैः सुविध्वस्तं कवचं काञ्चनं महत् व्यशीर्यत रथोपस्थे ताराजालमिव २२४

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

वांबरात् १९ विधूतवर्मा नाराचैर्बभूवस्तकृतव्रणाः इंद्रजित्समरे वीरः प्ररूढ इव सानुमान् २०
ततः शरसहस्रेण संक्रुद्धो रावणात्मजः विभेद समरे वीरो लक्ष्मणं भीमविक्रमम् २१ विशीर्णतम
हद्दिव्यं कवचं लक्ष्मणस्य तु कृतप्रतिकृतान्योन्यं बभूवतुररिंदमौ २२ अभीक्ष्णं निश्वसंतौ हि युध्ये
तां तुमुलं युधि शरसंकृत्तसर्वांगौ सर्वतो रुधिरोक्षितौ २३ सुदीर्घकालं तौ वीरावन्योन्यं निशितैः
शरैः ततक्षतुर्महात्मानौ रणकर्मविशारदौ २४ बभूवतुश्चात्मजये यत्तौ भीमपराक्रमौ २५ तौ
शरौघैस्तथा कीर्णौ निकृत्तकवचध्वजौ स्रवंतं रुधिरं चोष्णं जलं प्रस्रवणाविव २६ शरवर्षं तलो
घोरं मुंचंतौ भीमनिःस्वनौ सासारयोरिवाकाशे नीलयोः कालमेघयोः २७ तयोरथ महान्कालो
व्यतीयाद्युध्यमानयोः न च तौ युद्धवैमुख्यं श्रमं वाप्युपजग्मतुः २८ अस्त्राण्यस्त्रविदां श्रेष्ठौ दर्शि
यंतौ परस्परं चक्रतुर्नरराक्षसौ ३० तयोः पृथक् पृथक् भीमः शुश्रुवे तुमुलः स्वनः प्रकंपजननो
घोरो निर्घात इव दारुणः ३१ स तयोर्भ्राजते शब्दस्तदा समरसक्तयोः सुघोरयोर्निष्टनतोर्गगने म
हामेघयोरिव ३२ सुवर्णपुंखैर्नाराचैर्बलवंतौ कृतव्रणौ प्रसुस्रुवाते रुधिरं कीर्तिमंतौ जये धृ

३ शरानुच्चावचाकारानंतरिक्षे ववंधतुः २९ व्यपेतदोषमस्यंतौ लघु चित्रं च सुष्ठु च उभौ तु तुमुलं घोरं

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा० वा० यु० तौ ३३ ते गात्रयोर्निपतिताः रुक्मपुंखाः शरा युधि असृग्दिग्धा विनिष्पेतुर्विविशुर्धरणीतलम् ३४
२२४ अन्यैः सुनिशितैः शस्त्रैराकाशे संजघट्टिरे बभंजुश्चिच्छिदुश्चान्ये तयोर्बाणाः सहस्रशः ३५ स ब
भूव रणो घोरस्तयोर्बाणमयश्चयः अग्निभ्यामिव दीप्ताभ्यां सत्रे कुशमयश्चयः ३६ तयोः कृत
व्रणौ देहौ शुशुभाते महात्मनोः सपुष्पाविव निष्पत्रौ वने किंशुकशाल्मली ३७ चक्रतुस्तुमु
लं घोरं सन्निपातं मुहुर्मुहुः इंद्रजिल्लक्ष्मणश्चैव परस्परजयैषिणौ ३८ लक्ष्मणो रावणिं यु
द्धे रावणिश्चापि लक्ष्मणम् अन्योन्यं तावभिघ्नंतौ न श्रमं प्रत्यपद्यताम् ३९ बाणजालैः शरी
रस्थैरवगाढैस्तरस्विनौ शुशुभाते महावीर्यौ प्ररूढाविव पर्वतौ ४० तयो रुधिरसिक्तानि संवृ
तानि शरैर्भृशं बभ्राजुः सर्वगात्राणि ज्वलंत इव पावकाः ४१ तयोरथ महान्कालो व्यतियाद्यु
ध्यमानयोः न च तौ युद्धवैमुख्यं श्रमं वाप्युपजग्मतुः ४२ अथ समरपरिश्रमं निहंतुं समरमुखे
ष्वजितस्य लक्ष्मणस्य प्रियहितमुपपादयन्महात्मा समरमुपेत्य विभीषणोऽवतस्थे ॥ ४३ ॥ इत्यार्षे
श्रीमद्रामायणे युद्धकांडे एकोननवतितमः सर्गः ॥ ८९ ॥ युध्यमानौ ततो दृष्ट्वा प्रसक्तौ नरराक्षसौ राम० २२५

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

श्च भिन्नाविव मातंगौ परस्परजयैषिणौ १ तौ द्रष्टुकामः संग्राममपरस्परगतौ बली शूरः सरावणा
त्मातातयोः संग्राममूर्द्धनि २ ततो विस्फारयामास महद्धनुरवस्थितः उत्ससर्ज च तीक्ष्णाग्रान् राक्ष
से षु महाशरान् ३ ते शराः शिखिसंकाशा निपतंतः समाहिताः राक्षसान् दारयामासुर्वज्रा इव म
हागिरीन् ४ विभीषणस्यानुचरास्तेपि शूलासिपट्टिशैः चिच्छिदुः समरे वीरान् राक्षसान् राक्षसोत्त
माः राक्षसैस्तैः परिवृतः स तदा तु विभीषणः बभौ मध्ये प्रहृष्टानां कलभानामिव द्विपः ६ ततः संचो
दयानो वै हरीन् रक्षोवधप्रियान् उवाच वचनं कालेकालज्ञो रक्षसां वरः ७ एकोयं राक्षसेंद्रस्य
परायणमवस्थितः एतच्छेषं बलं तस्य किं तिष्ठत हरीश्वराः ८ अस्मिन् विनिहते पापे राक्षसे रणमू
र्द्धनि रावणं वर्जयित्वा तु शेषमस्य बलं हतम् ९ प्रहस्तो निहतो वीरो निकुंभश्च महाबलः कुंभक
र्णश्च कुंभश्च धूम्राक्षश्च महाबलः १० जंबुमाली महामाली तीक्ष्णवेगोशनिप्रभः सुप्तघ्नो यज्ञको
पश्च वज्रदंष्ट्रश्च राक्षसः ११ संह्रादी विकटोरिघ्नः तपनो मंद एव च प्रघासः प्रघसश्चैव प्रजंघो जंघ ए
व च १२ अग्निकेतुश्च दुर्धर्षो रश्मिकेतुश्च वीर्यवान् विद्युज्जिह्वो द्विजिह्वश्च सूर्यशत्रुश्च रा

रा०वा०यु० विव्यथे ऋषभं तु महावेगा वाहुभ्यां परिषस्वजे २६ कुंभकर्णभुजाभ्यां तु पीडितो वानरर्षभः निपपात
९८२ र्षभो भूमौ प्रमुखागतशोणितः २७ मुष्टिना शरभं हत्वा जानुना नीलमाहनत् आजघान गवाक्षं च त
लेनेंद्रजिपुस्तदा २८ हतप्रहारव्यथिता मुमुहुः शोणितोक्षिताः निपेतुस्ते तु मेदिन्यां निकृत्ता इव किं
शुकाः २९ तेषु वानरमुख्येषु पतितेषु महात्मसु वानराणां सहस्राणि कुंभकर्णं प्रदुद्रुवुः ३० तं शै
लमिव शैलाभाः सर्वे तु प्लवगर्षभाः समारुह्य समुत्पत्य ददंशुः प्लवगर्षभाः ३१ तं नखैर्दशनैश्चा
पि मुष्टिभि र्जानुभिस्तथा कुंभकर्णं महावाहुं निजघ्नुः प्लवगर्षभाः ३२ स वानरसहस्रैस्तु विचितः पर्वतो
पमः रराज राक्षसव्याघ्रो गिरिरात्मरुहैरिव ३३ वाहुभ्यां वानरान्सर्वान्प्रगृह्य स महावलः भक्षया
मास तं क्रुद्धो गरुडः पन्नगानिव ३४ प्रक्षिप्ताः कुंभकर्णेन वक्त्रे पातालसन्निभे नासापुटाभ्यां नि
र्जग्मुः कर्णाभ्यां चैव वानराः ३५ भक्षयन्भृशसंक्रुद्धो हरीन्पर्वतसन्निभान् वभंज वानरान्सर्वा
न्संक्रुद्धो राक्षसोत्तमः ३६ मांसशोणितसंक्लेदां कुर्वन्भूमिं स राक्षसः चचार हरिसैन्येषु कालाग्नि
रिव मूर्छितः ३७ वज्रहस्तो यथा शक्रः पाशहस्तो यथांतकः शूलहस्तो वभौ तस्मिन्कुंभकर्णो रा०स०
९८२

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा॰बा॰यु॰ क्षसः १३ अकंपनस्सुपार्श्वश्चचक्रमालीचराक्षसः कंपनःसत्ववंतौचदेवांतकनरांतकौ १४ एतान्नि
२२९ हत्यातिवलान्वहून्राक्षसस्सत्तमान् वाहुभ्यांसागरंतीर्त्वालंघ्यतांगोष्पदंलघु १५ एतावदेव
प्रोक्तंवोजेतव्यमितिवानराः हताःसर्वेसमागम्यराक्षसावलदर्पिताः १६ अशक्तंनिधनंकर्तुंपुत्रस्य
जनितुर्मम घातनामऽप्यस्यरामार्थेनिहन्यांन्नातुरात्मजम् १७ हंतुकामस्यमेवाष्पंचक्षुश्चैवनिरु
ध्यतेतेनतमेवैषमहावाहुर्लक्ष्मणःशमयिष्यति १८ वानराघ्नंतुसंभ्रम्यस्त्वानस्यसमीपगान् १९
इतितेनातियशसाराक्षसेनाभिचोदिताः वानरेंद्राजहृषिरेलांगूलानिचविव्यधुः २० ततस्तेक
पिशार्दूलाः क्ष्वेलंतश्चमुहुर्मुहुः मुमुचुर्विविधान्नादान्मेघान्दृष्ट्वेववर्हिणः २१ जांववानपितै
सर्वैःस्वयूथैरभिसंवृतः अश्मभिस्ताडयामासनखैर्दंतैश्चराक्षसान् २२ निघ्नंतमृक्षाधिप
तिंराक्षसास्तेमहावलाः परिवव्रुर्भयंत्यक्त्वातमनेकविधायुधाः २३ शरैःपरशुभिस्तीक्ष्णैःपट्टि
सैर्मुष्टितोमरैः जांववंतंमृधेजघ्नुर्निघ्नंतंराक्षसींचमूम् २४ ससंप्रहारस्तुमुलःसंजज्ञेकपिरक्ष
साम् देवासुराणांक्रुद्धानांयथाभीमोमहास्वनः २५ हनूमानपिसंक्रुद्धःसानुमुत्पाट्यपर्वतान् स रा॰म॰ २२९

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

लक्ष्मणोप्येवं दृष्ट्वा क्रोधमहामनाः रक्षसां कदनं चक्रे दुरासदः सहस्रशः २६ स दृष्ट्वा तुमुलं युद्धे
पितृव्यस्येन्द्रजित्क्रोधाल्लक्ष्मणं परवीरहा पुनरेवाभ्यधावत २७ तौ प्रवृद्धौ तदा वीरौ मृधे लक्ष्मणरा
क्षसौ शरौघानभिवर्षन्तौ जघ्नतुस्तौ परस्परम् २८ अभीक्ष्णमन्तर्दधतुः शरजालैर्महाबलौ
चन्द्रादित्याविवोष्णान्ते यथा मेघैस्तरस्विनौ २९ न ह्यादानं न संधानं धनुषो वा परिग्रहः नवि
प्रमोक्षो बाणानां न विकर्षो न विग्रहः ३० न मुष्टिप्रतिसंधानं न लक्ष्यप्रतिपादनम् अदृश्यत
तयोस्तत्र युध्यतोः पाणिलाघवात् ३१ चापवेगप्रमुक्तैश्च बाणजालैः समन्ततः अन्तरिक्षेऽभि
संपन्ने न रूपाणि चकाशिरे ३२ लक्ष्मणो रावणिं प्राप्य रावणिश्चापि लक्ष्मणम् अव्यवस्था
भवत्युग्रा ताभ्यामन्योन्यविग्रहे ३३ ताभ्यामुभाभ्यां तरसा विसृष्टैर्विशिखैः शितैः निरन्तरमि
वाकाशं बभूव तमसावृतम् ३४ तैः पतद्भिश्च बहुभिस्तयोः शरशतैः शितैः दिशश्च प्रदि
शश्चैव बभूवुः शरसंकुलाः ३५ तमसा पिहितं सर्वमासीद्भीमतरं महत् अस्तं गते सहस्रां
शौ संवृते तमसेव हि ३६ रुधिरौघा महानद्यः प्रावर्तन्त सहस्रशः क्रव्यादा दारुणा वाग्भि

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०वा०यु० श्चक्षिप्रभीमनिस्वनाः ३७ नतदानींववौवायुर्नेचजज्वालपावकः स्वस्त्यस्तुलोकेभ्यइतिजजल्पु
२२ स्तेमहर्षयः संपेतुश्चात्रसंत्रस्ताःगंधर्वाःसहचारणैः ३८ अथराक्षससिंहस्यकृष्णान्कनकभूषणान्
शरैश्चतुर्भिःसौमित्रिर्विव्याधचतुरोहयान् ३९ ततोपरेणभल्लेनपीतेननिशितेनच ४० संपूर्ण
यतमुक्तेनसुपत्रेणसुवर्चसा महेंद्राशनिकल्पेनसूतस्यविचरिष्यतः ४१ सतेनबाणाशनिनात
लशब्दानुनादिना लाघवाद्राघवःश्रीमानशिरःकायादपाहरत् ४२ सयंतरिमहातेजाहतेमं
ध्य दोदरसुतः स्वयंसारथ्यमकरोत्पुनश्चधनुरस्पृशत् तदद्भुतमभूत्तत्रसारथ्यंपश्यतांयुधि ४३ हये
षुव्यग्रहस्तंतंविव्याधनिशितैःशरैः धनुष्यथपुनर्व्यग्रेहयेषुमुमुचेशरान् ४४ छिद्रेषुतेषु
बाणौघैःसौमित्रिःशीघ्रकृत्तमः अर्दयामाससमरेविचरंतमभीतवत् ४५ निहतंसारथिंदृष्ट्वा
समरेरावणात्मजः प्रजहौसमरोद्धर्षंविषण्णःसबभूवह ४६ विषण्णवदनंदृष्ट्वाराक्षसंहरि
यूथपाः ततःपरमसंहृष्टालक्ष्मणंचाभ्यपूजयन् ४७ ततःप्रमाथीरभसःशरभोगंधमादनः रामः
अमर्षमाणाश्चत्वारश्चक्रुर्वेगंहरीश्वराः ४८ तेचास्यहयमुख्येषुतूर्णमुत्पत्यवानराः चतुर्षु २२०

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

सुमहावीर्या निपेतुर्भीमविक्रमाः ४९ तेषामधिष्ठितानां तैर्वानरैः पर्वतोपमैः सुरवेभ्यो रुधिरं व्य
क्तं हयानां समवर्त्तत ५० तेहयामथिता भग्ना व्यस्तबोधरसांगनाः ५१ ते निहत्य हयांस्तस्य प्रमथ्य
च महारथम् पुनरुत्पवेगेन तस्थुर्लक्ष्मणपार्श्वतः ५२ सहताश्वादवस्तुत्य रथान्मथितसार
थेः प्रारवर्षेत्सौमित्रिमभ्यधावत्तरावलिः ५३ ततो महेंद्रप्रतिमः स लक्ष्मणः पदातिनं तं निह
तैर्हयोत्तमैः सृजंतमाजौ निशितान् शरोत्तमान् भृशं तदा वारणरौ व्यदारयत् ॥५४॥ इत्यार्षे श्रीम
द्रामायणे युद्धकांडे नवतितमः सर्गः ॥९०॥ द्वादशप्रहारः समाप्तः ॥ सहताश्वो महातेजा भूमौ
तिष्ठन्निशाचरः इंद्रजित्परमक्रुद्धः संप्रजज्वाल तेजसा १ तौ धन्विनौ जिघांसंतावन्योन्यमि
षुभिर्भृशम् विजयेनाभिनिष्क्रांतौ वने गजवृषाविव २ निबर्हयंतश्चान्योन्यं ते राक्षसवनौक
सः भर्त्तारं न जहुर्युद्धे संपतंतस्ततस्ततः ३ ततस्तान्राक्षसान्सर्वान् हर्षयन् रावणात्मजः
स्तुवानो हर्षमाणश्च इदं वचनमब्रवीत् ४ तमसा बहुलेनेमाः संसक्ताः सर्वतो दिशः नेह
विज्ञायते स्वो वा परो वा राक्षसोत्तमाः ५ धृष्टं भवंतो युध्यंतु हरीणां मोहनाय वै अहं तु रथ

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

 मास्थाय स्वप्राणमिष्यामि संयुगम् ६ तथा भवंतः कुर्वंतु प्रयोमे काननौकसः नयुद्धे युद्धरात्मानः प्रवि

वेनगरमयि ७ इत्युक्त्वा रावणसुतो वंचयित्वा वनौकसः प्रविवेश पुरीं लंकां रथहेतोरमित्रहा ८
सरथं भूषयित्वाथ रुचिरं हेमभूषितम् प्रासासिशरसंपूर्णं युक्तं परमवाजिभिः ९ अधिष्ठितं हयज्ञे
न सूतेनाप्तोपदेशिना आरुरोह महातेजा रावणिः समितिंजयः १० स राक्षसगणैर्मुख्यैर्वृतो मंदो
दरीसुतः निर्ययौ नगरात्तूर्णं कृतांतबलचोदितः ११ सोभिनिष्क्रम्य नगरादिंद्रजित्परवीरहा अभ्य
याज्जवनैरश्वैर्लक्ष्मणं सविभीषणम् १२ ततो रथस्थमालोक्य सौमित्री रावणात्मजम् वानराश्च
महावीर्या राक्षसश्च विभीषणः १३ विस्मयं परमं जग्मुर्लाघवात्तस्य धीमतः रावणिश्चापि संक्रु
द्धो रणे वानरयूथपान् पातयामास बाणौघैः शतशोथ सहस्रशः १४ समंडलीकृतधनू रावणिः
समितिंजयः हरीनभ्यहनत् क्रुद्धः परं लाघवमास्थितः १५ ते वध्यमाना हरयो नाराचैर्भीमविक्रमाः
सौमित्रिं शरणं प्राप्ताः प्रजापतिमिव प्रजा १६ ततः समरकोपेन ज्वलितो रघुनंदनः चिच्छेद कार्मु
कं तस्य दर्शयन्पाणिलाघवम् १७ सोन्यत्कार्मुकमादाय सज्जं चक्रे त्वरन्निव तदप्यस्य शितैर्बाणैः सौमित्रि

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

सौ

क्षमाणो निरस्तं ततः १८ अथैनं छिन्नधन्वानमाशीविषविषोपमैः विव्याधोरसि मित्री रावणिं
पंचभिः शरैः १९ तस्य कायविनिर्भिन्ना महाकार्मुकनिःसृताः निपेतुर्धरणीं बाणा रक्ताद्रुव
महोरगाः २० स भिन्नवर्मा रुधिरं वमन्वक्त्रेण रावणिः जग्राह कार्मुकश्रेष्ठं दृढज्यं बलवत्त
रम् २१ स लक्ष्मणं समुद्दिश्य परं लाघवमास्थितः ववर्ष शरवर्षाणि वर्षाणीव पुरंदरः २२
मुक्तमिंद्रजिता तत्तु शरवर्षमरिंदमः अवारयदसंभ्रांतो लक्ष्मणः सुदुरासदम् २३ स दर्शया
मास तदा रावणिं रघुनंदन असंभ्रांतो महातेजास्तदद्भुतमिवाभवत् २४ ततस्तान्राक्षसा
न्सर्वांस्त्रिभिरेकैकमाहवे अविध्यत्परमक्रुद्धः शीघ्रास्त्रं संप्रदर्शयन् राक्षसेंद्रसुतं चापि बाणौ
घैः समताडयत् २५ सोतिविद्धो बलवता शत्रुणा शत्रुघातिना असक्तं प्रेषयामास लक्ष्मणाय
बहून्शरान् २६ तानप्राप्तांश्छितैर्बाणैश्चिच्छेद रघुनंदनः सारथेरस्य चरणे रथिनो रघुस
त्तमः शिरो जहार धर्मात्मा भल्लेनानतपर्वणा २७ असूतास्ते हयास्तत्र रथमूहुरविक्लवाः
मंडलान्यभिधावंति तदद्भुतमिवाभवत् २८ अमर्षवशमापन्नः सौमित्रिर्दृढविक्रमः प्रत्य

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

ए॰ वा॰ पु॰ विध्यद्धुर्यांस्तस्य शरैर्विश्रामयन्रणे २९ अथ स्म प्रमालात्तत्र कर्णावनामसुतो बली विद्याधर
२२९
शैभिर्बाणैः सौमित्रिं तममर्षणम् ३० तेतस्य वज्रप्रतिमाः शराः सर्पविषोपमाः विलयं जग्मु
र्णस्य कवचं कांचनप्रभम् ३१ स्वभेद्य कवचं मत्वा राघवं रावणात्मजः ललाटे लक्ष्मणं बाणैः
सुपुंखैस्त्रिभिरिंद्रजित् ३२ अथ विध्यत्परमक्रुद्धः शीघ्रमस्त्रं प्रदर्शयन् ३३ तैः पषकैर्ल्लत्वा
टस्थैः शुशुभे रघुनंदनः रणाग्ने समरश्लाघी त्रिशृंग इव पर्वतः ३४ स तथार्द्दितो बाणौघा
त्तसेन महामन्युस्तमाशु प्रतिविव्याध लक्ष्मणः पंचभिः शरैः ३५ विक्षतोंद्रजितो युद्धे वदने
शुभकुंडले ३६ लक्ष्मणेंद्रजितौ वीरौ महाबलशरासनौ अन्योन्यं जघ्नतुर्बाणैर्विशिखैर्भीम
विक्रमौ ३७ ततः शोणितदिग्धांगौ लक्ष्मणेंद्रजितावुभौ रणे तौ रेजतुर्वीरौ पुष्पिताविव किं
शुकौ ३८ तौ परस्परमभ्येत्य सर्वगात्रेषु धन्विनौ घोरैर्विव्यधतुर्बाणैः कृतभावावुभौ जये ३९
ततः परमकोपेन स पुनो रावणात्मजः विभीषणं त्रिभिर्बाणैर्विव्याध वदने शुभे ४० अथो
मुखैस्त्रिभिर्बाणैर्विध्वा तु स विभीषणम् एकैकेनाथ विव्याध तान्सर्वान्हरियूथपान् ४१ त एम॰ २२९

स्मै दृढतरं क्रुद्धो जघान गदया हयान् विभीषणो महातेजा रावणेः सुदुरात्मनः ४२ स हताश्वाद्वेगस्तु स
रथान्मथितसारथे ग्रप्य शक्तिं महातेजाः पितृव्याय मुमोच ह ४३ तामापतन्तीं संप्रेक्ष्य सुमित्रानंद
वर्द्धनः चिच्छेद निशितैर्बाणैः शतधा सापतद्भुवि ४४ तस्मै दृढधनुः क्रुद्धो हताश्वाय विभीषणः
वज्रस्पर्शान्समान्पंच ससर्जोरसि मार्गणान् ४५ ते तस्य कायं भित्वा तु रुक्मपुंखा निमित्तगाः बभू
वुर्लोहितादिग्धाः रक्ताइव महोरगाः ४६ पितृव्यस्य तु संक्रुद्ध इन्द्रजिच्छरमाददे वाणमन्यं दीम
उत्तमं रक्षसां मध्ये यमदत्तं महाबलम् ४७ तं समीक्ष्य महातेजा महेषुं तेन संहितम् लक्ष्मणोप्या
ददे वाणमन्यं भीमपराक्रमः ४८ कुवेरेण स्वयं स्वप्ने यद्दत्तममितात्मना दुर्जयं दुर्विषह्यं च सें
द्रैरपि सुरासुरैः ४९ तयोस्ते धनुषी श्रेष्ठे बाहुभिः परिघोपमैः विकृष्यमाणे वीराभ्यां भृशं
जग्मतुः श्रिया ५१ तौ भासयंतौ वाकाशं धनुर्भ्यां विशिखौ च्युतौ मुखेन मुखमाहत्य सन्नि
पेततुरोजसा ५२ सन्निपातस्तयोरासीच्छरयोर्घोररूपयोः सधूमविस्फुलिंगश्च तज्जोग्नि
र्दारुणोऽभवत् ५३ तौ महाग्रहसंकाशावन्योन्यं सन्निपत्य च संग्रामे शतधा यातौ मेदिन्यां चैव पेततुः ५४

रा०वा०यु० शरौ प्रतिहतौ दृष्ट्वा तावुभौ रणमूर्द्धनि । व्रीडितौ जातरोषौ च लक्ष्मणेन्द्रजितौ तदा ५५ सुसंरब्धस्तु सौ
२३० मित्रिरस्त्रं वारुणमाददे । रौद्रमिन्द्रजिदप्यस्त्रं विसृजन् युधि विष्ठितः ५६ तेन तद्विहतं चास्त्रं वारुणं पर
मात्भुतम् । ततः क्रुद्धो महातेजा इन्द्रजित्समितिंजयः ५७ आग्नेयं संदधे दीप्तं स लोकं संक्षिपन्नि
व । सौर्येणास्त्रेण तद्वीरो लक्ष्मणः प्रत्यवारयत् ५८ अस्त्रं निवारितं दृष्ट्वा रावणिः क्रोधमूर्छितः ।
आसुरं शत्रुनाशाय घोरमस्त्रमुपाददे ५९ तस्माच्चापाद्विनिष्पेतुर्भास्वराः कूटमुद्गराः । शूला
नि च भुशुण्ड्यश्च गदाः खड्गाः परश्वधाः ६० तं दृष्ट्वा लक्ष्मणः संख्ये घोरमस्त्रं सुदारुणम्
अवार्यं सर्वभूतानां सर्वशत्रुविदारणम् । माहेश्वरेण द्युतिमांस्तदस्त्रं प्रत्यवारयत् ६१ तयोः
सुतुमुलं युद्धं संबभूवाद्भुतोपमम् । गगनस्थानि भूतानि लक्ष्मणं परिवारयन् ६२ भैरवाभिरु
ते भीमे युद्धे वानररक्षसाम् । भूतैर्बहुभिराकाशं विस्मितैरावृतं बभौ ६३ ऋषयः पितरो देवा गंध
र्वगरुडोरगाः । शतक्रतुं पुरस्कृत्य ररक्षुर्लक्ष्मणं रणे ६४ अथान्यं मार्गणश्रेष्ठं संदधे राघवा
नुजः । हुताशनसमस्पर्शं रावणात्मजदारणम् ६५ सुपत्रमनुवृत्तांगं सुपर्वाणं सुसंस्थितम् ६ राम०
२३०

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

सुवर्णविकृतंवीरः शरीरांतकरं शरम् ६६ दुरावारंदुर्विषहंराक्षसानांभयावहम् आशीविषवि
षप्रख्यंदेवसंघैःसुपूजितम् ६७ येनशक्रोमहातेजादानवानजयत्प्रभुः पुरादेवासुरेयुद्धेवीर्यवा
न्हरिवाहनः ६८ तदैंद्रमस्त्रंसौमित्रिःसंयुगेष्वपराजितम् शरश्रेष्ठंधनुःश्रेष्ठेनरश्रेष्ठोऽभिसंदधे
६९ संधायामित्रमथनंविचकर्षशरासनम् सज्यमायम्यदुर्धर्षःकालोलोकक्षयेयथा ७० सं
धायधनुषिश्रेष्ठेविकर्षन्निदमब्रवीत् लक्ष्मीवान्लक्ष्मणोवाक्यमर्थसाधकमात्मनः ७१ धर्मा
त्मासत्यसंधश्चरामोदाशरथिर्यदि पौरुषेचाप्रतिद्वंद्वस्तमेनंजहिरावणिम् ७२ इत्युक्त्वाबाणमाक
र्णंविकृष्यचमहाबलः लक्ष्मणःसमरेवीरःससर्जैंद्रजितंप्रति ७३ ऐंद्रास्त्रेणसमायोज्यलक्ष्मणः
परवीरहा तच्छिरःसशिरस्त्राणंश्रीमज्ज्वलितकुंडलम् प्रमथ्येंद्रजितःकायात्पातयामासभूतले
७४ तद्राक्षसतनूजस्यछिन्नस्कंधंशिरोमहत् तपनीयनिभंभूमौददृशेशोणितोक्षितम् ७५ हतस्तुनि
पपाताशुधरण्यांरावणात्मजः कवचीसशिरस्त्राणोविध्वस्तःसशरासनः ७६ चुक्रुशुस्तेततःसर्वे
वानराःसविभीषणाः प्रहृष्यन्तितेतस्मिन्देवावृत्रवधेयथा ७७ अथांतरिक्षेदेवानाम्षी

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

महाहवे ३८ यथा शुष्काण्यरण्यानि ग्रीष्मे दहति पावकः तथा वानरसैन्यानि कुंभकर्णो व्यनिर्दहत्
३९ ततस्ते वध्यमानास्तु हतयूथा विनायकाः वानरा भयसंविग्ना विनेदुर्विस्वरं भृशम् ४० अनेक
शो वध्यमानाः कुंभकर्णेन वानराः राघवं शरणं जग्मुर्व्यथिताः खिन्नचेतसः ४१ प्रभग्नान्वानरा
न्दृष्ट्वा वज्रहस्तात्मजात्मजः अभ्यधावत वेगेन कुंभकर्णं महाहवे ४२ शैलशृंगं महद्गृह्य विनद्य
स मुहुर्मुहुः त्रासयन्राक्षसान्सर्वान् कुंभकर्णपदानुगान् ४३ चिक्षेप शैलशिखरं कुंभकर्णस्य मू
र्धनि स तेनाभिहतस्तेन शैलेनेन्द्ररिपुस्तदा ४४ कुंभकर्णः प्रजज्वाल क्रोधेन महता तदा सोऽभ्यधा
वत वेगेन वालिपुत्रममर्षणम् ४५ कुंभकर्णो महानादस्त्रासयन्सर्ववानरान् शूलं ससर्ज वै रोषादं
गदे तु महाबलः ४६ तमापतन्तं बलवान् युद्धमार्गविशारदः लाघवान्मोक्षयामास बलवान्
वानरर्षभः ४७ उत्पत्य चैनं तरसा तलेनोरस्यताडयत् स तेनाभिहतः कोपात्प्रमुमोहाचलोपमः ४८
संलब्धसंज्ञोतिबलो मुष्टिं संगृह्य राक्षसः अपहासेन चिक्षेप विसंज्ञः स पपात ह ४९ तस्मिन्प्ल
वगशार्दूले विसंज्ञे पतिते भुवि तच्छूलं समुपादाय सुग्रीवमभिदुद्रुवे ५० तमापतंतं संप्रेक्ष्य कुंभ

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

णां भावितात्मनाम् ऽभिजज्ञे च सन्नादो गंधर्वाप्सरसामपि ७८ ऊचुश्च सहितास्तुष्टा देवगंधर्वदानवाः
विज्वराः शांतकलुषा ब्राह्मणा विचरंत्विति ७९ ततोऽभ्यनंदन्संहृष्टाः समरे हरियूथपाः तमप्रतिबलं दृष्ट्वा
हतं नैऋतपुंगवम् ८० विभीषणो हनूमांश्च जांबवान् ऋक्षयूथपः विजयेनाभिनंदंतस्तुष्टुवुश्चा
पि लक्ष्मणम् ८१ पतितं समभिज्ञाय राक्षसी सा महाचमूः वध्यमाना दिशो भेजे हरिभिर्जितकाशिभिः
८२ वानरैर्वध्यमानास्ते शस्त्राण्युत्सृज्य राक्षसाः लंकामभिमुखाः सस्तुर्नष्टसंज्ञाः प्रधाविताः ८३ दुद्रु
वुः शतशो भीता राक्षसा बहुधा दिशः त्यक्त्वा प्रहरणान्सर्वे पट्टिशासिपरश्वधान् ८४ केचिल्लंकां प
रित्रस्ताः प्रविष्टा वानरार्दिताः समुद्रे पतिताः केचित्केचित्पर्वतमाश्रिताः ८५ हतमिंद्रजितं दृष्ट्वा श
यानं समरे क्षितौ राक्षसानां सहस्रेषु न कश्चित्प्रत्यदृश्यत ८६ यथास्तं गत आदित्ये नावतिष्ठंति रश्म
यः तथा तस्मिन्निपतिते राक्षसास्ते गता दिशः ८७ शांतरश्मिरिवादित्यो निर्वाण इव पावकः बभूव
स महाबाहुर्व्यपास्तगतजीवितः ८८ प्रशांतपीडा बहुलो विनष्टारिः प्रहर्षवान् बभूव लोकः पतिते रा
क्षसेंद्रसुते तदा ८९ हर्षं च शक्रो भगवान्सह सर्वैः सुरर्षिभिः जगाम निहते तस्मिन्राक्षसे क्रूरकर्मणि ९०

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

आकाशे चापि देवानां शुश्रुवे देवदुंदुभिः नृत्यद्भिरप्सरोभिश्च गंधर्वैश्च महात्मभिः ९१ बवर्षुः पुष्प
वर्षाणि तदद्भुतमिवाभवत् प्रशशंसुर्हते तस्मिन्राक्षसे क्रूरकर्मणि ९२ शुद्धा आपो नभश्चैव ज
हृषुर्देवदानवाः आजग्मुः पतिते तस्मिन्सर्वलोकभयावहे ९३ ऊचुश्च सहितास्तुष्टा देवगंधर्वदा
नवाः विज्वराः शांतकलुषा ब्राह्मणा विचरंत्विति ९४ ततोऽभ्यनंदन्संहृष्टाः समरे हरियूथपाः तम
प्रतिबलं दृष्ट्वा हतं नैरृतपुंगवम् ९५ विभीषणो हनूमांश्च जांबवानृक्षयूथपः विजयेनाभि
नंदंतस्तुष्टुवुश्चापि लक्ष्मणम् ९६ क्ष्वेलंतश्च नदंतश्च गर्जंतश्च प्लवंगमाः लब्धलक्षा रघुव
रं परिवार्य प्रतस्थिरे ९७ लांगूलानि प्रविध्यंतः स्फोटयंतश्च वानराः लक्ष्मणो जयतीत्येवं वाक्यं
विश्रावयंस्तदा ९८ अन्योन्यं च समाश्लिष्य हरयो हृष्टमानसाः चक्रुरुच्चावचा गुणा राघवाश्रय
जाः कथाः ९९ तदसुकरमथाभिवीक्ष्य हृष्टाः प्रियसुहृदो युधि लक्ष्मणस्य कर्म परममुपलभ्य मनः
प्रहर्षं विनिहतमिंद्ररिपुं निशम्य देवाः ॥१००॥ इत्यार्षे श्रीमद्रामायणे युद्धकांडे एकनवतितमः सर्गः
॥९१॥ त्रयोदशप्रहारः समाप्तः ॥१३॥ रुधिरक्लिन्नगात्रस्तु लक्ष्मणः शुभलक्षणः बभूव हृष्टस्तं हत्वा श

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

कृजेतारमाहवे १ ततः सज्जो बवंते चहनूमंतं च वीर्यवान सन्निपत्यमहातेजास्तांश्चसर्वान्वनौकसः
२ आजगाम ततः शीघ्रं यत्रसुग्रीवराघवौ विभीषणमवष्टभ्यहनूमंतंचलक्ष्मणः ३ ततोरामम
भिक्रम्यसौमित्रिरभिवाद्यच तस्थौभ्रातृसमीपस्थः इंद्रस्येवबृहस्पतिः निष्ठनन्निवचागत्यराघवा
य महात्मने आचचक्षेतदावीरोघोरमिंद्रजितोवधम ५ एवंस्तुशिरः छिन्नंलक्ष्मणेनम
हात्मना न्यवेदयत्तरामाय तदाहृष्टोविभीषणः ६ श्रुत्वैवत्तुमहावीर्योलक्ष्मणेनेंद्रजिद्वधम
प्रहर्षमतुलंलेभेरामोवाक्यमुवाचह ७ साधुलक्ष्मणतुष्टोस्मिकर्मचासुकरंकृतम एवणोर्हिवि
नाशेनजितमित्युपधारय ८ सतंशिरस्युपाघ्राय लक्ष्मणंकीर्तिवर्द्धनम लज्जमानंबलात्स्ने
हादंकमारोप्यवीर्यवान् ९ उपवेश्यतमुत्संगेपरिष्वज्यावपीडितम भ्रातरंलक्ष्मणंस्निग्धंपुनः
पुनरुदैक्षत १० शल्यसंपीडितेशस्तेनिश्वसंतंतुलक्ष्मणम रामस्तुदुःखसंतप्तंतंतुनिश्वासपी
डितम ११ मूर्द्ध्निचैनमुपाघ्रायभूयःसंस्पृश्यचत्वरन उवाचलक्ष्मणंवाक्यमाश्वास्यपुरुषर्ष
भः १२ कृतंपरमकल्याणंकर्मदुष्करकर्मणा अद्यमन्येहतेपुत्रेरावणंनिहतंयुधि १३ अद्या

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

निह

हंविजयी ह्यद्यौहते तस्मिन्दुरात्मनि रावणस्यान्क्रं मस्यदिष्ट्या वीरत्वयारणे छिन्नोहिदक्षिणोबा
हुः सहितस्यव्यपाश्रयः १४ विभीषणांगदाभ्यांच कृतंकर्ममहद्रणे अहोरात्रैस्त्रिभिर्वीरः कथंचिद्वि नि
पातितः १५ निरमित्रः कृतोस्म्यद्य निर्यास्यति हि रावणः बलव्यूहेन महता श्रुत्वा पुत्रं निपातितम् १६ ह
तंपुत्रवधसंतप्तंनिर्यातंराक्षसाधिपम् बलेनावृत्यमहता निहनिष्यामिदुर्जयम् १७ त्वयालक्ष्मण
नाथेनसीताचपृथिवीचमे नदुष्प्रापा हतेतस्मिन्शक्रजेतरिचाहवे १८ सतंभ्रातरमाश्वास्यपरि
ष्वज्यचराघवः रामः सुषेणंमुदितः समाभाष्येदमब्रवीत् १९ सशल्योयंमहाप्राज्ञः सौमित्रिर्मित्रवत्स
लः यथाभवतिसुस्वस्थस्तथात्वंसमुदाचर २० विशल्यः क्रियतांक्षिप्रं सौमित्रिः सविभीषणः ऋक्ष
वानरसैन्यानांशूराणांद्रुमयोधिनाम् २१ येचाप्यन्ये त्रयुध्यंतिसशल्याव्रणिनस्तथा तेपिसर्वेप्रयत्ने
नक्रियेतांसुखिनस्तथा २२ एवमुक्तः सरामेणमहात्माहरियूथपः लक्ष्मणायददौनस्तः सुषेणः परमौष
धम् २३ सतस्यगंधमाघ्रायविशल्यः समपद्यत तदानिर्वेदनश्चैवसंरूढव्रणएवच २४ विभीषण
मुखानांचसुहृदांराघवाज्ञया सर्ववानरमुख्यानांचिकित्सांतुतदाकरोत् २५ ततः प्रकृतिमाप

ण्णो हृतशल्यो गतक्लमः सौमित्रिर्मुदितस्तत्र क्षणेन विगतज्वरः २६ तथैव रामः प्लवगाधिपस्तथा विभी
षणश्चर्क्षपतिश्च वीर्यवान् । दृष्ट्वा सौमित्रिमरोगमुत्थितं मुदा ससैन्याः परमं जहर्षिरे २७ अपूजय
त्कर्म स लक्ष्मणस्य सुदुष्करं दाशरथिर्महात्मा बभूव हृष्टो युधि वानरेंद्रो निशम्य तं शक्रजितं नि
पातितम् ॥ २८ ॥ इत्यार्षे श्रीमद्रामायणे युद्धकाण्डे द्विनवतितमः सर्गः ॥ ९२ ॥ ततः पौलस्त्यसचिवाः श्रु
त्वा चेंद्रजितो वधम् । आचचक्षुरभिज्ञाय दशग्रीवाय सव्यथाः १ युद्धे हतो महाराज लक्ष्मणेन तवात्म
जः विभीषणसहायेन मिषतां नो महाबलः २ शूरः शूरेण संगम्य संग्रामेष्वपराजितः लक्ष्मणेन हतः
शूरः पुत्रस्ते विबुधेंद्रजित् ३ गतः स परमांल्लोकान् शरैः संतर्प्य लक्ष्मणम् ४ स तं प्रतिभयं श्रुत्वा व
धं पुत्रस्य दारुणम् घोरमिंद्रजितः संख्ये कश्मलं प्राविशन्महत् ५ उपलभ्य चिरात्संज्ञां राजा राक्ष
सपुंगवः पुत्रशोकाकुलो दीनो विललापाकुलेंद्रियः ६ हा राक्षसचमूमुख्य मम वत्स
महारथ जित्वेंद्रं कथमद्य त्वं लक्ष्मणस्य वशं गतः ७ ननु त्वमिषुभिः क्रुद्धो भिंद्याः कालांतकावपि
मंदरस्यापि शृंगाणि किं पुनर्लक्ष्मणं युधि ८ अद्य वैवस्वतो राजा भूयो बहुमतो मम येनाद्य त्वं महाबाहो

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

संयुक्तः कालधर्मणा ९ एष पंथाः सुयोधानां सर्वामरगणेष्वपि यः कृते हन्यते भर्तुः स पुमान्स्वर्गमृ
च्छति १० अद्य देवगणाः सर्वे लोकपालास्तथर्षयः हतमिंद्रजितं दृष्ट्वा सुखं स्वप्स्यंति निर्भयाः ११ ॥
अद्य लोकास्त्रयः कृत्स्नाः पृथिवी च सकानना एकेनेंद्रजिता हीना शून्येव प्रतिभाति मे १२ अ
द्य नैरृतकन्यानां श्रोष्याम्यंतःपुरे रवम् करेणुसंघस्य यथा निनादं गिरिगह्वरे १३ यौव
राज्यं च लंकां च रक्षांसि च परंतप मातरं मां च भार्यां च क्व गतोसि विहाय नः १४ मम नाम त्वया वीर
गतस्य यमसादनम् प्रेतकार्याणि कार्याणि विपरीते हि वर्तसे १५ स त्वं जीवति सुग्रीवे लक्ष्मणे
च सराघवे मम शल्यमनुद्धृत्य क्व गतोसि विहाय नः १६ एवमादिविलापार्त्तं रावणं राक्षसा
धिपम् आविवेश महान्कोपः पुत्रव्यसनसंभवः १७ प्रकृत्या कोपनं ह्येनं पुत्रस्य पुनराधयः दी
प्तं संदीपयामासुः घर्मेर्कमिव रश्मयः १८ ललाटे भ्रुकुटीभिश्च संहताभिर्व्यरोचत युगांते सहैक्रै नै
स्तु महोर्मिभिरिवोदधिः १९ कोपाद्विजृंभमाणस्य वक्त्राद्व्यक्तमभिज्वलन् उत्पपात सधूमो
ग्निर्वृत्रस्य वदनादिव २० स पुत्रवधसंतप्तः शूरः क्रोधवशंगतः समीक्ष्य रावणो बुध्या वैदेह्या रोच

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा० वा० पु० यद्द्धम २१ तस्य प्रहृत्य तस्याक्षे चरन्के क्रोधाग्निनापि च रावणस्य महाघोरे दीप्ते नेत्रे बभूवतुः २२
२३४
घोरं प्रकृत्या रूपं तु तस्य क्रोधाग्निमूर्छितम् बभूव रूपं क्रुद्धस्य रुद्रस्येव व्यवस्थितम् २३ तस्य क्रु
द्धस्य नेत्राभ्यां प्रापतन्नश्रुबिंदवः दीप्ताभ्यामिव दीपाभ्यां सार्चिषः स्नेहबिंदवः २४ दंतान्विदशत
स्तस्य शुश्रुवे दशनस्वनः यंत्रस्यावेष्ट्यमानस्य महतो दानवैरिव २५ कालाग्निरिव संक्रुद्धो यां यां दि
शमवैक्षत तस्यां तस्यां भयत्रस्ता राक्षसाः संनिलिल्यिरे २६ तमंतकमिव क्रुद्धं चराचरचिखादि
षुम् वीक्षमाणं दिशः सर्वा राक्षसा नोपचक्रमुः २७ ततः परमसंक्रुद्धो रावणो राक्षसाधिपः अ
ब्रवीद्रक्षसां मध्ये संस्तंभयिषुराहवे २८ मया वर्षसहस्राणि चरित्वा परमं तपः तेषु तेष्ववकाशे
षु स्वयंभूः परितोषितः २९ तस्यैव तपसो व्युष्ट्या प्रसादाच्च स्वयंभुवः नासुरेभ्यो न देवेभ्यो भयं
मम कदाचन ३० कवचं ब्रह्मदत्तं मे यदादित्यसमप्रभम् देवासुरविमर्देषु न छिन्नं वज्रश
क्तिभिः ३१ तेन मामद्य संयुक्तं रथस्थमिह संयुगे प्रतीयात्को ऽद्य मामाजौ साक्षादपि पुरंदरः ३२ राम०
यत्तदाभिप्रसन्नेन सशरं कार्मुकं महत् देवासुरविमर्देषु मम दत्तं स्वयंभुवा ३३ अद्य तूर्यशतैर्भी २३४

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

मेधनुकृत्याप्यतां मम रामलक्ष्मणयोरेव वधाय परमाहवे ३४ स पुत्रवधसंतप्तः शूरः क्रोधवशं
गतः समीक्ष्य रावणो बुध्या सीतां हंतुं व्यवस्यत ३५ प्रत्यवेक्षत तां ताम्राक्षः सुघोरो घोरदर्शनान्
दीनो दीनस्वरान् सर्वांस्तानुवाच निशाचरान् ३६ मायया मम वत्सेन वंचनार्थं वनौकसाम् किं
चिदेव हतं तत्र सीतेयमिति दर्शितम् ३७ तदिदं तथ्यमेवाहं करिष्ये प्रियमात्मनः वैदेहीं नाशयि
ष्यामि क्षत्रबंधुमनुव्रताम् इत्येवमुक्त्वा सचिवान् खड्गमाशु परामृशत् ३८ उद्धृत्य गुणसंप
न्नं विमलांबरवर्चसम् निष्पपात स वेगेन सभार्यः सचिवैर्वृतः ३९ रावणः पुत्रशोकेन भृश
माकुलचेतनः संक्रुद्धः खड्गमादाय सहसा यत्र मैथिली ४० व्रजंतं राक्षसं प्रेक्ष्य सिंहनादा
न्विचुक्रुशुः ऊचुश्चान्योन्यमालिंग्य संक्रुद्धं प्रेक्ष्य राक्षसम् ४१ अद्यैनेन ताबुभौ दृष्ट्वा भ्रातरौ प्र
व्यथिष्यतः ४२ लोकपाला हि चत्वारः क्रुद्धेनानेन निर्जिताः बहवः शत्रवश्चान्ये संयुगेष्व
भिपातिताः ४३ त्रिषु लोकेषु रत्नानि भुंक्ते चाहृत्य रावणः विक्रमे च बले चैव नास्त्यस्य सदृशो भु
वि ४४ तेषां संजल्पमानानामशोकवनिकां गताम् अभिदुद्राव वैदेहीं रावणः क्रोधमूर्छितः ४५

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० वा० यु० वार्यमाणः सुसंक्रुद्धः सुहृद्भिर्हितबुद्धिभिः अभ्यधावत संक्रुद्धः खेमहोरोहिणीमिव ४६ मैथि
२३५ लीरक्ष्यमाणा तु राक्षसीभिरनिंदिता दद श्रीराक्षसं क्रुद्धं निस्त्रिंशवरधारिणम् ४७ तं निशाम्य
स निस्त्रिंशं व्यथिता जनकात्मजा निवार्यमाणं बहुशः सुहृद्भिरनुवर्तिनम् ४८ सीता दुःख
समाविष्टा विलपंतीदमब्रवीत् यथायं मामभिक्रुद्धः समभिद्रवति स्वयम् वधिष्यति सनाथां
मामनाथामिव दुर्मतिः ४९ बहुशश्चोदयामास भर्त्तारं मामनुव्रताम् भार्या मम भवस्वेति प्र
त्याख्यातो ध्रुवं मया ५० सोयं मामनुपस्थाने व्यक्तं नैराश्यमागतः क्रोधमोहसमाविष्टो व्यक्तं
मां हंतुमुद्यतः ५१ अथवा तौ नरव्याघ्रौ भ्रातरौ रामलक्ष्मणौ मन्निमित्तमनार्येण समरे द्य
निपातितौ ५२ भैरवो हि महान्नादो राक्षसानां श्रुतो मया बहूनामिह हृष्टानां तदा विक्रोशतां
प्रियम् ५३ अहो धिङ्मन्निमित्तोयं विनाशो राजपुत्रयोः ५४ अथवा पुत्रशोकेन अहत्वा
रामलक्ष्मणौ विधमिष्यति मां रौद्रो राक्षसः पापनिश्चयः ५५ हनूमतोपि यद्वाक्यं न कृतं क्षु
द्रया मया यद्यहं तस्य पृष्ठेन तदा यायामनिंदिता नाद्यैवमनुशोचेयं भर्त्तुरंकगता सती ५६ राम० २३५

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

मन्येनुदद्यं तस्याः कौशल्यायाः फलिष्यति एकपुत्रा यदा पुत्रं योक्ष्यते पृथिवीसूदितम् ५७ साहि ज
न्म च बाल्यं च यौवनं च महात्मनः धर्मकार्याणि रूपं च रुदंती संस्मरिष्यति ५८ निराशा निहते
पुत्रे दत्वा श्राद्धमचेतना अग्निमारोहयते नूनं आपो वापि प्रवेक्ष्यति ५९ धिगस्तु कुब्जामसत्
तीं मंथरां पापनिश्चयाम् यन्निमित्तमिमं शोकं कौशल्या प्रतिपत्स्यते ६० इत्येवं मैथिलीं
दृष्ट्वा विलपंतीं तपस्विनीम् रोहिणीमिव चंद्रेण विना ग्रहवशंगताम् ६१ एतस्मिन्नंतरे तस्य
अमात्यः शीलवांछुचिः सुपार्श्वो नाम मेधावी रावणं राक्षसेश्वरम् निवार्यमाणं सचिवैरिदं वचनम
ब्रवीत् ६२ कथं नाम दशग्रीव साक्षाद्वैश्रवणानुज हंतुमिच्छसि वैदेहीं क्रोधाद्धर्ममपास्य च
६३ वेदविद्याव्रतस्नातः स्वकर्मनिरतः सदा स्त्रियः कस्माद्वधं वीर मन्यसे राक्षसेश्वर ६४ मैथि
लीं रूपसंपन्नां प्रत्यवेक्षस्व पार्थिव तस्मिन्नेव सहास्माभी राघवे क्रोधमुत्सृज ६५ अभ्युत्था
नं त्वमद्यैव कृष्णपक्षचतुर्दशीं कृत्वा निर्याह्यमावस्यां विजयाय बलैर्वृतः ६६ शूरो धीमान्रथी
खड्गी रथप्रवरमास्थितः हत्वा दाशरथिं रामं भवान्प्राप्स्यति मैथिलीम् ६७ स तद्दुरात्मा सुहृद

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

 कर्णमहाबलम् उत्पपात महावेगः सुग्रीवो वानराधिपः ५१ स पर्वताग्रमुत्क्षिप्य समाविध्य म
 हाकपिः अभिदुद्राव वेगेन कुंभकर्णमहाबलः ५२ तमापतंतं प्रेक्ष्य कुंभकर्णः प्लवंगमम् तस्थौ
विवृत्तसर्वांगो वानरेंद्रसमुन्मुखः ५३ कपिशोणितदिग्धांगं भक्षयंतं महाकपीन् कुंभकर्णंस्थि
तं दृष्ट्वा सुग्रीवो वाक्यमब्रवीत् ५४ पातिताश्च त्वया वीराः कृतं कर्म सुदुष्करम् भक्षितानि च
सैन्यानि प्राप्तं ते परमं यशः ५५ त्यज तद्वानरानीकं प्राकृतैः किं करिष्यसि सहस्वैकं निपातं मे प
र्वतस्यास्य राक्षस ५५ तद्वाक्यं हरिराजस्य सत्त्वधैर्यसमन्वितम् श्रुत्वा राक्षसशार्दूलः कुंभ
कर्णोऽब्रवीद्वचः ५६ प्रजापतेस्तु पौत्रस्त्वं तथैवर्क्षरजःसुतः श्रुतपौरुषसंपन्नस्तस्माद्गर्जसि वान
र ५७ स कुंभकर्णस्य वचो निशम्य व्याविध्य शैलं सहसा मुमोच तेनाजघानोरसि कुंभकर्णं शै
लेन वज्राशनिसंनिभेन ५८ तच्छैलशृंगं सहसा विभिन्नं भुजांतरे तस्य तदा विशाले ततो
विषेदुः सहसा प्लवंगमा रक्षोगणाश्चापि मुदा विनेदुः ५९ स शैलशृंगाभिहतश्चुकोप ना
द कोपाच्च विवृत्य वक्त्रं व्याविध्य शूलं च तडित्प्रकाशं चिक्षेप हर्यृक्षपतेर्वधाय ६० तत्कुं

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा० वा० यु० दा निवेदितं वचः सुधर्म्मं प्रति तिष्ठ रावणः ॥ हं जगाम मायतत श्च वीर्यवान् पुनः सभां च प्रविवेश सुदुः
२३६
तः ॥ ६८ ॥ इत्यार्षे श्रीमद्रामायणे युद्धकाण्डे त्रिनवतितमः सर्गः ॥ ९३ ॥ स प्रविश्य सभां राजा दीनः पर
मदुःखितः निषसादासने मुख्ये सिंहः क्रुद्ध इव श्वसन् १ अब्रवीच्च स तान्सर्वान्बलमुख्यान्महा
बलः एवगाः प्राञ्जलिर्वाक्यं पुत्रव्यसनकर्षितः २ सर्वे भवन्तः सर्वेण हस्त्यश्वेन समावृताः निर्यान्तु
रथसंघैश्च पदातिभिश्चोपशोभिताः ३ एकं रामं परिक्षिप्य समरे हन्तुमर्हथ प्रहृष्टाः शरवर्षेण प्रा
वृट्काल इवाम्बुदाः ४ अथवाहं शरैस्तीक्ष्णैर्भिन्नगात्रं महारणे भवद्भिः श्वो निहन्तास्मि रामं
लोकस्य पश्यतः ५ इत्येतद्वाक्यमादाय राक्षसेन्द्रस्य राक्षसाः निर्ययुस्ते रथैः शीघ्रैर्नागानीकैश्च
संवृताः ६ परिघान्पट्टिसांश्चैव शरखड्गपरश्वधान् शरीरान्तकरान्सर्वे चिक्षिपुर्वानरान्प्रति ७
वानराश्च द्रुमान्शैलान्राक्षसान्प्रति चिक्षिपुः ८ स संग्रामो महाभीमः सूर्यस्योदयनं प्रति रक्ष
सां वानराणां च तुमुलः समपद्यत ९ ते गदाभिर्विचित्राभिः प्रासैः खड्गैः परश्वधैः अन्योन्यं सम
रे जघ्नुस्तदा वानरराक्षसाः १० एवं प्रवृत्ते संग्रामे ह्यद्भुतं सुमहद्रजः रक्षसां वानराणां च शान्तं
राम०
२३६

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

श्रोणितविस्रवैः ११ मातंगरथकूलाश्च वाजिमत्स्या ध्वजद्रुमाः शरीरसंघाटवहाः प्रसुस्रुः श्रोणितापृ
गाः १२ ततस्ते वानराः सर्वे श्रोणितौघपरिप्लुताः ध्वजचर्मरथानश्वान्नानाप्रहरणानि च आप्लुत्याप्लु
त्य समरे वानरेंद्रा बभंजिरे १३ केशान् कर्णान्ललाटांश्च नासिकाश्च प्लवंगमाः राक्षसां दशनैस्ती
क्ष्णैर्नखैश्चापि व्यदारयन् १४ एकैकं राक्षसं संख्ये शतं वानरपुंगवाः अभ्यधावंत फलितं वृक्षं श
कुनयो यथा १५ तदा गदाभिर्गुर्वीभिः प्रासैः खड्गैः परश्वधैः निर्जघ्नुर्वानरान्घोरान् राक्षसाः पर्वतोप
माः १६ राक्षसैर्वध्यमानानां वानराणां महाचमूः शरण्यं शरणं याता रामं दशरथात्मजम् १७ ततो रा
मो महातेजा धनुरादाय वीर्यवान् प्रविश्य राक्षसं सैन्यं शरवर्षं ववर्ष ह १८ प्रविष्टं तु तदा रामं मेघाः सू
र्यमिवांबरे नाभिजग्मुर्महाघोरं निर्दहंतं शराग्निना १९ कृतान्येव सुघोराणि रामेण रजनीचराः रणे
रामस्य ददृशुः कर्माण्यसुकराणि ते २० चालयंतं महानीकं विधमंतं महारथान् ददृशुस्ते न वै रामं वा
तं वनगतं यथा २१ छिन्नं भिन्नं शरैर्दग्धं प्रभिन्नं शस्त्रपीडितम् बलं रामेण ददृशुर्न रामं शीघ्रकारिणम्
२२ प्रहरंतं शरीरेषु न ते पश्यंति राघवम् इंद्रियार्थेषु तिष्ठंतं भूतात्मानमिव प्रजाः २३ एष हंति गजानी

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०आ०यु० कमेषहंतिमहारथान् एषहंतिशरैस्तीक्ष्णैःपदातीन्वाजिभिःसह: २४ इतितेराक्षसाःसर्वेरामस्यसदृशान्न
२३७ रणे ऽन्योन्यंकुपिताजघ्नुःसादृश्याद्राघवस्यते २५ नतेददृशिरेरामंदहंतमरिवाहिनीम् मोहिताः
परमास्त्रेणगांधर्वेणमहात्मना २६ तेतुरामंसहस्राणिरणेयूथशोराक्षसाः ऽपुनःपश्यंतिकाकुत्स्थमेक
मेवमहारणे २७ भ्रमंतींकांचनींकोटिंकार्मुकस्यमहात्मनः ऽलातचक्रप्रतिमांददृशुस्तेनराघ
वम् २८ शरीरनाभिसत्वार्चिःशरारंनेमिकार्मुकं ज्याघोषतलनिर्घोषंतेजोबुद्धिगुणप्रभम् २९ दिव्या
स्त्रगुणसंपन्नंनिघ्नंतंयुधिराक्षसान् ददृशूरामचक्रंतात्कालचक्रमिवप्रजाः ३० ऽनीकंदशसाह
स्रंरथानांवातरंहसाम् ऽष्टादशसहस्राणिकुंजराणांतरस्विनाम् ३१ चतुर्दशसहस्राणांसारो
हाणांचवाजिनाम् पूर्णेशतसहस्रेद्वेराक्षसानांपदातिनाम् ३२ दिवसस्याष्टभागेनशरैरग्निशिखोप
मैःहतान्येकेनरामेणरक्षसांकामरूपिणाम् ३३ तेहताश्वाहतरथाःशांताविमथितध्वजाः ऽभिपेतुः
पुरींलंकांहतशेषानिशाचराः ३४ हतैर्गजपदात्यश्वैस्तद्बभूवरणाजिरम् ऽप्रक्रीडभूमिःक्रुद्धस्यरु
द्रस्येवमहात्मनः ३५ ततोदेवाःसगांधर्वाःसिद्धाश्चपरमर्षयः साधुसाध्वितिरामस्यतत्कर्मप्रत्यपूज राम० २३७

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

पन् ३६ ऽब्रवीच्च तदा रामः सुग्रीवं प्रस्यनेतरम् विभीषणं च धर्मात्मा हनूमन्तं च वानरम् ३७ जांब
वन्तं हरिश्रेष्ठं मैन्दं द्विविदमेव च एतदस्त्रबलं दिव्यं मम वा त्र्यम्बकस्य वा ३८ निहत्य तां राक्षसराजवा
हिनीं रामस्तदा शक्रसमो महात्मा ऽस्त्रेषु शस्त्रेषु जितक्लमश्च संस्तूयते देवगणैः प्रहृष्टैः ॥३९॥ इत्या
र्षे श्रीमद्रामायणे युद्धकाण्डे चतुर्नवतितमः सर्गः ॥९४॥ चतुर्द्दशप्रहारः समाप्तः ॥ ९४ तानि नागस
हस्राणि सारोहाणां च वाजिनाम् रथानां चाग्निवर्णानां सध्वजानां सहस्रशः १ राक्षसानां सहस्रा
णि गदापरिघयोधिनाम् काञ्चनध्वजचित्राणां शूराणां कामरूपिणाम् २ निहतानि शरैस्ती
क्ष्णैस्तप्तकाञ्चनभूषणैः रावणेन प्रयुक्तानि रामेणाक्लिष्टकर्मणा ३ दृष्ट्वा श्रुत्वा च संभ्रान्ता ह
तशेषा निशाचराः राक्षस्यश्च समागम्य दीनाश्चिन्तापरिप्लुताः ४ विधवा हतपुत्राश्च क्रोशन्त्यो
हतबान्धवाः राक्षस्यः सह संगम्य दुःखार्ताः पर्यदेवयन् ५ कथं शूर्पणखा वृद्धा कराला निर्णतोद
री आससाद वने रामं कन्दर्पसमरूपिणम् ६ सुकुमारं महासत्त्वं सर्वभूतहिते रतम् तं दृष्ट्वा लोकव
ध्या सा हीनरूपा प्रकामिता ७ कथं सर्वगुणैर्हीना गुणवन्तं महौजसम् सुमुखं दुर्मुखी रामं कामया

।चतुर्विंशति वर्तमानकथा समाप्ता

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०वा०पु० मामराक्षसी ज जनस्यास्यात्यभाग्यत्वात्तु वलिनीभवेतमूर्द्धजा यथ कार्यमपहास्यं च सर्वलोकविगर्हि
२२८ तम् ९ राक्षसानां विनाशाय दूषणस्य खरस्य च चकार प्रतिरूपा सा राघवस्य प्रधर्षणम् १० तन्निमि
त्तमिदं वैरं रावणेन कृतं महत् वधाय सीतानासानीता दशग्रीवेण रक्षसा ११ न च सीतां दशग्रीवः प्राप्नोति
ति जनकात्मजाम् बद्धं वस्वतां वैरमक्षयं राघवेण च १२ वैदेहीं प्रार्थयानं तं विराधं प्रेक्ष्य राक्षसम्
हतमेकेन रामेण पर्याप्तं तन्निदर्शनम् १३ चतुर्दश सहस्राणि रक्षसां भीमकर्मणाम् निहतानि ज
नस्थाने शरैरग्निशिखोपमैः १४ खरश्च निहतः संख्ये त्रिशिरा दूषणस्तथा शरैरादित्यसंकाशैः
पर्याप्तं तन्निदर्शनम् १५ हतो योजनबाहुश्च कबंधो रुधिराशनः क्रोधान्नादेन दन्घोरं पर्याप्तं
तन्निदर्शनम् १६ जघान बलिनं रामः सहस्रनयनात्मजं वालिनं मेघसंकाशं पर्याप्तं तन्निदर्शनम्
१७ ऋष्यमूके वसं शैले दीनो भग्नमनोरथः सुग्रीवः स्थापितो राज्ये पर्याप्तं तन्निदर्शनम् १८ धर्मा
र्थसहितं वाक्यं सर्वेषां रक्षसां हितम् युक्तं विभीषणेनोक्तं मोहात्तस्य न रोचते १९ विभीषणवचः कु
र्याद्यदि स्म धनदानुजः श्मशानभूता दुःखार्ता नैव लंकापुरी भवेत् २० कुंभकर्णं हतं श्रुत्वा राम० २२८

राघवेणमहाबलम् । प्रतिज्ञायेंचदुर्धर्षैर्लक्ष्मणोनहतंतदा २१ प्रियंचेद्रजितंपुत्रंरावणोनैवबुध्यते
प्रा हनूमतालंकादग्धालोमूलवन्हिना २२ हतमक्षकुमारंचदृष्ट्वासौनाववुध्यते २२ ममपुत्रो
ममभ्राताममभर्ताहतोरणे । इत्येषःश्रूयतेशब्दोराक्षसीनांकुलेकुले २३ रथाश्चाश्वाश्चनागा
श्चहताःशतसहस्रशः रणेरामेणशूरेणराक्षसाश्चपदातयः २४ रुद्रोवायदिवाविष्णुर्महें
द्रोवाशतक्रतुः हंतिनोरामरूपेणयदिवास्वयमंतकः २५ हतप्रवीरारामेणनिराशाजीवितेव
यम् । प्रपश्यंतोभयस्यांतमनाथाविलपामहे २६ रामहस्ताद्दशग्रीवःशूरोदत्तमहावरः इदं
भयंमहद्घोरंसमुत्पन्नंनबुध्यते २७ तंनदेवानगंधर्वानपिशाचानराक्षसाः उपसृष्टंपरित्रा
तुंशक्ताराममेणसंयुगे २८ उत्पाताश्चापिदृश्यंतेरावणस्यरणेरणे कथयंतिहिरामेणरावणस्यवि
बर्हणम् २९ पितामहेनप्रीतेनदेवदानवराक्षसैः रावणस्याभयंदत्तंमानुषेभ्योनयाचितम् ३०
तदिदंमानुषंमन्येप्राप्तंनिःसंशयंभयंजीवितांतकरंघोरंरक्षसांरावणस्यच ३१ पीड्यमानास्तुब
लिनावरदानेनरक्षसा दीप्तैस्तपोभिर्विबुधाःपितामहमपूजयन् ३२ देवतानांहितार्थायमहात्मा

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०वा०यु० वैपितामहः उवाचदेवताःसर्वाऽऽदंतुष्टोमहद्वचः ३३ यदाप्रभृतिलोकांस्त्रीन्सर्वे दानवराक्ष
२३९ साः भयेनप्रावृतानित्यंविचरिष्यंतिप्राप्स्यतम् ३४ देवैस्तुसमागम्यसर्वैश्चेंद्रपुरोगमैः वृषध्वज
स्त्रिपुरहामहादेवःप्रसादितः ३५ प्रसन्नस्तुमहादेवोदेवानेतद्वचोब्रवीत् उत्पत्स्यतिहितार्थंवोनारीर
क्षःक्षयावहा ३६ एषादेवैःप्रयुक्तातुक्षुद्यथादानवान्पुरा भक्षयिष्यतिनःसीताराक्षसघ्नीसरा
वणान् ३७ रावणस्यापनीतेनदुर्विनीतस्यदुर्मतेः अयंनिष्ठानकोघोरःशोकेनसमभिप्लुतः ३८
न तेन पश्यामहेल्लोकेयोनःशरणदोभवेत् राघवेणोपसृष्टानांकालेनेवयुगक्षये ३९ नास्तिनः
शरणंकश्चिद्भयेमहतितिष्ठताम् दवाग्निनावेष्टितानांकरेणूनांयथावने ४० प्राप्तकालं
कृतंतेनपौलस्त्येनमहात्मना यतएवभयंदृष्टंतमेवशरणंगतः ४१ इतीवसर्वारजनीचरस्त्रि
यः परस्परम् संपरिरभ्यबाहुभिः विलेपुरार्त्तीभयभारपीडिता विनेदुरुच्चैश्चतदासुदारुणम् ४३
इत्यार्षे श्रीमद्रामायणे युद्धकांडे पंचनवतितमः सर्गः॥ ९५॥ आर्त्तानांराक्षसीनांतुलंकायांवैकुले
कुले रावणःकरुणंशब्दंशुश्रावपरिदेवितम् १ सतुदीर्घंविनिश्वस्यमुहूर्त्तंध्यानमास्थितः बभूव राम० २३९

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

परमक्रुद्धो रावणो भीमदर्शनः २ संदश्य दशनैरोष्ठं क्रोधसंरक्तलोचनः राक्षसैरपि दुर्दर्शः का
लाग्निरिव मूर्छितः ३ उवाच च समीपस्थान् राक्षसान् राक्षसेश्वरः भयाव्यक्तकथस्तत्र निर्दहन्नि
व चक्षुषा ४ महोदरं महापार्श्वं विरूपाक्षं च राक्षसम् शीघ्रं वदत सैन्यानि निर्यातेति ममाज्ञया ५
तस्य तद्वचनं श्रुत्वा राक्षसास्ते भयाकुलाः चोदयामासुरव्यग्रान् राक्षसान् रावणाज्ञया ६ तेतु
सर्वे तथेत्युक्त्वा राक्षसा घोरदर्शनाः कृतस्वस्त्ययनाः सर्वे रणायाभिमुखा ययुः ७ प्रतिपूज्य यथा
न्यायं रावणं ते महारथाः तस्थुः प्राञ्जलयः सर्वे भर्तुर्विजयकाङ्क्षिणः ८ अथोवाच प्रहस्यैतान्
रावणः क्रोधमूर्छितः महोदरमहापार्श्वौ विरूपाक्षं च राक्षसम् ९ अद्य बाणैर्धनुर्मुक्तैर्युगान्तादि
त्यसन्निभैः राघवं लक्ष्मणं चैव नेष्यामि यमसादनम् १० खरस्य कुम्भकर्णस्य प्रहस्तेन्द्रजितोस्तथा करि
ष्यामि प्रतीकारमद्य शत्रुवधादहम् ११ नैवान्तरिक्षं न दिशो न च द्यौर्नापि सागराः प्रकाशत्वं गमिष्यन्ति
मद्बाणजलदावृताः १२ अद्य वानरमुख्यानां तानि यूथानि भागशः धनुषा शरजालेन वधिष्यामि
पत्रिणा १३ अद्य वानरसैन्यानि रथेन पवनौजसा धनुःसमुद्रादुद्भूतैर्मथिष्यामि शरोर्मिभिः १४

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० वा० यु० आक्रोशपद्मवक्त्राणि पद्मकेसरवर्चसाम् अद्यव्यूहतटाकानि गजवत्प्रमथाम्यहं १५ सशरैरद्य वदनैः
२८० संख्ये वानरयूथपाः मंडयिष्यंति वसुधां सनालैरिव पंकजैः १६ अद्य युद्धप्रचंडस्य हरीणां द्रुमयो
धिनाम् मुक्तेनैकेषुणा युद्धे भेत्स्यामि च शतं शतम् १७ हतो भ्राता हतो भर्त्ता यासां च तनया हताः वधेना
द्य रिपोस्तासां करोम्यश्रुप्रमार्जनम् १८ अद्य मद्बाणनिर्भिन्नैः प्रकीर्णैर्गतचेतनैः करोमि वानरैर्युद्धे
यत्नावेक्ष्यतलां महीम् १९ अद्य गोमायवो गृध्राः ये च मांसाशिनोऽपरे सर्वांस्तांस्तर्पयिष्यामि श
त्रुमांसैः शरार्पितैः २० कल्प्यतां मे रथः शीघ्रं क्षिप्रमानीयतां धनुः अनुप्रयांतु मां सर्वे ये च शिष्टा
निशाचराः २१ तस्य तद्वचनं श्रुत्वा महापार्श्वोऽब्रवीद्वचः बलाध्यक्षान् स्थितांस्तत्र बलं संत्वर्यतामि
ति २२ बलाध्यक्षास्तु संरब्धा राक्षसांस्तान् गृहे गृहे चोदयंतः परिययुर्लंकां लघुपराक्रमाः
२३ ततो मुहूर्त्तान्निष्पेतू राक्षसा भीमदर्शनाः नदंतो भीमवदना नानाप्रहरणैर्भुजैः २४ असि
भिः पट्टिशैः शूलैर्गदाभिर्मुसलैर्हलैः शक्तिभिस्तीक्ष्णधाराभिर्महद्भिः कूटमुद्गरैः २५ यष्टि
भिर्विविधैश्चक्रैर्निशितैश्च परश्वधैः भिंडिपालैः शतघ्नीभिरन्यैश्चापि वरायुधैः २६ अथा राम० २८०

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

नपन्चत्वाध्यक्षोश्चत्वारोएवरास्तया द्रुतं सूतसमायुक्तं युक्ताष्टतुरगं रथम् ग्प्रारुरोह तदा भीमो दी
प्यमानः स्वतेजसा २७ ततः प्रयातः सहसा राक्षसैर्बहुभिर्वृतः एवराः सत्वगांभीर्यादारयन्निव मेदि
नीम् २८ एवरोनाभ्यनुज्ञातौ महापार्श्वमहोदरौ विरूपाक्षश्च दुर्द्धर्षो रथानारुरुहुस्तदा २९ ते
तु हृष्टा विनर्द्दंतो भिंदंतमिव मेदिनीम् नादं घोरं विमुंचंतो निर्ययुर्जयकांक्षिणः ३० ततो युद्धा
य तेजस्वी रक्षोगणबलैर्वृतः निर्ययावुद्यतधनुः कालांतकयमोपमः ३१ ततः प्रजविनाश्वेन रथेन
हाबलः हरेरत निर्ययौ तेन यत्रतौ रामलक्ष्मणौ ३२ ततो नष्टप्रभः सूर्यो दिशश्च तिमिरावृताः द्वि
जाश्च विनेदुर्घोरं कंपते च चचाल च मेदिनी ३३ ववर्ष रुधिरं देवश्चस्खलुश्च तुरंगमाः ध्वजाग्रे न्य
पतद्गृध्रो विनेदुश्चाशिवं शिवाः ३४ नयनं चास्फुरद्वामो वामो बाहुरकंपत विवर्णं वदनं चासी
त्किंचिद्भ्रश्यत स्वनः ३५ ततो निष्क्रमतो युद्धे दशग्रीवस्य रक्षसः रणे निधनशंसीनि रूपाणे
तानि जज्ञिरे ३६ ग्पंतरिक्षात्पपातोल्का निर्घातसमनिस्वना विनेदुरशिवा गृध्रा वायसैरभिमिश्रि
ताः ३७ एतानचिंतयन्घोरानुत्पातान्समवस्थितान् निर्ययौ रावणो मोहाद्वधार्थी कालचोदितः ३८

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

भकर्णस्यभुजाद्विकृष्य शूलंशितंकांचनदामजुष्टम् क्षिप्रंसमुत्पत्यनिगृह्यदोर्भ्यांबभंजवेगेनसुतोनि
लस्य ६१ कृतंभारसहस्रेणशूलंकालायसंमहत् बभंजजानुमारोप्यतदाहृष्टःप्लवंगमः ६२ शूलं
भग्नंहनुमताहृष्ट्वासाहरिवाहिनी हृष्टाननादबहुशःसर्वतश्चापिदुद्रुवे ६३ सिंहनादंचतेचक्रुः
प्रहृष्टावनगोचराः मारुतिंपूजयामासुर्दृष्ट्वाशूलंद्विधाकृतम् ६४ सतत्तथाभग्नमवेक्ष्यशूलं ।
चुकोपरक्षोधिपतिर्महात्मा उत्पाट्यलंकामलयात्सशृंगंजघानसुग्रीवमुपेत्यतेन ६५ सशैल
शृंगाभिहतोविसंज्ञःपपातभूमौयुधिवानरेंद्रः तंवीक्ष्यभूमौपतितंविसंज्ञंनेदुःप्रहृष्टायुधियातुधा
नाः ६६ समभ्युपेत्याद्भुतघोरवीर्यंसकुंभकर्णोयुधिवानरेंद्रं जहारसुग्रीवमभिप्रगृह्ययथानि
लोमेघमिवप्रचंडः ६७ सतंमहामेघनिकाशरूपंउत्पाट्यगच्छन्युधिकुंभकर्णः रराजमेरुप्रति
मानरूपोमेरुर्यथात्युच्छ्रितघोरशृंगः ६८ ततःसमादायजगामवीरःसंस्तूयमानोयुधियातुधानैः
शृण्वन्निनादंत्रिदशालयानांप्लवंगराजग्रहविस्मितानाम् ६९ ततःसमादायतदासमेनेहरींद्रमिं
द्रोपममिंद्रवीर्यः अस्मिन्हृतेसर्वमिदंहृतंस्यात्सराघवंसैन्यमितींद्रशत्रुः ७० विद्रुतांवाहिनीं ।।

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०वा०यु० तेषांतु रवघोषेण राक्षसानां महात्मनाम् वानराणामपि चमूर्युद्धायैवाभ्यवर्त्तत ३९ तेषांतु तुमुलं
२४१ युद्धं बभूव कपिरक्षसाम् अन्योन्यमाह्वयानानां क्रुद्धानां जयमिच्छताम् ४० ततः क्रुद्धो दशग्रीवः
शरैः कांचनभूषणैः वानराणामनीकेषु चकार कदनं महत् ४१ निकृत्तशिरसः केचिद्रावणेन व
लीमुखाः केचिद्विछिन्नहृदयाः केचिछ्रोत्रविवर्जिताः ४२ निरुच्छ्वासा हताः केचित केचिद्राव
णपार्श्वे विदारिताः केचिद्विभिन्नशिरसः केचिच्चक्षुर्विनाशिताः ४३ दशाननः क्रोधविवृत्तनेत्रो
यतोयतोभ्यतिरथेन संख्ये ततस्ततस्तस्य शरप्रवेगं सोढुं न शेकुर्हरियूथपास्ते ॥४४॥ इत्यार्षे श्री
मद्रामायणे युद्धकाण्डे षण्णवतितमः सर्गः ॥ ९६ ॥ तथा तैः कृत्तगात्रैस्तु दशग्रीवेण मार्गणैः
बभूव वसुधा तत्र प्रकीर्णा हरिभिस्तदा १ रावणस्याप्रसह्यंतं शरसंपातमेकतः न शेकुः सहितु
दीप्तं पतंगा ज्वलनं यथा २ तेर्दिता निशितैर्बाणैः क्रोशंतो विप्रदुद्रुवुः पावकार्चिःसमाविष्टाद
ह्यमाना यथा गजाः ३ प्लवंगानामनीकानि महाभ्राणीव मारुतः सययौ समरे तस्मिन्विधमन्
रावणः शरैः ४ कदनं तरसा कृत्वा राक्षसेंद्रो वनौकसाम् आससाद ततो युद्धे त्वरितं राघवं रणे ५ राम०
२४१

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

सुग्रीवस्तान्कपीन्द्रांश्च भग्नान्विद्रावितान्रणे गुल्मे सुषेणं निक्षिप्य चक्रे युद्धे द्रुतं मनः ६ आत्म
नः सदृशं वीरः स तं निक्षिप्य वानरः सुग्रीवोभिमुखः शत्रुं प्रतस्थे पादपायुधः ७ पार्श्वतः पृष्ठतः
श्चास्य सर्वे वानरयूथपाः अनुजग्मुर्महाशैलान्विविधांश्च महीरुहान् ८ ननर्द युधि सुग्रीवः
स्वरेण महता महान् पोथयन्विविधांश्चान्यान्ममंथोत्तमराक्षसान् ९ ममर्द च महाकायो राक्ष
सान्वानरेश्वरः युगान्तसमये वायुः प्रवृद्धानगमानिव १० राक्षसानामनीकेषु शैलवर्षं ववर्ष
ह ११ अश्मवर्षं यथा मेघः पक्षिसंघेषु कानने ११ कपिराजविमुक्तैस्तैः शैलवर्षैस्तु राक्षसाः
विकीर्णशिरसः पेतुर्विकीर्णा इव पर्वताः १२ अथैषु क्षीयमाणेषु राक्षसेषु समंततः सुग्री
वेण प्रभग्नेषु नदत्सु च पतत्सु च १३ विरूपाक्षः स्वकं नाम धन्वी विश्राव्य राक्षसः रथादा
प्लुत्य दुर्धर्षो गजस्कंधमुपारुहत् १४ स तं द्विरदमारुह्य विरूपाक्षो महाबलः ननर्द भीमनि
र्ह्रादं वानरानभ्यधावत १५ सुग्रीवे स शरान्घोरान्विससर्ज चमूमुखे स्थापयामास चो
द्विग्नान्राक्षसान्संप्रहर्षयन् १६ सोतिविद्धः शितैर्बाणैः कपीन्द्रस्तेन रक्षसा चुक्रोध च म

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०वा०यु० हाक्रोधोवधेतस्यमनोदध्ये १७ ततःपादपमुध्य सशूरःसंप्रधनेहरिः अभिपत्यजघानास्यप्रमुखेतं
२५२ महागजम् १८ सतुप्रहाराभिहतःसुग्रीवेणमहागजः अपासर्पद्धनुर्मात्रंनिषसादननादच १९
गजात्तुमथितात्तूर्णमपक्रम्यसवीर्यवान् राक्षसोभिमुखःशत्रुंप्रत्युद्गम्यततःकपिम् २० आर्षभंच
सखड्गंचप्रगृह्यलघुविक्रमः भर्त्सयन्निवसुग्रीवमाससाद व्यवस्थितम् २१ सहितस्याभिसंक्रुद्धःप्र
गृह्यविपुलांशिलाम् विरूपाक्षायचिक्षेपसुग्रीवोजलदोपमाम् २२ सतांशिलामापतन्तींदृष्ट्वारा
क्षसपुंगवः अपक्रम्यसुविक्रान्तःखड्गेनप्राहरत्तदा २३ तेनखड्गप्रहारेणरक्षसाबलिनाहतः मु
हूर्तमभवद्वीरोविसंज्ञइववानरः २४ सतदासहसोत्पत्यराक्षसस्यमहाहवे मुष्टिंसंवर्त्यवेगेनपातया
मासवक्षसि २५ मुष्टिप्रहाराभिहतोविरूपाक्षोनिशाचरः तेनखड्गेनसंक्रुद्धःसुग्रीवस्यचमूमुखे
२६ कवचंपातयामासपद्भ्यामभिहतोपतत् ससमुत्थायपतितःकपिस्तस्यव्यसर्जयन् २७ त
लप्रहारमशनेःसमानंभीमनिस्वनम् तलप्रहारंतद्रक्षःसुग्रीवेणसमुद्यतम् २८ नैपुण्यान्मोच
यित्वैनंमुष्टिनोरस्यताडयत् ततःसतुक्रुद्धतरःसुग्रीवोवानरेश्वरः २९ मोक्षितंचात्मनोदृष्ट्वाप्र रा०स०
२५२

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

हारं तेन रक्षसा सदृक्प्रीतिरं तस्य विरूपाक्षस्य वानरः ३० ततोऽन्यत्पातयत्क्रोधाच्छुरदेशे महत्तरम् महे
न्द्राशनिकल्पेन तत्तेनाभिहतः क्षितौ ३१ पपात रुधिरक्लिन्नः शोणितं तु समुद्गिरन् स्रोतोभ्यस्तु विरू
पाक्षो मदैर्गिरिर्यथा ३२ विवर्तमानं क्रोधात्सफेनरुधिराप्लुतम् ददृशुस्ते विरूपाक्षं विरूपा
क्षतरं कृतम् ३३ स्फुरन्तं परिवर्तन्तं पार्श्वेन रुधिरोक्षितम् करुणं च विनर्दन्तं ददृशुः कपयो रिपुम्
३४ तदा तु तौ संयति संप्रयुक्तौ तरस्विनौ वानरराक्षसानाम् बलार्णवौ संस्वनतुः प्रभीमौ महार्णवौ द्वा
विव भिन्नवेलौ ३५ निपातितं प्रेक्ष्य विरूपनेत्रं महाबलं तं हरिपार्थिवेन बलं समस्तं कपिराक्षसाना
मुन्मत्तगङ्गाप्रतिमं बभूव ॥ ३६ ॥ इत्यार्षे श्रीमद्रामायणे लोक युद्धकाण्डे सप्तनवतितमः सर्गः ॥ ९७ ॥ चतु
र्विंशतिर्वर्तमानकथा समाप्ताः ॥ छ ॥ हन्यमाने बले तूर्णमन्योन्यं ते महामृधे सरसीव महाघर्मे सूप
क्षीणे बभूवतुः १ स्वबलस्य तु घातेन विरूपाक्षवधेन च बभूव द्विगुणं क्रुद्धो रावणो राक्षसेश्वरः २
प्रक्षीणं स्वबलं दृष्ट्वा वध्यमानं वलीमुखैः बभूवास्य व्यथा युद्धे दृष्ट्वा दैवविपर्ययम् ३ उवाच च स
मीपस्थं महोदरमरिंदमम् अस्मिन्काले महाबाहो जयाशा त्वयि मे स्थिता ४ जहि शत्रुचमूं वीर

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

 दर्शयाद्यपराक्रमम् भर्तृपिंडस्य कालोयं निर्वेष्टुं साधु युध्यताम् ५ एवमुक्तस्तथेत्युक्त्वा रावणेन महो
 दरः प्रविवेशारिसेनां तां पतंग इव पावकम् ६ ततः स कदनं चक्रे वानराणां महाबलः भर्तृवाक्येन तेज
 जस्वी च स्वेन वीर्येण चोदितः ७ वानराश्च महासत्वाः प्रगृह्य विपुलाः शिलाः प्रविश्यारिबलं भीमं जघ्नुस्ते
रजनीचरान् ८ महोदरस्तु संक्रुद्धः शरैः कांचनभूषणैः चिच्छेद पाणिपादोरून् वानराणां महाहवे
९ ततस्ते वानराः सर्वे राक्षसेनार्दिता भृशम् दिशो दश द्रुताः केचित्केचित्सुग्रीवमाश्रिताः १० प्र
भग्नां समरे दृष्ट्वा वानराणां महाचमूम् अभिदुद्राव सुग्रीवो महोदरमनंतरम् ११ प्रगृह्य विपुलां
घोरां महीधरसमां शिलाम् चिक्षेप च महातेजास्तद्वधाय हरीश्वरः १२ तामापतंतीं सहसा शिलां
दृष्ट्वा महोदरः असंभ्रांतस्ततो बाणैर्बिभेद स दुरासदाम् १३ रक्षसा तेन बाणौघैर्निकृत्ता सा सहस्र
धा निपपात शिला भूमौ गृध्रचक्रमिवाकुलम् १४ तां तु भिन्नां शिलां दृष्ट्वा सुग्रीवः क्रोधमूर्छि
तः सालमुत्पाट्य चिक्षेप रक्षसे रणमूर्धनि १५ नवैश्च विददारैनं शूरः परबलार्दनम् स ददर्श त
तः क्रुद्धः परिघं पतितं भुवि १६ आविध्य तु स तं दीप्तं परिघं तस्य दर्शयन् परिघेणोग्रवेगेन जघाना

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

स्याहयोत्तमान् १७ तस्माद्धतहयाद्वीरःसोवप्लुत्यमहारथात् गदांजग्राहसंक्रुद्धोराक्षसोथमहोदरः १८
गदापरिघहस्तौतौयुधिवीरौसमीयतुः नर्दन्तौगोवृषप्रख्यौघनाविवसविद्युतौ १९ ततःक्रुद्धोगदां
तस्मैचिक्षेपरजनीचरः ज्वलन्तींभास्कराभासांसुग्रीवायमहोदरः २० गदांतांसुमहाघोरामापतन्
तींमहाबलः सुग्रीवोरोषताम्राक्षःसमुद्यम्यमहाहवे २१ आजघानगदांतस्यपरिघेणहरीश्वरः
पपातसगदाभिन्नःपरिघस्तस्यभूतले २२ ततोजग्राहतेजस्वीसुग्रीवोवसुधातलात् आयसंमु
सलंघोरंसर्वतोहेमभूषितम् २३ सतमुद्यम्यचिक्षेपसोप्यन्यांव्याक्षिपद्गदाम् भिन्नावन्योन्यमा
साद्यपेततुस्तौमहीतले २४ ततोभिन्नप्रहरणौमुष्टिभ्यांतौसमीयतुः तेजोबलसमाविष्टौदीप्ता
विवहुताशनौ २५ जघ्नतुस्तौतदान्योन्यंनेदतुश्चपुनःपुनः तलैश्चान्योन्यमासाद्यपेततुस्तौमहीत
ले २६ उत्पेततुस्ततस्तूर्णंजघ्नतुश्चपरस्परम् भुजैश्चिक्षेपतुर्वीरावन्योन्यमपराजितौ २७ ज
ग्मतुस्तौश्रमंवीरौबाहुयुद्धेपरंतपौ २८ जहारचतदाखड्गमदूरपरिवर्तिनम् राक्षसश्चर्मणासा
र्द्धंमहावेगोमहोदरः २९ तथैवचमहाखड्गंचर्मणापतितंसह जग्राहवानरश्रेष्ठःसुग्रीवोवेगव

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०वा०यु० नरः ३० तौ तु रोषपरीताङ्गौ नर्दन्तावभ्यधावताम् उद्यतासी रणे हृष्टौ चर्मखड्गविशारदौ ३१ दक्षि
२८४ णं मण्डलं चोभौ सुतूर्णं संपरीयतुः अन्योन्यमभिसंक्रुद्धौ जये प्रणिहितावुभौ ३२ स तु शूरो महावेगो वीर्य
श्लाघी महोदरः महाचर्मणि तत्खड्गं पातयामास दुर्मतिः ३३ लग्नमुत्कर्षतः खड्गं खड्गेन कपिकुंजरः
जहार सशिरस्त्राणं कुंडलोपगतं शिरः ३४ निकृत्तशिरसस्तस्य पतितस्य महीतले तद्बलं राक्षसेन्द्रस्य
दृष्ट्वा तत्र न तिष्ठते ३५ हत्वा तं वानरैः सार्द्धं ननाद मुदितो हरिः चुक्रोध च दशग्रीवो बभौ हृष्टश्च राघ
वः ३६ विषण्णवदनाः सर्वे राक्षसा दीनचेतसः विद्रवन्ति ततः सर्वे भयवित्रस्तचेतसः ३७ महोदरं ते
विनिपात्य भूमौ महागिरेः शीर्णमिवैकदेशं सूर्यात्मजस्तत्र रराज लक्ष्म्या सूर्यः स्वतेजोभिरिवाप्रधृष्यः
३८ अथ विजयमवाप्य वानरेन्द्रः समरमुखे सुरसिद्धयक्षसंघैः अवनितलगतैश्च भूतसंघैर्हर्षस
माकुलितैर्निरीक्ष्यमाणः ३९ इत्यार्षे श्रीमद्रामायणे युद्धकाण्डे अष्टनवतितमः सर्गः ॥ ९८ ॥ महोदरे रा०म०
तु निहते महापार्श्वो महाबलः सुग्रीवेण समीक्ष्याथ क्रोधसंरक्तलोचनः अङ्गदस्य चमूं भीमां क्षो २८४
भयामास मार्गणैः १ स वानराणां मुख्यानामुत्तमाङ्गानि राक्षसः पातयामास कायेभ्यः फलं वृन्तादिवानिलः २

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

केषांचिदिषुभिर्वाहून्स्कंधांश्चिछेद राक्षसः वानराणां सुसंरब्धः पार्श्वे केषांचिदाक्षिपत् ३ तेर्दिता
वाणवर्षेण महापार्श्वेन वानराः विषादविमुखाः सर्वे बभूवुर्गतचेतसः ४ निशाम्य बलमुद्विग्नमंग
दे राक्षसार्द्दितम् वेगं चक्रे महाबाहुः समुद्र इव पर्वसु ५ आयसं परिघं गृह्य सूर्यरश्मिसमप्रभम्
समरे वानरश्रेष्ठो महापार्श्वे न्यपातयत् ६ स तु तेन प्रहारेण महापार्श्वो विचेतनः ससूतः स्यंदनात्तस्मा
द्विसंज्ञश्चापतद्भुवि ७ स ऋक्षराजस्तेजस्वी नीलांजनचयोपमः निष्पत्य सुमहावीर्यः स्वयूथा
न्मेघसन्निभात् ८ प्रगृह्य गिरिशृंगाभां क्रुद्धः सुविपुलां शिलाम् अश्वाञ्जघान तरसा बभंज
स्यंदनं च तत् ९ मुहूर्त्ताल्लब्धसंज्ञस्तु महापार्श्वो महाबलः अंगदं बहुभिर्बाणैर्भूयस्तं प्रत्यविध्यत
१० जांबवंतं त्रिभिर्बाणैराजघान स्तनांतरे ऋक्षराजं गवाक्षं च जघान बहुभिः शरैः ११ गवाक्षं
जांबवंतं च स दृष्ट्वा शरपीडितौ जग्राह परिघं घोरमंगदः क्रोधमूर्छितः १२ तस्यांगदः प्रकुपितो राक्ष
सस्य तमायसम् दूरस्थितस्य परिघं रविरश्मिसमप्रभम् १३ द्वाभ्यां भुजाभ्यां संगृह्य भ्रामयित्वा च वेग
वान् महापार्श्वाय चिक्षेप वधार्थं वालिनः सुतः १४ स तु क्षिप्तो बलवता परिघस्तस्य रक्षसः धनु

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा० वा० यु० ध्वजस्तत्रारं हत्वाच्छिरस्त्राणमपातयत १५ तं समासाद्य तेजस्वी वालिपुत्रः प्रतापवान् तलेनाभ्यहनत्क्रु
२८५ द्धः कर्णमूले सकुंडले १६ स तु क्रुद्धो महावेगो महापार्श्वो महाद्युतिः करेणैकेन जग्राह सुमहांतं परश्व
धम् १७ तं तैलधौतं विमलं शैलसारमयं दृढम् राक्षसः परमक्रुद्धो वालिपुत्रे न्यपातयत् १८ तेन
वामांसफलके भृशं प्रत्यपातितम् अंगदो मोक्षयामास सरोषः स परश्वधम् १९ स वीरो वज्रसं
काशमंगदो मुष्टिमात्मनः संवर्तयत्सुसं क्रुद्धः पितुस्तुल्यपराक्रमः २० राक्षसस्य स्तनाभ्याशे मर्मज्ञो
हृदयं प्रति इंद्राशनिसमस्पर्शं स मुष्टिं विन्यपातयत् २१ तेन तस्य निपातेन राक्षसस्य महामृधे पप
फाल हृदयं चाशु स पपात हतो भुवि २२ तस्मिन्विनिहते भूमौ तत्सैन्यं संप्रचुक्षुभे अभवच्च महा
क्रोधः समरे रावणस्य तु २३ वानराणां प्रहृष्टानां सिंहनादश्च पुष्कलः स्फोटयन्निव शब्देन लंकां सा
ट्टालगोपुराम् २४ महेंद्रेणेव देवानां नादः समभवन्महान् २५ अथेंद्रशत्रुस्त्रिदशालयानां वनौकसां
तत्र महाप्रणादम् श्रुत्वा सरोषं युधि राक्षसेंद्रः पुनश्च युद्धाभिमुखोवतस्थे ॥२६॥ इत्यार्षे श्रीमद्रामा
यणे युद्धकांडे एकोनशततमः सर्गः ॥ ९९ ॥ महोदरमहापार्श्वौ हतौ दृष्ट्वा तु रावणः तस्मिन्विनिहते वी राम० २८५

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रैविरूपा सेमहाबले १ आविवेशमहाक्रोधोरावणंतुमहामृधे सूतंसंचोदयामासवाक्यंचेदमुवा
चह २ निहतानाममामात्यानां रुद्धस्यनगरस्यच दुःखमेकोपनेष्यामिहत्वातौरामलक्ष्मणौ ३ राम
वृक्षंरणेहन्मि सीतापुष्पफलप्रदम् प्रशाखायस्यसुग्रीवोजांबवान्पनसोनलः ४ मैदश्चद्वि
दश्चैवगंधमादनः हनूमांश्चसुषेणश्चसर्वेचहरियूथपाः ५ सदिशोदशघोषेणरथ
स्याभिरथोमहान् नादयन्प्रययौतूर्णंराघवंचाभ्यवर्तत ६ पूरितातेनशब्देनसनदीगिरिका
नना संचचालमहीसर्वासवराहमृगद्विपा ७ तामसंसुमहाघोरंचकारास्त्रंसुदारुणम् निर्द
दाहकपीन्सर्वान् ते प्रपेतुःसमंततः ८ उत्पपातरजोघोरंतैर्भग्नैःसंप्रधावितैः नहितासहि
तुंशेकुर्ब्रह्मणानिर्मितंस्वयम् ९ तान्यनीकान्यनेकानिरावणस्यशरोत्तमैः दृष्ट्वाभग्नानि
शतशोराघवःपर्यवस्थितः १० ततोराक्षसशार्दूलोविद्राव्यहरिवाहिनीम् सददर्शततोरामं
तिष्ठंतमपराजितम् ११ लक्ष्मणेनसहभ्रात्राविष्णुनावासवंयथा आलिखंतमिवाकाशम
वष्टभ्यमहद्धनुः १२ पद्मपत्रविशालाक्षंदीर्घबाहुमरिंदमम् ततोरामोमहातेजाःसौमि

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०७०वा०यु० दृष्ट्वावानरराजानमितस्ततः कुंभकर्णेनसुग्रीवंगृहीतंचहरीश्वरम् ७१ हनूमांश्चिंतयामासमतिमा
१८४ न्मारुतात्मजः एवंगृहीतेसुग्रीवेकिंकर्तव्यंमयाभवेत् ७२ यद्वैन्याय्यंमयाकर्तुंतत्करिष्यामिसर्वथा
भूत्वापर्वतसंकाशोनाशयिष्यामिराक्षसम् ७३ मयाहतेसंयतिकुंभकर्णेमहाबलेमुष्टिविशीर्णदेहे वि
मोचितेवानरपार्थिवेचभवंतुहृष्टाःप्लवगाःसमग्राः ७४ अथवास्वयमप्येषमोक्षंप्राप्स्यतिपार्थिवः गृ
हीतोप्ययंयदिभवेत्त्रिदशैःसासुरोरगैः ७५ मन्येनतावदात्मानंबुध्यतेवानराधिपः शैलप्रहाराभि
हतःकुंभकर्णेनसंयुगे ७६ अयंमुहूर्तात्सुग्रीवोलब्धसंज्ञोमहाहवे आत्मनोवानराणांचयत्पथ्यंतत्क
स्प रिष्यति ७७ मयातुमोक्षितस्यास्यसुग्रीवस्यमहात्मनः अप्रीतिश्चभवेत्कष्टाकीर्तिनाशश्चशाश्वतः
७८ तस्मान्मुहूर्तंकांक्षिष्येविक्रमंपार्थिवस्यनः भिन्नंचवानरानीकंतावदाश्वासयाम्यहम् ७९
इत्येवंचिंतयित्वातुहनूमान्मारुतात्मजः भूयःसंस्तंभयामासवानराणांमहाचमूम् ८० सकुंभकर्णोथ
विवेशलंकांस्फुरंतमादायमहाहरिंतम् विमानचर्यागृहगोपुरस्थैःपुष्पाग्र्यवर्षैरभिपूज्यमानः ८१
पुष्पाग्र्यवर्षैस्तुसिच्यमानःशनैःशनैःराजवीथ्यांतुशीतत्वात्संज्ञामापमहाहरीश्वरः ८२ एवंगृहीतो राम०
१८४

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०वा०यु० त्रिसहितो वज्री १३ बानरं भ्रवरणो भ्यन्तानापतंतं च रावणम् समीक्ष्य राघवो दृष्ट्वा मध्ये जग्राह का
२४६ र्मुकम् १४ विस्फारयितुमारेभे ततः स धनुरुत्तमम् महावेगं महानादं निर्दहन्निव मेदिनीम् १५ रा
वणस्य च बाणौघैस्तस्य विस्फारितेन च शब्देन राक्षसास्तेन पेतुश्च शतशस्तदा १६ तयोः शरपथं
प्राप्य रावणो राजपुत्रयोः स बभौ च यथा राहुः समीपे शशिसूर्ययोः १७ तमिच्छन् प्रथमं योद्धुं लक्ष्म
णो निशितैः शरैः मुमोच धनुरायम्य शरानग्निशिखोपमान् १८ तान्मुक्तमात्रानाकाशे
लक्ष्मणेन धनुष्मता बाणान्बाणैर्महातेजा रावणः प्रत्यवारयत् १९ एकमेकेन बाणेन त्रि
भिस्त्रीन्दशभिर्दश लक्ष्मणस्य प्रचिच्छेद दर्शयन्पाणिलाघवम् २० पुनस्तु शरवर्षेण लक्ष्म
णस्तस्य वारयत् अभ्यतिक्रम्य सौमित्रिं रावणः समितिंजयः आससाद ततो रामं स्थितं शैलमिव
वाचलम् २१ स संख्ये राममासाद्य क्रोधसंरक्तलोचनः व्यसृजच्छरवर्षाणि रावणो राघवोप
रि २२ शरधारास्ततो रामो रावणस्य धनुश्च्युताम् दृष्ट्वैवापतितां शीघ्रं भल्लं जग्राह सत्वरम् रा०यु० २४६
२३ तां छरौघांस्ततो भल्लैस्तैस्तीक्ष्णैश्चिच्छेद राघवः दीप्यमानान्महावेगान् क्रुद्धानाशीविषोपमान् २४

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

राघवो रावणान्तूर्णं रावणो राघवं तदा अन्योन्यं विविधैस्तीक्ष्णैः शरवर्षैर्ववर्षतुः २५ चेरतुश्च चिरं
चित्रं मण्डलं सव्यदक्षिणाम् बाणवेगपरिक्षिप्तावन्योन्यमपराजितौ २६ तयोर्भूतानि वित्रेसुर्युगपत्संप्र
युध्यतोः रौद्रयोः सायकमुचोर्यमान्तकनिकाशयोः २७ सन्ततं विविधैर्बाणैर्बभूव गगनं तदा घनै
रिवातपापाये विद्युन्मालासमाकुलम् २८ गवाक्षितमिवाकाशं बभूव शरवृष्टिभिः महावेगैः
सुतीक्ष्णाग्रैर्गृध्रपत्रैः सुवाजितैः २९ शरान्धकारं तौ भीमं चक्रतुः परमं तदा गतेऽस्तं तपने चा
पि महामेघाविवोत्थितौ ३० बभूव तु महद्युद्धमन्योन्यवधकाङ्क्षिणोः अनासाद्यमचिन्त्यं च
वृत्रवासवयोरिव ३१ उभौ हि परमेष्वासावुभौ युद्धविशारदौ उभावस्त्रविदां मुख्यावुभौ युद्धे
विचेरतुः ३२ उभौ हि येन व्रजतस्तेन तेन शरोर्मयः ऊर्मयो वायुना विद्धा जग्मुः सागरयोरिव
३३ ततः संसक्तहस्तस्तु रावणो लोकरावणः नाराचमालां रामस्य ललाटे प्रत्यमुञ्चत ३४ रौद्रचा
पप्रयुक्तां तां नीलोत्पलदलप्रभाम् शिरसा धारयन्रामो न व्यथां प्रत्यपद्यत ३५ अथ मन्त्रान
पि जपन्रौद्रमस्त्रमुदीरयन् शरान्भूयः समादाय रामः क्रोधसमन्वितः ३६ मुमोच च महा

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०वा०यु० तेजसाग्न्युपमान्वीर्यवान् तान् शरान् राक्षसेंद्राय चिक्षेपाच्छिन्नसायकः ३७ ते महामेघसंका
२४ शा कवचे पतिताः शराः अवध्ये राक्षसेंद्रस्य न व्यथां जनयंस्तदा ३८ ते भित्त्वा बाणरूपाणि पं
चशीर्षा इवोरगाः श्वसंतो विविशुर्भूमिं रावणप्रतिकूलिताः ३९ पुनरेवाथ तं रामो रथस्थं रा
क्षसाधिपम् लक्षादेपरमायत्तो [illegible] दिव्यास्त्रकुशलोभिनत् ४० निहतं राघवस्या
स्त्रं रावणः क्रोधमूर्छितः आसुरं सुमहाघोरमस्त्रं प्रादुश्चकार ह ४१ सिंहव्याघ्रमुखांश्चैव कं
क काकमुखानपि गृध्रश्येनमुखांश्चापि सृगालवदनांस्तथा ४२ ईहामृगमुखांश्चापि
व्यादितास्यान्भयावहान् पंचास्यान्लेलिहास्यांश्च ससर्ज निशितान्शरान् शरं प्रतिमहाते
जाः क्रुद्धः सर्प इव श्वसन् ४३ आसुरेण समाविष्टः सोस्त्रेण रघुनंदनः ससर्जास्त्रं महो
त्साहं पावकं पावकप्रभः ४४ अग्निदीप्तमुखान्बाणान् तत्र सूर्यमुखानपि चंद्रार्द्धचं
द्रवक्त्रांश्च धूमकेतुमुखानपि ४५ ग्रहनक्षत्रवर्णांश्च महोल्कामुखसंस्थितान् वि
द्युज्जिह्वोपमांश्चापि ससर्ज विविधान्शरान् ४६ ते रावणशरा घोरा राघवास्त्रसमाहताः रा०म० २४

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

विस्मयं जग्मुराकाशे जग्मुश्चैव महर्षयः ४७ तदस्त्रं निहतं दृष्ट्वा रामेणाक्लिष्टकर्मणा दृष्ट्वा नेदु
स्ततः सर्वे कपयः कामरूपिणः सुग्रीवप्रमुखा वीराः परिवार्य तु राघवम् ४८ ततस्तदस्त्रं विनि
हत्य राघवः प्रसह्य तद्रावणबाहुनिस्सृतम् मुदान्वितो दाशरथिर्महात्मा विनेदुरुच्चैर्मुदिताः
कपीश्वराः ॥४९॥ इत्यार्षे श्रीमद्रामायणे युद्धकाण्डे शततमः सर्गः ॥१००॥ तदस्त्रं निहतं दृ
ष्ट्वा रावणो राक्षसाधिपः क्रोधं च द्विगुणं चक्रे क्रोधाच्चास्त्रमनन्तरम् १ मयेन विहितं रौ
द्रमन्यदस्त्रं महाद्युतिः उत्स्रष्टुं रावणो भीमं राघवाय प्रचक्रमे २ ततः शूलानि निश्चेरु
र्गदाश्च मुसलानि च कार्मुकाद्दीप्यमानानि वज्रसाराणि सर्वशः ३ मुद्गराः कूटपाशाश्च
दीप्ताश्चाशनयस्तथा निष्पेतुर्विविधास्तीक्ष्णा वाता इव युगक्षये ४ तदस्त्रं राघवः श्री
मान् क्रमादस्त्रविदां वरः जघान परमास्त्रेण गान्धर्वेण महाद्युतिः ५ तस्मिन्प्रतिहतेऽस्त्रे
तु राघवेण महात्मना रावणः क्रोधताम्राक्षः सौरमस्त्रमुदीरयत् ६ ततश्चक्राणि निष्पे
तुर्भास्वराणि महान्ति च कार्मुकाद्भीमवेगस्य दशग्रीवस्य धीमतः ७ तैरासीद्गगनं दीप्तं संपत

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

 द्भिः समंततः पतद्भिश्च दिशो दीप्तैश्चंद्रसूर्यमहैरिव ८ तानि चिच्छेद बाणौघैश्चकार च तु स
२५८ राघवः श्वायुधानि च चित्राणि रावणस्य च मुमुचे ९ तदस्त्रं तु हतं दृष्ट्वा रावणो राक्षसाधिपः वि
व्याध दशभिर्वीरो रामं सर्वेषु मर्मसु १० स विद्धो दशभिर्वीरो महाकार्मुकनिःसृतैः रावणेन
महातेजा न प्राकंपत राघवः ११ ततो विव्याध गात्रेषु सर्वेषु समितिंजयः राघवस्तु सुसंक्रुद्धो
रावणं बहुभिः शरैः १२ एतस्मिन्नंतरे क्रुद्धो राघवस्यानुजो बली लक्ष्मणः सायकान्सप्त ज।
ग्राह परवीरहा १३ तैः सायकैर्महावेगै रावणस्य महाद्युतिः ध्वजं मनुष्यशीर्षं तु तस्य चिच्छेद
नैकधा १४ सारथेश्चापि बाणेन शिरो ज्वलितकुंडलम् जहार लक्ष्मणः श्रीमान्नैरृतस्य
महाबलः १५ तस्य बाणैश्च चिच्छेद धनुर्गजकरोपमम् लक्ष्मणो राक्षसेंद्रस्य पंचभिर्निशि
तैः शरैः १६ नीलमेघनिभांश्चास्य सद[illegible]न्पर्वतोपमान् जघानाप्लुत्य गदया रावणस्य
विभीषणः १७ हताश्वात्तु तदा वेगादवप्लुत्य महारथात् कोपमाहारयत्तीव्रं भ्रातरं प्रति राव
णः १८ ततः शक्तिं महाशक्तिः प्रदीप्तामशनीमिव विभीषणाय चिक्षेप राक्षसेंद्रः प्रतापवान् १९

श्वा

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

शश्रामेव ततो बाणैस्त्रिभिश्चिच्छेद लक्ष्मणः अघोषोदतिष्ठत्संनादो वानराणां तदा रणे २० साप
पात त्रिधा छिन्ना शक्तिः कांचनमालिनी सविस्फुलिंगा ज्वलिता महोल्केव दिवश्च्युता २१ त
तः संभाविततरां कालेनापि दुरासदाम् जग्राह विपुलां शक्तिं दीप्यमानां स्वतेजसा २२ सा वेगि
ता वत्नवता रावणेन दुरासदा जज्वाल ससु महातेजा शक्राशनिसमप्रभा २३ एतस्मिन्नंतरे वीरो
लक्ष्मणस्तं विभीषणम् प्राणसंशयमापन्नं तूर्णमभ्यवपद्यत २४ तं विमोक्षयितुं वीरश्चा
पमायम्य लक्ष्मणः रावणं शक्तिहस्तं वै शरवर्षैरवाकिरत् २५ कीर्यमाणः शरौघेण वि
सृष्टेन महात्मना न प्रहर्तुं मनश्चक्रे विमुखीकृतविक्रमः २६ मोक्षितं भ्रातरं दृष्ट्वा लक्ष्म
णेन स रावणः लक्ष्मणाभिमुखस्तिष्ठन्निदं वचनमब्रवीत् २७ मोक्षितस्ते बलश्लाघि
न्यस्मादेवं विभीषणः विमुच्य राक्षसं शक्तिस्त्वयीयं विनिपात्यते २८ एषा ते हृदयं भित्त्वा श
क्तिर्लोहितलक्षणा मद्बाहुपरिघोत्सृष्टा प्राणानादाय यास्यति २९ इत्येवमुक्त्वा तां शक्ति
मष्टघंटां महास्वनाम् मयेन मायाविहितां ममोघां शत्रुघातिनीम् ३० लक्ष्मणाय स

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०वा०यु०मुद्दिश्य प्रज्वलन्तीमिव तेजसा रावणः परमक्रुद्धश्चिक्षेप च ननाद च ३१ सा क्षिप्ता भीमवेगेन वज्राशनि
२८९ समस्वना शक्तिरभ्यपतद्वेगाल्लक्ष्मणं रणमूर्द्धनि ३२ तामनुव्याहरच्छक्तिमापतन्तीं स राघवः स्वस्त्य
स्तु लक्ष्मणायेति मोघा भव हतोद्यमा ३३ रावणेन रणे शक्तिः क्रुद्धेनाशीविषोपमा मुक्ता शूरस्याभी
तस्य लक्ष्मणस्य ममज्ज सा ३४ न्यपतत्सा महावेगा लक्ष्मणस्य महोरसि जिह्वेवोरगराजस्य दीप्य
माना महाद्युतिः ३५ ततो रावणवेगेन सुदूरमवगाढया शक्त्या विभिन्नहृदयः पपात भुवि लक्ष्म
णः ३६ तदवस्थं समीपस्थो लक्ष्मणं प्रेक्ष्य राघवः भ्रातृस्नेहान्महातेजा विषण्णहृदयोऽभवत् ३७
समुहूर्तमिव ध्यात्वा बाष्पव्याकुललोचनः बभूव संरब्धतरो युगान्त इव पावकः ३८ न विषादस्य का
लोयमिति संचिन्त्य राघवः चक्रे सुतुमुलं युद्धं रावणस्य वधे धृतः सर्वयत्नेन महता लक्ष्मणं परवीरहा ३९
सदद्दर्श ततो रामः शक्त्या भिन्नं महाहवे लक्ष्मणं रुधिरादिग्धं सपन्नगमिवाचलम् ४० तामपि प्रहि
तां शक्तिं रावणेन बलीयसा यतन्तस्ते हरिश्रेष्ठा न शेकुरवमर्दितुम् ४१ अर्दिताश्चैव बाणौघैः क्षिप्र
हस्तेन रक्षसा सौमित्रिं सा विनिर्भिद्य प्रविष्टा धरणीतलम् ४२ तां कराभ्यां परामृश्य रामः शक्तिं भ राम० २८९

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

पावकम् वभञ्जसमरे क्रुद्धो वलवान्विचकर्ष ह ४३ तस्य निष्कर्षतः शक्तिं रावणेन वलीयसा प्राणाः सर्वे
स्तु गात्रेषु पातितास्मर्म भेदिनः ४४ अ चिंतयित्वा तान्वाणान्समाश्लिष्य च लक्ष्मणम् अब्रवीच्च हनू
मंतं सुग्रीवं तं च राघवः ४५ लक्ष्मणं परिवार्यैव तिष्ठध्वं वानरोत्तमाः पराक्रमस्य कालोयं संप्राप्तो मे
चिरेप्सितः ४६ पापात्मायं दशग्रीवो वध्यतां पापनिश्चयः कांक्षितं चातकस्येव घर्मांते मेघदर्श
नम् ४७ अस्मिन्मुहूर्ते न चिरात्सत्यं प्रतिशृणोमि वः अरावणमरामं वा जगद्द्रक्ष्यथ वानराः ४८
राज्यनाशं वने वासं दंडके परिधावनम् वैदेह्याश्च परामर्षं रक्षोभिश्च समागमम् ४९ प्राप्तं दुःखं
महद्घोरं क्लेशश्च निरयोपमः अद्य सर्वमहं त्यक्ष्ये निहत्वा रावणं रणे ५० यदर्थं वानरानीकं समा
नीतमिदं मया सुग्रीवश्च कृतो राज्ये निहत्वा वालिनं रणे ५१ यदर्थं सागरः क्रांतः सेतुर्वद्धश्च साग ग
रे सोयमद्य रणे पापश्चक्षुर्विषयमागतः ५२ चक्षुर्विषयमागम्य नायं जीवितुमर्हति दृष्टिं दृष्टिवि
षस्येव सर्पस्य मम रावणः ५३ सुखं पश्यत दुर्धर्षा युद्धं वानरपुंगवाः आसीनाः पर्वताग्रेषु ममेदं रावण
स्य च ५४ अद्य पश्यंतु रामस्य रामत्वं मम संयुगे त्रयो लोकाः सगंधर्वाः सिद्धाः सर्षिजंगमाः ५५ अ

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०वा०यु० द्य कर्म करिष्यामि यच्छ्रोकाः सचराचराः सदेवाः कथयिष्यन्ति यावद्भूमिर्धरिष्यति ५६ एवमुक्त्वा
२५० शितैर्बाणैस्तप्तकाञ्चनभूषणैः अभ्यधावत्ततो रामो दशग्रीवं समाहितः ५७ तथा प्रविद्धैर्नाराचै
र्मुसलैश्चापि रावणः अभ्यवर्षत्तदा रामं धाराभिरिव तोयदः ५८ रामरावणमुक्तानामन्योन्यमभि
निघ्नताम् शराणां च शराणां च बभूव तुमुलस्वनः ५९ विच्छिन्नाश्च विकीर्णाश्च रामरावणयोः
शराः अन्तरिक्षात्प्रदीप्ताग्रा निपेतुर्धरणीतले ६० तयोर्ज्यातलनिर्घोषो रामरावणयोर्महान्
त्रासयन्सर्वभूतानां बभूवाद्भुतदर्शनः ६१ विकीर्यमाणः शरजालवृष्टिभिर्महात्मना दीप्तध
नुष्मतार्दितः भयात्प्रदुद्राव समेत्य रावणो यथानिलेनाभिहतो बलाहकः ॥६२॥ हरिः ॐ इतिश्री
दिसार्षे श्रीमद्रामायणे वाल्मीकीये युद्धकाण्डे एकसप्ततितमः सर्गः ॥१०१॥ शक्त्या विनिहतं दृष्ट्वा
रावणेन बलीयसा लक्ष्मणं समरे शूरं शोणितौघपरिप्लुतम् १ स दत्त्वा तुमुलं युद्धं रावणस्य दुरात्म
नः विसृजन्नेव बाणौघान् सुषेणमिदमब्रवीत् २ एष रावणवीर्येण लक्ष्मणः पतितः क्षितौ
सर्पवच्चेष्टते भूमौ मम शोकमुदीरयन् ३ शोणितार्द्रमिमं वीरं प्राणैरिष्टतरं मम पश्यतो मम का रा०म० २५०

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

शक्तिपर्यस्तपर्याकुलात्मनः ४ अयं स समरश्लाघी भ्राता मे शुभलक्षणः यदि पंचत्वमापन्नः प्रा
णैर्मे किं सुखेन वा ५ लज्जतीव हि मे वीर्यं भ्रश्यतीव कराद्धनुः सायका व्यवसीदंति दृष्टिर्बाष्पव
शंगता ६ अवसीदंति गात्राणि स्वप्नयाने नृणामिव चिंता मे वर्द्धते तीव्रा मुमूर्षा चोपजायते ७ भ्रा
तरं निहतं दृष्ट्वा रावणेन दुरात्मना निष्टनंतं तु दुःखार्तं मर्मण्यभिहतं भृशम् परं विषादमापन्नो वि
ललापाकुलेंद्रियः ८ भ्रातरं निहतं दृष्ट्वा लक्ष्मणं रणपांसुषु विजयोपि हि मे शूर न प्रियायोप
कल्पते ९ अचक्षुर्विषयश्चंद्रः कां प्रीतिं जनयिष्यति किं मे युद्धेन किं प्राणैर्युद्धे कार्यं न विद्यते
१० यत्रायं निहतः शेते रणमूर्द्धनि लक्ष्मणः ११ यथैव मां वने यांतमनुयाति महाद्युतिः अहम
प्यनुयास्यामि तथैवैनं यमक्षयम् १२ इष्टबंधुजनो नित्यं मां स नित्यमनुव्रतः इमाम पश्यामि
यत्र भ्राता सहोदरः १४ किं न्वु राज्येन दुर्धर्ष लक्ष्मणेन विना मम कथं वक्ष्याम्यहं त्वंबां सुमित्रां पुत्र
वत्सलाम् १५ उपालंभं न शक्ष्यामि सोढुं दत्तं सुमित्रया किं नु वक्ष्यामि कौशल्यां मातरं किं नु
कैकयीम् भरतं किं नु वक्ष्यामि शत्रुघ्नं च महाबलम् १६ सह तेन वनं यातो विना तेनागतः कथम्

स्थां गमितो राक्षसैः कूटयोधिभिः ९३ देशे देशे कलत्राणि देशे देशे च बांधवाः तं तु देशं न ४

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

ततः ससंज्ञामुपलभ्य कृच्छ्राद्द्वितीयसत्त्वस्य मुजोत्तरस्य । अवेक्षमाणः पुरराजमार्गं विचिन्तयामास मुहुर्महात्मा ८३ एवं
गृहीतेन कपिनानुत्तमेन शक्यं मया संप्रतिकर्तुमद्य । तथा करिष्यामि यथा हरीणां भविष्यतीष्टं च हितं च कार्यम् ८४
ततः कराग्रैः सहसा समेत्य राजा हरीणाममरेन्द्रशत्रुम् । नखैश्च कर्णौ दशनैश्च नासां ददंश पादैर्विददार पार्श्वे
२ ८५ स कुम्भकर्णो हृतकर्णनासो विदारितस्तेन दन्तैर्नखैश्च । रोषाभिभूतः क्षतजार्द्रगात्रः सुग्रीवमाविध्य
पिपेष भूमौ ८६ स भूतले भीमबलेन पिष्टः सुरारिभिस्तैरभिहन्यमानः । जगाम खं कन्दुकवज्जवेन पु
नश्च रामेण समाजगाम ८७ कर्णनासाविहीनस्तु कुम्भकर्णो महाबलः । रराज शोणितोद्गारी गिरिः प्र
स्रवणैरिव ८८ शोणितार्द्रो महाकायो राक्षसो भीमदर्शनः । युद्धायाभिमुखो भूयो मनश्चक्रे महा
बलः ८९ अमर्षाच्छोणितोद्गारी शुशुभे रावणानुजः । नीलाञ्जनगिरिप्रख्यः ससन्ध्य इव तोयदः
९० गते च तस्मिन्सुरराजशत्रुः क्रोधात्प्रदुद्राव रणाय भूयः । अनायुधोऽस्मीति विचिन्त्य रौद्रो घोरं
तदा मुद्गरमाससाद ९१ ततः स पुर्याः सहसा महात्मा निष्क्रम्य तद्वानरसैन्यमुग्रम् । तेनैव रूपेण
बभञ्ज रुद्धः प्रहारमुष्ट्या च पदेन सद्यः ९२ बभक्ष रक्षो युधि कुम्भकर्णः प्रजायुगान्ताग्निरिव प्रदीप्तः
बुभुक्षितः शोणितमांसगृध्नुः प्रविश्य तद्वानरसैन्यमुग्रम् ९३ चखाद रक्षांसि हरीनपि शाचान्ऋ

रा०वा०यु० इहैव मरणं श्रेयो न तु बंधुविगर्हणम् किं मया दुष्कृतं कर्म कृतमन्यत्र जन्मनि येन मे धार्मिको भ्राता
२५१ निहतश्चाग्रतः स्थितः १८ हा भ्रातर्मनुजश्रेष्ठ शूराणां प्रवर प्रभो एकाकी किन्नु मां त्यक्त्वा परलो
काय गच्छसि १९ विलपंतं च मां भ्रातः किमर्थं नावभाषसे उत्तिष्ठ पश्य किं शेषे दीनं मां पश्य चक्षु
षा २० शोकार्तस्य प्रमत्तस्य पर्वतेषु वनेषु च विषण्णस्य महाबाहो समाश्वासयिता मम २१ एवं वि
लपंतं तं शोकव्याकुलितेंद्रियम् समाश्वासयन्वीरः सुषेणो वाक्यमब्रवीत् २२ त्यजेमां नरव्या
घ्र बुद्धिं वैक्लव्यकारिणीम् नैव पंचत्वमापन्नो लक्ष्मणो लक्ष्मिवर्धनः २३ न ह्यस्य विकृतं
वक्त्रं नापि श्यामं न निष्प्रभम् सुप्रभं च प्रसन्नं च मुखमस्य हि लक्ष्यते २४ पद्मपत्रतलौ हस्तौ सुप्र
सन्ने च लोचने नेदृशं दृश्यते रूपं गतासूनां विशांपते २५ विषादं मा कृथा वीर सप्राणोयमरिंदम
आख्याति तु प्रसुप्तस्य स्रस्तगात्रस्य भूतले सोच्छ्वासं हृदयं वीर कंपमानं मुहुर्मुहुः २६ एवमुक्त्वा महा
प्राज्ञः सुषेणो राघवं वचः समीपस्थमुवाचेदं हनूमंतं महाकपिम् २७ सौम्य शीघ्रमितो गत्वा पर्वतं हि
महोदयम् पूर्वं तु कथितो योसौ वीर जांबवता तव २८ दक्षिणे शिखरे जातां महौषधीं संजीवकर्णीं वि राम० २५१

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

२ न सबुद्धिः समुत्पन्ना मारुतेरमितौजसः इदमेव गमिष्यामि गृहीत्वा शिखरं गिरेः ३२

धि मिहानय विशल्यकरणीं नाम्ना सावर्ण्यकरणीं तथा २९ संजीवकरणीं वीर संधानीं च महौषधीम्
सं जीवनार्थं वीरस्य लक्ष्मणस्य त्वमानय ३० इत्येवमुक्तो हनुमान्गत्वा चौषधिपर्वतम् चिंता
मवाप्याम चक्रे श्रीमान्नजानंस्ता महौषधीः ३१ स्यामि त्तु शिखरे जातामौषधीं तां हरवा वहाम् प्रत
वैशल्यकरणीं गच्छामि सुषेणो ह्येवमब्रवीत् ३३ अगृह्य यदि गच्छामि विशल्यकरणीमहम् कालात्यये
न दोषः स्याद्वैक्लव्यं च महद्भवेत् ३३ इति संचिंत्य हनुमान्गत्वा क्षिप्रं महाबलम् आसाद्य पर्वतश्रेष्ठं
त्रिः प्रकंप्य गिरेस्तटम् ३४ फुल्लनानातरुगणं समुत्पाट्य महाबलः गृहीत्वा हरिशार्दूलो हस्ता
भ्यां समतोलयत् ३५ सनीलमिव जीमूतं तोयपूर्णं नभस्तलात् उत्पपात गृहीत्वा तु हनूमाञ्छिख
रं गिरेः ३६ समागम्य महावेगः सन्यस्य शिखरं गिरेः विश्रम्य किंचिद्धनुमान्सुषेणमिदमब्रवीत्
३७ औषधीर्नावगच्छामि ता अहं हरिपुंगव तदिदं शिखरं कृत्स्नं गिरेस्तस्याहृतं मया ३८ एवं कथ
यमानं तु प्रशस्य पवनात्मजम् सुषेणो वानरश्रेष्ठो जग्राहोत्पाट्य चौषधीः ३९ विस्मितास्तु बभू
वुस्ते सर्ववानरयूथपाः दृष्ट्वा तु हनुमत्कर्म सुरैरपि सुदुष्करम् ४० ततः संक्षोदयित्वा तामो

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

१०वा०यु० षधिं वानरसत्तमः लक्ष्मणस्य ददौ नस्तः सुषेणः सुमहाद्युतिः ४२ सशल्यः समाघ्राय लक्ष्मणः
२५२ परवीरहा विशल्यो विरुजः शीघ्रमुदतिष्ठन्महीतलात् ४३ तमुत्थितं तु हरयो भूतलात्प्रेक्ष्य
लक्ष्मणम् साधु साध्वीति सुप्रीता लक्ष्मणं प्रत्यपूजयन् ४४ एह्येहीत्यब्रवीद्रामो लक्ष्मणं
परवीरहा सस्वजे गाढमालिंग्य बाष्पपर्याकुलेक्षणः ४५ अब्रवीच्च परिष्वज्य सौमित्रिं राघवस्त
दा दिष्ट्या त्वां वीर पश्यामि मरणात्पुनरागतम् ४६ नहि मे जीवितेनार्थः सीतया च जयेन वा को
हि मे जीवितेनार्थस्त्वयि पंचत्वमागते ४७ इत्येवं ब्रुवतस्तस्य राघवस्य महात्मनः खिन्नः शिथिलया
वाचा लक्ष्मणो वाक्यमब्रवीत् ४८ तां प्रतिज्ञां प्रतिज्ञाय पुरा सत्यपराक्रमः लघुः कश्चिदिवासत्वो
नैवं त्वं वक्तुमर्हसि ४९ नहि प्रतिज्ञां कुर्वन्ति वितथां सत्यवादिनः लक्षणं हि महत्वस्य प्रतिज्ञाप
रिपालनम् ५० नैराश्यमुपगंतुं च नालं ते मत्कृतेन घ वधेन रावणस्याद्य प्रतिज्ञामनुपालय
५१ न जीवन्यास्यते शत्रुस्तव बाणपथं गतः नर्दतस्तीक्ष्णदंष्ट्रस्य सिंहस्येव महागजः ५२ अ
हं तु वधमिच्छामि शीघ्रमस्य दुरात्मनः यावदस्तं न यात्येष कृतकर्मा दिवाकरः ५३ यदि वधमिच्छ रा०म० २५२

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

सिणवणाम्पसंरब्धेयदिच कृतंतत्स्त्वेच्छसिप्रतिसाम् यदितवराजसुताभिलाषमार्य कुरुचवचोमम
प्रशिघ्रमद्यवीर ५४ इत्यार्षे श्रीमद्रामायणे युद्धकांडे द्व्यधिकशततमः सर्गः ॥ १०२ ॥ लक्ष्मणे
नतुतद्वाक्यमुक्तंश्रुत्वासराघवः संदधेपरवीरघ्नोधनुरादायवीर्यवान् रावणायशरान्घोरान्
विससर्जचमूमुखे १ अथान्यंरथमारुह्यरावणोराक्षसाधिपः अभ्यधावतकाकुत्स्थंस्वर्भानुरिव
भास्करम् २ दशग्रीवोरथस्थस्तुरामंवज्रोपमैःशरैः आजघानमहाशैलंधाराभिरिवतोयदः ३
दीप्तपावकसंकाशैःशरैःकांचनभूषणैः निर्बिभेदरणेरामोदशग्रीवंसमाहितः ४ भूमिस्थितस्य
रामस्यरथस्थस्यचरक्षसः नसमंयुद्धमित्याहुर्देवगांधर्वदानवाः ५ ततोदेववरःश्रीमान्श्रुत्वातेषां
वचोमृतम् आहूयमातलिंशक्रोवचनंचेदमब्रवीत् ६ रथेनममभूमिष्ठंशीघ्रंयाहिरघूत्तमम
आहूयभूतलंयातःकुरुदेवहितंमहत् ७ इत्युक्तोदेवराज्ञेनमातलिर्देवसारथिः प्रणम्यशिरसादेवं
ततोवचनमब्रवीत् ८ शीघ्रंयास्यामिदेवेंद्रसारथ्यंचकरोम्यहम् ततोहयैश्चसंयोज्यहरितैःस्यंदनो
त्तमम् ततःकांचनचित्रांगःकिंकिणीशतभूषितः १० तरुणादित्यसंकाशोवैडूर्यमयकूबरः

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

मू

रा०वा०यु० मदश्वैः कांचनापीडैर्युक्तः श्वेतप्रकीर्णकैः ११ हरिभिः सूर्यसंकाशैर्हेमजालविभूषितैः रुक्मवेणु
२५३ ध्वजः श्रीमान्देवराजरथो वरः १२ देवराजेन संदिष्टो रथमारुह्य मातलिः अभ्यवर्त्तत काकुत्स्थमव
तीर्य त्रिविष्टपात् १३ अब्रवीच्च तदा रामं सप्रतोदो रथे स्थितः प्रांजलिर्मातलिर्वाक्यं सहस्राक्षस्य सार
थिः १४ सहस्राक्षेण काकुत्स्थ रथोयं विजयाय ते दत्तस्तव महासत्व श्रीमन् शत्रुनिवर्हण १५
इदमैंद्रं महच्चापं कवचं चाग्निसंनिभम् शराश्चादित्यसंकाशाः शक्तिश्च विमला शिता १६ आ
रुह्येमं रथं वीर राक्षसं जहि रावणम् मया सारथिना राम महेंद्र इव दानवान् १७ इत्युक्तः संपरिक्र
म्य रथं तमभिवाद्य च आरुरोह तदा रामो लोकांल्लक्ष्म्या विराजयन् १८ तद्बभूवाद्भुतं युद्धं द्वैरथं रोम
हर्षणम् रामस्य च महाबाहो रावणस्य च रक्षसः १९ गांधर्वेण च गांधर्वं दैवं दैवेन राघवः अस्त्रं रा
क्षसराजस्य जघान परमास्त्रवित् २० अस्त्रं तु परमं घोरं राक्षसं राक्षसाधिपः ससर्ज परमक्रुद्धः पुन
रेव निशाचरः २१ ते रावणधनुर्मुक्ताः शराः कांचनभूषणाः अभ्यवर्तंत काकुत्स्थं सर्पा भूत्वा महा
विषाः २२ ते दीप्तवदना दीप्तं वमंतो ज्वलनं मुखैः राममेवाभ्यवर्तंत व्यादितास्या भयावहाः २३ ते राम० २५३

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

वासुकिसमस्पर्शैर्दीप्तभोगैर्महाविषैः दिशश्च संतताः सर्वाः प्रदिशश्च समावृताः २४ तान्दृष्ट्वा पन्न
गान् रामः समापतत पततस्त्राहवे ग्रस्त्रं पाशुपतं घोरं शरदुश्चक्रे भयावहम् २५ तेन राघवधनुर्मुक्ताः
रुक्मपुंखाः शिखिप्रभाः सुपर्णाः कांचनाभूत्वा विचेरुः सर्पशत्रवः २६ ते तान्सर्वान्छरान्जघ्नुः
सर्परूपान्महाजवान् सुपर्णरूपा रामस्य विशिखाः कामरूपिणः २७ ग्रस्त्रे प्रतिहते क्रुद्धो रावणो
राक्षसाधिपः ग्रभ्यवर्षत्तदा रामं घोराभिः शरवृष्टिभिः २८ ततः शरसहस्रेण राममक्लिष्टकारिणम्
ग्रर्दयित्वा शरौघेण मातलिं प्रत्यविध्यत २९ चिच्छेद केतुमिंद्रस्य शरेणैकेन रावणः पातयित्वा रथो
पस्थे रथात्केतुं च कांचनम् ३० ऐंद्रानभिजघानाश्वान् शरजालेन रावणः विषेदुर्देवगंधर्वाः
दानवाश्चारणैः सह ३१ राममार्तं तु तं दृष्ट्वा सिद्धाश्च परमर्षयः व्यथिता वानरेंद्रश्च बभूवुः सविभी
षणाः ३२ रामचंद्रमसं दृष्ट्वा ग्रस्तं रावणराहुणा प्राजापत्यं च नक्षत्रं रोहिणीं शशिनः प्रियाम्
समाक्रम्य बुधस्तस्थौ प्रजानाम् अशुभावहः ३३ सधूमपरिवृत्तोर्मिः प्रज्वलन्निव सागरः उत्पपा
त तदा क्रुद्धः स्पृशन्निव दिवाकरम् ३४ शस्त्रवर्णः सुपरुषो मंदरश्मिर्दिवाकरः ग्रदृश्यत कबंधांकः

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०यो०यु० संसक्तो धूमकेतुना ३५ कोसलानां तु नक्षत्रं व्यक्तमिन्द्राग्निदैवतम् आक्रम्याङ्गारकस्तस्थौ वि
२५४ शाखामपि चांबरे ३६ दशास्यो विंशतिभुजः प्रगृहीतशरासनः अदृश्यत महासत्त्वो मैनाक इव प
र्वतः ३७ निरस्यमानो रामस्तु दशग्रीवेण रक्षसा नाशक्नोदभिसंधातुं सायकान् रणमूर्द्धनि ३८
स कृत्वा भ्रुकुटीं क्रुद्धः किंचित्संरक्तलोचनः जगाम सुमहाक्रोधं निर्दहन्निव चक्षुषा ॥३९॥ इत्यार्षे
युद्ध० त्रिशततमः सर्गः १०३॥ तस्य क्रुद्धस्य वदने दृष्ट्वा रामस्य धीमतः सर्वभूतानि वित्रेसुः प्राकंपत च
मेदिनी १ सिंहशार्दूलवान् शैलः संचचालाचलद्रुमः बभूव चातिक्षुभितः समुद्रः सरितां पतिः २
घनाश्च खरनिर्घोषा गगने परुषस्वनाः औत्पातिकाश्च नर्दन्तः समंतात्परिचक्रमुः ३ रामं दृष्ट्वा सु
संक्रुद्धमुत्पातांश्च सुदारुणान् वित्रेसुः सर्वभूतानि रावणस्याभवद्भयम् ४ विमानस्थास्तदा देवा
गंधर्वाश्च महोरगाः ऋषिदानवदैत्याश्च खेचराः ५ ददृशुस्ते तदा युद्धं लोकसंवर्तसंस्थितेना
नाप्रहरणैर्भीमैः शूरयोः संप्रयुध्यतोः ६ ऊचुः सुरासुराः सर्वे तदा विग्रहमागताः प्रेक्ष्यमाणा
महायुद्धं वाक्यं भक्त्या प्रहृष्टवत् ७ दशग्रीवं जयेत्याहुरसुराः समवस्थिताः देवा रामं योचुस्ते राम०
गरुत्मंतेश्च म २५४

त्वंजयेतिपुनःपुनः ८ एतस्मिन्नंतरेक्रोधाद्राघवंसचरावणः प्रहर्तुकामोदुष्टात्मास्पृशन्प्रहरणंम
हत् ९ वज्रसारंमहानादंसर्वशत्रुनिवर्हणम् शैलशृंगनिभैःकूटैश्चित्तदृष्टिभयावहम् १०
सधूममिवतीक्ष्णाग्रंयुगांतांग्निचयोपमम् अतिरौद्रमनासाद्यंकालेनापिदुरासदम् ११ त्रास
नेसर्वभूतानांदारणंभेदनंतथा प्रदीप्तइववेगेनशूलंजग्राहरावणः १२ तच्छूलंपरमंक्रुद्धोज
ग्राहयुधिवीर्यवान् अनीकैःसमरेशूरैराक्षसैःपरिवारितः १३ समुद्यम्यमहाकायोननादयुधि
भैरवम् संरक्तनयनोरोषात्स्वसैन्यमभिहर्षयन् १४ पृथिवींचांतरिक्षंचदिशश्चप्रदिशस्तथा
प्राकंपयत्तदाशब्दोराक्षसेंद्रस्यदारुणः १५ अतिकायस्यनादेनतेनतस्यदुरात्मनः सर्वभूतानि
वित्रेसुःसागरश्चप्रचुक्षुभे १६ सगृहीत्वामहावीर्यःशूलंतद्रावणोमहत् विनद्यसुमहानादंरामं
परुषमब्रवीत् १७ शूलोयंवज्रसारस्तेरामरोषान्मयोद्यतः तवभ्रातृसहायस्यसद्यःप्राणान्हरि
ष्यति १८ रक्षसामद्यशूराणांनिहतानांचमूमुखे त्वांनिहत्यरणश्लाघिन्करोमितरसासमम्
१९ तिष्ठेदानींनिहन्मित्वामेषशूलेनराघव एवमुक्त्वासचिक्षेपतच्छूलंराक्षसाधिपः २० ३०

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

 तद्द्रावणकरान्मुक्तं विद्युज्ज्वालासमाकुलम् ।२०। घंटमहानादं वियद्गतमशोभत २१ तच्छूलं रा
 घवो दृष्ट्वा ज्वलंतं घोरदर्शनम् ससर्ज्ज विशिखान् रामश्चापमायम्य वीर्य्यवान् २२ आपतंतं शरौघे
णावारयामास राघवः ३ त्पतंतं युगांताग्निं जलौघैरिव वासवः २३ निर्द्दहस्ततां बाणान् रामकार्मु
कनिःसृतान् रावणस्य महाच्छूलं पतंगानिव पावकः २४ तान्दृष्ट्वा भस्मसाद्भूतान् शूलसंस्प
र्श चूर्णितान् सायकानंतरिक्षस्थान् राघवः क्रोधमाहरत् २५ सतां मातलिनानीतां शक्तिं वासव
निर्मिताम् जग्राह परम क्रुद्धो राघवो रघुनंदनः २६ सातोलिता बलवता शक्तिर्घंटाकृतस्वना
नभः प्रज्वालयामास युगांतोल्केव सप्रभा २७ सा क्षिप्ता राक्षसेंद्रस्य तस्मिन् शूले पपात ह भिन्नः
शक्त्या महान् शूलो निपपात गतद्युतिः २८ निर्बिभेद ततो बाणैर्हयानस्य मनोजवान् रामस्तीक्ष्
णैर्महावेगैर्वज्रकल्पैरजिह्मगैः २९ निर्बिभेदोरसि तदा रावणं निशितैः शरैः राघवः परमायत्तो ल
लाटे पत्रिभिस्त्रिभिः ३० स शरैर्भिन्नसर्वांगो गात्रप्रस्रुतशोणितः राक्षसेंद्रः समूहस्थः फुल्ला
शोक इवाबभौ ३१ स रामबाणैरतिविद्धगात्रो निशाचरेंद्रः क्षतजार्द्रगात्रः जगाम खेदं च स

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

ण्याजिमध्ये क्रोधं वचक्रे सुभृशं दशास्यः ॥ ३२ ॥ इत्यार्षे श्रीमद्रामायणे युद्धकाण्डे चतुःशततमः सर्गः
१०४ स तु तेन प्रहारेण काकुत्स्थेनार्द्दितो भृशम् । रावणः समरश्लाघी महाक्रोधमुपागमत् १ स
दीप्तनयनो मर्षी चापमुद्यम्य वीर्यवान् । अभ्यधावत्सुसंक्रुद्धो राघवं परमाहवे २ वाणधारा
सहस्रैस्तु स तोयद इवोन्नतः । राघवं रावणो वाणैस्तटाकमिव पूरयन् ३ पूरितः शरजालेन
न धनुर्मुक्तेन संयुगे महागिरिरिवाकंप्यः काकुत्स्थो नैव कंपते ४ स शरैः शरजालानि वा
रयन्समरे स्थितः । गभस्तीनिव सूर्यस्य प्रतिजग्राह वीर्यवान् ५ ततः शर सहस्राणि क्षिप्रह
स्तो निशाचरः । निजघानोरसि क्रुद्धो राघवस्य महात्मनः ६ स शोणितसमादिग्धः समरे ल
क्ष्मणाग्रजः । दृष्टः फुल्ल इवारण्ये सुमहान्किंशुकद्रुमः ७ शराभिघातसंरब्धः सोभिजग्रा
ह सायकान् । काकुत्स्थः सुमहातेजा युगांतादित्यवर्चसः ८ ततोन्योन्यसुसंरब्धौ तावुभौ रामरा
वणौ । शरांधकारे समरे नोपलक्षयतां तदा ९ ततः क्रोधसमाविष्टो रामो दशरथात्मजः । उ
वाच रावणं वीरः प्रहस्य परुषं वचः १० मम भार्या जनस्थानादज्ञानाद्राक्षसाधम हृता ते विवशा

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०वा०पु० क्षांश्च मोहाद्युधि कुंभकर्णः पृथैवमस्तु हरत्तेपुगांते संभक्षयामास तथा हरीश्वरान् १४ एकं द्वौ त्री
१७५ न्बहून् क्रुद्धो वानरान्सह राक्षसैः समादायैकहस्तेन प्रचिक्षेप मुखे त्वरन् १५ संप्रस्रवंस्तदा मेदः शो
णितं च महाबलः वध्यमानो नरैर्वृक्षैर्भक्षयामास वानरान् १६ ते भक्ष्यमाणा हरयो रामं जग्मुस्तदा
गतिम् कुंभकर्णोतिसंक्रुद्धः कपीन्खादन्प्रधावति १७ शतानि सप्त चाष्टौ च विंशत्रिंशत्तथैव च
संपरिष्वज्य बाहुभ्यां भक्षयन्परिधावति १८ मेदोवसाशोणितदिग्धगात्रः कर्णावसक्तग्रथितो
न्त्रमाल्यः ववर्ष शूलानि सुतीक्ष्णदंष्ट्रः कालो युगांतस्थ इव प्रवृद्धः १९ तस्मिन्काले सुमित्रायाः पु
त्रः परबलार्दनः चकार लक्ष्मणः क्रुद्धो युद्धं बद्धगोधांगुलित्रवान् १०० स कुंभकर्णस्य शरान्शरीरे स
प्तवीर्यवान् निचखानाददे चान्यान्विससर्ज च लक्ष्मणः १०१ पीड्यमानस्तदास्त्रं तु विशेषं तत्स राक्ष
सः ततश्चुकोप बलवान्सुमित्रानंदवर्द्धनः १०२ अथास्य कवचं शुभ्रं जांबूनदमयं शुभम् प्रच्छादया
मास शरैः संध्याभ्रमिव मारुतः १०३ नीलांजनचयप्रख्यैः शरैः कांचनभूषणैः आपीड्यमानः शुशु
भे मेघैः सूर्य इवांशुमान् १०४ ततः स राक्षसो भीमः सुमित्रानंदवर्द्धनम् सावज्ञमेव प्रोवाच वाक्यं मेघौ राम० १७५

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०वा०यु० यस्मात्तस्मात्त्वंनासिवीर्यवान ११ मयाविरहितांदीनांवर्तमानांमहावने वैदेहींप्रसभंहत्वाशूरो
२५६ हमितिमन्यसे २२ स्त्रीषुशूरविनाथासुपरदाराभिमर्शक कृत्वाकापुरुषंकर्मशूरोहमितिमन्य
से २३ भिन्नमर्यादनिर्लज्जचारित्रेष्वनवस्थित दर्पान्मृत्युमुपादाय शूरोहमितिमन्यसे १४ शू
रेणधनदभ्रात्राबलैःसमुदितेनच श्लाघनीयंमहत्कर्मयशस्यंचकृतंत्वया १५ उत्सेकेनाभिप
न्नस्यगर्हितस्याहितस्यच कर्मणःप्राप्नुहीदानींतस्याद्यसुमहत्फलम् १६ शूरोहमितिचात्मानमव
गच्छसिदुर्मते नैवलज्जास्तितेसीतांचोरवद्व्यपकर्षतः १७ यदिमत्सन्निधौसीताधर्षितास्यात्त्व
याबलात् भ्रातरंतुखरंपश्येस्तदामत्सायकैर्हतः १८ दिष्ट्यासिममंदात्मन्चक्षुर्विषयमागतः
अद्यत्वांसायकैस्तीक्ष्णैर्नयामियमसादनम् १९ अद्यतेमच्छरैश्छिन्नंशिरोज्वलितकुंडलम्
क्रव्यादाव्यपकर्षन्तुविकीर्णंरणपांसुषु २० निपत्योरसिगृध्रास्तेक्षितौक्षिप्तस्यसायकैः पि
बंतुरुधिरंतर्षाद्बाणशल्यांतरोत्थितम् २१ अद्यमद्बाणभिन्नस्यगतासोःपतितस्यते कर्षंत्वंत्रा रा०म०
णिपतगागरुत्मंतइवोरगान् २२ इत्येवंसंवदन्वीरोरामःशत्रुनिबर्हणः राक्षसेंद्रंसमीपस्थंशरव २५६

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

र्यवाकिरत् २३ बभूवद्विगुणंवीर्यंवलंहर्षश्चसंयुगे रामस्यास्त्रवलंचैवशत्रोर्निधनकांक्षिणः ॥२४
प्रादुर्बभूवुरस्त्राणिसर्वाणिविदितात्मनः प्रहर्षश्चमहातेजाः शीघ्रहस्ततरोभवत् ॥२५॥ शुभान्येता
निचिन्हानिविज्ञायात्मगतानिसः भूयएवार्दयद्रामोरावणंराक्षसांतकृत् ॥२६॥ हरीणांचाश्मनि
करैः शरवर्षैश्चराघवात् हन्यमानोदशग्रीवोविघूर्णहृदयोभवत् ॥२७॥ यदाचशस्त्रंनाल
भेनव्यकर्षच्चकार्मुकम् नास्यप्रत्यकरोद्वीर्यंविक्लवेनांतरात्मना ॥२८॥ क्षिप्ताश्चापिशरास्तेन
शस्त्राणिविविधानिच मरणार्थायवर्त्तंते नमृत्युकालोभ्यवर्त्तत ॥२९॥ सूतस्तुरथनेतास्यतदव
स्थंनिरीक्ष्यतम् शनैर्युद्धादसंभ्रांतोरथंतस्यापवाहयत् ॥३०॥ रथंचतस्यारथजवेनसारथिर्निवा
र्यभीमंजलदस्वनंतदा जगामभीत्यासमरान्महीपतिंनिरस्तवीर्यंपतितंसमीक्ष्य ॥३१॥ इत्यार्षेश्री
मद्रामायणेयुद्धकाण्डेपंचोत्तरशततमःसर्गः ॥१०५॥ सतुमोहात्सुसंक्रुद्धः कृतांतवलचोदितः
क्रोधसंरक्तनयनोरावणःसूतमब्रवीत् १ हीनवीर्यमिवाशक्तंपौरुषेणविवर्जितम् भीरुंलघु
मिवासत्वंविहीनमिवतेजसा २ विमुक्तमिवमायाभिरस्त्रैरिववहिष्कृतम् मामवज्ञायदुर्बुद्धे

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०वा०७० त्वयावुध्याविहीनेवचेष्टसे ३ किमर्थंमामवज्ञायमच्छंदमनवेक्ष्यचत्वयाशत्रुसमक्षेमेरयोयमप
२९० वाहितः ४ त्वयाद्यहिममानार्यचिरकालसमार्जितम् यशोवीर्यंचतत्तेजम्प्रपन्नमपश्वविनाशितः
५ शत्रोःप्रख्यातवीर्यस्यरंजनीयस्यविक्रमैः पश्यतोकृष्टलुब्धोहंकृतःकापुरुषस्त्वया ६ प
स्त्वंकथमिमंमोहान्नचोद्वहसिदुर्मते ससोयंपतितःक्लेमिपरेणाल्पमुपस्कृतः ७ नहितद्धिद्युते
कर्मसुहृदोहितकांक्षिणः रिपूणांसदृशंचैतद्यत्त्वयैतदनुष्ठितम् ८ निवर्त्तपरयेशीघ्रंयाव
न्नोपैतिमेरिपुः यदिवाध्युषितोसित्वंसमर्यैतयदिवाग्रणीः ९ एवंपरुषमुक्तस्तुहितवद्भिरवुद्धि
ना ग्यपुत्रोद्भावणेसूत्तोहितंसानुनयंवचः १० नभीतोस्मिनमूढोस्मिनोपजप्तोस्मिशत्रुभिः
नप्रमत्तोस्मिन्नास्नेहोविस्मृतानचसत्क्रिया ११ मयातुहितकामेनयशश्चपरिरक्षिता स्नेहप्र
सन्नमनसाहितमित्यप्रियंकृतम् १२ नास्मिन्नर्थेमहाराजत्वंमांप्रियहितेरतम् कश्चिल्लघुरिवा
नार्योदोषतोगंतुमर्हसि १३ श्रूयतोचाभिधास्यामियन्निमित्तंमयारथः नदीवेगइवांभोभिः
संयुगेविनिवर्तितः १४ श्रमात्त्वावगच्छामिमहतारणकर्मणा नहितेवीरसौमुख्यंप्रकर्षंवो रा०म० २९०

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

पधारये १५ रथोद्वहनविज्ञाश्चतस्मेरथवाजिनः दीनान्घर्मपरिश्रांतान्गावो वर्षहतानिव १६
निमित्तानि च भूयिष्ठं यानि प्रादुर्भवंति नः तेषु तेष्वभिपन्नेषु लक्षयाम्यप्रदक्षिणम् १७ देशका
लौ च विज्ञेयौ लक्षणानींगितानि च दैन्यं हर्षश्च खेदश्च रथिनश्च बलाबलम् १८ स्थलनिम्नानि
भूमेश्च समानि विषमाणि च युद्धकालश्च विज्ञेयः परस्यांतरदर्शनम् १९ उपयानापयाने च स्थानं
प्रत्यपसर्पणम् सर्वमेतद्रथस्थेन ज्ञेयं रथकुटुंबिना २० तव विश्रामहेतोस्तु तथैषां रथवाजिना
म् रौद्रं वर्जयता खेदं क्षमं कृतमिदं मया २१ स्वेच्छयान मया वीर रथोयमपवाहितः भर्तृस्नेहपरी
तेन मयेदं यत्कृतं प्रभो २२ सन्तुष्टस्तेन वाक्येन रावणस्तस्य सारथेः प्रशस्यैनं बहुविधं युद्धलुब्धो ब्र
वीदिदम् २४ रथं शीघ्रमिमं सूत राघवाभिमुखं नय नाहत्वा समरे शत्रून्निवर्तिष्यति रावणः २५
एवमुक्त्वा ततो हृष्टो रावणो राक्षसेश्वरः ददौ तस्मै शुभं ह्येकं हस्ताभरणमुत्तमम् २६ श्रुत्वा राव
णवाक्यानि सारथिः संन्यवर्तत २७ ततो द्रुतं रावणवाक्यचोदितः प्रचोदयामास हयान्स सारथिः
स राक्षसेंद्रस्य ततो महारथः क्षणेन रामस्य रणाग्रतोभवत् ।२८।। इत्यार्षे रामायणे युद्धकांडे षट

५ ३ऊ२ आज्ञापय यथातत्त्वं वक्ष्यस्यरिनिषूदन तत्करिष्याम्यहं वीरगतानृण्येन चेतसा २३

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

धिकशततमः सर्गः॥ १०६ ॥ ततो युद्धपरिश्रांतं समरे चिंतया स्थितम् रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थित
रा०वा·यु·म् १ दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम् उपागम्याब्रवीद्राममगस्त्यो भगवांस्तदा २ राम रा
२५८ म महाबाहो शृणु गुह्यं सनातनम् येन सर्वानरीन्वत्स समरे विजयिष्यसि ३ आदित्यहृदयं पुण्यं
सर्वशत्रुविनाशनम् जयावहं जपेन्नित्यमक्षय्यं परमं शिवम् ४ सर्वमंगलमांगल्यं सर्वपापप्रणा
शनम् चिंताशोकप्रशमनमायुर्वर्द्धनमुत्तमम् ५ रश्मिमंतं समुद्यंतं देवासुरनमस्कृतम् पूज
यस्व विवस्वंतं भास्करं भुवनेश्वरम् ६ सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावनः एष देवासुरगणा
न्लोकान्पाति गभस्तिभिः ७ एष ब्रह्मा च विष्णुश्च शिवः स्कंदः प्रजापतिः महेंद्रो धनदः कालो य
मः सोमो ह्यपां पतिः ८ पितरो वसवः साध्या ह्यश्विनौ मरुतो मनुः वायुर्वह्निः प्रजाः प्राण ऋतु
कर्त्ता प्रभाकरः ९ आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान् सुवर्णसदृशो भानुर्हिरण्यरेता
दिवाकरः १० हरिदश्वः सहस्रार्चिः सप्तसप्तिर्मरीचिमान् तिमिरोन्मथनः शंभुस्त्वष्टा मार्तंड अं राम०
शुमान् ११ हिरण्यगर्भः शिशिरस्तपनो भास्करो रविः अग्निगर्भो दितेः पुत्रः शंखः शिशिरनाशनः १२ २५८

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

व्योमनाथस्तमोभेदी ऋग्यजुःसामपारगः घनवृष्टिरपांमित्रोविंध्यवीथी प्लवंगमः १३ आतपी
मंडलीमृत्युःपिंगलःसर्वतापनः कविर्विश्वोमहातेजारक्तःसर्वभवोद्भवः १४ नक्षत्रग्रहताराणा
मधिपोविश्वभावनः तेजसामपितेजस्वी द्वादशात्मन्नमोस्तु ते १५ नमःपूर्वायगिरयेपश्चिमायाद्र
येनमः ज्योतिर्गणानांपतयेदिनाधिपतयेनमः १६ जयायजयभद्रायहर्यश्वायनमोनमः
नमोनमःसहस्रांशोआदित्यायनमोनमः १७ नमउग्रायवीरायसारंगायनमोनमः नमःपद्मप्रबो
धायप्रचंडायनमोस्तु ते १८ ब्रह्मेशानाच्युतेशायसूर्यायादित्यवर्चसे भास्वतेसर्वभक्षायरौद्रा
यवपुषेनमः १९ तमोघ्नायहिमघ्नायशत्रुघ्नायामितात्मने कृतघ्नघ्नायदेवायज्योतिषांपतये
नमः २० तप्तचामीकराभायहरयेविश्वकर्मणे नमस्तमोभिनिघ्नायरुचयेलोकसाक्षिणे २१
नाशयत्येषवैभूतंतमेवसृजतिप्रभुः पायत्येषतपत्येषवर्षत्येषगभस्तिभिः २२ एषसुप्तेषुजाग
र्तिभूतेषुपरिनिष्ठितः एषचैवाग्निहोत्रंचफलंचैवाग्निहोत्रिणाम् २३ देवाश्चक्रतवश्चैव
क्रतूनांफलमेवच यानिकृत्यानिलोकेषु सर्वएषपरमप्रभुः २४ एनमापत्सुकृच्छ्रेषुकांतारेषु

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०वा०यु० भयेषुच कीर्तिमन्पुरुषः कश्चिन्नावसीदति राघव २५ पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिं एतत्त्रि
२५९ गुणितं जप्त्वा युद्धेषु विजयिष्यति २६ अस्मिन्क्षणे महाबाहो रावणं त्वं जहिष्यसि एवमुक्त्वा त
तोगस्त्यो जगाम स यथागतम् २७ एतच्छ्रुत्वा महातेजा नष्टशोको भवत्तदा धारयामास सुप्री
तो राघवः प्रयतात्मवान् २८ आदित्यं प्रेक्ष्य जप्त्वा त्रिः परं हर्षमवाप्तवान् त्रिराचम्य शुचिर्भूत्वा ध
नुरादाय वीर्यवान् २९ रावणं प्रेक्ष्य हृष्टात्मा युद्धाय समुपागमत् सर्वयत्नेन महता वधे तस्य धृतो
भवत् ३० अथ रविरवदन्निरीक्ष्य रामं मुदितमनाः परमं प्रहृष्यमाणः निशिचरपति संक्षयं वि
दित्वा सुरगणमध्यगतो वचस्त्वरेति ॥ ३१ ॥ इत्यार्षे रामायणे युद्धकांडे सप्तोत्तरशततमः सर्गः ॥ ॥
१०७ सरथं सारथिर्हृष्टः परसैन्यप्रहर्षणम् गंधर्वनगराकारं समुच्छ्रितपताकिनम् १ युक्तं परम
संपन्नैर्वाजिभिर्हेममालिभिः युद्धोपकरणैः पूर्णं पताकाध्वजमालिनम् ग्रसंतमिव चाकाशं ना
दयंतं वसुंधराम् २ प्रणाशं परसैन्यानां स्वसैन्यस्य प्रहर्षणम् रावणस्य रथं क्षिप्रं चोदयामास सा
रथिः ३ तमापतंतं सहसा स्वनवंतं महाध्वजम् रथं राक्षसराजस्य नरराजो ददर्श ह ४ कृष्ण रा०म० २५९

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

वाजिसमायुक्तं युक्तं रौद्रेण वर्चसा उह्यमानमिवाकाशे विमानं सूर्यवर्चसम् ५ तडित्पताकागहनं
दर्शितेन्द्रायुधायुधम् शरधाराविमुंचंतं धारासारमिवांबुदम् ६ स दृष्ट्वा मेघसंकाशमापतं
तं रथं रिपोः गिरेर्वज्राभिमृष्टस्य दीर्यतः सदृशं स्वनम् ७ विस्फारयन्वै वेगेन बालचंद्रानतं धनुः
उवाच मातलिं रामः सहस्राक्षस्य सारथिम् ८ मातले पश्य संरब्धमापतंतं रथं रिपोः ९ यथाप
सव्यं पतता वेगेन महता पुनः समरे हंतुमात्मानं तथानेन कृता मतिः १० तदप्रमादमातिष्ठ प्र
त्युद्गच्छ रथं रिपोः विध्वंसयितुमिच्छामि वायुर्मेघमिवोत्थितम् ११ अविक्लवमसंभ्रांतम
व्यग्रहृदयेक्षणम् रश्मिसंचारनियतं प्रचोदय रथं द्रुतम् १२ काममन्न त्वं समाधेयः पुरंदर
रथोचितम् युयुत्सुरहमेकाग्रः स्मारये त्वां न शिक्षये १३ परितुष्टः स रामस्य तेन वाक्येन मातलिः
प्रचोदयामास रथं सुरसारथिसत्तमः १४ अपसव्यं ततः कुर्वन्रावणस्य महारथम् चक्रोत्क्षिप्तेन
रजसा रावणं व्यवधूनयत् १५ ततः क्रुद्धो दशग्रीवस्ताम्रविस्फारितेक्षणः रथप्रतिमुखं रामं सा
यकैरवधूनयत् १६ धर्षणामर्षितो रामो धैर्यं रोषेण लंभयत् जग्राह सुमहावेगमैंद्रं युधि शरासन

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० वा० यु० नम शरांश्च वसुमहावेगान्सूर्यरश्मिसमप्रभान् १७ तद्वयोढं महद्युद्धमन्योन्यवधकांक्षिणोः पर
३६० स्पराभिमुखयोर्दृप्तयोरिव सिंहयोः १८ ततो देवाः सगंधर्वाः सिद्धाश्च परमर्षयः समीयुर्द्वैरथं द्र
ष्टुं रावणक्षयकांक्षिणः १९ समुत्पेतुरथोत्पाता दारुणा रोमहर्षणाः रावणस्य विनाशाय
राघवस्य जयाय च २० ववर्ष रुधिरं देवो रावणस्य रथोपरि वाता मंडलिनस्तीक्ष्णा ह्यपसव्यं प्र
चक्रमुः २१ महद्गृध्रकुलं चास्य भ्रममाणं नभस्थले येन येन रथो याति तेन तेन प्रधावति २२ सं न
ध्यया चावृता लंका जपापुष्पनिकाशया दृश्यते संप्रदीप्तेव दिवसेपि वसुंधरा २३ सनिर्घाता म
होल्काश्च संप्रपेतुर्महास्वनाः विषादयंस्ते रक्षांसि रावणस्य तदाहिताः २४ रावणश्च यतस्तत्र
प्रचचाल वसुंधरा रक्षसां च प्रहरतां गृहीता इव बाहवः २५ ताम्राः पीताः सिताः श्वेताः पतिताः सू
र्यरश्मयः दृश्यंते रावणस्यांगे पर्वतस्येव धातवः २६ गृध्रैरनुगताश्चास्य वमंत्यो ज्वलनं मुखैः प्र
णेदुर्मुखमीक्षंत्यः संरब्धमशिवाः शिवाः २७ प्रतिकूलं ववौ वायू रणे पांसून्समुत्किरन् तस्य
राक्षसराजस्य कुर्वन्दृष्टिविलोपनम् २८ निपेतुरिंद्राशनयः सैन्ये चास्य समंततः दुर्विषह्य राम० २६०

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

स्वराघोराविनाशंलंधयोदयम २९ दिशश्चप्रदिशःसर्वाबभूवुस्तिमिरावृताः पांसुवर्षेणमहतादु
र्द्दर्शंचनभोभवत ३० कुर्वंत्यःकलहंघोरंशारिकास्तद्रथंप्रति निपेतुःशतशस्तत्रदारुणांदारुणा
रुताः ३१ जघनेभ्यःस्फुलिंगाश्चनेत्रेभ्योश्रूणिसंततम मुमुचुस्तस्यतुरगास्तुल्यमग्निंचवारिच ३२
एवंप्रकारबहवःसमुत्पाताभयावहाः रावणस्यविनाशायदारुणाःसंप्रजज्ञिरे ३३ रामस्यापि
निमित्तानिसौम्यानिचशिवानिच बभूवुर्जयशंसीनिप्रादुर्भूतानिसर्वशः॥ ३४॥ निमित्तानीहसौ
म्यानिराघवस्सजयायच दृष्ट्वापरमसंहृष्टोहतंमेनेसरावणम॥ ३५॥ ततोनिरीक्ष्यात्मगतानिरा
(निर्निमित्त घवोरणेनिमित्तानिनिमित्तकोविदः जगामहर्षंचपरांनिर्वृतिंचकारयुद्धेह्यधिकंचविक्रमम ३६॥
॥इत्यार्षेश्रीमद्रामायणेयुद्धकांडेसप्तोत्तरशततमःसर्गः॥ १०७॥ ततःप्रवृत्तंसुक्रूरंरामरावणा
योस्तदा सुमहद्द्वैरथंयुद्धंसर्वलोकभयावहम १ ततोराक्षससैन्यंचहरीणांचमहद्बलम प्रगृही
तप्रहरणंनिश्चेष्टंसमतिष्ठत २ संप्रयुद्धौतुतौदृष्ट्वाबलवन्नरराक्षसौ व्याक्षिप्तहृदयाःसर्वे
परंविस्मयमागताः ३ नानाप्रहरणैर्व्यग्रैर्भुजैर्विस्मितबुद्धयः तस्थुःप्रेक्ष्यचतंसर्वेनाभिजग्मुः

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

घातितस्त्वनः १०५ अथैतं कस्यापि कथं स्पृष्टुधिज्ञे तारमाहवे युध्यतामामभीतेन रक्षसा श्रिता वीरतात्वया १०६
प्रगृहीतायुधस्याहमस्त्यारिव महाम्रधे तिष्ठन्नप्यानतः पूज्यः किमु युद्धप्रदायकः १०७ रावणेतसमा
रूढो व्रतैः सर्वामरैः प्रभुः नैव शक्रोपि समरे स्थित पूर्वः कदाचन १०८ अथाद्य त्वया हं सौमित्रे बले
नापि पराक्रमैः तोषितोस्मि तुमि क्षमि त्वामनुज्ञातुमद्य राघव १०९ यत्तु वीर्यवलोत्साहैस्तोषितो
हं रतोत्वया रामभेवैकमिच्छामि हंतुं यस्मिन्हते हतम् ११० रामे मयाचेन्निहते यन्ये स्थास्यंति संयु
गे तानहं योधयिष्यामि स्ववलेन प्रमाथिना १११ इत्युक्तवाक्यं तद्रक्षः प्रोवाच स्तुतिसंहितम्
मध्ये घोरतरं वाक्यं सौमित्रिः प्रहसन्निव ११२ यत्त्वं शक्रादिभिर्देवैरसह्यं प्राप्य पौरुषम् तत्सत्यं ना
न्यथा वीर दृष्टस्ते ह्य पराक्रमः ११३ एष दाशरथी रामस्तिष्ठत्यद्रिरिवाचलः इति श्रुत्वा ह्यनादृ
त्य लक्ष्मणं तं स निशाचरः ११४ अतिक्रम्य तु सौमित्रिं कुंभकर्णो महावलः राममेवाभिदुद्राव दारयन्नि
व मेदिनीम् ११५ अथ दाशरथी रामो रौद्रमस्त्रं प्रयोजयन् कुंभकर्णस्य हृदये ससर्ज निशितान्छरान्
११६ तस्य रामेणाभिविद्धस्य सहसाभिप्रधावतः अंगाराभिश्राक्रुद्धस्य मुखान्निश्चेरुः रश्मयः ११७ रामा

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा० वा० यु० परस्परम् ४ रक्षसां रावणं चापि वानराणां च राघवम् पश्यतां विस्मिताक्षाणां सैन्यं चित्रमिवाबभौ
२६१ ५ तौ तु तत्र तान्निमित्तानि दृष्ट्वा राघवरावणौ कृतबुद्धी स्थितौ वैरौ युयुधाते ह्यभीतवत् ६ जेतव्य
मिति काकुत्स्थो मर्तव्यमिति रावणः धृतौ स्ववीर्यसर्वस्वं युद्धे ऽदर्शयतां तदा ७ एवं जपंततः प
श्यंति देवाः सर्षिगणास्तदा ततः क्रोधाद्दशग्रीवः शरान्संधाय वीर्यवान् ८ मुमोच ध्वजमुद्दि
श्य राघवस्य रथे स्थितम् ८ ते शरास्तमनासाद्य पुरंदररथध्वजम् रथशक्तिं परामृश्य निपेतुर्ध
रणीतले ९ ततो रामो ऽपि संक्रुद्धश्चापमाकृष्य वीर्यवान् कृतप्रतिकृतं कर्तुं मनसा संप्रचक्रमे १०
रावणध्वजमुद्दिश्य मुमोच निशितं शरम् महासर्पमिवासह्यं ज्वलन्तमिव तेजसा ११ रामश्चिक्षे
प तेजस्वी केतुमुद्दिश्य सायकम् जगाम स महीं भित्त्वा दशग्रीवध्वजं शरः १२ स निकृत्तो ऽपतद्भूमौ
रावणस्यंदनध्वजः ध्वजस्योन्मथनं दृष्ट्वा रावणः स महाबलः १३ क्रोधजेनाग्निना संख्ये प्रदीप्त इ
व पावकः संप्रदीप्तो ऽभवत्क्रोधादमर्षात्प्रदहन्निव स रोषवशमापन्नः [illegible] शरवर्षं ववर्ष ह रा० म०
१४ रामस्य तुरगान्दीप्तैः शरैर्विव्याध रावणः ते दिव्या हरयस्तत्र नास्खलन्नापि बभ्रमुः बभूवः २६१

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

स्वस्थ हृदयाः पद्मनालैरिवाहताः १५ तेषामसंभ्रमं दृष्ट्वा वाजिनां रावणस्तदा भूय एव सुसंक्रुद्धः श
रवर्षं मुमोच ह १६ गदांश्च परिघांश्चैव चक्राणि मुसलानि च गिरिशृंगाणि वृक्षांश्च तथा शूलप
रश्वधान् १७ मायाविहितमेतत्तु शरवर्षमपातयत् १८ सहस्रशस्तदा बाणान् [illegible]यांत हृदयो
द्यमः तुमुलं त्रासजननं भीमं भीमप्रतिस्वनम् १९ तद्वर्षमभवद्युद्धे नैकशस्त्रमयं महत् विमु
च्य राघवरथं समंताद्वानरे बले २० सायकैरंतरिक्षं च चकार ह निरंतरम् मुमोच च दशग्रीवो
निःसंगेनांतरात्मना २१ व्यायच्छमानं तं दृष्ट्वा तत्परं रावणं रणे प्रहसन्निव काकुत्स्थः संदधे
निशितान् क्षुरान् २२ स मुमोच ततो बाणान् शतशोऽथ सहस्रशः तान् दृष्ट्वा रावणश्चक्रे विशि
खैः खं निरंतरम् २३ ततस्ताभ्यां प्रयुक्तेन शरवर्षेण भास्वता शरबद्धमिवाभाति द्वितीयमि
व चांबरम् २४ नानिमित्तोऽभवद्बाणो नातिभेत्ता न निष्फलः २५ अन्योन्यं तैः समाहत्य निपेतु
र्धरणीतले तथा विसृजतोर्बाणान् रामरावणयोर्मृधे २६ प्रायुध्येतामविच्छिन्नमस्यंतौ सव्य
दक्षिणम् चक्रतुश्च शरैर्घोरैर्निरुच्छ्वासमिवांबरम् २७ रावणस्य हयान् रामो हयान् रामस्य रावणः

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० वा० यु० जघ्नतुस्तौ तदान्योन्यं कृतानुकृतकारिणौ २८ एवं तु तौ सुसंक्रुद्धौ चक्रतुर्युद्धमुत्तमम् मुहूर्तमभव
३६२ द्युद्धं तुमुलं रोमहर्षणम् २९ प्रयुद्ध्यमानौ समरे महाबलौ शितैः शरैः रावणलक्ष्मणाग्रजौ ध्व
जाववपातेन स राक्षसाधिपो भृशं प्रचुक्रोध तदा रघूत्तमे॥३०॥ इत्यार्षे रामायणे युद्धकाण्डे न
वोत्तरशततमः सर्गः॥१०९॥ तौ तथा युद्ध्यमानौ तु समरे रामरावणौ ददृशुः सर्वभूतानि विस्मि
तेनान्तरात्मना १ अर्दयन्तौ तु समरे तयोस्तौ स्यन्दनोत्तमौ परस्परमभिक्रुद्धौ परस्परमभिद्रुतौ २
परस्परवधे युक्तौ घोररूपौ बभूवतुः मण्डलानि च वीथीश्च गतप्रत्यागतानि च दर्शयन्तौ बहुवि
धां सूतसारथ्यजां गतिम् ३ अर्दयन् रावणं रामो राघवं चापि रावणः गतिवेगं समापन्नौ प्रवर्त्तननि
वर्त्तने ४ क्षिपन्तौ शरजालानि तयोस्तौ स्यन्दनोत्तमौ चेरतुः संयुगमहीं सासारौ जलदाविव ५ द
र्शयित्वा तदा तौ तु गतिं बहुविधां रणे परस्परस्याभिमुखौ पुनरेव च तस्थतुः ६ धुरं धुरेण रथयोर्व
क्त्रं वक्त्रेण वाजिनाम् पताकाश्च पताकाभिः समीयुः स्थितयोस्तदा ७ रावणस्य ततो रामो धनुर्मु
क्तैः शितैः शरैः चतुर्भिश्चतुरो दीप्तान् हयान् प्रत्यपसर्पयत् ८ स क्रोधवशमापन्नो हयानाम राम० ३६२

म

रा० वा० यु० जघ्नतुस्तौतदान्योन्यंकृतानुकृतकारिणौ २८ एवंतुतौसुसंक्रुद्धौचक्रतुर्युद्धमुत्तमम् मुहूर्त्तमभव
३६२ द्युद्धंतुमुलंरोमहर्षणाम् २९ प्रयुध्यमानौसमरेमहाबलौशितैः शरैरावणलक्ष्मणाग्रजौ ध्व
जावपातेनसरावणाधिपोभृशंप्रचुक्रोधतदारघूत्तमे॥३०॥इत्यार्षेरामायणेयुद्धकाण्डेन
वोत्तरशततमःसर्गः॥१०९॥तौतथायुध्यमानौतुसमरेरामरावणौ ददृशुःसर्वभूतानिविस्मि
तेनान्तरात्मना १ अर्दयन्तौतुसमरेतयोस्तौस्यंदनोत्तमौ परस्परमभिक्रुद्धौपरस्परमभिद्रुतौ २
परस्परवधेयुक्तौघोररूपौबभूवतुः मंडलानिचवीथीश्चगतप्रत्यागतानिच दर्शयंतौबहुवि
धांसूतसारथ्यजांगतिम् ३ अर्दयन्रावणंरामोराघवंचापिरावणः गतिवेगसमापन्नौप्रवर्त्तननि
वर्त्तने ४ क्षिपतोःशरजालानितयोस्तौस्यंदनोत्तमौ चेरतुःसंयुगमहींसासारौजलदाविव ५ द
र्शयित्वातदातौगतिंबहुविधांरणे परस्परस्याभिमुखौपुनरेवचतस्थतुः ६ धुरंधुरेणरथयोर्व
क्त्रंवक्त्रेणवाजिनाम् पताकाश्चपताकाभिःसमीयुःस्थितयोस्तदा ७ रावणस्यततोरामोधनुर्मु
क्तैःशितैःशरैः चतुर्भिश्चतुरोदीप्तान्हयान्प्रत्यपसर्पयत् ८ सक्रोधवशमापन्नोहयानाम राम०
३६२

म

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

पसर्पितो मुमोच निशितान् वाणान् राघवाय दशाननः ९ सोतिविद्धो बलवता दशग्रीवेण राघवः
जगाम न विकारं च न चापि व्यथितोभवत् १० चिक्षेप च पुनर्वाणान् वज्रपातसमस्वनान् सारथिं
वज्रहस्तस्य समुद्दिश्य दशाननः मातलेस्तु महावेगाः शरीरे पातिताः शराः न सूक्ष्ममपि संमोहं
व्यथां वा प्रददुर्युधि १२ तया धर्षणया क्रुद्धो मातलेर्न तथात्मनः चकार शरजालेन राघवो विमु
खं रिपुम् १३ विंशतिं त्रिंशतिं षष्टिं शतशोथ सहस्रशः मुमोच राघवो वीरः सायकान्स्य
न्दने रिपोः १४ रावणोपि ततः क्रुद्धो रथस्थो राक्षसेश्वरः गदामुसलवर्षेण रामं प्रत्यर्दयद्रणे १५
तथा प्रवृत्तं पुनर्युद्धं तुमुलं रोमहर्षणम् गदानां मुसलानां च परिघाणां च निस्वनैः शराणां पुंखवा
तैश्च क्षुभिताः सप्तसागराः १६ क्षुब्धानां सागराणां च पातालतलवासिनः व्यथिता दानवाः सर्वे
पन्नगाश्च सहस्रशः १७ चकंपे मेदिनी कृत्स्ना सशैलवनकानना भास्करो निष्प्रभश्चासीन्न
ववौ चापि मारुतः १८ ततो देवाः सगंधर्वाः सिद्धाश्च परमर्षयः चिंतामापेदिरे सर्वे सकिन्नर

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

परम्पितो मुमोच निशितान् बाणान् राघवाय दशाननः ९ सोतिविद्धो बलवता दशग्रीवेण राघवः
जगाम न विकारं च न चापि व्यथितोभवत् १० चिक्षेप च पुनर्बाणान् वज्रपातसमस्वनान् सारथिं
वज्रहस्तस्य समुद्दिश्य दशाननः मातलेस्तु महावेगाः शरीरे पातिताः शराः न सूक्ष्ममपि संमोहं
व्यथां वा प्रददुर्युधि १२ तया धर्षणया क्रुद्धो मातलेर्न तथात्मनः चकार शरजालेन राघवो विमु
खं रिपुम् १३ विंशतिं त्रिंशतिं षष्टिं शतशोथ सहस्रशः मुमोच राघवो वीरः सायकान् स्य
न्दने रिपोः १४ रावणोपि ततः क्रुद्धो रथस्थो राक्षसेश्वरः गदामुसलवर्षेण रामं प्रत्यर्दयद्रणे १५
तत्प्रवृत्तं पुनर्युद्धं तुमुलं रोमहर्षणम् गदानां मुसलानां च परिघाणां च निस्वनैः शराणां पुंखवा
तैश्च क्षुभिताः सप्तसागराः १६ क्षुब्धानां सागराणां च पातालतलवासिनः व्यथिता दानवाः सर्वे
पन्नगाश्च सहस्रशः १७ चकंपे मेदिनी कृत्स्ना सशैलवनकानना भास्करो निष्प्रभश्चासीन्न
ववौ चापि मारुतः १८ ततो देवाः सगंधर्वाः सिद्धाश्च परमर्षयः चिंतामापेदिरे सर्वे सकिन्नर

रा० यु० महोरगाः २० स्वस्तिगोब्राह्मणेभ्यस्तु लोकास्तिष्ठंतु शाश्वताः जयतां राघवः संख्ये रावणं राक्षसे
२६२ श्वरम् २१ एवं जपंतो पश्यंति देवाः सर्षिगणास्तदा रामरावणयोर्युद्धं सुघोरं रोमहर्षणम् २२ गं
धर्वाप्सरसां संघा दृष्ट्वा युद्धमनूपमम् गगनं गगनाकारं सागरः सागरोपमः रामरावणयोर्युद्धं राम
रावणयोरिव एवं ब्रुवंतो ददृशुस्तद्युद्धं रामरावणम् २४ ततः क्रोधान्महाबाहू रघूणां कीर्तिवर्द्धनः
संधाय धनुषा रामः शरमाशीविषोपमम् २५ रावणस्य शिरश्छिंदच्छ्रीमज्ज्वलितकुंडलम् तच्छि
रः पतितं भूमौ दृष्टं लोकैस्त्रिभिस्तदा २६ तस्यैव सदृशं चान्यद्रावणस्योत्थितं शिरः तत्क्षिप्रं क्षि
प्रहस्तेन रामेण क्षिप्रकारिणा २७ द्वितीयं रावणशिरश्छिन्नं संयति सायकैः छिन्नमात्रं तु तच्छीर्षं
पुनरेव प्रदृश्यते २८ तदप्यशनिसंकाशैश्छिन्नं रामस्य सायकैः एवमेकशतं छिन्नं शिरसां तुल्य
वर्चसाम् २९ न चैव रावणस्यांतो दृश्यते जीवितक्षये ३० ततः सर्वास्त्रविद्वीरः कौशल्यानंदवर्द्ध राम०
नः मार्गणैर्बहुभिर्युक्तश्चिंतयामास राघवः ३१ मारीचो निहतो यैस्तु खरो यैस्तु सदूषणः क्रौंचा २६३

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रणेयकबंधस्तुविराधोदंडकावने ३२ यैःसालागिरयोभग्नावालीचक्षुभितोंबुधिः तस्येमेसाय
काः सर्वेयुद्धेप्रत्यायिकमम ३३ किंतुतत्कारणंयेनरावणेमंदतेजसः ३ इतिचिंतापरश्चासीद
प्रमत्तश्चसंयुगे ववर्षशरवर्षाणिराघवोरावणोरसि ३४ एवंतौपिततः क्रुद्धोरथस्थोराक्षसे
श्वरः गदामुसलवर्षेणरामंप्रत्यर्दयद्रणे ३५ तत्प्रवृत्तंमहद्युद्धंतुमुलंरोमहर्षणम् अंतरिक्षे
चभूमौचपुनश्चगिरिमूर्धनि ३६ देवदानवयक्षाणांपिशाचोरगरक्षसाम् पश्यतांतन्महद्यु
द्धंसप्तरात्रमवर्त्तत नैवरात्रौनदिवसेनमुहूर्तंनचक्षणम् रामरावणयोर्युद्धंविराममुपागच्छति
३८ दशरथसुतराक्षसेंद्रयोस्तयोर्जयमनवेक्ष्यरणोत्सवराघवस्य सुरवररथसारथिर्महात्मारण
गतराममुवाचवाक्यमाशु ॥३९॥ इत्यार्षेश्रीमद्रामायणेयुद्धकांडेदशोत्तरशततमःसर्गः॥
॥११०॥ अथसंस्मारयामासराघवंमातलिस्तदा अजानन्निवकिंवीरत्वमेनमनुवर्त्तसे १ विसृज्या
स्मैवधायत्वमस्त्रंपैतामहंप्रभो विनाशःकथितोरामयस्सुरैःसोद्यवर्त्तते २ ततःसंस्मारितोराम

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रावणेकवंधत्तुविराधोदंडुकावने ३२ यैःसालागिरयोभग्नावालीचक्षुभितोंवुधिः तइमेसाय
काः सर्वेयुद्धेप्रासायिकमम ३३ किंतुतत्कारणंयेनराघवेणमंदतेजसः ३ इतिचिंतापरश्चासीद
प्रमत्तश्चसंयुगे ववर्षशरवर्षाणिराघवोरावणोरसि ३४ एवमुक्तोपिततः क्रुद्धोरथस्थोराक्षसे
श्वरः गदामुसलवर्षेणराममंप्रत्यपद्यत ३५ ततप्रवृत्तंमहद्युद्धंतुमुलंरोमहर्षणम् अंतरिक्षे
चभूमौचपुनश्चगिरिमूर्धनि ३६ देवदानवयक्षाणांपिशाचोरगरक्षसाम् पश्यतांतन्महद्यु
द्धंसप्तरात्रमवर्त्तत नैवरात्रंनदिवसंनमुहूर्त्तंनचक्षणम् रामरावणयोर्युद्धंविराममुपागच्छति
३८ दशरथसुतराक्षसेंद्रयोस्तयोर्जयमनवेक्ष्यरणेसराघवस्य सुरवररथसारथिर्महात्मारण
गतराममुवाचवाक्यमाशु ॥३९॥ इत्यार्षश्रीमद्रामायणेयुद्धकाण्डेदशोत्तरशततमःसर्गः॥
॥११०॥ अथसंस्मारयामासराघवंमातलिस्तदा अजानन्निवकिंवीरत्वमेनमनुवर्त्तसे १ विसृज्या
स्मैवधायत्वमस्त्रंपैतामहंप्रभो विनाशकालःकथितोयःसुरैःसोद्यवर्त्तते २ ततःसंस्मारितोराम

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०वा०यु० त्तेन वाक्येन मातलेः जग्राह स शरं दीप्तं निश्वसंतमिवोरगम् ३ यमस्मै प्रथमं प्रादादगस्त्यो भ
२६४ गवानृषिः ब्रह्मदत्तं महाबाणममोघं युधि वीर्यवान् ४ ब्रह्मणा निर्मितं पूर्वमिंद्रार्थममितौजसा
दत्तं सुरपतेः पूर्वं त्रिलोकजयकांक्षिणः ५ यस्य वाजेषु पवनः फले पावकभास्करौ शरीरमा
काशमयं गौरवे मेरुमंदरौ ६ जाज्वल्यमानं वपुषा सुपुंखं हेमभूषितम् तेजसा सर्वभूतानां कृतं भा
स्करवर्चसम् ७ सधूममिव कालाग्निं दीप्तमाशीविषोपमम् रथनागाश्ववृंदानां भेदनं क्षि
प्रकारिणम् ८ द्वाराणां परिघाणां च गिरीणां चापि भेदनम् नानारुधिरदिग्धांगं मेदोदिग्धं सु
दारुणम् ९ वज्रसारं महानादं नानासमितिदारुणम् सर्ववित्रासनं भीमं श्वसंतमिव पन्नगम्
१० कंकगृध्रबकानां च गोमायुगणरक्षसाम् नित्यं भक्ष्यप्रदं युद्धे यमरूपं भयावहम् ११ नंदनं
वानरेंद्राणां रक्षसामवसादनम् वाजितं विविधैर्वाजैश्चारुचित्रैर्गरुत्मतः १२ तमुत्तमेषुं लो
कानामिक्ष्वाकुभयनाशनम् द्विषतां कीर्तिहरणं प्रहर्षकरमात्मनः १३ अभिमंत्र्य ततो रामः राम० २६४

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०वा०यु० दरम् अब्रवीद्राक्षसश्रेष्ठं भ्रातरं रावणं ततः १ मोहं न वभयं घोरं वधात्तस्य दुरात्मनः रामस्याद्य प्रमा
१०७ र्जामि निर्वैरस्त्वं सुखी भव २ गर्जंति न वृथा शूरा निर्जला इव तोयदाः पश्य संपद्यमानं तु गर्जितं युधि
१६७ कर्मणा ३ न मर्षयति चात्मानं संभावयितुमात्मना अदर्शयित्वा शूरास्तु कर्म कुर्वंति दुष्करम्
४ विक्लवानामबुद्धीनां राज्ञां पंडितमानिनाम् रोचते त्वद्वचो नित्यं कथ्यमानं महोदर ५ युद्धे कापु
रुषैर्नित्यं भवद्भिः प्रियवादिभिः राजानमनुगच्छद्भिः कृत्यमेतद्विनाशितम् ६ राजशेषा कृता लंका
क्षीणः कोशो बलं हतम् राजानमिममासाद्य सुहृच्चिन्हममित्रकम् ७ एष निर्याम्यहं योद्धुमुद्यतः
शत्रुनिर्जये दुर्नयं भवतामद्य समीकर्तुं महाहवे ८ एवमुक्तवतो वाक्यं कुंभकर्णस्य धीमतः प्रत्यु
वाच ततो वाक्यं प्रहसन् राक्षसेश्वरः ९ महोदरोयं रामात्तु परित्रस्तो न संशयः न हि रोचयते तात
युद्धं युद्धविशारद १० कश्चिन्मे त्वत्समो नास्ति सौहृदेन बलेन च गच्छ शत्रुवधाय त्वं कुंभकर्ण जया
य च ११ शयानः शत्रुनाशार्थं भवान्संबोधितो मया अयं हि कालः सुहृदां राक्षसानामरिंदम १२
त्वं गच्छ शूलमादाय पाशहस्त इवांतकः वानरान्राजपुत्रौ च भक्षयादित्यतेजसौ १३ समालोक्य राम० १०७ १६७

रा०बा०१० ७९ स्तविद्धो गंभीरेण दन्तरा क्षसपुंगवः अभ्यधावत संक्रुद्धो हर्तुं निद्रुत्य वद्धरन्नरतो ११८ तस्योरसि निमग्ना
स्ते शरा वर्हिणवाससः ११९ हत्वा ह्यास्य परिभ्रष्टा गदा चोर्व्यां पपात ह अथ प्रधानि च सर्वाणि विप्रकी
र्णं तु भूतले १२० स निरायुधमात्मानं प्रदा मेने महाबलः मुष्टिभ्यां च कराभ्यां च चकार कदनं महत्
१२१ स वीरो रतिविद्धांगः क्षतजेन समुक्षितः रुधिरं परिसुस्राव गिरिः प्रस्रवणं यथा १२२ सुग्रीवे
ण च कोपेन रुधिरेण च मूर्छितः वानरानरराक्षसान् ध्वानरवोदन्स परिधावति १२३ अद्रिशृंगं
समाविध्य भीमं भीमपराक्रमः चिक्षेप राममुद्दिश्य वज्रवानंतकोपमः १२४ अप्राप्तमेत रामः स
प्तभिस्तैरजिह्मगैः चिच्छेद गिरिशृंगं तं पुनः संधाय कार्मुकम् १२५ ततस्तु रामो धर्मात्मा तस्य वर्म महत्
दा शरैः कांचनचित्रांगैश्चिच्छेद भरताग्रजः १२६ तन्मेरुशिखराकारं द्योतमानमिव श्रिया
हे शरैर्वानरैर्दृष्टं पतमानमपातयत् १२७ तस्मिन्काले तु धर्मात्मा लक्ष्मणो राममब्रवीत् कुं
भकर्णवधे युक्तो योगान्परिमृश्यान्वहन् १२८ नैवायं वानरान् राजन्न विजानाति राक्षसान् मत्तः
शोणितगंधेन स्वान्परांश्चापि खादति १२९ साध्वेनमधिरोहंतु सर्वतो हरयो द्रुतम् यूथपाश्च यथा रा०म० ७९

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

स्वमहेषुंमहाबलः वेदप्रोक्तेनविधिनासंदधेकार्मुकेवली १४ तस्मिन्संधीयमानेतुराघवेणशरो
त्तमे सर्वभूतानिवित्रेसुश्चचालचवसुंधरा १५ सरावणायसंक्रुद्धोभृशमायम्यकार्मुकं चिक्षे
पपरमायत्तःशरंमर्मविदारणम् १६ सवज्रइवदुर्द्धर्षोवज्रवाहुविसर्जितः कृतांतइववचावार्यो
न्यपतद्रावणोरसि १७ सविसृष्टोमहावेगःशरीरांतकरःशरः विभेदहृदयंतस्यरावणस्यदुरात्म
नः १८ रुधिराक्तःसवेगेनशरीरांतकरःशरः रावणस्यहरन्प्राणान्विवेशधरणीतलम १९
सशरोरावणंहत्वारुधिरार्द्रीकृतच्छविः कृतकर्मानिभृतवत्स्वतूणींपुनराविशत् २० तस्यह न
स्ताद्धतस्याशुकार्मुकंतत्ससायकम् निपपातसहप्राणैर्भ्रश्यमानस्यजीवितात् २१ गता
सुर्भीमवेगस्तुनैरृतेंद्रोमहाद्युतिः पपातस्यंदनाद्भूमौवृत्रोवज्रहतोयथा २२ तंदृष्ट्वापति
तंभूमौहतशेषानिशाचराः हतनाथाभयत्रस्ताःसर्वतःसंप्रदुद्रुवुः २३ नर्दंतश्चाभिपेतुस्ता
न्वानराद्रुमयोधिनः २४ दशग्रीववधंदृष्ट्वाविजयंराघवस्यच २५ अर्दितावानरैर्हृष्टैर्

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०वा०यु० कामभ्यपतन्भयात् हताश्रयत्वात्करुणैर्बाष्पप्रस्रवणोर्मुखैः २५ ततोविनेदुः संहृष्टावानरा
२६५ जितकाशिनः वदंतोराघवजयंरावणस्यचतंवधम् २६ अथांतरिक्षेव्यनदत्सौम्यस्त्रिदशदुंदु
भिः दिव्यगंधवहस्तत्रमारुतः सुसुखोववौ २७ निपपातांतरीक्षाच्चपुष्पवृष्टिस्तदाभुवि कि
रंती राघवरथंदुरवापामनोहरा २८ राघवस्तवसंयुक्तागगनेचविशुश्रुवे साधुसाध्विति वा
गग्र्यादेवतानांमहात्मनाम् २९ आविवेशमहान्हर्षोदेवानांचारणैःसह रावणेनिहतेरौद्रे
सर्वलोकभयावहे ३० ततःसकामंसुग्रीवमंगदंचमहाबलम् चकारराघवःप्रीतोहत्वाराक्ष
सपुंगवम् ३१ ततःप्रजग्मुःप्रशमंमरुद्गणादिशःप्रसेदुर्विमलंनभोभवत् महीचकंपेनहिमारु
तोववौस्थिरप्रभश्चाप्यभवद्दिवाकरः ३२ ततस्तुसुग्रीवविभीषणांगदाः सुहृद्विशिष्टाःस
हलक्ष्मणास्तदा समेत्यहृष्टाविजयेनराघवंरणेभिरामंविधिनाभ्यपूजयन् ३३ सतुनिहतरिपुः
स्थिरप्रतिज्ञःस्वजनबलाभिवृतोरणेरराज रघुकुलनृपनंदनोमहौजास्त्रिदशगणैरभिसं राम० २६५

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

ष्टतौयपेंद्रः ३४॥ इत्यार्षे श्रीमद्रामायणे युद्धकांडे अमावास्यायां रावणवधो नाम एकादशोत्तर
शततमः सर्गः॥१११॥ भ्रातरं निहतं दृष्ट्वा शयानं रामनिर्जितम् शोकवेगपरीतात्मा विललाप
विभीषणः १ वीर विक्रान्त विख्यात विनीत नयकोविद महार्हशयनोपेत किं शेषेद्य हतो
भुवि २ निक्षिप्य दीर्घौ निश्चेष्टौ भुजावंगदभूषितौ मुकुटेनापवृत्तेन भास्कराकारवर्चसा
३ तदिदं वीर संप्राप्तं यन्मया पूर्वमीरितम् काममोहपरीतस्य यत्ते न रुचितं वचः ४ यन्न दर्पा
त्प्रहस्तो वा नेंद्रजिन्नापरे जनाः न कुंभकर्णोतिरथो नातिकायो नरांतकः न स्वयं बहु मन्येथा
स्तस्योदर्कोयमागतः ५ गतः सेतुः सुनीतानां गतो धर्मस्य विग्रहः गतः सत्वस्य संक्षेपः प्रस्तावा
नां गतिर्गता ६ आदित्यः पतितो भूमौ मग्नस्तमसि चंद्रमाः चित्रभानुः प्रशांतार्चिर्व्यवसायो
निरुद्यमः ७ अस्मिन्निपतिते वीरे भूमौ शस्त्रभृतां वरे किं शेषमिव लोकस्य हतवीरस्य सांप्र
तम् रणे राक्षसशार्दूले प्रसुप्त इव पांसुषु ८ धृतिप्रवालः प्रसहाग्र्यपुष्पस्तपोबलः शौर्य
निबद्धमूलः रणे महान् राक्षसराजवृक्षः संमर्दितो राघवमारुतेन ९ तेजोविषाणः कुलवंशवं प्रा

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा० वा० यु० वंशाः कोपप्रसादापरगान्नूहस्तः इक्ष्वाकुसिंहावगाढदेहः सुप्तः क्षितौ रावणगंधहस्ती १०
२६६ पराक्रमोत्साहविजृंभिताचिर्निःश्वासधूमः स्वबलप्रतापः प्रतापवान्संयति राक्षसाग्निर्नि
र्वापितो रामपयोधरेण ११ सिंहर्क्षलांगूलककुद्विषाणः पराभिजिद्गंधनगंधहस्ती रक्षो
वृषश्चापलकर्णचक्षुः क्षितीश्वरव्याघ्रहतोवसन्नः १२ वदंतं हेतुमद्वाक्यं परिदृष्टार्थनि
श्चयम् रामः शोकसमाविष्टमित्युवाच विभीषणम् १३ नायं विनष्टो निश्चेष्टः समरे चंड
विक्रमः अत्युन्नतमहोत्साहः पतितोयमशंकितः १४ नैवं विनष्टाः शोच्यंते क्षत्रधर्ममवस्थि
ताः वृद्धिमाशंसमाना ये निपतंति रणाजिरे १५ येन सेंद्रास्त्रयो लोका त्रासिता युधि धी
मता तस्मिन्कालसमायुक्ते न कालः परिशोचितुम् १६ नैकांतविजयो युद्धे भूतपूर्वः कदाचन
परैर्वा हन्यते वीरः परान्वा हंति संयुगे १७ इयं हि पूर्वैः संदिष्टा गतिः क्षत्रियसंमता क्षत्रियो नि
हतः संख्ये न शोच्य इति निश्चयः १८ तदेवं निश्चयं दृष्ट्वा तत्त्वमास्थाय विज्वरः यदिहानंतरं का
र्यं कल्प्यतामनुचिंतय १९ तमुक्तवाक्यं विक्रांतं राजपुत्रं विभीषणः उवाच शोकसंतप्तो भ्रातु राम० २६६

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

हितमनंतरम् २० योयं विमर्द्दे भुनभग्न पूर्वैः सुरैः समेतैः सहवासवेन भवंतमासाद्य रणे विभ[illegible]
ग्नो विक्रमिवासाद्युपयातमुद्धः २१ अनेन दत्तानि सुपूजितानि भुक्ता च भोगा निभृ ता श्च भृत्त्यासाः
धनानि मित्रेषु समर्पितानि वैराण्ययं मित्रे च पापि तानि २२ एषाहिताग्निश्च महात्तपाश्च वेदांत
कर्म्मसु चाग्र्यसूरः एतस्य प्रेतस्य गतस्य कृत्यं त्वं कर्तुमिच्छामि तव प्रसादात् २३ सतस्य वाक्यैः
करुणैर्म्महात्मा संबोधितः साधु विभीषणेन आज्ञापयामास नरेंद्रसूनुः स्वर्गीयमाधान वि
धिं विधिज्ञः २४॥ अत्र गायत्री॥ नः मरणांतानि वैराणि निवृत्तं नः प्रयोजनम् क्रियतामस्य सं
स्कारो ममाप्येष यथा तव॥२५॥इत्यार्षे श्रीमद्रामायणे युद्धकाण्डे द्वादशोत्तरशततमः सर्गः॥११२
रावणं निहतं श्रुत्वा राघवेण महात्मना अंतःपुराद्विनिष्पेतू राक्षस्यः शोककर्शिताः १ वार्य
माणाः सुबहुशो वेष्टंत्यः क्षितिपांसुषु विमुक्तकेश्यः सुदुःखार्त्ता गावो वत्सहता इव २ उत्तरे
णा विनिष्क्रम्य द्वारेण सह राक्षसैः प्रविश्यायोधनं घोरं विचिन्वंत्यो हतं पतिम् ३ आर्यपुत्रे
ति वादिन्यो हा नाथेति च सर्वशः परिपेतुः कबंधांकां महीं शोणितकर्द्दमाम् ४ ता बाष्प

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० वा० यु० परिपूर्णार्थे श्योमर्त्तं शोकपराजिताः करिण्य इव नर्द्दन्त्यो नेदुर्हतयूथपाः ५ ददृशुस्तं महाका
२६० यं महावीर्यं महाद्युतिम् रावणं निहतं भूमौ नीलांजनचयोपमम् ताः पतिं निहतं दृष्ट्वा शाया
नं रणपांसुषु निपेतुस्तस्य गात्रेषु छिन्ना वनलता इव ७ बहुमानात्परिष्वज्य काचिदेनं
रुरोद ह चरणौ काचिदालंब्य काचित्कंठे वलंब्य च ८ उत्क्षिप्य च भुजौ काचिद्भूमौ सम प
रिवर्त्तते हतस्य वदनं दृष्ट्वा काचिन्मोहमुपागमत् ९ काचिदंके शिरः कृत्वा रुरोद मुखमी
क्षती स्नापयंती मुखं वाष्पैस्तुषारैरिव पंकजम् १० एवमार्त्ताः पतिं दृष्ट्वा रावणं निहतं
भुवि चुक्रुशुर्बहुधा शोकार्त्ताः पर्य्यदेवयन् ११ येन वित्रासितः शक्रो येन वित्रासि
तो यमः येन वैश्रवणो राजा पुष्पकेन वियोजितः १२ गंधर्वाणामृषीणां च सुराणां भावि
तात्मनाम् भयं येन महद्दत्तं सोयं शेते रणे हतः १३ असुरेभ्यः सुरेभ्यो वा पन्नगेभ्योपि वाथनः भयं
यो न विजानाति तस्येदं मानुषाद्भयम् १४ अवध्यो देवतानां यस्तथा दानवरक्षसाम् हतः
सोयं रणे शेते मानुषेण पदातिना १५ यो न शक्यः सुरैर्हन्तुं न यक्षैर्नासुरैस्तथा सोयं क रा०म० २६०

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

श्चिदिवास्त्वोमत्सुमर्यैनत्वंमितः १६ एवंवदंत्योवहुधारुरुदुस्तत्रताःस्त्रियः भूयएवचदुःखा
र्त्ताविलेपुश्चपुनःपुनः १७ अश्रृणवतात्सुहृदांसततंहितवादिनाम् मरणायाहृतासीताघा
तिताश्चनिशाचराः १८ एतैःसममिदानींतेवयमात्माचपातितः १९ ब्रुवाणोपिहितंवाक्य
मिष्टोभ्राताविभीषणः दृष्टंपरुषितोमोहात्वयात्मवधकांक्षिणा २० यदिनिर्यातितातेस्यात्सी
तारामायमैथिली ननःस्याद्व्यसनंघोरमिदंमूलहरंमहत् २१ वृत्तकामोभवेद्भ्राताराम्रोमि
त्रकुलंभवेत् वयंत्वविधवाःसर्वाःसकामाननचशत्रवः २२ त्वयापुनर्नृशंसेनसीतांसंरुध्य
तावलात् राक्षसाचवयमात्माचत्रयंतुल्यंनिपातितम् २३ नकामकरःकामंवात्तवराक्ष
सपुंगव दैवंचेष्टयतेसर्वंहतंदैवेनहन्यते २४ वानराणांविनाशोयंराक्षसानांचतेरणे त
वचैवमहावाहोदैवयोगादुपागतः २५ नैवार्थेनचकामेनविक्रमेणनचाज्ञया शक्यादैवग
तिर्लोकेनिवर्तयितुमुद्यता २६ विलेपुरेवंदीनास्ताराक्षसाधिपयोषितः कुररीइवदुःखार्त्ता
वाष्पव्याप्ता कुलेक्षणाः २७ ॥इत्यार्षेरामायणेयुद्धकाण्डेत्रयोदशोत्तरशततमःसर्गः॥ ११३

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०वा०यु० तासांविलपमानानांतथाराक्षसयोषिताम् ज्येष्ठापत्नीप्रियादीनाभर्तारंसमुदैक्षत १
२६८ दशग्रीवंहतंदृष्ट्वारामेणाचिन्त्यकर्मणा पतिंमंदोदरीतत्रकृपणापर्यदेवयत् २ ननुनामम
हाबाहोतववैश्रवणानुज क्रुद्धस्यप्रमुखेस्थातुंत्रस्यत्यपिपुरंदरः ३ ऋषयश्चमहान्ता
गंधर्वाश्चयशस्विनः ननुनामतवोद्वेगाच्चारणाश्चदिशोगताः ४ सत्वंमानुषमात्रेण
रामेणयुधिनिर्जितः नव्यपत्रपसेराजन् किमिदंराक्षसेश्वरः ५ कथंत्रैलोक्यमाक्रम्यश्रि
यावीर्येणचान्वितम् अविषह्यंजघानत्वांमानुषोवनगोचरः ६ मानुषाणामविषयेचर
तः कामरूपिणः विनाशस्तवरामेणसंयुगेनोपपद्यते ७ नचैतत्कर्मरामस्यश्रद्दधामिचमू
मुखे सर्वतः समुपेतस्यतवतेनाभिमर्शनम् ८ अथवारामरूपेणकृतांतःस्वयमागतः मा
यांतवविनाशायविधायाप्रतितर्किताम् ९ अथवावासवेनत्वंधर्षितोसिमहाबलः वास
वस्यकुतःशक्तिस्त्वांद्रष्टुमपिसंयुगे १० व्यक्तमेषमहायोगीपरमात्मासनातनः अनादिम रा०यु०
ध्यनिधनोमहतःपरमोमहान ११ तमसःपरमोधाताशंखचक्रगदाधरः श्रीवत्सवक्षा २६८

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

नित्यश्रीरजय्यः शाश्वतो ध्रुवः १२ मानुषं रूपमास्थाय विष्णुः सत्यपराक्रमः सर्वैः परिवृतो
देवैर्वानरत्वमुपागतैः १३ सर्वलोकेश्वरः श्रीमान्लोकानां हितकाम्यया महावीर्यमहाश
प्राज्ञिं देवशत्रुं भयावहम् तासःसपरीवारं हतवांस्त्वां महाद्युतिः १४ इंद्रियाणि पुराजि
त्वा जितं त्रिभुवनं त्वया स्मरद्भिरिव तद्वैरमिंद्रियैरेव निर्जितः १५ यदेव हि जनस्थाने राक्ष
सैर्बहुभिर्वृतः खरस्तु निहतो भ्राता तदा रामोन्नु मानुषः १६ यदेव नगरीं लंकां दुष्प्रवेशां
सुरैरपि प्रविष्टो हनुमान्वीर्यात्तदैव व्यथिता वयम् १७ क्रियतामविरोधश्च राघवेणेति यन्
मया उच्यमानो न गृह्णासि तस्येयं व्युष्टिरागता १८ अकस्माच्चाभिकामोसि सीतां राक्ष
सपुंगव ऐश्वर्यस्य विनाशाय देहस्य स्वजनस्य वा १९ अरुंधत्या विशिष्टां तां रोहिण्याश्चा
पि दुर्मते सीतां धर्षयता मान्यां त्वया ह्यसदृशं कृतम् २० वसुधाया वसुधां श्रियः श्रीं भ
र्तृवत्सलाम् २१ सीतां सर्वानवद्यांगीमरण्ये विजने शुभाम् आनयित्वा तु तां दीनां छ
द्मनात्मस्वदूषणं २२ अप्राप्य चैव तं कामं मैथिलीसंगमे कृतम् पतिव्रतायास्तपसा नूनं दग्धो

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा० वा० ग्रसिमे प्रभो २३ तैर्देवपन्नगगन्धर्वैस्त्वं धर्षयंस्तनुमध्यमाम् देवा हि बिभ्यते सर्वे सेन्द्राः साग्निपुरोग
३६९ माः २४ अवश्यमेव लभते फलं पापस्य कर्मणः घोरं पर्यागते काले कर्त्ता नास्त्यत्र संशयः २५
शुभकृच्छुभमाप्नोति पापकृत्पापमश्नुते विभीषणस्तु सुखं प्राप्तस्त्वं प्राप्तः पापमीदृशम् २६
सन्त्यन्याः प्रमदास्तुभ्यं रूपेणाभ्यधिकास्ततः अनंगवशमापन्नस्त्वं तु मोहान्न बुध्यसे २७
न कुलेन न रूपेण न दाक्षिण्येन मैथिली मयाधिका वा तुल्या वा त्वं तु मोहान्न बुध्यसे २८
सर्वदा सर्वभूतानां नास्ति मृत्युरलक्षणः तव तद्वदयं मृत्युर्मैथिलीकृतलक्षणः २९ सीता
निमित्तजो मृत्युस्त्वया दूरादुपाहृतः मैथिली सह रामेण विशोका विहरिष्यति अल्पपुण्या
त्वहं घोरे पतिता शोकसागरे ३० कैलासे मन्दरे मेरौ तथा चैत्ररथे वने देवोद्यानेषु सर्वेषु
विहृत्य सहिता त्वया ३१ विमानेनानुरूपेण या याम्यतुलया श्रिया पश्यन्ती विविधान्देशां
स्तांस्तांश्चित्रस्रगम्बरा ३२ भ्रंशिता कामभोगेभ्यः सास्मि वीर वधात्तव ३३ सैवान्येवास्मि
संवृत्ता धिग्राज्ञां चंचलां श्रियम् ३३ हा राजन्सुकुमारं ते सुभ्रु सुत्वक्समुन्नसम् का रा० म० ३६९

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

मुख्यास्तिष्ठंत्वस्य समंततः १३० ग्रासं दृश्य निर्भिः कालेह हरिभार प्रपीडितः प्रपतेद्राक्षसो भूमौ न
स्यान्हन्यात्प्लवंगमान् १३१ तस्य तद्वचनं श्रुत्वा राजपुत्रस्य धीमतः ते समारुरुहुर्हृष्टाः कुंभकर्णं प्लवं
गमाः १३२ कुंभकर्णस्तु संक्रुद्धः समारूढः प्लवंगमैः व्यधूनयत्तान्वेगेन दुष्टहस्तीव हस्तिपान्
१३३ तान्दृष्ट्वा निर्धुतान्रामो रुष्टोयमिति राक्षसम् समुत्पपात वेगेन धनुरुत्तममाददे १३४ क्रोध
रक्तेक्षणो वीरो निर्दहन्निव चक्षुषा राघवो राक्षसं वेगादभिदुद्राव वेगितः १३५ यूथपान्हर्षय
न्सर्वान्कुंभकर्णभयार्दितान् ३६ स चापमादाय भुजंगकल्पं दृढज्यमुग्रं तपनीयचित्रं हरीन्समा
श्वास्य समुत्पपात रामो निबद्धोत्तमतूणबाणः ३७ स वानरगणैस्तैस्तु वृतः परपुरंजयः लक्ष्मणा
नुचरो रामः संप्रतस्थे महाबलः ३८ स ददर्श महाकायं किरीटिनमरिंदमम् शोणिताप्लुतरक्ता
क्षं कुंभकर्णं महाबलम् १३९ हरीन्समभिधावंतं यथा रुष्टं दिशागजम् मार्गमाणं हरीन्क्रुद्धं राक्षसैः
परिवारितम् १४० विंध्यमंदरसंकाशं कांचनांगदभूषणम् स्रवंतं रुधिरं वक्त्राद्वर्षमेघमिवोत्थि
तम् १४१ जिह्वया परिलिह्यंतं सृक्किणी शोणितोक्षिते मृद्नंतं वानरानीकं कालांतकयमोपमम्

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

ति श्रीद्युतिभिस्तुल्यमिदं पद्मदिवाकरैः ३४ किरीटकूटोज्वलितं ताम्रास्यं दीप्तकुंडलम् म
दव्याकुललोलाक्षं भूत्वा पत्स्यानभूमिषु ३५ विविधस्रग्धरं चारु वल्गुस्मितयुतं शुभम्
तदेवाद्य तवैवं हि वक्त्रं न भ्राजते प्रभो ३६ रामसायकनिर्भिन्नं रक्तं रुधिरविस्रवैः विकीर्णमे
दोमस्तिष्कं रूक्षं स्पंदनरेणुभिः ३७ हा पश्चिमा मे संप्राप्ता दशा वैधव्यदायिनी या मया सीन्न
संबुद्धा कदाचिदपि मंदया ३८ पिता दानवराजो मे भर्ता मे राक्षसेश्वरः पुत्रो मे शक्रनिर्जेता
इत्यहं गर्विता भृशम् ३९ दृप्तारिमर्दनाः क्रूराः प्रख्यातबलपौरुषाः अकुतश्चिद्भया नाथाम
मेत्यासीन्मतिर्ध्रुवा ४० तेषामेवं प्रभावानां युष्माकं राक्षसर्षभ कथं भयमसं बुद्धं मानुषादि
दमागतम् ४१ स्निग्धेंद्रनीलसंकाशं प्रांशुशैलोपमं महत् केयूरांगदवैडूर्यमुक्ताहारस्रगुज्व
लम् ४२ कांतं विहारेष्वधिकं दीप्तं संग्रामभूमिषु विनीतं गुरुपूजासु श्रांतं शोकरपूजने भा
त्याभरणाभाभिर्यद्विद्युद्भिरिवांबुदः ४३ तदेवाद्य शरीरं ते तीक्ष्णैर्नैकशरैश्चितम्
पुनर्दुर्लभसंस्पर्शं परिष्वक्तुं न शक्यते ४४ श्वाविधः शलकैर्युक्तं लग्नैर्बाणैर्निरंतरम् स्वर्पि
दुर्लभसं

रा०वा०यु० तैर्मर्मसु भृशं छिन्नस्तथा युद्धे च धन्वना ४५ क्षितौ निपतितं राजन् प्रणामं वै रुधिरच्छवि व
२८० ज्रप्रहारपतितो विकीर्ण इव पर्वतः ४६ हा स्वप्नः सत्यमेवेदं त्वं रामेण कथं हतः त्वं मृत्योरपि
मृत्युः स्याः कथं मृत्युवशं गतः ४७ त्रैलोक्यवसुभोक्तारं त्रैलोक्योद्वेगदं महत् जेतारं लो
कपालानां क्षेप्तारं शंकरस्य च ४८ दृप्तानां निगृहीतारमाविष्कृतपराक्रमम् लोकक्षोभयि
तारं च नादैर्भूतविद्रावणम् ४९ ओजसा दृप्तवाक्यानां वक्तारं रिपुसंनिधौ स्वयूथभृत्यगोप्ता
रं हन्तारं भीमकर्मणाम् ५० हन्तारं दानवेन्द्राणां यक्षाणां च सहस्रशः निवातकवचानां तु नि
गृहीतारमाहवे ५१ नैकयज्ञविलोप्तारं त्रातारं स्वजनस्य च धर्मव्यवस्थाभेत्तारं मायास्रष्टार
माहवे ५२ देवासुरनृकन्यानामाहर्तारं ततस्ततः शत्रुस्त्रीशोकदातारं नेतारं निजसैन्यकान् ५३
लंकाद्वीपस्य गोप्तारं कर्त्तारं भीमकर्मणाम् अस्माकं कामभोगानां दातारं रथिनां वरम् ५४ ए
वंप्रभावं भर्तारं दृष्ट्वा रामेण पातितम् स्थितास्म्यहं देहमिमं धारयामि हतप्रिया ५५ शयनेषु म राम०
हार्हेषु शयित्वा राक्षसेश्वर इह कस्मात्प्रसुप्तोसि धरण्यां रेणुगुंठितः ५६ यदा मे तनयः श्री २८०

स्तो ल्लक्ष्मणेनेंद्रजिद्युधि तदा त्वदभिहता तीव्रमद्य त्वस्मि निपातिता ५७ साहं बंधुजनैर्हीना ही
नाथेन च त्वया विहीना कामभोगैश्च शोचिष्ये शाश्वतीः समाः ५८ प्रपन्नो दीर्घमध्वानं रा
जन्न द्य सुदुर्गमम् नय मामपि दुःखार्त्तां न वर्त्तिष्ये त्वया ५९ कस्मात्त्वं मां विहायेह क्व परां गंतु
मिच्छसि दीनां विलपतीं मंदां किं च मां नाभिभाषसे ६० दृष्ट्वा न खल्वभिक्रुद्धो मामिहानवकुं
ठिताम् निर्गतां नगरद्वारात्पद्भ्यामेवागतां प्रभो ६१ पश्येष्टदारदारांस्ते भ्रष्टलज्जावकुंठना
न् बहिर्निष्पतितान्सर्वान्कथं दृष्ट्वा न कुप्यसि ६२ अयं क्रीडासहायस्ते नाथ लालप्यते जनः
न चैनमाश्वासयसे किं वा न बहुमन्यसे ६३ यास्त्वया विधवा राजन्कृता नैकाः कुलस्त्रियः पति
व्रता धर्मनिरता गुरुशुश्रूषणे रता ६४ ताभिः शोकाभितप्ताभिः शप्तः परवशं गतः त्वया विप्रकृ
ताभिश्च यदा शप्तं तदागतम् ६५ प्रवादः सत्य एवायं त्वां प्रति प्रायशो नृप पतिव्रतानां नाकस्मा
त्पतंत्यश्रूणि भूतले ६६ कथं च नाम ते राजँल्लोकानाक्रम्य तेजसा नारी चौर्यमिदं क्षुद्रं कृ
तं शौंडीर्यमानिना ६७ अपनीयाश्रमाद्रामं यन्मृगच्छद्मना त्वया आनीता रामपत्नी सा तत्ते का

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा० वा० कुन्तर्यत्नद्विरणाम् ६८ कार्त्येयं चनतेपुर्दे कदाचित्संस्मराम्यहम् ततु भाग्यविपर्यासान्नूनं ते ते पक्कलन्द
२७०१ णाम् ६९ अतीतानागतार्थज्ञो वर्तमानविचक्षणः मैथिलीमाहृतां दृष्ट्वा ध्यात्वा निश्वस्य चा
पतम् ७० सत्यवाक्स महाबाहुर्देवरो मे यदब्रवीत् अयं राक्षसमुख्यानां विनाशः समुपस्थि
तः ७१ कामक्रोधसमुत्थेन व्यसनेन प्रसंगिना निवृत्तस्त्वत्कृतेनार्थः सोऽयं मूलहरो महान् ७
२ त्वया कृतमिदं सर्वमनाथं रक्षसां कुलम् ७३ नहि त्वं शोचितव्यो मे प्रख्यातबलपौरुषः
स्त्रीस्वभावात्तु मे बुद्धिः कारुण्ये परिवर्तते ७४ सुकृतं दुष्कृतं च त्वं गृहीत्वा स्वां गतिं गतः आ
त्मानमनुशोचामि त्वद्विनाशेन दुःखिताम् ७५ सुहृदां हितकामानां न श्रुतं वचनं त्वया भ्रा
तॄणां चैव कार्त्स्न्येन हितमुक्तं दशानन ७६ हेत्वर्थयुक्तं विधिवच्छ्रेयस्करमदारुणम् विभी
षणेनाभिहितं न कृतं हेतुमत्त्वया ७७ मारीचकुम्भकर्णाभ्यां वाक्यं मम पितुस्तथा न कृतं वी
र्यमत्तेन तस्येदं फलमीदृशम् ७८ नीलजीमूतसंकाश पीताम्बरशुभांगद स्वगात्राणि वि
निक्षिप्य किं शेषे रुधिराप्लुतः ७९ प्रसुप्त इव शोकार्त्ता किं मां न प्रतिभाषसे महावीर्यस्य दक्ष राम० २७०१

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

स्य संयुगेष्वपलायिनः यातुधानस्य दौहित्री किं मां न प्रतिभाषसे ८० उत्तिष्ठोत्तिष्ठ किं शेषे येन
वे परिभवे कृते अद्य वै निर्भया लंकां प्रविष्टाः सूर्यरश्मयः ८१ येन सूदयसे शत्रून् समरेषु
र्षवर्चसा वज्रं वज्रधरस्येव सोयं ते सततार्चितः ८२ रणे बहुप्रहरणे हेमजालपरिष्कृतः
परिघो व्यवकीर्णास्ति बाणैर्भिन्नः सहस्रधा ८३ प्रियामिवोपगूह्य त्वं शेषे समरमेदिनीम्
अप्रियामिव कस्मान्मां नेच्छस्यभिभाषितुम् धिगस्तु हृदयं यस्या ममेदं न सहस्रधा त्व
यि पंचत्वमापन्ने फलत्येतच्छोकपीडितम् ८५ इत्येवं विलपंती सा बाष्पपर्याकुलेक्षणा
स्नेहाक्रुष्टेन हृदया तदा मोहमुपागतम् ८६ कश्मलाभिहता सन्ना बभौ सा रणवरोरसि
६ संध्यानुरक्तैर्जलदैर्दीप्ता विद्युदिवोज्ज्वला ८७ तथागतां समुत्थाप्य सपत्न्यस्तां भृशातुराः
पर्यवस्थापयामासू रुदंत्यो रुदतीं भृशम् ८८ किं ते न विदिता देवी लोकानां स्थितिरध्रुव
दशाविभागपर्यायैर्नारीणां चंचला श्रिया ८९ इत्येवमुच्यमाना सा सशब्दं प्ररुरोद ह स्नाप
यंती स्तनमुखौ स्वस्ते नावस्त्राम्बुविस्रवैः ९० एतस्मिन्नंतरे रामो विभीषणमुवाच ह संस्कारः

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० वा० यु० क्रियतांभ्रातुः स्त्रीगणाः परिसांत्व्यताम ९१ तंप्रश्रयितमव्यग्रोरामंश्रुतवाक्योविभीषणः विमृ
२७२ श्यबुध्याधर्मज्ञोधर्मार्थसहितंवचः ९२ रामस्यैवानुवृत्यर्थमुत्तरंप्रत्यभाषत ९३ त्यक्तध
र्मव्रतंक्रूरंनृशंसमनृतंतथा नाहमर्हामिसंस्कर्तुंपरदाराभिमर्शिनम ९३ भ्रातृरूपोहिमेश
त्रुरेषसर्वाहितेरतः रावणोनार्हतेपूजांपूज्योपिगुरुगौरवात ९४ नृशंसइतिमांरामवक्ष्य
तिमनुजाभुवि श्रुत्वातस्यगुणान्सर्वेवक्ष्यंतिसुकृतंपुनः ९५ तच्छ्रुत्वापरमःप्रीतोरामोधर्म
भृतांवरः विभीषणमुवाचेदंवाक्यज्ञोवाक्यकोविदम ९६ तवापिमेप्रियंकार्यंत्वत्प्रभा
वाच्चमेजितम् अवश्यंतुक्षमंवाच्योमयात्वंराक्षसेश्वर ९७ अधर्मानृतसंयुक्तःकामंत्वेष
निशाचरः तेजस्वीबलवान्शूरःसंग्रामेषुचनित्यशः ९८ शतक्रतुमुखैर्देवैःश्रूयतेनपरा
जितः महात्माबलसंपन्नोरावणोलोकरावणः ९९ मरणांतानिवैराणिनिवृत्तंनःप्रयोजन
म् क्रियतामस्यसंस्कारोममाप्येषयथातवा१०० त्वत्सकाशान्महाबाहोसंस्कारंविधिपू राम०
र्वकम् क्षिप्रमर्हतिधर्मज्ञत्वंयशोभाग्भविष्यसि १०१ राघवस्यवचःश्रुत्वात्वरमाणो २७२

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

विभीषणः संस्कारयितुमारेभे भ्रातरं रावणं हतम् २ स प्रविश्य पुरीं लंकां राक्षसेंद्रो विभीषणः
रावणस्याग्निहोत्रं तु निर्यापयति सत्वरम् ३ शकटान्दारुपात्राणि अग्नीन्वै याजकांस्तथा
तथा चंदनकाष्ठानि काष्ठानि विविधानि च ४ अगरूणि सुगंधीनि गंधांश्च सुरभींस्तथा
मणिमुक्ताप्रवालानि निर्यापयति राक्षसः ५ आजगाम मुहूर्तेन राक्षसैः परिवारितः ततो
माल्यवता सार्धं क्रियामेव चकार सः १०६ सौवर्णीं शिबिकां दिव्यामारोप्य क्षौमवासस
म् रावणं राक्षसाधीशमश्रुपूर्णमुखा द्विजाः तूर्यघोषैश्च विविधैस्तुवद्भिश्चाभिनंदित
म् ७ पताकाभिश्च चित्राभिः सुमनोभिश्च चित्रिताम् उत्क्षिप्य शिबिकां तां तु विभीषणपुरोग
माः ८ दक्षिणाभिमुखाः सर्वे गृह्य काष्ठानि भेजिरे ८ अग्नयो दीप्यमानास्ते तदाध्वर्युस
मीरिताः शरणाभिगताः सर्वे पुरस्तात्तस्य ते ययुः ९ अंतःपुराणि सर्वाणि रुदमानानि सत्व
रम् १० तोनुययुस्तानि प्लवमानानि सर्वतः रावणं प्रयते देशे स्थाप्य ते भृशदुःखिताः
११० चितां चंदनकाष्ठैश्च पद्मकोशीरचंदनैः ब्राह्म्या संवेशयामासु राङ्कवास्तरसंवृताम्

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०वा०यु० प्रचक्रू राक्षसेंद्रस्य पितृमेधमनुत्तमम् वेदिं च दक्षिणप्राचीं यथास्थानं च पावकम् १२ पृ
२८३ षदाज्येन संपूर्णां स्रुवं स्कंधे प्रचिक्षिपुः पादयोः शकटं प्रापुरूर्वोश्चोलूखलं तदा १३ दारु
पात्राणि सर्वाणि अरणिं चोत्तरारणिम् दत्वा तु मुसलं चान्यं यथास्थानं विचक्रमुः १४ शा
स्त्रदृष्टेन विधिना महर्षिविहितेन च तत्र मेध्यं पशुं हत्वा राक्षसेंद्रस्य राक्षसाः १५ परिस्तरणि
कां राज्ञो घृताक्तां समवेशयन् १५ गंधैर्माल्यैरलंकृत्वा रावणं दीनमानसाः विभीषणसहा
यास्ते वस्त्रैश्च विविधैरपि लाजैरवकिरंति स्म वाष्पपूर्णमुखास्तदा १६ स ददौ पावकं तस्य
विधियुक्तं विभीषणः स्नात्वा चैवार्द्रवस्त्रेण तिलान् दर्भविमिश्रितान् उदकेन च संमिश्रा
न् प्रदाय विधिपूर्वकम् १७ ताः स्त्रियोऽनुनयामास सांत्वमुक्त्वा पुनः पुनः गम्यतामिति ताः सर्वा
विविशुर्नगरं ततः १८ प्रविष्टासु च सर्वासु राक्षसीषु विभीषणः रामपार्श्वमुपागम्य तदाति राम०
ष्ठद्विनीतवत् १९ रामोऽपि सह सैन्येन ससुग्रीवः सलक्ष्मणः हर्षं लेभे रिपुं हत्वा यथा वृत्रं शत २८३
क्रतुः ॥१२०॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये युद्धकाण्डे चतुर्दशोत्तरशततमः सर्गः ॥११४॥

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

तेरावणवधं दृष्ट्वा देवगंधर्वदानवाः जग्मुस्तैस्तैर्विमानैः स्वैः कथयंतः शुभाः कथाः १ रावण
स्य वधं घोरं राघवस्य पराक्रमम् सुयुद्धं वानराणां च सुग्रीवस्य च मंत्रितम् २ अनुरागं च वीर्यं च
मारुतेर्लक्ष्मणस्य च कथयंतो महाभागाः जग्मुर्हृष्टा यथागतम् ३ राघवो पि रथं दिव्यमिं
द्रदत्तं शिखिप्रभम् अनुज्ञाप्य महाबाहुर्मातलिं प्रत्यपूजयत् ४ राघवेणाभ्यनुज्ञातो मातलिः
शक्रसारथिः दिव्यं तं रथमास्थाय दिवमेवारुरोह सः ५ तस्मिंस्तु दिवमारूढे सुरसारथि २
सत्तमे राघवः परमप्रीतः सुग्रीवं परिषस्वजे ६ परिष्वज्य च सुग्रीवं लक्ष्मणेनाभिवा
दितः पूज्यमानो हरिश्रेष्ठैराजगाम बलालयम् ७ अब्रवीच्च तदा रामः समीपपरिवर्तिनम्
सौमित्रिं सत्वसंपन्नं लक्ष्मणं दीप्ततेजसम् ८ बिभीषणमिमं सौम्य लंकायामभिषेचय अनु
रक्तं च भक्तं च मम चैवोपकारिणम् ९ एषनः परमः कामो यदिमं रावणानुज लंकायां सौम्य
पश्येयमभिषिक्तं विभीषणम् १० एवमुक्तस्तु सौमित्री राघवेण महात्मना तथेत्युक्त्वा तु
संहृष्टः सौवर्णं घटमाददे ११ तं घटं वानरेंद्राणां हस्ते दत्वा मनोजवान् आदिदेश महास

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० वा० यु० त्वान्समुद्रात्सलिलं त्वानय १२ आदिदेश शीघ्रं ततो गत्वा वानरास्ते महाबलाः आगतास्तु जलं गृ
२८४ ह्य समुद्राद्वानरोत्तमाः १३ ततस्त्वेकं घटं गृह्य संस्थाप्य परमासने घटेन तेन सौमित्रिरभिषि
ञ्चद्विभीषणम् १४ लंकायां रक्षसां मध्ये राजानं रामशासनात् विधिना मंत्रदृष्टेन सुहृद्गण
समावृतः १५ अभ्यषिंचत्स धर्मात्मा शुद्धात्मानं विभीषणम् तस्यामात्या जहृषिरे भक्ता ये
चास्य राक्षसाः १६ दृष्ट्वाभिषिक्तं लंकायां राक्षसेंद्रं विभीषणम् राघवः परमां प्रीतिमाज
गाम सलक्ष्मणः १७ स तद्राज्यं महत्प्राप्य रामदत्तं विभीषणः संसांत्वयित्वा प्रकृतीस्ततो रा
ममुपागमत् १८ अक्षतान्मोदकाँल्लाजान्दिव्याः सुमनसस्तदा आजह्रुरथ संहृष्टाः
पौरास्तस्मै निशाचराः १९ स तान्गृहीत्वा दुर्धर्षो राघवाय न्यवेदयत् मंगल्यं मंगलं सर्वं ल
क्ष्मणाय च वीर्यवान् २० कृतकार्यं समृद्धार्थं दृष्ट्वा रामो विभीषणम् प्रतिजग्राह तत्सर्वं त
स्यैव प्रियकाम्यया २१ ततः शैलोपमं वीरं प्रांजलिं पुरतः स्थितम् अब्रवीद्राघवो वाक्यं ह
नूमंतं प्लवंगमम् २२ अनुमान्य महाराजमिमं सौम्य विभीषणम् गच्छ सौम्य पुरीं लंकामनुज्ञा राम० २८४

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०बा०पु० ४२ तं दृष्ट्वा राघवश्रेष्ठः प्रदीप्तानलवर्चसम् विस्फारयामास तदा कार्मुकं पुरुषर्षभः ४३ ततस्य
२७ चापनिर्घोषात्कुपितो राक्षसर्षभः ॥ अमृष्यमाणस्तं घोषमभिदुद्राव राघवम् १४४ ततस्तु वातोद्धत
मेघकल्पं भुजंगराजोत्तमभोगबाहुम् तमापतंतं धरणीधराभमुवाच रामो युधि कुंभकर्णम् ४५
॥ आगच्छ रक्षोधिप मा विषादमवस्थितोहं प्रगृहीतचापः ॥ अवेहि मां शक्रसपत्न रामं भवान्मुहूर्ता
द्भविता विचेताः १४६ रामोयमिति विज्ञाय जहास विकृतस्वनम् ॥ अभ्यधावत्तं क्रुद्धो हरीन्वि
द्रावयन्रणे दारयन्निव सर्वेषां हृदयानि वनौकसाम् १४७ प्रहस्य विकृतं भीमं स मेघस्तनितो
पमम् कुंभकर्णो महातेजा राघवं वाक्यमब्रवीत् १४८ नाहं विराधो विज्ञेयो न कबंधो खरोन च
न चवाली न मारीचः कुंभकर्णोहमागतम् १४९ पश्य मे मुद्गरं भीमं सर्वकालायसं महत् ॥ अनेन
निर्जिता देवा दानवाश्च पुरा मया १५० विकर्णनासइति मां नावज्ञातुं त्वमर्हसि ॥ अल्यापि हि न
मे पीडा कर्णनासाविकर्तनात् १५१ दर्शयेक्ष्वाकुशार्दूल वीर्यं गात्रेषु मे नघ ततस्त्वां भक्ष
यिष्यामि दृष्टपौरुषविक्रमम् १५२ स कुंभकर्णस्य वचो निशम्य रामः सुपुंखान् विससर्ज बाणान् राम० २७

स

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

यथायथाविधि प्रविश्य रावणागृहं विजयेनाभिनंद्य च वैदेह्यामां कुशलिनं ससुग्रीवं सलक्ष्म
णम् श्राचक्ष्व वदतां श्रेष्ठ रावणं च मया हतम् २४ प्रियमेतदुदाहृत्य मैथिल्यास्त्वं हरीश्वरः प्र
तिगृह्य च संदेशमुपावर्तितुमर्हसि ॥२५॥ इत्यार्षे श्रीमद्रामायणे युद्धकाण्डे पंचदशोत्तरशततमः सर्गः
११५ इति प्रतिसमादिष्टो हनूमान्मारुतात्मजः प्रविवेश पुरीं लंकां पूज्यमानो निशाचरैः १ प्रविश्य
च महातेजा रावणस्य निवेशनम् ददर्श मृजया हीनां सातंकामिव रोहिणीम् २ वृक्षमूले निरानंदां
राक्षसीभिः परिवृताम् निभृतः प्रणतः प्रह्वः सोभिगम्याभिवाद्य च ३ दृष्ट्वा तमागतं देवी हनूमंतं म
हाबलम् तूष्णीमास्ते तदा दृष्ट्वा स्मृत्वा प्रमुदिताभवत् ४ सौम्यं तस्या मुखं दृष्ट्वा हनूमान्मारुतात्मजः
रामस्य वचनात्सर्वमाख्यातुमुपचक्रमे ५ वैदेहि कुशली रामः ससुग्रीवः सलक्ष्मणः विभीषणसहा
यश्च हरीणां सहितो बलैः ६ कुशलं चाह सिद्धार्थो हतशत्रुररिंदमः विभीषणसहायेन रामेण
हरिभिः सह निहतो रावणो देवि लक्ष्मणस्य नयेन च प्रियमाख्यामि ते देवि त्वां च भूयः सभाजये
८ दिष्ट्या जीवसि धर्मज्ञे जयामे प्रतिगृह्यताम ९ ष्ट्वा च कुशले रामो वीरस्त्वां रघुनंदनः ९ स

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा० वा० यु० ब्रवीत्परमप्रीतः कृतार्थेनांतरात्मना दिष्ट्यावर्धसि धर्मज्ञे मज्जयेनचसंयुगे १० लब्धो
२९५ यंविजयःसीतेस्वस्थाभवगतज्वरा रावणोनिहतःपापःसामात्यःससुतोमृधे ११ मयाह्यल
ब्धनिद्रेणधृतेनतवनिर्जये प्रतिज्ञैषाविनिस्तीर्णाबद्ध्वासेतुंमहोदधौ १२ संभ्रमश्चनकर्त
व्योवर्तंत्यारावणालये विभीषणविधेयंहिलंकैश्वर्यमिदंकृतम् १३ तदाश्वसिहिवि
श्वस्तास्वगृहेपरिवर्तसे [illegible]यंचाभ्येतिसंहृष्टस्त्वद्दर्शनसमुत्सुकः १४ एवमुक्ताहनुमता
सीताशशिनिभानना प्रहर्षेणावरुद्धासाव्याजहारनकिंचन १५ अब्रवीच्चहरिश्रेष्ठः सीतामप्र
तिजल्पतीम् किंत्वंचिंतयसेदेविकिंचमांनाभिभाषसे १६ एवमुक्ताहनुमतासीताधर्मेव्य
वस्थिता अब्रवीत्परमप्रीताहर्षगद्गदयागिरा १७ प्रियमेतदुपश्रुत्यभर्तुर्विजयसंश्रितम्
प्रहर्षवशमापन्नानिर्वाक्यास्मिक्षणांतरम् १८ नहिपश्यामिसदृशंचिंतयंतीप्लवंगम मत्प्रि
याख्यानकस्येहतवप्रत्यभिनंदनम् १९ नचपश्यामितत्सौम्यपृथिव्यामपिवानर सदृशंम
त्प्रियाख्यानेतवदातुंभवेत्समम् २० हिरण्यंवासुवर्णंवारत्नानिविविधानिच राज्यंवात्रिषुलो राम० २९५

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

के पुनैतत्तदर्हति भाषितुम् २१ एवमुक्तस्तु वैदेह्या प्रत्युवाच प्लवंगमः प्रगृहीतांजलिर्वाक्यं सीतायाः
प्रमुखे स्थितः २२ भर्तुः प्रियहिते युक्ते भर्तुर्विजयकांक्षिणी स्निग्धमेवंविधं वाक्यं त्वमेवार्हसि भाषि
तुम् २३ तवैतद्वचनं सौम्यं सारवत् स्निग्धमेव च स्त्रीणां ईदृग्विधा चापि देवराज्याद्धि प्राप्य
ते २४ स्पर्धत ब्रह्मणा प्रासादे वा राज्याद्यो गुणाः हत्त शत्रुं विजयिनं रामं पश्यामि सुस्थितम् २५
तस्यास्तद्वचनं श्रुत्वा मैथिली जनकात्मजा ततः शुभतरं वाक्यमुवाच पवनात्मजम् २६ श्रुति
नदाणसंपन्नं माधुर्यगुणभूषितम् बुध्या ह्यष्टांगया युक्तं त्वमेवार्हसि भाषितुम् २७ श्लाघ
नीयोनिलस्य त्वं सुतः परमधार्मिकः बलं शौर्यं श्रुतं सत्त्वं विक्रमो दार्ढ्यमुत्तमम् २८ तेजः क्ष
मा धृतिः स्थैर्यं विनीतत्वं न संशयः एते चान्ये च बहवो गुणास्त्वय्येव शोभनाः २९ अथोवा
च पुनः सीतामसंभ्रांतो विनीतवत् प्रगृहीतांजलिर्हर्षात् सीतायाः प्रमुखे स्थितः ३० इमां तु
खलु राक्षस्यो यदि त्वमनुमन्यसे हंतुमिच्छाम्यहं सर्वा याभिस्त्वं तर्जिता पुरा ३१ क्लिश्यंतीं प
तिदेवां त्वामशोकवनिकांगताम् घोररूपसमाचाराः क्रूराः क्रूरतरेक्षणाः ३३ राक्षस्यो दारुणा

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० वा० यु० कृपा वरमेतत्त्वपकुर्मे मुष्टिभिः पाणिभिः सर्वाश्चरणैश्चापि शोभने २३ इच्छामि विविधै
११६ र्घातैर्हन्तुमेताः सुदारुणाः घोरैर्जानुप्रहारैश्च दशनानां च पातनैः ३४ कृन्तनैः कर्णना
सानां केशानां लुञ्चनैस्तथा नखैः शुष्कमुखैश्चैव दारुणैर्लङ्घनैर्हतैः हनुम ३५ विभिन्नशंकु
र्णा वांसपार्श्वकेश्चकलेवरैः निपात्य हंतुमिच्छामि तव विप्रियकारिणीः ३६ एवं प्रकारैर्बहुभि
र्विप्रकारैर्यशस्विनि हंतुमिच्छाम्यहं देवि तवेमाः कृतकिल्विषाः ३७ एवमुक्ता
हनुमता वैदेही जनकात्मजा उवाच धर्मसहितं हनूमंतं यशस्विनी ३८ राजसंश्रयवश्यानां कुर्वतीनां
पराज्ञया विधेयानां च दासीनां कः कुप्येद्वानरोत्तम ३९ भाग्यवैषम्ययोगेन पुरा दुश्चरितेन च
मयैतत्प्राप्यते सर्वं स्वकृतं ह्युपभुज्यते ४० प्राप्तव्यं तु दशायोगान्मयैतदिति निश्चितम् दासीनां
रावणस्याहं मर्षयामीह दुर्बला ४१ आज्ञप्ता रावणेनैता राक्षस्यो मामतर्जयन् हते तस्मिन्न कुर्वंति
तर्जनं वानरोत्तम ४२ अयं व्याघ्रसमीपे तु पुराणो धर्मसंहितः ऋक्षेण गीतः श्लोकोस्ति तं निबो
ध प्लवंगम ४३ न परः पापमादत्ते परेषां पापकर्मणाम् समयो रक्षितव्यस्तु संतश्चारित्रभूषणाः ४४ रा० ११६

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

पापनां वा शुभानां वा वधार्हाणां प्लवंगम कार्यं करुणमार्येण न कश्चिन्नापराध्यति ४५ लोकहिंसा
विहाराणां रक्षसां कामरूपिणाम् कुर्वतामपि पापानि नैव कार्यमशोभनम् ४६ एवमुक्तस्तु हनुमा
न्सीतया वाक्यकोविदः प्रत्युवाच ततः सीतां रामपत्नीं यशस्विनीम् ४७ युक्ता रामस्य भवती धर्मप
त्नी यशस्विनी प्रतिसंदिश मां देवि गमिष्ये यत्र राघवः ४८ एवमुक्ता हनुमता वैदेही जनकात्मजा
अब्रवीद् द्रष्टुमिच्छामि भर्तारं वानरोत्तम ४९ तस्यास्तद्वचनं श्रुत्वा हनूमान्पवनात्मजः हर्षयन्मै
थिलीं वाक्यमुवाचेदं महाद्युतिः ५० पूर्णचंद्राननं रामं द्रक्ष्यस्यार्ये सलक्ष्मणम् स्थिरमित्रं ह
तामित्रं शचीव त्रिदशेश्वरम् ५१ तामेवमुक्त्वा राजंतीं सीतां साक्षादिव श्रियम् आजगाम महा
तेजा हनूमान्यत्र राघवः ५२ स यदि हरिवरस्ततो हनूमान्प्रतिवचनं जनकेश्वरात्मजायाः कथि
तमकथयद्वथाक्रमेण त्रिदशवरप्रतिमाय राघवाय ॥५३॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये
युद्धकाण्डे षोडशोत्तरशततमः सर्गः ॥११६॥ स उवाच महाप्राज्ञमभिगम्य प्लवंगमः रामं वचनमर्थ
ज्ञो वरं सर्वधनुष्मताम् १ यन्निमित्तोऽयमारंभः कर्मणां च फलोदयः सीतां तां शोकसंतप्तां मे

षट्पंचाशंति वर्तमानकथा समाप्ता

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० वा० यु० पश्यन्तीं द्रष्टुमर्हसि २ साहि शोकसमाविष्टा बाष्पपर्याकुलेक्षणा मैथिली विजयं श्रुत्वा तव हर्षमुपागम
त ३ पूर्वकात्प्रत्ययाच्चाहमुक्तो विश्वस्तया तया भर्तारं द्रष्टुमिच्छामि कृतार्थं सहलक्ष्मणम् ४ एवमुक्तो
हनुमता रामो धर्मभृतां वरः आगच्छत्सहसा ध्यानमीषद्बाष्पपरिप्लुतः ५ स दीर्घमुष्णं निश्वस्य
मेदिनीमवलोकयन् उवाच मेघसंकाशं विभीषणमुपस्थितम् ६ दिव्यांगरागां वैदेहीं दिव्याभ
रणभूषिताम् इह सीतां शिरःस्नातामुपस्थापय माचिरम् ७ एवमुक्तस्तु रामेण त्वरमाणो विभीषणः
प्रविश्यान्तःपुरं सीतां स्वाभिः स्त्रीभिरचोदयत् ८ ततः सीतां महाभागां दृष्ट्वोवाच विभीषणः मूर्द्ध्नि ब
द्धाञ्जलिः श्रीमान्विनीतो राक्षसेश्वरः ९ दिव्यांगरागा वैदेही दिव्याभरणभूषिता यानमारोह भ
द्रं ते भर्ता त्वां द्रष्टुमिच्छति एवमुक्ता तु वैदेही प्रत्युवाच विभीषणम् अस्नात्वा द्रष्टुमिच्छामि भर्तारं रा
क्षसेश्वर ११ तस्यास्तद्वचनं श्रुत्वा प्रत्युवाच विभीषणः यथाह रामो भर्ता ते तत्तथा कर्तुमर्हसि १२
तस्य तद्वचनं श्रुत्वा मैथिली पतिदेवता भर्तृभक्तिव्रता साध्वी तथेति प्रत्यभाषत १३ ततः सीतां शिरः राम०
स्नातां युवतीभिरलंकृताम् महार्हाभरणोपेतां महार्हवरधारिणीम् १४ आरोप्य शिबिकां दीप्तां

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

परार्ध्यांवरसंवृताम् रक्षोभिर्बहुभिर्गुप्तामाजहारविभीषणः १५ सोभिगम्यमहात्मानंज्ञात्वाभिध्यान
मास्थितम् प्रणतश्चप्रहृष्टश्चप्राप्तांसीतांन्यवेदयत् १६ तामागतामुपश्रुत्यरक्षोगृहचिरोषिताम्
हर्षोदैन्यंचरोषश्चत्रयंराघवमाविशत् १७ ततःपार्श्वगतंदृष्ट्वासविमर्शंविचारयन् विभीषणमिदं
वाक्यमहृष्टोराघवोब्रवीत् १८ राक्षसाधिपतेसौम्यनित्यंमद्विजयेरत वैदेहीसंनिकर्षंमेशीघ्रं
समुपागच्छतु १९ तस्यतद्वचनंश्रुत्वाराघवस्यविभीषणः तूर्णमुत्सारणेयत्नंकारयामाससर्वतः २०
कंचुकोष्णीषिणस्तत्रवेत्रझर्झरपाणयः उत्सारयंतःपुरुषान्समंतात्परिचक्रमुः २१ ऋक्षाणां
वानराणांचराक्षसानांचसर्वशः वृंदान्युत्सार्यमाणानिदूरमुत्तस्थुरंततः २२ तेषामुत्सार्यमाणा
नांसर्वेषांध्वनिरुत्थितः वायुनोद्वर्तमानस्यसमुद्रस्येवनिस्वनः २३ उत्सार्यमाणांस्तान्दृष्ट्वास
मंताज्जातसंभ्रमान् दाक्षिण्यात्तदमर्षाच्चवारयामासराघवः २४ संरंभाच्चाब्रवीद्रामश्चक्षुषाप्रद
हन्निव विभीषणंमहाप्राज्ञंसोपालंभमिदंवचः २५ किमर्थंमामनादृत्यक्लिश्यतेयंत्वयाजनः नि
वर्तयैनमुद्वेगंजनोयंस्वजनोमम २६ नगृहाणिनवस्त्राणिनप्राकारास्तिरस्क्रियाः नेदृशारा

भ

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

कृ

रा० वा० यु० नेदृशा राजसत्काराः वृत्तमावरणं स्त्रियः २७ व्यसने षु न कृच्छ्रेषु न युद्धेषु स्वयंवरे न क्रतौ नो विवाहे वा दर्शनं
२७८ दूष्यते स्त्रियः २८ सैषा युद्धगता चैव कृच्छ्रे महति च स्थिता दर्शनेनास्या दोषः स्यान्मत्समीपे विशेषतः
२९ तदानय समीपं मे शीघ्रमेनां विभीषण सीता पश्यतु मामेषा सुहृद्गणवृतं स्थितम् ३० एव
मुक्तस्तु रामेण सविमर्शो विभीषणः रामस्योपानयत्सीतां सन्निकर्षं विभीषणः ३१ ततो लक्ष्म
णसुग्रीवौ हनूमांश्च प्लवंगमः निशम्य वाक्यं रामस्य बभूवुर्व्यथिता भृशम् ३२ कलत्रनिरपेक्षैश्चेङ्गि
तैरस्य दारुणैः अप्रीतमिव सीतायां तर्कयन्ति स्म राघवम् ३३ लज्जया त्ववलीयन्ती स्वेषु गात्रेषु
मैथिली विभीषणेनानुगता भर्तारं साभ्यवर्तत ३४ सा वस्त्रसंरुद्धमुखी लज्जया जनसंसदि रुरोदा
साद्य भर्तारमार्यपुत्रेति भाषिणी ३५ विस्मयाच्च प्रहर्षाच्च स्नेहाच्च पतिदेवता उदैक्षत मुखं भर्तुः सौ
म्यं सौम्यतरानना ३६ अथ समपनुदन्मनःक्लमं सा सुचिरमुदीक्ष्य मुखं प्रियस्य वदनमुदितपूर्ण
चंद्रकांतं विमलशशांकनिभानना तदासीत् ॥३७॥ इत्यार्षे रामायणे युद्धकाण्डे सप्तदशोत्तरशततमः राम०
सर्गः ॥११७॥ तां तु पार्श्वे स्थितां प्रह्वां रामः संप्रेक्ष्य मैथिलीम् हृदयांतर्गतं भावं व्याहर्तुमुपचक्रमे १ २७८

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

एषासिनिर्जिताभद्रे शत्रुंजित्वामयारणे पौरुषाद्यदनुष्ठेयंतदेतदुपपादितं २ गतोस्म्यम
र्षस्यांतंधर्षणासंप्रमार्जिता ॥ अवमानश्चशत्रुश्चमयायुगपदुद्धृतौ ३ ॥ अद्यमेपौरुषंदृ
ष्टमद्यमेसफलःश्रमः ॥ अद्यतीर्णप्रतिज्ञत्वात्प्रभवामीहचात्मनः ४ यात्वंविरहितानी
ताचलचित्तेनरक्षसा दैवसंपादितोदोषोमानुषेणमयाजितः ५ संप्राप्तमवमानंयस्ते
ए कि जसानप्रमार्जति कस्तस्यपुरुषार्थोस्तिपुरुषस्याल्पतेजसः ६ लंघनंचसमुद्रस्यलंकायाश्चाव
मर्दनम् सफलंतस्यचश्लाघ्यमद्यकर्महनूमतः ७ युद्धेविक्रमतश्चैवहितंमंत्रयतश्चनः
सुग्रीवस्यससैन्यस्यसफलोद्यपरिश्रमः ८ निर्गुणंभ्रातरंत्यक्त्वायोमांस्वयमुपस्थितः
विभीषणस्यभक्तस्यसफलोद्यपरिश्रमः ९ इत्येवंवदतस्तस्यसीतारामस्यतद्वचः मृगी
वोत्फुल्लनयनाबभूवाश्रुपरिप्लुता १० पश्यतस्तांतुरामस्यभूयःक्रोधोभ्यवर्द्धत प्रभू
ताज्यावसिक्तस्यपावकस्येवदीप्यतः ११ सबद्ध्वाभ्रुकुटींवक्त्रेतिर्यक्प्रेक्षितलोचनः अ
ब्रवीत्परुषंसीतांमध्येवानररक्षसाम् १२ यत्कर्तव्यंमनुष्येणधर्षणांपरिमार्जता मयापि

रा० वा० पु० तन्मत्तं सीते शत्रुहन्तादमर्षिणात् १३ निर्जिताजीवलोकस्य तपसा भावितात्मना अग
२७९ स्त्येन दुराधर्षा मुनिना दक्षिणा दिक् १४ विदितश्चास्तु भद्रं ते योपरशापरिश्रमः सती
र्णाः समुद्रं वीर्यान्त्वदर्थमपाकृतः १५ रक्षतानुमयावृत्तमपवादं च सर्वशः प्रख्या
तस्यात्मवंशस्य वंशो च परिरक्षिता १६ प्राप्तचारित्रसन्देहा मम प्रतिमुखे स्थिता दीपो
नेत्रातुरस्येव प्रतिकूलासि मे दृढम् १७ तद्गच्छ त्वाभ्यनुज्ञाता यथेष्टं जनकात्मजे
एता दश दिशो भद्रे कार्यमस्ति न मे त्वया १८ कः पुमान्हि कुले जातः स्त्रियं परगृहोषि
ताम् तेजस्वी पुनरादद्यात्सुहृल्लोभेन चेतसा १९ रावणाङ्कपरिक्लिष्टां दृष्टां दुष्टेन
चक्षुषा कथं त्वां पुनरादद्यां कुलं व्यपदिशन्महत् २० यदर्थं निर्जिता मे त्वं यशः प्रत्या
हृतं मया नास्ति मे त्वय्यभिष्वङ्गो यथेष्टं गम्यतामितः २१ इति प्रव्याहृतं भद्रे मयैतत्कृत
बुद्धिना लक्ष्मणे भरते वा त्वं कुरु बुद्धिं यथासुखम् २२ सुग्रीवे वानरेन्द्रे वा राक्षसेन्द्रे विभी राम०
षणे निवेशय मनः सीते यथा वा सुखमात्मनः २३ न हि त्वां रावणो दृष्ट्वा दिव्यरूपां मनोरमाम् २७९

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

द्रु तैस्तु हतो वज्रसमानवेगैर्न्न चुक्षुभे न व्यथते स्म सारिः १५३ तैः सायकैः सालवनाग्निकृत्तो वाहनीहतो वानरपुं
गवश्च ते कुंभकर्णस्य तदा शरीरे वज्रोपमा न व्यथयां प्रचक्रुः १५४ स वारिधारा इव सायकांस्तांपिव र
न् शरीरेण महेंद्रशत्रुः जघान रामस्य शरप्रवेगं व्याविध्य तं मुद्गरमप्रमेयम् १५५ ततस्तु रक्तः क्षतजानु त
लिप्तं वित्रासनं देवमहाचमूनाम् व्याविध्य तं मुद्गरमुग्रवेगं विद्रावयामास चमूं हरीणाम् १५६ वाय
व्यमादाय ततो महास्त्रं रामः प्रचिक्षेप निशाचराय समुद्गरं तेन च कृत्तबाहुं स कृत्तबाहुस्तुमुलं ननाद १५७
कुं स तस्य बाहुर्गिरिशृंगकल्पः समुद्गरो राघवबाणनुन्नः पपात तस्मिन्हरिराजसैन्ये जघान तां वानरवाहिनीं च
१५८ ते वानरा भग्नहतावशेषाः पर्यंतमाश्रित्य तदा विषण्णाः प्रपीडितांगा ददृशुः सुघोरं नरेंद्ररक्षोधि
पसन्निपातम् १५९ स कुंभकर्णोस्त्रनिकृत्तबाहुर्महासिकृत्ताग्र इवाचलेंद्रः उत्पाटयामास करेण सालं
ततोभिदुद्राव रणे नरेंद्रम् १६० तं तस्य बाहुं सह सालवृक्षं समुद्यतं पन्नगभोगकल्पम् ऐंद्रास्त्रयुक्ते
न जघान रामो बाणेन जांबूनदचित्रितेन ६१ स कुंभकर्णस्य भुजो निकृत्तः पपात भूमौ गिरिसन्निका

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

मर्षयेत चिरंसीतेत्युक्त्वा हे परिवर्तिनी २४ ततः प्रियार्हश्रवणा तद[illegible]यं प्रियं प्रियादुपश्रुत्य
चिरस्य मैथिली मुमोच बाष्पं सुभृशं प्रवेपिता गजेंद्रहस्ताभिहतेव वल्लरी ॥२५॥ इत्यार्षे रामा
यणे युद्धकांडेऽष्टादशोत्तरशततमः सर्गः ॥११८॥ एवमुक्तातु वैदेही परुषं रोमहर्षणं राघ
वेणासरोषेण संप्रहृष्टपिताभवत् १ सातदश्रुतपूर्वं हि जने महति मैथिली श्रुत्वा भर्तृ
वचो रूक्षं लज्जया व्रीडिताभवत् २ प्रविशंतीव गात्राणि स्वान्येव जनकात्मजा वाक्शरै
स्तैः सशल्येव भृशमश्रूण्यवर्तयत् ३ ततो बाष्पपरिक्लिष्टं मार्जयंती स्वमाननम् शनै
र्गद्गदया वाचा भर्तारमिदमब्रवीत् ४ किं मामसदृशं वाक्यमीदृशं श्रोत्रदारुणम् रू
क्षं श्रावयसे वीर प्राकृतः प्राकृतामिव ५ न तथास्मि महाबाहो यथा त्वमवगच्छसि प्रत्ययं
गच्छ मे स्वेन चारित्रेणैव ते शपे ६ पृथक्स्त्रीणां प्रचारेण जातिं त्वं परिशंकसे परित्य
जेमां शंकां तु यदि तेऽहं परीक्षिता ७ यद्यहं गात्रसंस्पर्शं गतास्मि विवशा प्रभो कामकारो
न मे तत्र दैवं तत्रापराध्यति ८ मदधीनं तु यत्तन्मे हृदयं त्वयि वर्तते पराधीनेषु गात्रे

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०वा०यु० बुकिंकरिष्याम्यनीश्वरा ९ सहसंवृद्धभावाचसंसर्गेणाचमानद यदहंतेनविज्ञाताहतातेना
२८१ स्मिशाश्वतम् १० प्रेषितस्तेयदावीरोहनूमानवलोककः लंकास्थाहंत्वयाराजन्किंतदान
विसर्जिता ११ प्रत्यक्षंवानरेंद्रस्यतद्वाक्यसमनंतरम् त्वयासंत्यक्तयावीरत्यक्तंस्याज्जीवितं
मया १२ नवृथातेश्रमोयंस्यात्संशयेन्यस्यजीवितम् सुहृज्जनपरिक्लेशोनचायंनिष्फलस्त
तव १३ त्वयातुनरशार्दूलक्रोधमेवानुवर्तता लघुनेवमनुष्येणस्त्रीत्वमेवपुरस्कृतम्
१४ अपदेशेनजनकान्नोत्पत्तिर्वसुधातलात् ममवृत्तंचवृत्तज्ञबहुतेनपुरस्कृतम् १५ न
प्रमाणीकृतःपाणिर्बाल्येममनिपीडितः ममभक्तिश्चशीलंचसर्वंतेपृष्ठतःकृतम् १६ एवं
ब्रुवाणारुदतीबाष्पगद्गदभाषिणी अब्रवील्लक्ष्मणंसीतादीनंध्यानपरंस्थितम् १७ चितां
मेकुरुसौमित्रेव्यसनस्यास्यभेषजम् मिथ्यापवादोपहतानाहंजीवितुमुत्सहे १८ अप्रीतस्य
गुणैर्भर्तुस्त्यक्तायाजनसंसदि याक्षमामेगतिर्गंतुंप्रवेक्ष्येहव्यवाहनम् १९ एवमुक्तस्तुवै राम०
देह्यालक्ष्मणःपरवीरहा अमर्षवशमापन्नोराघवाननमैक्षत २० सविज्ञायमनश्छंदंरा २८१

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

मस्याकारसूचितम् चितांचकारसौमित्रिर्मतेरामस्यवीर्यवान् २१ नहिरामंतदाकश्चित्कालां
तकयमोपमम् अनुनेतुमथोवक्तुंद्रष्टुंवाप्यशकत्सुहृत २२ अधोमुखंततोरामंशनैःकृ
त्वाप्रदक्षिणम् उपासर्पतवैदेहीदीप्यमानंहुताशनम् २३ प्रणम्यदैवतेभ्यश्चब्राह्मणेभ्य
श्चमैथिली बद्धांजलिपुटाचेदमुवाचाग्निसमीपतः २४ यथामेहृदयंनित्यंनापसर्पति
राघवात् तथालोकस्यसाक्षीमांसर्वतःपातुपावकः २५ यथामांशुद्धचारित्रांदुष्टांजानाति
राघवः तथालोकस्यसाक्षीमांसर्वतःपातुपावकः २६ कर्मणामनसावाचायथानातिच
राम्यहम् राघवंसर्वधर्मज्ञंतथामांपातुपावकः २७ एवमुक्त्वातुवैदेहीपरिक्रम्यहुताशनम्
विवेशज्वलनंदीप्तंनिःसंगेनांतरात्मना २८ जनस्तुसुमहान्तत्रबालवृद्धसमाकुलः दद
र्शमैथिलींदीप्तांप्रविशंतींहुताशनम् २९ सातप्तनवहेमाभातप्तकांचनभूषणा पपातज्व
लनंदीप्तंसर्वलोकस्यसंनिधौ ३० ददृशुस्तांविशालाक्षींपतंतींहव्यवाहनम् सीतांसर्वाणि
भूतानिरुक्मवेदिनिभांतथा ३१ ददृशुस्तांमहाभागांप्रविशंतींहुताशनम् सीतांकृत्स्नास्त्र

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०वा०यु० यो लोकाः प्रायामाज्याहुतीमिव ३२ प्रचुक्रुशुस्त्रियः सर्वास्तां दृष्ट्वा हव्यवाहने पतंतीं संस्कृतां
मैत्रेर्वसोर्धारामिवाध्वरे ३३ ददृशुस्तां त्रयो लोका देवगंधर्वदानवाः शप्तां पतंतीं निरये त्रि
२८१ दिवाद्देवतामिव ३४ तस्यामग्निं विशंत्यां तु हाहेति विपुलः स्वनः रक्षसां वानराणां च संबभू
वाद्भुतोपमः ॥३५॥ इत्यार्षे रामायणे युद्धकांडे एकोनविंशदुत्तरशततमः सर्गः ॥११९॥ ततो
हि दुर्मना रामः श्रुत्वैवं वदतां गिरः दध्यौ मुहूर्तं धर्मात्मा बाष्पव्याकुललोचनः १ ततो वै
श्रवणो राजा यमश्चामित्रकर्षनः सहस्राक्षो महेंद्रश्च वरुणश्च परंतपः २ षडर्धनयनः श्री
मान्महादेवो वृषध्वजः कर्ता सर्वस्य लोकस्य ब्रह्मा ब्रह्मविदां वरः ३ एते सर्वे समागम्य विमानैः
सूर्यसन्निभैः आगम्य नगरीं लंकामभिजग्मुश्च राघवम् ४ ततः सहस्ताभरणान् प्रगृह्य विपु
लान्भुजान् अब्रुवन् त्रिदशश्रेष्ठा राघवं प्रांजलिं स्थितम् ५ कर्ता सर्वस्य लोकस्य श्रेष्ठो ज्ञा
नवतां विभुः उपेक्षसे कथं सीतां पतंतीं हव्यवाहने कथं देवगणश्रेष्ठमात्मानं नावबुध्यसे ६ राम०
ऋतधामा वसुः पूर्वं वसूनां च प्रजापतिः त्वं त्रयाणां हि लोकानामादिकर्ता स्वयंप्रभुः ७ रुद्राणा

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

मष्टमोरुद्रः साध्यानामपिपंचमः अश्विनौचापितेकर्णौचंद्रसूर्यौचचक्षुषी ८ अंतेचादौचम
ध्यंचदृश्यसेत्वंपरंतप उपेक्षसेचवैदेहींमानुषःप्राकृतोयथा ९ इत्युक्तोलोकपालैस्तैःस्वा
मीलोकस्यराघवः अब्रवीत्त्रिदशश्रेष्ठान्रामोधर्मभृतांवरः १० आत्मानंमानुषंमन्ये
रामंदशरथात्मजम् योहंयस्ययतश्चाहंभगवांस्तद्ब्रवीतुमे ११ इतिब्रुवाणंकाकुत्स्थंब्रह्माब्र
ह्मविदांवरः अब्रवीच्छृणुमेरामसत्यंसत्यपराक्रम १२ भवान्नारायणोदेवःश्रीमांश्चक्रायुधो
विभुः एकशृंगोवराहस्त्वंभूतभव्यसपत्नजित् १३ अक्षरंब्रह्मसत्यंचमध्येचांतेचराघव लोका
नांत्वंपरोधर्मोविष्वक्सेनश्चतुर्भुजः १४ शार्ङ्गधन्वाहृषीकेशःपुरुषःपुरुषोत्तमः अजितः
७ खड्गधृग्विष्णुःकृष्णश्चैवबृहद्बलः १५ सेनानीर्ग्रामणीःसर्वंत्वंबुद्धिस्त्वंक्षमादमः प्रभवश्चा
प्ययश्चत्वमुपेंद्रोमधुसूदनः १६ इंद्रकर्मामहेंद्रस्त्वंपद्मनाभोरणांतकृत् शरण्यंशरणंचत्वा
माहुर्दिव्यामहर्षयः १७ सहस्रशृंगोवेदात्माशतशीर्षोमहर्षभः त्वंत्रयाणांहिलोकानामादिक
र्तास्वयंप्रभुः १८ सिद्धानामपिसाध्यानामाश्रयश्चासिपूर्वजः त्वंयज्ञस्त्वंवषट्कारस्त्वमोंकारः

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

 परात्परः १९ प्रभवंनिधनंवात्तेनविदुःकोभवानिति दृश्यसेसर्वभूतेषुब्राह्मणेषुचगोषुच
२० दिक्षुसर्वासुगगनेपर्वतेषुवनेषुच सहस्त्रचरणःश्रीमान्शतशीर्षःसहस्त्रदृक् २१ त्वंधा
 रयसिभूतानिवसुधांचसपर्वताम् अंतेपृथिव्याःसलिलेदृश्यसेत्वंमहोरगः २२ त्रीन्लोका
न्धारयन्रामदेवगंधर्वदानवान् अहंतेहृदयंरामजिह्वादेवीसरस्वती २३ देवागात्रेषुरोमा
 णिब्रह्मणानिर्मिताःप्रभो निमेषस्तेभवद्रात्रिरुन्मेषस्तेभवद्दिवा २४ संस्कारास्तेभवन्वेदानै
तदस्तित्वयाविना जगत्सर्वंशरीरंतेस्थैर्यंतेवसुधातलम् २५ अग्निःकोपःप्रसादस्ते
सोमःश्रीवत्सलक्षणः त्वयालोकास्त्रयःक्रांताःपुराणेविक्रमैस्त्रिभिः २६ महेंद्रश्चकृतोराजा
बलिंबध्वामहासुरम् सीतालक्ष्मीर्भवान्विष्णुर्देवःकृष्णःप्रजापतिः २७ वधार्थंरावणस्येहप्र
विष्टोमानुषींतनुम् तदिदंनःकृतंकार्यंत्वयाधर्मभृतांवर २८ निहतोरावणोरामप्रहृष्टो
दिवमाक्रम अमोघंबलवीर्यंतेनतेमोघाःपराक्रमाः २९ अमोघंदर्शनंरामनचमोघस्त
वस्तवः अमोघास्तेभविष्यंतिभक्तिमंतस्तुयेनराः ३० येत्वांदेवंध्रुवंभक्ताःपुराणंपुरुषो

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

त्तमम् प्राप्नुवंतःसदाकामानिहलोकेपरत्रच ३१ इममार्षस्तवंदिव्यमितिहासंपुरातनम् ये
नराःकीर्त्तयिष्यंतिनास्तितेषांपराभवः ॥३२॥ इत्यार्षेरामायणेयुद्धकाण्डेविंशदुत्तरशततमःसर्गः
१२० एतच्छ्रुत्वाशुभंवाक्यंपितामहसमीरितम् अंकेनादायवैदेहीमुत्पपातविभावसुः १
विधूयाथचितांतांतुवैदेहींहव्यवाहनः उत्तस्थौमूर्त्तिमानाशुगृहीत्वाजनकात्मजाम् २ तरु
णादित्यसंकाशांतप्तकांचनभूषणाम् रक्तांबरधरांबालांनीलकुंचितमूर्द्धजाम् ३ अक्लि
ष्टमाल्याभरणांतथारूपांमनस्विनीम् ददौरामायवैदेहीमंकेकृत्वाविभावसुः ४ अब्रवी
च्चतदारामंसाक्षीलोकस्यपावकः एषातेरामवैदेहीपापमस्यानविद्यते ५ नैववाचानमनसा
नान्तुध्यानान्नचक्षुषा सुवृत्तावृत्तशौंडीर्यनत्वामतिचचारह ६ रावणेनापनीतैषावीर्यो
त्सिक्तेनरक्षसा त्वयाविरहितादीनाविवशानिर्जनेवने ७ रुद्धाचांतःपुरेगुप्तात्वच्चित्तात्वत्प
रायणा रक्षितारक्षसीसंघैर्विकृतैर्घोरदर्शनैः ८ प्रलोभ्यमानाविविधंभर्त्स्यमानाचमैथिली
नाचिंतयत्तद्रक्षस्त्वद्गतेनांतरात्मना ९ विशुद्धभावांनिष्पापांप्रतिगृह्णीष्वराघव नहि

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा० वा० यु० नाकिंचिदभिधास्यमहमाज्ञापयामिते १० ततःप्रीतमनारामः श्रुत्वैवंवदतांवरः दध्यौमुहूर्त्तं
धर्मात्माहर्षव्याकुललोचनः ११ एवमुक्तोमहातेजाधृतिमान्दृढविक्रमः अब्रवीत्त्रिदशश्रेष्ठं
२८३ रामोधर्मभृतांवरः १२ अवश्यंत्रिषुलोकेषुसीतापावनमर्हति दीर्घकालोषिताचेयंरावणांतःपुरे
शुभा १३ बालिशःखलुकामात्मारामोदशरथात्मजः इतिवक्ष्यंतिमांसंतोजानकीमविशोध्य
हि १४ अनन्यहृदयांभक्तांमच्चित्तपरिरक्षिणीं अहमप्यवगच्छामिमैथिलीजनकात्मजाम् १५
प्रत्ययार्थंतुलोकानांत्रयाणांसत्यसंश्रयः उपेक्षेयंचवैदेहींप्रविशंतींहुताशनम् १६ इमामपि
विशालाक्षींरक्षितांस्वेनतेजसा रावणोनातिवर्त्तेतवेलामिवमहोदधिः १७ नहिशक्तःसुदुष्टात्मा
मनसापिचमैथिलीम् प्रधर्षयितुमप्राप्यांदीप्तामग्निशिखामिव १८ नेयमर्हतिचैश्वर्यंरावणां
तःपुरेशुभा अनन्याहिमयासीताभास्करेणप्रभायथा १९ विशुद्धात्रिषुलोकेषुमैथिलीजनका
त्मजा नहिहातुमियंशक्याकीर्त्तिरात्मवतायथा २० अवश्यंचमयाकार्यंसर्वेषांवोवचोहितम् राम०
स्निग्धानांलोकमान्यानामेवंचब्रुवतांहितम् २१ इत्येवमुक्त्वावचनंमहाबलः प्रशस्यमानः स्व २८३

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

कृतेन कर्मणा ॥ समेत्य रामः प्रियया महारथः सुखं सुखार्हो ऽनुबभूव राघवः ॥ २२ ॥ इत्यार्षे रामायणे युद्ध
काण्डे एकविंशोत्तरशततमः सर्गः ॥ १२१ ॥ एतच्छ्रुत्वा शुभं वाक्यं राघवेणानुभाषितम् इदं शुभत
रं वाक्यं व्याजहार महेश्वरः १ पुष्कराक्ष महाबाहो महावक्षः परंतप दिष्ट्या कृतमिदं कर्म त्वया
धर्मभृतां वर २ दिष्ट्या सर्वस्य लोकस्य प्रवृद्धं दारुणं तमः अपवृत्तं त्वया संख्ये राम रावणजं भ
यम् ३ आश्वास्य भरतं दीनं कौसल्यां च यशस्विनीम् कैकेयीं च सुमित्रां च दृष्ट्वा लक्ष्मणमातरम् ४
प्राप्य राज्यमयोध्यायां नन्दयित्वा सुहृज्जनम् इक्ष्वाकूणां कुले वंशं स्थापयित्वा महाबल ५ इष्ट्वा
तुरगमेधेन प्राप्य चानुत्तमं यशः ब्राह्मणेभ्यो धनं दत्त्वा त्रिदिवं गन्तुमर्हसि ६ एष राजा दशरथो
विमानस्थः पिता तव काकुत्स्थ मानुषे लोके गुरुस्तव महायशाः ७ इन्द्रलोकं गतः श्रीमांस्त्वया पु
त्रेण तारितः लक्ष्मणेन सह भ्रात्रा त्वमेनमभिवादय ८ महादेववचः श्रुत्वा राघवः सह लक्ष्मणः
विमानशिखरस्थस्य प्रणाममकरोत्पितुः ९ दीप्यमानं स्वया लक्ष्म्या विरजोऽम्बरधारिणम् ल
क्ष्मणेन सह भ्रात्रा ददर्श पितरं प्रभुः १० हर्षेण महताविष्टो विमानस्थो महीपतिः प्राणैः प्रियतरं

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० वा० पु० दृष्ट्वा पुत्रं दशरथस्तदा ११ आरोप्यांके महाबाहुर्वरासनगतः प्रभुः बाहुभ्यां संपरिष्वज्य ततो वा
क्यं समाददे १२ न मे स्वर्गो बहुमतः संमानश्च सुरर्षिभिः त्वया राम विहीनस्य सत्यं प्रतिशृणोमि ते
२८४ १३ कैकेय्या यानि चोक्तानि वाक्यानि वदतां वर तव प्रव्राजनार्थानि स्थितानि हृदये मम १४
त्वां तु दृष्ट्वा कुशलिनं परिष्वज्य सलक्ष्मणम् अद्य दुःखाद्विमुक्तोस्मि नीहारादिव भास्करः १५
तारितोहं त्वया पुत्र सुपुत्रेण महात्मना अष्टावक्रेण धर्मात्मा कहोलो ब्राह्मणो यथा १६ इदानीं
च विजानामि यथा सौम्य सुरेश्वरैः वधार्थं रावणस्येह पिहितं पुरुषोत्तमम् १७ सिद्धार्था खलु कौ
शल्या या त्वां राम गृहं गतम् वनान्निवृत्तं संहृष्टा द्रक्ष्यते शत्रुसूदनम् १८ सिद्धार्थाः खलु ते राम
नरा ये त्वां पुरीं गतम् जलार्द्रमभिषिक्तं च द्रक्ष्यंते वसुधाधिपम् १९ अनुरक्तेन बलिना शुचि
ना धर्मचारिणा इच्छेयं त्वामहं द्रष्टुं भरतेन समागतम् २० चतुर्दश समाः सौम्य वने निर्यापितास्त्व
या वसता सीतया सार्द्धं लक्ष्मणेन च धीमता २१ निवृत्तवनवासोसि प्रतिज्ञा सफला कृता रा व
णं च रणे हत्वा देवास्ते परितोषिताः २२ कृतं कर्म यशः श्लाघ्यं प्राप्तं ते शत्रुसूदन भ्रातृभिः सह राम०
२८४

रु तैराहतोवज्रसमानवेगैर्नचुक्षुभेनव्यथतेसुरारिः १५३ तैःसायकैःसात्नवरानिकृत्तावाल्मीहतौवानरपुं
गवश्च तेकुंभकर्णास्यतदाशरीरेवज्रोपमानव्यपयोंप्रकुंभ १५४ सवारिधाराइवसायकांस्तांपिब न
नशरीरेणमहेंद्रशत्रुः जघानतमस्यशरप्रवेगंव्याविध्यतंमुद्गरमश्वमेधम् १५५ ततस्तुरक्षःक्षतजानु तै
लिप्तंवित्रासनंदेवमहाचमूनाम् व्याविध्यतंमुद्गरमुग्रवेगंविद्रावयामासचमूंहरीणाम् १५६ वाय
व्यमास्त्रंसतदामहात्मासमःक्षिपन्निशाचराय समुद्गरंतेनचकर्त्तवाहुंसकृत्तवाहुस्तुमुलंननाद १५७
क सतस्यवाहुर्गिरिशृंगकल्पःसमुद्गरोराघववाणलूनः पपाततस्मिन्हरिराजसैन्येजघानतांवानरवाहिनींच
१५८ तेवानराभग्नहतावशेषाः पर्यंतमाश्रित्यतदाविषण्णाः प्रपीडितांगाददृशुःसुघोरंनरेंद्ररक्षोधि
पसन्निपातम् १५९ सकुंभकर्णोस्त्रनिकृत्तवाहुर्महान्निकृत्ताग्रइवाचलेंद्रः उत्पाटयामासकरेणसालं
ततोभिदुद्रावरणेनरेंद्रम् १६० तंतस्यबाहुंसहसालवृक्षंसमुद्यतंपन्नगभोगकल्पम् ऐंद्रास्त्रयुक्ते
नजघानरामोबाणेनजांबूनदचित्रितेन ६१ सकुंभकर्णस्यभुजोनिकृत्तःपपातभूमौगिरिसन्निका

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

२ कैकेयीत्वया सशापः

राज्यस्थो दीर्घमायुरवाप्नुहि २३ इति ब्रुवाणं राजानं रामः प्रांजलिरब्रवीत् कुरु प्रसादं धर्मज्ञ कैकेय्या म
रतस्य च २४ स पुत्रां त्वां त्यजामीति यदुक्ता कैकेयीं घोरः सपुत्रां न स्पृशेत्प्रभो २५ स पश्यति महाराजो
राममुक्त्वा कृतांजलिम् लक्ष्मणं च परिष्वज्य पुनर्वाक्यमुवाच ह २६ रामं शुश्रूषता भक्त्या वैदे
ह्या सह सीतया कृतं मम महाप्रीतिः प्राप्तं धर्मफलं च ते २७ धर्मं प्राप्स्यसि धर्मज्ञ यशश्च विपुलं भु
वि रामे प्रसन्ने स्वर्गं च महिमानं तथोत्तमम् २८ रामं शुश्रूष भद्रं ते सुमित्रानंदवर्द्धन: रामः सर्वस्य
लोकस्य शुभेष्वभिरतः सदा २९ एते सेंद्रास्त्रयो लोकाः सिद्धाश्च परमर्षयः अभिगम्य महात्मान
मर्चंति पुरुषोत्तमम् ३० एतत्तदुक्तमव्यक्तमक्षरं ब्रह्म संमितम् देवानां हृदयं सौम्य गुह्यं रामः परंत
पः ३१ अवाप्तं धर्मचरणं यशश्च विपुलं त्वया रामं शुश्रूषता व्यग्रं वैदेह्या सह सीतया ३२ तथो
क्त्वा तु महाबाहुर्लक्ष्मणं प्रांजलिं स्थितम् उवाच राजा धर्मात्मा वैदेहीं वचनं शुभम् ३३ कर्त्तव्यो न तु
वैदेहि मन्युस्त्यागमिमं प्रति रामेण त्वद्धितार्थं च कृतमेतद्धितैषिणा ३४ न त्वं शुश्रूषमाधेया पतिशु
श्रूषणां प्रति अवश्यं तु मया वाच्यमेष ते दैवतं परम् ३५ इति प्रतिसमादिश्य पुत्रौ सीतां तथा स्नुषाम्

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०वा०यु० इंद्रलोकंविमानेनययौदप्तास्योज्वलनन॥३६॥इत्यार्षेश्रीमद्रामायणेवाल्मीकीयेयुद्धकाण्डेद्वावि
शोत्तरशततमःसर्गः॥१२२॥प्रतिप्रयातेकाकुत्स्थेमहेंद्रःपाकशासनः अब्रवीत्परमप्रीतोराघवंप्रां
२८५ जलिस्थितम् १ अमोघंदर्शनंरामतवास्माकंपरंतप प्रीतियुक्ताःस्मतेनत्वंब्रूहियन्मनसेच्छसि २ ए
वमुक्तस्तुकाकुत्स्थःप्रत्युवाचकृतांजलिः लक्ष्मणेनसहभ्रात्रासीतयाचापिभार्यया ३ यदिप्रीतिः
समुत्पन्नामयितेसर्वसुरेश्वर वक्ष्यामिकुरुमेसत्यंवचनंवदतांवर ४ ममहेतोःपराक्रांतायेगता
यमसादनम् तेसर्वेजीवितंप्राप्यसमुत्तिष्ठंतुवानराः ५ मत्कृतेविप्रयुक्तायेपुत्रैर्दारैश्चवानराः
तान्प्रीतिमनसःसर्वान्द्रष्टुमिच्छामिमानद ६ विक्रांताश्चापिशूराश्चनमृत्युंगणयंतिते कृतयत्नाविप
न्नाश्चजीवेयुस्तेसुरर्षभ ७ मत्प्रियेष्वभिरक्ताश्चनमृत्युंगणयंतिते त्वत्प्रसादात्समेयुस्तेवरमेतमहंवृ
णे ८ नीरुजान्निर्व्रणांश्चैवसंपन्नबलपौरुषान् गोलांगूलांस्तथैवर्क्षान्द्रष्टुमिच्छामिमानद ९ अका
लेचापिमुख्यानिमूलानिचफलानिच नद्यश्चविमलास्तत्रतिष्ठेयुर्यत्रवानराः १० श्रुत्वातुवचनंत राम०
स्यराघवस्यमहात्मनः महेंद्रःप्रत्युवाचेदंवचनंप्रीतिलक्षणम् ११ महानयंवरस्तातत्वयोक्तोरघुसत्तम
२८५

द्विर्मयानोक्तपूर्वं च तस्मादेतद्भविष्यति १२ समुत्तिष्ठंतु ते सर्वे ये हता युधि वानरसैः ऋक्षाश्च सह गोपुच्छै
र्निकृत्तानन बाहवः १३ नीरुजो निर्व्रणाश्चैव संपन्नबलपौरुषाः समुत्थास्यंति हरयः सुप्ता निद्राक्ष
येयथा १४ सुहृद्भिर्बांधवैश्चैव ज्ञातिभिः स्वजनेन च सर्व एव समेष्यंति संयुक्ताः परया मुदा १५
अकाले पुष्पशबलाः फलवंतश्च पादपाः भविष्यंति महेष्वास नद्यश्च सलिलायुताः १६ सव्रणैः
प्रथमं गात्रैः संवृत्तैर्निर्व्रणैः पुनः १७ ततः समुत्थिताः सर्वे सुप्त्वेव हरिपुंगवाः बभूवुर्वानराः सर्वे किं त्वे
तदिति विस्मिताः १८ काकुत्स्थं परिपूर्णार्थं दृष्ट्वा सर्वे सुरोत्तमाः अब्रुवन्परमप्रीताः स्तुत्वा रामं
सलक्ष्मणम् १९ गच्छायोध्यामितो वीर विसर्जय च वानरान् मैथिलीं सांत्वयस्वैनामनुरक्तां तपस्वि
नीम् २० भ्रातरं भरतं पश्य त्वच्छोकाद्व्रतचारिणम् शत्रुघ्नं च महात्मानं मातॄः सर्वाः परंतप अभि
षेचय चात्मानं पौरान्गत्वा प्रहर्षय २१ एवमुक्त्वा तमामंत्र्य रामं सौमित्रिणा सह विमानैः सूर्यसंका
शैः हृष्टा जग्मुः सुरा दिवम् २२ अभिवाद्य च काकुत्स्थः सर्वांस्तांस्त्रिदिवौकसः लक्ष्मणेन स
ह भ्रात्रा वासमाज्ञापयत्तदा २३ ततस्तु सा लक्ष्मणरामपालिता महाचमूर्हृष्टजना यशस्विनी श्रिया

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

 रा०वा०यु० ज्वलन्तीविरराजसर्वतोनिशाप्रणीतेवहिशीतरश्मिना ॥ २४ ॥ इत्यार्षेश्रीमद्रामायणेयुद्धकाण्डे त्रयो
विंशोत्तरशततमः सर्गः ॥ १२३ ॥ तांरात्रिमुषितंरामंसुखोदितमरिंदमम् अब्रवीत्प्राञ्जलिर्वाक्यं
२८६ जयंपृष्ट्वाविभीषणः १ स्नानानिचांगरागाणिवस्त्राण्याभरणानिच चंदनानिचमाल्यानिदि
व्यानिविविधानिच २ अलंकारविदश्चेमानार्यःपद्मनिभेक्षणाः उपस्थितास्त्वांविधिवत्स्नाप
यिष्यंतिराघव ३ एवमुक्तस्तुकाकुत्स्थःप्रत्युवाचविभीषणम् हरीन्सुग्रीवमुख्यांस्त्वंस्नानेनाभि
निमंत्रय ४ सतुताम्यतिधर्मात्मामममहेतोःसुखोचितः सुकुमारोमहाबाहुःकुमारःसत्यसंश्रयः ५
तंविनाकैकेयीपुत्रंभरतंधर्मचारिणम् नमेस्नानंबहुमतंवस्त्राण्याभरणानिच ६ इतएवपथा
क्षिप्रंप्रतिगच्छामितांपुरीम् अयोध्यामागतोह्येषपंथाःपरमदुर्गमः ७ एवमुक्तस्तुकाकुत्स्थंप्र
त्युवाचविभीषणः अह्नात्वांप्रापयिष्यामितांपुरींपार्थिवात्मज ८ पुष्पकंनामभद्रंतेविमानं
सूर्यसन्निभम् ममभ्रातुःकुबेरस्यरावणेनाहृतंबलात् ९ हृतंनिर्जित्यसंग्रामेकामगंदिव्यमुत्तमम् रा०
त्वदर्थंपालितंचेदंतिष्ठत्यतुलविक्रमः १० तदिदंमेघसंकाशंविमानमिहतिष्ठति तेनयास्यसियाः

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

प्रत्याद्बहुमानाच्चसौहृदेनचराघव

नेनत्वमयोध्यांगतज्वरः ११ अहंतेहनुमान्योयदिस्मरसिमेगुणान् वसतावदिहाप्राज्ञयद्यस्तिमयि
सौहृदम् १२ लक्ष्मणेनसहभ्रात्रावैदेह्याचैवसीतया अर्चितःसर्वकामैस्त्वंततोरामगमिष्यसि १३
प्रीतियुक्तस्यविहितांससैन्यस्यससुहृद्गणः सत्क्रियांराममेतावत्गृहाणत्वंमयोद्यताम् १४ प्रसाद
यामिप्रेष्योहंनखल्वाज्ञापयामिते १५ एवमुक्तस्ततोरामःप्रत्युवाचविभीषणम् रक्षसांवानराणां
चसर्वेषांचोपशृण्वताम् १६ पूजितोहंत्वयावीरसाचिव्येनपरंतप सर्वात्मनाचचेष्टाभिःसौहृ
देनोत्तमेनच १७ नखल्वेतंनकुर्यांतेवचनंराक्षसेश्वर तंतुमेभ्रातरंद्रष्टुंभरतंत्वरतेमनः १८
मांनिवर्तयितुंयोसौचित्रकूटमुपागतः शिरसायाचितोयस्यवचनंनकृतंमया १९ कौशल्यांच
सुमित्रांचकैकेयींचयशस्विनीम् गुहंचसुहृदंश्चैवपौरांश्चजनपदैःसह २० उपस्थापयमेक्षिप्रं
विमानंराक्षसेश्वर कृतकार्यस्यमेवासःकथंस्विदिहसंमतः २१ अनुजानीहिमांसौम्यपूजितोऽ
स्मिविभीषण मन्युर्नखलुकर्तव्यस्त्वरितंयानमानय २२ राघवस्यवचःश्रुत्वाराक्षसेंद्रोविभीष
णः तंविमानमादायतूर्णंप्रतिनिवर्तत २३ ततःकांचनचित्रांगंवैडूर्यमणिवेदिकम् कूटागारैः

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०वा०यु० परिक्षिप्तं सर्वतो रजतप्रभम् २४ पांडुराभिः पताकाभिर्ध्वजैश्च समलंकृतम् कांचनैः कांचनैर्हर्म्यै
र्हेमपद्मविभूषितैः २५ प्रकीर्णं किंकिणीजालैर्मुक्तामणिगवाक्षकम् घंटाजालैः परिक्षिप्तं सर्व
२८१ तो मधुरस्वनम् २६ तं मेरुशिखराकारं निर्मितं विश्वकर्मणा बहुभिर्भूषितं हर्म्यैर्मुक्तारजतसन्निभैः
२७ तलैः स्फाटिकचित्रांगैर्वैदूर्यैश्च वरासनैः महार्हास्तरणोपेतैरुपपन्नं महाधनैः २८ उपस्थि
तमनाधृष्यं तद्विमानं मनोजवम् निवेदयित्वा रामाय तस्थौ तत्र विभीषणः ॥२९॥ इत्यार्षे रामायणे
युद्धकाण्डे चतुर्विंशोत्तरशततमः सर्गः ॥१२४॥ उपस्थितं तु तं कृत्वा पुष्पकं पुष्पभूषितम् अविदू
रे स्थितो रामं प्रत्युवाच विभीषणः १ स तु बद्धांजलिः प्रह्वो विनीतो राक्षसेश्वरः अब्रवीत्त्वरयो
पेतः किं करोमीति राघवम् २ तमब्रवीन्महातेजा लक्ष्मणस्योपशृण्वतः विमृश्य राघवो वाक्यमि
दं स्नेहपुरस्कृतम् ३ कृतप्रयत्नकर्माणो विभीषण वनौकसः रत्नैरर्थैश्च वस्त्रैश्च विविधैश्च प्र
पूजय ४ सहैभिरजिता लंका निर्जिता राक्षसेश्वर हृष्टैः प्राणभयं त्यक्त्वा संग्रामेष्वनिवर्तिभिः राम०
५ त इमे कृतकर्माणः पूज्यन्तां सर्ववानराः धनरत्नप्रदानेन कर्मैषां सफलं कुरु ६ एवं संमानि
२८१

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

ताम्रैस्तैर्नंदमानाय या त्वया भविष्यंतिकृतस्तेननिर्दिष्टा हरियूथपाः ७ त्याजितं संगृहीत्वा रसानु
क्रोशं यशस्विनम् सर्वे त्वामभिगच्छंतित्ततः संबोधयाम्यहम् ८ हीनं रतिगुणैः सर्वैरभिहंतारमाह
वे त्यजंति नृपतिं सैन्याः संविग्नास्तं नरेश्वरम ९ एवमुक्तास्तु रामेण वानरांस्तान्विभीषणः
रत्नार्थसंविभागेन सर्वानेवान्वपूजयत् १० ततस्तान्पूजितान्दृष्ट्वा रत्नैरर्थैश्च हरियूथपान् आ
रुरोह ततो रामस्तद्विमानमनुत्तमम् ११ अंकेनादाय वैदेहीं लज्जमानां यशस्विनीम् लक्ष्मणेन स
हभ्रात्रा विक्रांतेन धनुष्मता १२ अब्रवीच्च विमानस्थः पूजयन्सर्ववानरान् सुग्रीवं च महावीर्यं
काकुत्स्थः सविभीषणम् १३ मित्रकार्यं कृतमिदं भवद्भिर्वानरोत्तमाः अनुज्ञाता मया सर्वे यथे
ष्टं प्रतिगच्छत १४ यत्तु कार्यं वयस्येन स्निग्धेन च हितेन वा परंतप कृतं सुग्रीव तत्सर्वं भवता धर्मभीरुणा
१५ किष्किंधां प्रतियाह्याशु स्वसैन्येनाभिसंवृतः स्वराज्ये वस लंकायां मया दत्ते विभीषण १६
न त्वां धर्षयितुं शक्ताः सेंद्रा अपि दिवौकसः १७ अयोध्यां प्रतियास्यामि राजधानीं पितुर्मम १८
अनुज्ञातुमिच्छामि सर्वांश्चामंत्रयामि वः १८ एवमुक्तास्तु रामेण वानरास्ते महाबलाः ऊचुः प्रांज

 त्वयोमूत्वाराक्षसश्चविभीषणः १९ अयोध्यांगंतुमिच्छामःसर्वान्नयतुनोभवान् मुद्युक्ताविचरिष्या
मःवनानिनगराणिच २० दृष्ट्वात्वामभिषेकार्द्रं कौशल्यामभिवाद्यच अचिरेणागमिष्यामः
 स्वगृहान्नृपतेःसुत २१ एवमुक्तस्तुधर्मात्मावानरैःसविभीषणैः अब्रवीद्राघवःश्रीमान्ससुग्रीव
विभीषणान् २२ प्रियात्प्रियतरंलब्धंयदहंससुहृज्जनः सर्वैर्भवद्भिःसहितःप्रीतिंलप्स्येपुरींगतः
२३ क्षिप्रमारोहसुग्रीवविमानंवानरैःसह त्वमप्यारोहसामात्योराक्षसेंद्रविभीषण २४ ततस्ततु
ष्पकंदिव्यंसुग्रीवःसहसेनया अध्यारोहत्ततःश्रीमान्सामात्यश्चविभीषणः १५ तेष्वारूढेषु
सर्वेषुकौबेरंपरमासनम् राघवेणाभ्यनुज्ञातमुत्पपातविहायसं २६ ययौतेनविमानेनहंस
युक्तेनभास्वता प्रहृष्टश्चप्रतीतश्चबभौरामःकुबेरवत् २७ तेसर्वेवानरर्क्षाश्चराक्षसाश्चम
हाबलाः यथासुखमसंबाधंदिव्येतस्मिन्नुपाविशन् ॥२८॥ इत्यार्षेरामायणेयुद्धकाण्डेपंच
विंशत्युत्तरशततमःसर्गः ॥१२५॥ अनुज्ञातंतुरामेणतद्विमानमनुत्तमम् हंसयुक्तंमहानादमु
त्पपातविहायसम् १ पातयित्वाततश्चक्षुःसर्वतोरघुनंदनः अब्रवीन्मैथिलींसीतांरामः

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

हि

शशिनिभाननाम् २ कैलासशिखराकारंत्रिकूटशीखरेस्थिताम् लंकामीदृस्वैर्दैनिर्मितां
विश्वकर्मणा ३ एतदायोधनंपश्यमांसशोणितकर्दमम् हरीणांराक्षसानांचसीतेविशसनंमहत् ४
एषदत्तवरः शेतेप्रमाथीराक्षसेश्वर तवहेतोर्विशालाक्षिरावणोनिहतोमया ५ कुंभकर्णोत्रनिहतः प्र
हस्तश्चनिशाचरः धूम्राक्षश्चात्रनिहतोवानरेणहनूमता ६ विद्युन्मालीहतश्चात्रसुषेणेनमहात्म
ना लक्ष्मणेनेंद्रजिच्चात्ररावणिर्निहतोरणे ७ अंगदेनात्रनिहतोविकटोनामराक्षसः विरूपाक्षस्तुदु
ष्प्रेक्षोमहापार्श्वमहोदरौ ८ अकंपनश्चनिहतोबलिनोन्येचराक्षसाः त्रिशिराश्चातिकायश्चदेवांतक
नरांतकौ ९ युद्धोन्मत्तश्चमत्तश्चराक्षसप्रवरावुभौ निकुंभश्चैवकुंभश्चकुंभकर्णात्मजौबली १० व
हताः ज्रदंष्ट्रश्चदंष्ट्रश्चबहवोराक्षसाः मकराक्षश्चदुर्द्धर्षोमयायुधिनिपातितः ११ अकंपनश्चनिहतः
[illegible]ः शोणिताक्षश्चवीर्यवान् यूपाक्षश्चप्रजंघश्चनिहतौतौमहाहवे १२ विद्युज्जिह्वो
त्रनिहतोराक्षसोभीमदर्शनः यज्ञशत्रुश्चनिहतः सुप्तघ्नश्चमहाबलः सूर्यशत्रुश्चनिहतोब्रह्मशत्रुस्त
थापरः १३ अत्रमंदोदरीनामभार्यातंपरिदेवयत् सपत्नीनांसहस्रेणसास्रेणपरिवारिता १४ एतत्तु

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०वा०यु० दृश्यतेतीर्थमेतत्समुद्रस्यवरानने यत्रसागरमुत्तीर्यतांरात्रिमुषितावयम् १५ एषसेतुर्मयाबद्धःसागरेलवणा
३३९ र्णवे तवहेतोर्विशालाक्षिनलसेतुःसुदुष्करः १६ पश्यसागरमक्षोभ्यंवैदेहिवरुणालयम् अपारम
२८८ भिगर्जंतंशंखशुक्तिसमाकुलम् १७ हिरण्यनाभंशैलेंद्रंकांचनंपश्यमैथिलि विश्रामार्थंहनुम
तोभित्वासागरमुत्थितम् १८ एतत्कुक्षौसमुद्रस्यस्कंधावारनिवेशनम् अत्रपूर्वंमहादेवःप्रसादम
करोद्विभुः १९ एतत्तुदृश्यतेतीर्थंसागरस्यमहात्मनः सेतुबंधइतिख्यातंत्रैलोक्येनचपूजितम् २०
एतत्पवित्रंपरमंमहापातकनाशनम् अत्रराक्षसराजोयमाजगामविभीषणः २१ एषासादृश्यतेसी
तेकिष्किंधाचित्रकानना सुग्रीवस्यपुरीरम्यायत्रवालीमयाहतः २२ अथदृष्ट्वापुरींसीताकि
ष्किंधांवालिपालिताम् अब्रवीत्प्रश्रितंवाक्यंरामंप्रणयसाध्वसा २३ सुग्रीवप्रियभार्याभिस्तारा
प्रमुखतोनृप अन्येषांवानरेंद्राणांस्त्रीभिःपरिवृताह्यहम् २४ गंतुमिच्छेसहायोध्यांराजधानीं
त्वयासह एवमुक्तोथवैदेह्याराघवःप्रत्युवाचताम् २५ एवमस्त्वितिकिष्किंधांप्राप्यसंस्थाप्यरा
घवः विमानंप्रेक्ष्यसुग्रीवंवाक्यमेतदुवाचह २६ ब्रूहिवानरशार्दूलसर्वान्वानरपुंगवान् स्त्रीभिः राम० ३३९ २८८

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०वा०यु० श्राः विचेष्टमानो निजघान वृक्षान् शैलान्नरान् शिलानां वानरराक्षसांश्च ६२ तंछिन्नबाहुं समवेक्ष्य रामः समाप
११८ तंतं सहसा नदंतं द्वावर्द्धचंद्रौ निशितौ प्रगृह्य चिच्छेद पादौ युधि राक्षसस्य ६३ तौ तस्य पादौ प्रदिशो दिश
श्च गिरेर्गुहाश्चैव महार्णवं च लंकां च सेनां कपिराक्षसानां विनादयंतौ विनिपेततुश्च १६४ निकृ
त्तबाहुर्विनिकृत्तपादो विदार्य वक्त्रं वडवामुखाभम् दुद्राव रामं सहसाभिगर्जन् राहुर्यथा चंद्रमिवांतरि
क्षे १६५ अपूरयत्तस्य मुखं शिताग्रै रामः शरैर्हेमपिनद्धपुंखैः स पूर्णवक्त्रो न शशाक वक्तुं चुकू
ज कृच्छ्रेण मुमोह चापि १६६ अथाददे सूर्यमरीचिकल्पं स ब्रह्मदंडांतककालकल्पं अरिष्टमैं
द्रं निशितं सुपुंखं रामः शरं मारुततुल्यवेगम् १६७ तं वज्रजांबूनदचारुपुंखं प्रदीप्तसूर्यज्वल
नप्रकाशम् महेंद्रवज्राशनितुल्यसारं रामः प्रचिक्षेप निशाचराय ६८ स सायको राघवबाहुसादितो
दिशः स्वभासा दश संप्रकाशयन् स धूमवैश्वानरदीप्तदर्शनो जगाम शक्राशनितुल्यविक्रमः ६९
स तं महापर्वतकूटसन्निभं विवृत्तदंष्ट्रं चलचारुकुंडलम् चकर्त रक्षोधिपतेः शिरस्तदा यथैव वृ
त्रस्य पुरा पुरंदरः १७० कुंभकर्णशिरो भाति कुंडलालंकृतं महत् आदित्येभ्युदिते रात्रौ मध्यस्थ राम० ११८

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

परिवृताः सर्वैर्ह्ययोध्यायां तु सीतया २७ तथा त्वमेभिः सर्वाभिः स्त्रीभिः सह महाबल ऽभित्वरस्व सुग्रीव
गच्छामः प्लवगाधिपः २८ एवमुक्तस्तु सुग्रीवो रामेणामिततेजसा वानराधिपतिः श्रीमांस्तैश्च सर्वैः समा
वृतः २९ प्रविश्यांतःपुरं शीघ्रं तारामुद्वीक्ष्य सोऽब्रवीत् प्रिये त्वं सह नारीणां वानराणां महात्मनाम् ३० राघ
वेणाभ्यनुज्ञाता मैथिलीप्रियकाम्यया त्वरत्वमभिगच्छामो गृह्य वानरयोषितः ऽयोध्यां दर्शयि।
ष्यामः सर्वा दशरथस्त्रियः ३१ सुग्रीवस्य वचः श्रुत्वा तारा सर्वांगशोभना ऽहूय चाब्रवीत्सर्वा वा
नराणां तु योषितः ३२ सुग्रीवेणाभ्यनुज्ञाता गंतुं सर्वैश्च वानरैः मम चापि प्रियं कार्यं मयोध्या
दर्शनेन च ३३ प्रवेशं चैव रामस्य पौरजानपदैस्सह विभूतिं चैव सर्वासां स्त्रीँ दशरथस्य च ३४ ता रां
रया चाभ्यनुज्ञाताः सर्वा वानरयोषितः नेपथ्यविधिपूर्वं तु कृत्वा चापि प्रदक्षिणाम् ऽध्यारोहन्वि
मानं तत्सीतादर्शनकांक्षया ३५ ताभिः सहोत्थितं शीघ्रं विमानं प्रेक्ष्य राघवः ऋष्यमूकसमीपे तु
वैदेहीं पुनरब्रवीत् ३६ दृश्यते सौ महान्सीते सविद्युदिव तोयदः ऋष्यमूको गिरिश्रेष्ठः कांचनै
र्धातुभिर्वृतः ३७ अत्राहं वानरेंद्रेण सुग्रीवेण समागतः समयश्च कृतः सीते वधार्थं वालिनो मया ३८

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा० वा० यु० एषासादृश्यतेपंपानलिनीचित्रकानना त्वयाविहीनोयत्राहंविललापसुदुःखितः ३९ अस्यास्ती
रेमयादृष्टाशबरीधर्मचारिणी अत्रयोजनबाहुश्चकबंधोनिहतोमया ४० दृश्यतेसौजनस्थाने
२८ सीतेश्रीमान्वनस्पतिः ४१ जटायुश्चमहातेजास्तवहेतोर्विलासिनी रावणेनहतोयत्रपक्षिणांप्र
म वरोबली ४२ एतत्तदाश्रमपदंस्माकंवरवर्णिनी पर्णशालातथाचित्रादृश्यतेशुभदर्शने यत्रत्वंरा
क्षसेंद्रेणरावणेनहृताबलात् ४३ एषागोदावरीरम्याप्रसन्नसलिलाशिवा अगस्त्यस्याश्रमोह्येषदृ
श्यतेपश्यमैथिलि ४४ दीप्तश्चैवाश्रमश्चैषःसुतीक्ष्णस्यमहात्मनः ४५ वैदेहिदृश्यतेचासौश
रभंगाश्रमोमहान् उपयातःसहस्राक्षोयत्रशक्रःपुरंदरः ४६ एतेतेतापसावासादृश्यंतेतनुमध्यमे
अत्रिःकुलपतिर्यत्रसूर्यवैश्वानरप्रभः ४७ अत्रसीतेत्वयादृष्टातापसीधर्मचारिणी अस्मिन्देशे
महाकायोविराधोनिहतोमया ४८ असौसुतनुशैलेंद्रःचित्रकूटःप्रकाशते यत्रमांकैकेयीपुत्रः
प्रसादयितुमागतः ४९ एषासायमुनादूरात्दृश्यतेचित्रकानना भरद्वाजाश्रमोयत्रश्रीमानेषः
प्रकाशते ५० एषात्रिपथगागंगादृश्यतेवरवर्णिनि नानाद्विजगणाकीर्णासंप्रपुष्पितकानना ५१ राम०
२८

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

शृंगिवेरपुरं चैतत्गुहो यत्र समागतः ॥ ५३ ॥ एषा च दृश्यते सीते सरयूर्यूपमालिनी ॥ नानातरुगणाकी
र्णा संप्रपुष्पितकानना ॥ ५४ ॥ एषा च दृश्यते सीते राजधानी पितुर्मम ॥ अयोध्यां कुरु वैदेहि प्रणामं पुनरा
गता ॥ ५५ ॥ ततस्ते वानराः सर्वे राक्षसश्च विभीषणः ॥ उत्पत्योत्पत्य ददृशुस्तां पुरीं शुभकाननाम् ॥ ५६ ॥
ततस्तु तां पांडुरहर्म्यमालिनीं विशालकक्ष्यां गजवाजिसंकुलाम् ॥ पुरीमयोध्यां ददृशुः प्लवंगमाः पुरीं
महेंद्रस्य यथामरावतीम् ॥ ५७ ॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये युद्धकाण्डे षट्विंशाच्छतत
मः सर्गः ॥ १२६ ॥ पूर्णे चतुर्दशे वर्षे पंचम्यां लक्ष्मणाग्रजः भरद्वाजाश्रमं प्राप्य ववंदे नियतो मुनिम्
१ सोऽपृच्छदभिवाद्यैनं भरद्वाजं तपोधनम् शृणोषि कच्चिद्भगवन् सुभिक्षानामयं पुरे २ कच्चि
त्स युक्तो भरतो जीवंत्यपि च मातरः एवमुक्तस्तु रामेण भरद्वाजो महामुनिः प्रत्युवाच रघुश्रेष्ठं ।
स्मितपूर्वं प्रहृष्टवत् ३ आज्ञावशत्वे भरतो जटिलस्त्वां प्रतीक्षते पादुके ते पुरस्कृत्य सर्वं च कुशलं
गृहे ४ त्वां पुरा चीरवसनं प्रविशंतं महावनम् स्त्रीतृतीयं च्युतं राज्याद्धर्मकामं च केवलम् ५ पदा
तिं त्यक्तसर्वस्वं पितृनिर्देशकारिणम् सर्वभोगपरित्यक्तं स्वर्गच्युतमिवामरम् ६ दृष्ट्वा तु करुणा

रा०वा०यु० पूर्वं मम्मासीत्समितिंजयः कैकेयीवचने युक्तं वन्यमूलफलाशनम् ७ सांप्रतं सुसमृद्धार्थं समि
त्रामात्यबांधवम् समीक्ष्य विजितारिं च मम भूत्प्रीतिरुत्तमा ८ सर्वं च सत्त्व दुःखं वै ते विदितं मम राघ
२९१ व यत्त्वया विपुले प्राप्तं जनस्थानवधादिकम् ९ ब्राह्मणार्थं नियुक्तस्य रक्षतः सर्वतापसान् रावणेन न
हृता भार्या बभूवेयमनिंदिता १० मारीचदर्शनं चैव तत्सोन्मथनमेव च कबंधदर्शनं चैव पंपाभि
गमनं तथा ११ सुग्रीवेण च ते सख्यं यत्र वाली हतस्त्वया मार्गणं चैव वैदेह्याः कर्म वातात्मजस्य च
१२ विदितायां च वैदेह्यां नलसेतुर्यथा कृतः यथा चादीपिता लंका प्रहृष्टैर्हरियूथपैः १३ सपुत्रबां
धवामात्यः सबलः सहवाहनः यथा च निहतः संख्ये रावणो बलदर्पितः १४ यथा च निहते तस्मिन् रावणे
देवकंटके समागमश्च त्रिदशैर्यथा दत्तश्च ते वरः १५ सर्वं ममैतद्विदितं तपसा धर्मवत्सल संपतंति
च मे शिष्याः प्रवृत्ताख्याः पुरीमितः १६ अहमप्यत्र ते दद्मि वरं शस्त्रभृतां वर अर्घ्यं प्रतिगृहाणेदमयो
ध्यां श्वो गमिष्यसि १७ तस्य तच्छिरसा वाक्यं प्रतिगृह्य नृपात्मज बाढमित्येव संहृष्टः श्रीमान्वरमयाच
त १८ अकाले फलिनो वृक्षाः सर्वे चापि मधुस्रवाः फलान्यमृतगंधीनि बहूनि विविधानि च १९ राम०

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

भवंतुमार्गेभगवन्नयोध्यांप्रतिगछतः तथेतिचप्रतिज्ञातेवचनात्सममनंतरम् २० अभवन्पादपास्त
त्रस्वर्गपादपसन्निभाः निष्फलाःफलिनश्चासन्विपुष्पाःपुष्पशालिनः २१ शुष्काःसमग्रपत्रास्ते
नगाश्चैवमधुस्रवाः सर्वतोयोजनास्तिस्रोगछतामभवंस्तदा २२ ततःप्रहृष्टाःप्लवगर्षभास्तेवहूनि
दिव्यानिफलानिचैव कामादुपाश्नंतिसहस्रशस्तेमुदान्विताःस्वर्गजितोमुदेव॥२३॥ इत्यार्षेरामा
यणेयुद्धकाण्डेसप्तविंशाच्छततमःसर्गः॥१२७॥ अयोध्यांतुसमालोक्यचिंतयामासराघवः प्रि
यकामःप्रियंरामस्ततस्त्वरितविक्रमः १ चिंतयित्वाततोदृष्टिंवानरेषुन्यपातयत् उवाचधी
मांस्तेजस्वीहनूमंतंप्लवंगमम् २ अयोध्यांत्वरितोगछ शीघ्रंप्लवगसत्तम जानीहिकच्चित्कुश
लीजनोनृपतिमंदिरे ३ शृंगिवेरपुरंप्राप्यगुहंगहनगोचरम् निषादाधिपतिंब्रूहिकुशलं
वचनान्मम ४ श्रुत्वातुमांकुशलिनमरोगंविगतज्वरम् भविष्यतिगुहःप्रीतःसममात्मसमः
सखा ५ अयोध्यायाश्चतेमार्गंप्रवृत्तिंभरतस्यच निवेदयिष्यतिप्रीतोनिषादाधिपतिर्गुहः ६ भ
रतस्तुत्वयावाच्यःकुशलंवचनान्मम सिद्धार्थंशंसमांतस्मैसभार्यंसहलक्ष्मणम् ७ हरणं

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०वा०यु० चापिवैदेह्यारावणेनबलीयसा सुग्रीवेण च संवादंवालिनश्चवधंरणे ८ मैथिल्यान्वेषणं
३२२ चैवयथाचाधिगतात्वया लंघयित्वामहातोयमापगापतिमव्ययम् ९ उपयानंसमुद्रस्यसा
२९२ गरस्यचदर्शनम यथाचकारितोसेतूरावणश्चयथाहतः १० वरदानंमहेंद्रेणब्रह्मणावरु
णेनच महादेवप्रसादाच्चपित्राममसमागमम् ११ उपयानंचमांसौम्यभरतायनिवेदय सह
राक्षसराजेनहरीणामीश्वरेणच १२ जित्वाशत्रुगणान्रामःप्राप्यचानुत्तमंयशः उपयाति
समृद्धार्थःसहमित्रैर्महाबलैः १३ एतच्छ्रुत्वायमाकारंभजतेभरतस्ततः सचतेवेदित
व्यःस्यात्सर्वंयच्चापिमांप्रति १४ ज्ञेयाःसर्वेचवृत्तांताभरतस्येंगितानिच तत्वेनमुखवर्णेन
दृष्ट्याव्याभाषितेनच १५ सर्वकामसमृद्धंहिहस्त्यश्वरथसंकुलम पितृपैतामहंराज्यंकस्यना
वर्तयेन्मनः १६ संगत्याभरतः श्रीमानराज्येनार्थीस्वयंभवेत प्रशास्तुवसुधांसर्वामखिलांरघु
नंदनः १७ तस्यबुद्धिंचविज्ञायव्यवसायंचवानर यावन्नदूरंयाताःस्मःक्षिप्रमागंतुमर्हसि १८ ३
ति इतिप्रसमादिष्टोहनूमानमारुतात्मजः मानुषंधारयन्रूपमयोध्यांत्वरितोययौ १९ अथोत्पपातवेगे रा० ३२२
२९२

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

नहनूमान्मारुतात्मजः गरुत्मानिव वेगेन जिघृक्षन्नुरगोत्तमम् २० लंघयित्वा पितृपथं विहगेंद्रालयं शुभ
मम् गंगायमुनयोर्भीमं समतीत्य समागमम् २१ शृंगवेरपुरं प्राप्य गुहमासाद्य वीर्यवान् स वाचा शुभ
या हृष्टो हनूमानिदमब्रवीत् २२ सखा तु तव काकुत्स्थो रामः सत्यपराक्रमः ससीतः सहसौमित्रिः स त्वां
कुशलमब्रवीत् २३ पंचमीमद्य रजनीमुषित्वा वचनान्मुनेः भरद्वाजाभ्यनुज्ञातं द्रक्ष्यस्यद्यैव राघवं
२४ एवमुक्त्वा महातेजाः संप्रहृष्टतनूरुहः उत्पपात महावेगाद्वेगवानविचारयत् २५ सोपश्य
द्रामतीर्थं च नदीं वालुकिनीं तथा वरूथीं गोमतीं चैव भीमं सालवनं तथा २६ प्रजाश्च बहुसाहस्रीः स्फी
ताञ्जनपदानपि स गत्वा दूरमध्वानं त्वरितः कपिकुंजरः २७ आससाद द्रुमान्फुल्लान्नंदिग्राम
समीपगान् सुराधिपस्योपवने यथा चैत्ररथे द्रुमान् स्त्रीभिः सपुत्रैः पौत्रैश्च रममाणैः स्वलंकृतैः २८
क्रोशमात्रे त्वयोध्यायाश्चीरकृष्णाजिनांबरम् ददर्श भरतं दीनं कृशमाश्रमवासिनम् २९ जटिलं
मलदिग्धांगं भ्रातृव्यसनकर्षितम् फलमूलाशिनं दांतं तापसं धर्मचारिणम् ३० समुन्नत
जटाभारं वल्कलाजिनवाससम् नियतं भावितात्मानं ब्रह्मर्षिसमतेजसम् ३१ पादुके ते पुरस्कृ

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० वा० यु० त्वप्रशास्तेतंवसुंधराम् चातुर्वर्ण्यंचलोकस्यत्रातारंसर्वतोभयात् ३२ उपस्थितममात्यैश्चशुचि
३२३ भिश्चपुरोहितैः बलमुख्यैश्चयुक्तैश्चकाषायांबरधारिभिः ३३ नहितेराजपुत्रंतंचीरकृष्णाजि
२८३ नांबरम् परिभोक्तुंव्यवस्यंतिपौराधर्मवत्सलाः ३४ तंधर्ममिवधर्मज्ञंदेहवंतमिवापरम् उ
वाचप्रांजलिर्वाक्यंहनूमान्मारुतात्मजः ३५ वसंतंदंडकारण्येयंत्वंचीरजटाधरम् अनुशोच
सिकाकुत्स्थंसत्वांकौशलमब्रवीत् ३६ प्रियमाख्यामितेदेवशोकंत्यजसुदारुणम् अस्मिन्मुहूर्ते
भ्रात्रात्वंरामेणसहसंगतः ३७ निहत्यरावणंरामःप्रतिलभ्यचमैथिलीम् उपयातिसमृद्धार्थःसह
मित्रैर्महाबलैः ३८ लक्ष्मणश्चमहातेजावैदेहीचयशस्विनी सीतासमग्रारामेणमहेंद्रेणशचीयथा
३९ एवमुक्तोहनुमताभरतःकैकयीसुतः पपातसहसाहृष्टोहर्षान्मोहमुपागमत् ४० ततोमुहूर्तादु
त्थायप्रत्याश्वस्यचराघवः हनूमंतमुवाचेदंभरतःप्रियवादिनम् ४१ अशोकजैःप्रीतिमयैःकपि
मालिंग्यसंभ्रमात् सिषेचभरतःश्रीमान्विपुलैरश्रुबिंदुभिः ४२ देवोवामानुषोवात्वमनुक्रोशा रा०म०
दिहागतः प्रियाख्यानस्यतेसौम्यददामिब्रुवतःप्रियम् ४३ गवांशतसहस्रंचग्रामाणांचशतंपरम् ३२३
२८३

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

सकुंडलाः शुद्धभाचाराः भार्या कन्यास्तु षोडश ४४ हेमवर्णाः सुनासोरुः शशिसौम्याननाः स्त्रियः सर्वा
भरणसंपन्नाः संपन्नाः कुलजातिभिः ४५ निशाम्य रामागमनं नृपात्मजः कपिप्रवीरस्य तदाद्भुतोपमम्
प्रहर्षितो रामदिदृक्षयाभवत्पुनश्च हर्षादिदमब्रवीत् ॥४६॥ इत्यार्षे रामायणे युद्धकांडेऽष्टाविंशाच्छ
ततमः सर्गः ॥१२८॥ बहूनि नाम वर्षाणि गतस्य सुमहद्वनम् शृणोम्यहं प्रीतिकरं मम नाथस्य कीर्त्तनम्
१ कल्याणी बत गाथेयं लौकिकी प्रतिभाति मे एति जीवंतमानंदो नरं वर्षशतादपि २ राघवस्य हरी
णां च कथमासीत्समागमः कस्मिन्देशे किमाश्रित्य तत्त्वमाख्याहि पृच्छतः ३ स पृष्टो राजपुत्रेणाव
स्यां समुपवेशितः आचचक्षे ततः सर्वं रामस्य चरितं वने ४ यथा प्रव्राजितो रामो मातुर्दत्ते वरे तव य
था च पुत्रशोकेन राजा दशरथो मृतः ५ यथा दूतैस्त्वमानीतस्तूर्णं राजगृहात्प्रभो त्वयायोध्यां प्रवि
ष्टेन यथा राज्यं न चेप्सितम् ६ चित्रकूटं गिरिं गत्वा राज्येनामित्रकर्षणः निमंत्रितस्त्वया भ्राता धर्म
माचरता सताम् ७ स्थितेन राज्ञो वचने यथा राज्यं विसर्जितम् आर्यस्य पादुके गृह्य यथासि पुनराग
तः ८ सर्वमेतन्महाबाहो यथावद्विदितं तव त्वयि प्रतिप्रयाते तु यद्वृत्तं तन्निबोध मे ९ अपयाते

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० बा० ५० त्वयि पित्तदास्सुस्त्रोत्तम्भगाद्विजम् परिद्यूनमिवात्यर्थं तद्वनं समपद्यत १० तद्वृत्तिमद्दितं घोरं सिंह
व्याघ्रमृगाकुलम् प्रविवेशाथ विजनं सुमहद्दण्डकावनम् ११ तेषां पुरस्ताद्बलवान् गच्छतां गहने व
२८४ ने विनदन्सुमहानादं विराधः प्रत्यदृश्यत १२ तमुत्क्षिप्य महानादमूर्द्ध्वबाहुमधोमुखम् निखातेऽप
क्षिपत्तीश्मन् दन्तमिव कुंजरम् १३ तत्कृत्वा दुष्करं कर्म भ्रातरौ रामलक्ष्मणौ सायाह्ने शरभंगस्य रम्य
माश्रममीयतुः १४ शरभंगे दिवं प्राप्ते रामः सत्यपराक्रमः अभिवाद्य मुनीन्सर्वान् जनस्थानमुपा
गमत् १५ पश्चाच्छूर्पणखा नाम रामपार्श्वमुपागता १६ ततो रामेण संदिष्टो लक्ष्मणः सहसोत्थितः
प्रगृह्य खड्गं चिच्छेद कर्णनासे महाबलः १७ चतुर्दश सहस्राणि जनस्थाननिवासिनाम् हतानि
वसता तत्र राघवेण महात्मना १८ एकेन सह संगम्य रामेणा रणमूर्द्धनि अन्हः चतुर्थभागेन निःशेषा
राक्षसाः कृताः महाबला महावीर्या स्तपसो विघ्नकारिणः १९ निहताः राघवेणाजौ दण्डकारण्यवासि
नः राक्षसाश्च विनिष्पिष्टाः खरश्च निहतो रणे २० दूषणं चाग्रतो हत्वा त्रिशिरास्तदनन्तरम् ततस्ते राम०
नार्दिता बालिशा वराः समुपागता २१ रावणानुचरो घोरो मारीचो नाम राक्षसः लोभयामास वैदेहीं
२८४

वचंद्रमाः॥१७१॥तद्रामबाणाभिहतं पपात रक्षःशिरः पर्वतसन्निकाशं। बभंज चर्यागृहगोपुराणि प्राकार
मुच्चं तमपातयच्च॥१७२॥तच्चातिकायं हिमवत्प्रकाशं रक्षस्तदा तोयनिधौ पपात॥ग्राहान्वरान्मीनव
रान्भुजंगमान्ममर्द भूमिं च समाविवेश॥१७३॥तस्मिन्हते ब्राह्मणदेवशत्रौ महाबले संयति कुंभकर्णे॥च
चाल भूर्भूमिधराश्च सर्वे हृष्टास्तु देवास्तुमुलं प्रणेदुः॥१७४॥ततस्तु देवर्षिमहर्षिपन्नगाः सुराश्च भू
तानि सुपर्णगुह्यकाः॥सयक्षगंधर्वगणा नभोगताः प्रहर्षिता रामपराक्रमेण॥१७५॥ततस्तु तेनास्य वधेन
भूरिणा मनस्विनो नैर्ऋतराजबांधवाः॥विनेदुरुच्चैर्व्यथिता रघूत्तमं हरिं समीक्ष्यैव यथा सुराहिताः॥१७६॥स
देवलोकस्य तमो विहत्य सम्यग्यथा राहुमुखाद्विमुक्तः॥तथा व्यभासीद्धरिसैन्यमध्ये निहत्य रामो युधि कुंभक
र्णम्॥१७७॥प्रहर्षमीयुर्बहवस्तु वानराः प्रबुद्धपद्मप्रतिमैरिवाननैः॥अपूजयन्राघवमिष्टभागिनं हते रि
पौ भीमबले दुरासदे॥१७८॥स कुंभकर्णं सुरसैन्यमर्दनं महत्सु युद्धेष्वजितं कदाचन॥ननंद हत्वा भरताग्रजो र
णे महासुरं वृत्रमिवामराधिपः॥१७९॥इत्यार्षे श्रीमद्रामायणे युद्धकाण्डे सप्तषष्टितमः सर्गः॥६७॥

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

भूत्वा रत्नमयो मृगः २२ सा राममब्रवीद्दृष्ट्वा वैदेही गृह्यतामिति अहो मनोहरः कान्त आश्रमो नो भवि
ष्यति २३ ततो रामो धनुष्पाणिर्मृगं तमनुधावति स तं जघान धावन्तं शरेणानतपर्वणा २४ अ
यसौम्य दशग्रीवो मृगयां याति राघवे लक्ष्मणे चापि निष्क्रान्ते प्रविवेशाश्रमं तदा २५ जग्राह तरसा
सीतां ग्रहः खे रोहिणीमिव त्रातुकामं ततो युद्धे हत्वा गृध्रं जटायुषम् २६ प्रगृह्य सहसा सीतां जगामा
शु स राक्षसः ततस्त्वद्भुतसंकाशाः स्थिताः पर्वतमूर्द्धनि २७ सीतां गृहीत्वा गच्छन्तं वानराः पर्वतोपमाः
ददृशुर्विस्मिताकारा रावणं राक्षसाधिपम् २८ ततः शीघ्रतरं गत्वा तद्विमानं मनोजवम् आरुह्य सह
वैदेह्या पुष्पकं स महाबलः प्रविवेश तदा लंकां रावणो राक्षसेश्वरः २९ तां सुवर्णपरिक्रान्ते शुभे
महति वेश्मनि प्रविश्य मैथिलीं वाक्यैः सान्त्वयामास रावणः ३० तृणवद्भाषितं तस्य तं च नैऋतपुं
गवम् अचिन्तयित्वा वैदेही अशोकवनिकां गता ३१ न्यवर्तत तदा रामो मृगं हत्वा तदा वने निवर्ते त
मानः काकुत्स्थो दृष्ट्वा गृध्रं स विव्यथे ३२ गृध्रं हतं तदा दृष्ट्वा रामः प्रियतरं पितुः मार्गमाणस्तु वैदेहीं राघ
वः सह लक्ष्मणः ३३ गोदावरीमन्वचरद्वनोद्देशांश्च पुष्पितान् आसेदतुर्महारण्ये कबन्धं नाम राक्षसम्

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

ग०वी०पु० ३४ ततः कबंधवचनाद्रामः सत्यपराक्रमः । ऋष्यमूकगिरिं गत्वा सुग्रीवेण समागतः ३५ ततः समा
गमः पूर्वं प्रीत्या हार्द्दी व्यजायत । भ्रात्रा निरस्तः क्रोधेन सुग्रीवो वालिना पुरा ३६ इतरे महाबले सुग्रीवः
२८५ तरसंवादात्प्रगाढः प्रणयस्तयोः । रामः स्वबाहुवीर्येण राज्यं तस्य प्रत्यपादयत् ३७ वालिनं समरे हत्वा महा
कायं महाबलम् । सुग्रीवः स्थापितो राज्ये सहितः सर्ववानरैः ३८ रामाय प्रतिजानीते राजपुत्र्यास्तु मार्गण
म् । आदिष्टा वानरेंद्रेण सुग्रीवेण महात्मना ३९ तेषां नो विप्रनष्टानां विंध्ये पर्वतसत्तमे । शोको
कामितश्चासीन्महान्कालोत्यवर्तत ४० भ्राता तु गृध्रराजस्य संपातिर्नाम वीर्यवान् । समाख्याति
स्म वसतीं सीतां रावणमंदिरे ४१ सोहं दुःखपरीतानां दुःखं तद्द्रातिनां नुदन् । आत्मवीर्यं समास्था
य योजनानां शतं प्लुतः ४२ तत्राहमेकामद्राक्षमशोकवनिकां गताम् । कौशेयवस्त्रां मलिनां निरानं
दां दृढव्रताम् ४३ तया समेत्य विधिवत्पृष्ट्वा सर्वमनिंदिताम् । अभिज्ञानं मया दत्तं रामनामांगु
लीयकम् । अभिज्ञानं मणिं लब्ध्वा चरितार्थोहमागतः ४४ मया च पुनरागम्य रामस्याक्लिष्टकर्मणः । राम०
अभिज्ञानं मया दत्तमर्चिष्मान्स महामणिः ४५ श्रुत्वा तां मैथिलीं रामस्त्वाप्राशंसे च जीवितम् । २८५

दशकोट्यः प्लवंगानां सर्वाः प्रस्थापिता दिशः

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

जीवितांतमनुप्राप्तः पीत्वामृतमिवातुरः ४६ उद्योजयित्वा नुद्योगं दध्येनं कावधेमनः जिघांसुरि
वलोकांतेस र्वांल्लोकान्विभावसुः ४७ ततः समुद्रमासाद्य नलं सेतुम कारयत् अतरत्कपिवीराणांवा
हिनी तेन सेतुना ४८ प्रहस्तमवधीन्नीलः कुंभकर्णं तु राघवः लक्ष्मणो रावणसुतं स्वयं रामस्तु रावण
म ४९ सशक्रेण समागम्य यमेन वरुणेन च महेश्वरस्वयंभूभ्यां तथा दशरथेन च ५० तैश्च दत्तव
रः श्रीमानृषिभिश्च समागतैः सुरर्षिभिश्च काकुत्स्थो वरांल्लेभे परंतपः ५१ स तु दत्तवरः प्रीत्या वान
रैश्च समागतः पुष्पकेण विमानेन किष्किंधामभ्युपागमत् ५२ तां गंगां पुनरासाद्य वसंतं मुनि
संनिधौ अविघ्नं पुष्ययोगेन श्वो रामं द्रष्टुमर्हसि ५३ ततः स वाक्यैर्मधुरैर्हनुमतो निशम्य हृष्टो भ
रतः कृतांजलिः उवाच वाणीं मनसः प्रहर्षिणीं चिरस्य पूर्णाः खलु मे मनोरथाः ॥५४॥ इत्यार्षे रामायणे
युद्धकाण्डे एकोनत्रिंशाच्छततमः सर्गः ॥१२९॥ श्रुत्वा तु परमानंदं भरतः सत्यविक्रमः हृष्टमा
ज्ञापयामास शत्रुघ्नं परवीरहा १ दैवतानि च सर्वाणि चैत्यानि नगरस्य सुगंधमाल्यैर्वादित्रैरर्चं
तु शुचयो नराः २ सूताः स्तुतिपुराणज्ञाः सर्वे वैतालिकास्तथा सर्वे वादित्रकुशला गणिकाश्चै

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० वा० यु० वर्णशः ३ राजदारास्तथामात्याः सैन्याः सेनांगनागणाः ब्राह्मणाश्च सराजन्याः श्रेणीमुख्यास्तथा
गणाः अभिनिर्यान्तु रामस्य द्रष्टुं शशिनिभं मुखम् ४ भरतस्य वचः श्रुत्वा शत्रुघ्नः परवीरहा विष्टीरने
२९६ कसाहस्रीश्चोदयामास भागशः ५ समीकुरुत निम्नानि विषमाणि समानि च स्थानानि च निरस्यं
तां नंदिग्रामादितः परम् ६ सिंचंतु पृथिवीं कृत्स्नां हिमशीतेन वारिणा ततोभ्यवकिरंत्वन्ये लाजैः
पुष्पैश्च सर्वशः ७ समुच्छ्रितपताकास्तु रथ्याः पुरवरोत्तमे शोभयंतु च वेश्मानि सूर्यस्योदयनं प्रति
१० स्रग्दाममुक्तपुष्पैश्च सुवर्णैरजतैरपि राजमार्गमसंबाधं किरंतु शतशो नराः ९ ततस्तच्छास
नं श्रुत्वा शत्रुघ्नस्य मुदान्विताः १० धृष्टिर्जयंतो विजयः सिद्धार्थश्चार्थसाधकः अशोको मंत्रपा
लश्च सुमंत्रश्चापि निर्ययुः ११ मत्तैर्नागसहस्रैश्च स[illegible] ध्वजैः सुविभूषितैः अपरे हेमकक्ष्या
भिः सगजाभिः करेणुभिः १२ निर्ययुस्तुरगाक्रांता रथैश्च सुमहारथाः शक्त्यृष्टिपाशहस्तानां सध्व
जानां पताकिनाम् १३ तुरगाणां सहस्रैश्च मुख्यैर्मुख्यतरान्वितैः पदातीनां सहस्रैश्च वीराः परि वृ राम०
ता ययुः १४ ततो यानान्युपारूढाः सर्वा दशरथस्त्रियः कौशल्यां प्रमुखे कृत्वा सुमित्रां चापि निर्ययुः

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

द्विजातिमुख्यैर्धर्मात्मा श्रेणीमुख्यैः सनैगमैः माल्यमोदकहस्तैश्च मंत्रिभिर्भरतो वृतः १६ शंखभेरी
निनादैश्च वंदिभिश्चाभिनंदितः पादुके ते गृहीत्वा तु शिरसा धर्मकोविदः १७ पांडरं छत्रमादा
य शुक्लमाल्योपशोभितम् शुक्ले च वालव्यजने राजार्हे हेमभूषिते १८ उपवासकृशो दीनश्ची
रकृष्णाजिनांवरम् भ्रातुरागमनं श्रुत्वा तत्पूर्वं हर्षमागतः १९ प्रत्युद्ययौ तदा रामं महात्मा सचिवैः
सह अश्वानां खुरशब्दैश्च रथनेमिस्वनेन च २० शंखदुंदुभिनादेन संचचालेव मेदिनी गजा
नां बृंहितैश्चापि शंखदुंदुभिनिस्वनैः २१ कृत्स्नं तु नगरं तत्तु नंदिग्राममुपागमत् समीक्ष्य भरतो वा
क्यमुवाच पवनात्मजम् २२ कच्चिन्न खलु कापेयी सेव्यते चलचित्तता न हि पश्यामि काकुत्स्थ
राममार्यं परंतपम् २३ कच्चिन्न चानुदृश्यंते कपयः कामरूपिणः अथैवमुक्ते वचने हनूमा
नीदमब्रवीत् २४ अर्थं विज्ञापयन्नेव भरतं सत्यविक्रमम् सदाफलान्कुसुमितान्वृक्षान् प्राप्य
मधुश्रवान् २५ भरद्वाजप्रसादेन मत्तभ्रमरनादितान् तस्य चैष वरो दत्तो वासवेन परंतप २६
ससैन्यस्य तदातिथ्यं कृतं सर्वगुणान्वितम् निस्वनः श्रूयते भीमः प्रहृष्टानां वनौकसाम् २७ म

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०वा०यु० न्येवानरसेनास्तानदीं तरन्तिवान्नुकीं रजोवर्षसमुद्भूतंपश्यमास्त्रवनंप्रति २८ मन्येसालवनंरम्यं
३२० ल्लोल्नयंतिप्लवंगमाः तदेतद्दृश्यतेदूरात्तविमानंचंद्रसन्निभम् विमानंपुष्पकंदिव्यंमनसाब्रह्मनिर्मितं
२८१ म् रावणंबांधवैःसार्द्धंहत्वालब्धंमहात्मना ३० तरुणादित्यसंकाशंविमानंरामवाहनं धनदस्यप्रसादेन
दिव्यमेतन्मनोजवम् ३१ एतस्मिन्भ्रातरौवीरौवैदेह्यासहराघवौ सुग्रीवश्चमहातेजाराक्षसश्चविभीष
णः ३२ ततोहर्षसमुद्भूतोनिस्वनोदिवमस्पृशत् स्त्रीबालयुववृद्धानांरामोयमितिकीर्तितः ३३ रथ
कुंजरवाजिस्थास्तेवतीर्यमहींगताः ददृशुस्तंविमानस्थंनराःसोममिवांबरे ३४ प्रांजलिर्भरतोभूत्वाप्र
हृष्टोराघवोन्मुखः स्वागतेनार्घ्यपाद्यैश्चततोराममपूजयत् ३५ मनसाब्रह्मणासृष्टेविमानेभरताग्र
जः रराजपृथुदीर्घाक्षोवज्रपाणिरिवामरः ३६ ततोविमानाग्रगतंभरतोभ्रातरंतदा ववंदेप्रणतोराम
मंमेरुस्थमिवभास्करम् ३७ ततोरामाभ्यनुज्ञातंतद्विमानमनुत्तमम् हंसयुक्तंमहावेगंनिपपातमही
तलम् ३८ आरोपितोविमानंततभरतःसत्यविक्रमः राममासाद्यमुदितःपुनरेवाभ्यवादयत् ३९ राम०
तंसमुत्थाप्यकाकुत्स्थःचिरस्याक्षिपथंगतम् अंकेभरतमारोप्यमुदितःपरिषस्वजे ४० ततोल्न ३२०
२८१

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

स्मरामासाद्य वैदेहींच परंतपः अभ्यवादयत्प्रीतो भरतो नाम चाब्रवीत् ४१ सुग्रीवं कैकेयीपुत्रो
जांबवंतमथांगदम् मैंदंच द्विविदं नीलमृषभं चैव सस्वजे ४२ सुषेणंच नलंचैव गवाक्षं गंधमा
दनम् शरभं पनसंचैव परितः परिषस्वजे ४३ ते कृत्वा मानुषं रूपं वानराः कामरूपिणः कुशलं प
र्यपृच्छंस्ते प्रहृष्टा भरतं तदा ४४ अथाब्रवीद्राजपुत्रः सुग्रीवं वानरर्षभम् परिष्वज्य महातेजा भर
तो धर्मिणांवरः ४५ त्वमस्माकं चतुर्णां वै भ्राता सुग्रीव पंचमः सौहृदाज्जायते मित्रमपकारोरि
लक्षणम् ४६ विभीषणंच भरतः सांत्ववाक्यमथाब्रवीत् दिष्ट्या त्वया सहायेन कृतं कर्म सुदुष्क
रम् ४७ शत्रुघ्नश्च तदा राममभिवाद्य सलक्ष्मणम् सीतायाश्चरणौ वीरो विनयादभ्यवादयत्
४८ रामो मातरमासाद्य विवर्णां शोककर्षिताम् जग्राह प्रणतः पादौ मनो मातुः प्रहर्षयन् ४९
अभिवाद्य सुमित्रांच कैकेयींच यशस्विनीम् समातॄंश्च ततः सर्वाः पुरोहितमुपागमत् ५० स्वा
गतं ते महाबाहो कौशल्यानंदवर्द्धन इति प्रांजलयः सर्वे नागरा राममब्रुवन् ५१ तान्यंजलिसहस्रा
णि प्रगृहीतानि नागरैः आकोशानीव पद्मानि ददर्श भरताग्रजः ५२ पादुके ते तु रामस्य गृहीत्वा

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०वा०यु० भरतस्त्वपम् चरणाभ्यां नरेंद्रस्य योजयामास धर्मवित् ५३ अब्रवीच्च तदा रामं भरतः स कृतांजलिः ए
तत्ते सकलं राज्यं न्यासं निर्यातितं मया ५४ अद्य जन्म कृतार्थं मे संवृत्तश्च मनोरथः यत्त्वां पश्यामि
२५८ राजानमयोध्यां पुनरागतम् ५५ अवेक्षतां भवान्कोशं कोष्ठागारं गृहं बलम् भवतस्तेजसा सर्वं
कृतं दशगुणं मया ५६ तथा ब्रुवाणं भरतं दृष्ट्वा तं भ्रातृवत्सलम् मुमुचुर्वानरा बाष्पं राक्षसश्च वि
भीषणः ५७ ततः प्रहर्षाद्भरतमंकमारोप्य राघव ययौ तेन विमानेन ससैन्यो भरताश्रमम् ५८ भ स
रताश्रममासाद्य ससैन्यो राघवस्तदा अवतीर्य विमानाग्रादवतस्थे महीतले ५९ अब्रवीच्च
तदा रामस्तद्विमानमनुत्तमम् वह वैश्रवणं देवमनुजानामि गम्यताम् ६० ततो रामाभ्यनुज्ञातं त
द्विमानमनुत्तमम् उत्तरां दिशमुद्दिश्य जगाम धनदालयम् ६१ विमानं पुष्पकं दिव्यं संगृही
तं तु रक्षसा अगमद्धनदं वेगाद्रामवाक्यप्रचोदितम् ६२ पुरोहितस्यात्मसमस्य राघवो बृहस्पतेः
शक्र इवामराधिपः निपीड्य पादौ पृथगासने शुभे सहैव तेनोपविवेश वीर्यवान् ॥६३॥ इत्यार्षे श्री राम०
मद्रामायणे वाल्मीकीये युद्धकाण्डे मधुमितपदषष्ट्याम भिरामराम भरतसमागमे सरामानुमित्र
२५८

वर्गसहितस्यभरताश्रमप्रवेशोनामत्रिंशाच्छततमःसर्गः॥१३०॥शिरस्यंजलिमाधायकैकेय्यानं
दवर्द्धनः बभाषेभरतोज्येष्ठंरामंसत्यपराक्रमम् १ पूजितामामिकामातादत्तंराज्यमिदंमम तद्
दामिपुनस्तुभ्यंयथात्वमददामम २ धुरमेकाकिनान्यस्तामृषभेणावलीयसा किशोरेवगुरुं
भारंनवोढुमहमुत्सहे ३ वारिवेगेनमहताभिन्नःसेतुरिवक्षरन् दुर्बंधनमिदंमन्येराज्यछिद्र
मसंवृतम् ४ गतिंखरइवाश्वस्यहंसस्येवचवायसः नान्वेतुमुत्सहेवीरतवमार्गमरिंदम ५
यथाचारोपितोवृक्षोजातश्चांतर्निवेशने महानपिदुरारोहोमहास्कंधःप्रशाखवान् ६ शीर्य
तपुष्पितोभूत्वानफलानिप्रदर्शयन् तस्यनानुभवेदर्थंयस्यहेतोःसरोपितः ७ एषोपमामहा
बाहोत्वमर्थंवेत्तुमर्हसि यद्यस्मान्मनुजेंद्रत्वंभर्तान्भृत्यान्नशाधिहि ८ जगदद्याभिषिक्तं
त्वामनुपश्यतुराघव प्रतपंतमिवादित्यंमध्याह्नेदीप्ततेजसं ९ तूर्यसंघातनिर्घोषैःकांची
नूपुरनिस्वनैः मधुरैर्गीतशब्दैश्चप्रतिबुध्यस्वशेष्वच १० यावदावर्त्ततेचक्रंयावतीचव
सुंधरा तावत्त्वमिहलोकस्यस्वामित्वमनुवर्तय ११ भरतस्यवचःश्रुत्वारामःपरपुरंजयः तथे

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०वा०यु० तिप्रतिगृह्याहनिषसादासनेसुभे १२ ततः शत्रुघ्नवचनान्नीपुणाः श्मश्रुवर्द्धनाः सुखहस्ताःसु
३२९ शीघ्राश्च राघवंपर्य्यवारयन् १३ पूर्वंतुभरतेस्नातेलक्ष्मणेच्चमहाबले सुग्रीवेवानरेंद्रेचराक्ष
२७७ सेंद्रेविभीषणे १४ विशोधितजटःस्नातश्चित्रमाल्यानुलेपनः महार्हवसनोपेतस्तस्थौतत्रश्रि
याज्वलन् १५ प्रतिकर्मचरामस्यकारयामासवीर्यवान् लक्ष्मणस्यचलक्ष्मीवानिक्ष्वाकु
कुलवर्द्धनः १६ प्रतिकर्मचसीतायाःसर्वादशरथस्त्रियः आत्मनैवतदाचक्रुर्मनस्विन्योमनोह
रम् १७ ततोवानरपत्नीनांसर्वासामेवशोभनम् चकारयत्नात्कौशल्याप्रहृष्टापुत्रवत्सला १८
ततः शत्रुघ्नवचनात्सुमंत्रोनामसारथिः योजयित्वाभिचक्रामरथंसर्वांगशोभनम् १९ अर्कम
ण्डलसंकाशंदिव्यंदृष्ट्वारथंस्थितम् आरुरोहमहाबाहूरामःपरपुरंजयः २० सुग्रीवोहनु
मांश्चैवमहेंद्रसदृशद्युती स्नातौदिव्यनिभैर्वस्त्रैर्जग्मतुःशुभकुंडलौ २१ सर्वाभरणजुष्टाश्च
ययुस्ताःशुभकुंडलाः सुग्रीवपत्न्यःसीताचद्रष्टुंनगरमुत्सुकाः २२ अयोध्यायांचसचिवारा
ज्ञोदशरथस्यच पुरोहितंपुरस्कृत्यमंत्रयामासुरर्थवत् २३ अशोकोविजयश्चैवसिद्धार्थश्च राम०
३२९
२७७

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०वा०यु० कुंभकर्णवधेन सप्तपञ्चाशत्तमः सर्गः ॥ पूर्वीभागः ॥ श्रीसाःमाः श्रवसमाप्तः ॥ अथ उत्तरभागप्रारम्भ ॥ कुंभ
१७९ कर्णं हतं दृष्ट्वा राघवेण महात्मना राक्षसा राक्षसेन्द्राय रावणाय न्यवेदयन् १ राजन् स कालसंका
शः संयुक्तः कालधर्मणा विद्राव्य वानरीं सेनां भक्षयित्वा च वानरान् २ प्रतपित्वा मुहूर्तं तु प्रशा
न्तो रामतेजसा कायेनार्द्धं प्रविष्टेन समुद्रं भीमदर्शनम् ३ निकृत्तकर्णोरुभुजे विस्रवद्रुधि
रंबहु रुध्वा द्वारं शरीरेण लंकायाः पर्वतोपमः ४ कुंभकर्णस्तव भ्राता काकुत्स्थशरपीडि
तः अगंडभूतो विकृतो दावदग्ध इव द्रुमः ५ श्रुत्वा विनिहतं संख्ये कुंभकर्णं महाबलम् राव
णः शोकसंतप्तो मुमोह च पपात च ६ पितृव्यं निहतं श्रुत्वा देवांतकनरांतकौ त्रिशिराश्चाति
कायश्च रुरुदुः शोकपीडिताः ७ भ्रातरं निहतं श्रुत्वा रामेणाक्लिष्टकर्मणा महोदरमहापार्श्वौ
शोकाक्रांतौ बभूवतुः ८ ततः कृच्छ्रात्समासाद्य संज्ञां राक्षसपुंगवः कुंभकर्णवधाद्दीनो विलला राम०
प सरावणः ९ हा वीर रिपुदर्पघ्न कुंभकर्ण महाबल त्वं मां विहाय वै दैवाद्यातोसि यमसादनम् १० १७९

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

समाहिताः मंत्रयन्रामवृद्ध्यर्थंवृत्यर्थंनगरस्यच २४ सर्वमेवाभिषेकार्थंजयार्हस्यमहात्मनः कर्तुं
मर्हथरामस्ययद्यन्मंगलपूर्वकम् २५ इतितेमंत्रिणःसर्वेसंदिश्यचपुरोहितम् नगरान्निर्ययुस्तूर्णं
रामदर्शनबुद्धयः २६ हरियुक्तंसहस्राक्षोरथमिंद्रइवानघः प्रययौरथमास्थायरामोनगरमुत्तमं
२७ जग्राहभरतोरश्मीन्शत्रुघ्नश्छत्रमाददे लक्ष्मणोव्यजनंतस्यमूर्ध्निसंवीजयत्तदा २८ श्वेतं
चवालव्यजनंजग्राहेपरितःस्थितः अपरंचंद्रसंकाशंराक्षसेंद्रोविभीषणः २९ ऋषिसंघैस्तदा
काशेदेवैश्चसमरुद्गणैः स्तूयमानस्यरामस्यशुश्रुवेमधुरध्वनिः ३० ततःशत्रुंजयंनामकुंज
रंपर्वतोपमम् आरुरोहमहातेजाःसुग्रीवःप्लवगर्षभः ३१ नवनागसहस्राणिययुरास्थाय
वानराः मानुषंविग्रहंकृत्वासर्वाभरणभूषिताः ३२ प्रययौपुरुषव्याघ्रस्तांपुरींहर्म्यमालिनीं
शंखशब्दप्रणादैश्चदुंदुभीनांचनिस्वनैः ३३ ददृशुस्तेसमायांतंराघवंसपुरःसरम् विराज
मानंवपुषारथेनातिरथंतदा ३४ तेवर्द्धयित्वाकाकुत्स्थंरामेणप्रतिनंदिताः अनुजग्मुर्महा
त्मानंभ्रातृभिःपरिवारितम् ३५ अमात्यैर्ब्राह्मणैश्चैवतथाप्रकृतिभिर्वृतः श्रियाविरुरुचेरामो

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०वा०यु० नक्षत्रैरिव चंद्रमाः ३६ स पुरोगामिभिस्तूर्यैस्तालस्वस्तिकपाणिभिः प्रव्याहरद्भिर्मुदितैर्मंगलानि
३३० वृतो ययौ ३७ अक्षतं जातरूपं च गावः कन्याः सह द्विजाः नरा मोदकहस्ताश्च रामस्य पुरतो ययु ३
३०० ८ सख्यं च रामः सुग्रीवे प्रभावं चानिलात्मजे वानराणां च तत्कर्म व्याचचक्षेथ मंत्रिणाम् ३९
श्रुत्वा च विस्मयं जग्मुरयोध्यापुरवासिनः वानराणां च तत्कर्म राक्षसानां च तद्बलम् ४० द्यु
तिमानेतदाख्याय रामो वानरसंवृतः हृष्टपुष्टजनाकीर्णामयोध्यां प्रविवेश सः ४१ ततो ह्य
भ्युच्छ्रयन्पौराः पताकाश्च गृहे गृहे ऐक्ष्वाकाध्युषितं रम्यमाससाद पितुर्गृहम् ४२ अथाब्रवी
द्राजपुत्रो भरतं धर्मिणां वरम् अर्थोपहितया वाचा मधुरं रघुनंदनः ४३ पितुर्भवनमासाद्य
प्रविश्य च महात्मनः कौशल्यां च सुमित्रां च कैकेयीमभिवाद्य ४४ यच्च मद्भवनं श्रेष्ठं साशो
कवनिकं महत् मुक्तावैडूर्यसंकीर्णं सुग्रीवाय निवेदय ४५ तस्य तद्वचनं श्रुत्वा भरतः सत्य
विक्रमः हस्ते गृहीत्वा सुग्रीवं प्रविवेश तमालयम् ४६ ततस्तैलप्रदीपांश्च पर्यंकास्तरणानि
च गृहीत्वा विविशुः क्षिप्रं शत्रुघ्नेन प्रचोदिताः उवाच च महातेजाः सुग्रीवं राघवानुजः अभि राम०

३३०
३००

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

षेकाय रामस्य दूतानाज्ञापयत्प्रभो ४८ सौवर्णान् वानरेंद्राणां चतुर्णां चतुरो घटान् ददौ क्षिप्रं स सु
ग्रीवः सर्वरत्नविभूषितान् ४९ यथाभ्युदयसमये चतुर्णां सागरांभसाम् पूर्णैर्घटैः प्रतीक्षध्वं
तथा कुरुत वानराः ५० एवमुक्त्वा महात्मानो वानरा वारणोपमाः उत्पेतुर्गगनं शीघ्रं गरुडा
इव शीघ्रगाः ५१ जांबवांश्च हनूमांश्च वेगदर्शी च वानरः ऋषभश्चैव कलशान् जलपू
र्णानथानयन् ५२ नदीशतानां पंचानां जलं कुंभैरुपाहरन् पूर्वात्समुद्रात्कलशं जलपूर्ण
मथानयत् ५३ सुषेणः सत्वसंपन्नः सर्वरत्नविभूषितम् ऋषभो दक्षिणात्तूर्णं समुद्राज्जलमा
नयत् रक्तचंदनकर्पूरैः संवृतं कांचनं घटम् गवयः पश्चिमात्तोयमाजहार महार्णवात् ५५
रत्नकुंभेन महता शीतं मारुतविक्रमः उत्तराच्च जलं शीघ्रं गरुडानिलविक्रमः ५६ आजहार स
धर्मात्मा नीलः सर्वगुणान्वितः ततस्तैर्वानरश्रेष्ठैरानीतं प्रेक्ष्य तज्जलम् ५७ अभिषेकाय रामस्य
शत्रुघ्नः सचिवैः सह पुरोहिताय श्रेष्ठाय सुहृद्भ्यश्च न्यवेदयत् ५८ ततः स प्रयतो वृद्धो वसिष्ठो
ब्राह्मणैः सह रामं रत्नमये पीठे ससीतं संन्यवेशयत् ५९ वसिष्ठो विजयश्चैव जाबालिरथ काश्यप

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०वा०यु०प: कात्यायनो गौतमश्च वामदेवस्तथैव च ६० अभ्यषिंचन्नरव्याघ्रं प्रसन्नेन सुगंधिना सलिलेन
३३० सहस्राक्षं वसवो वासवं यथा ६१ ऋत्विग्भिर्ब्राह्मणैः पूर्वं कन्याभिर्मंत्रिभिस्तथा योधैश्चाभ्यषि
३०१ चंस्तं संप्रहृष्टैः सहनैगमैः ६२ सर्वौषधिरसैश्चापि दैवतैर्नभसि स्थितैः चतुर्भिर्लोकपालैश्च स
र्वैर्देवैश्च संगतैः ६३ ब्रह्मणा निर्मितं पूर्वं किरीटं रत्नशोभितम् अभिषिक्तः पुरा येन मनुस्तं दीप्त
तेजसम् ६४ तस्यान्ववाये राजानः क्रमाद्येनाभिषेचिताः सभायां हेमक्लृप्तायां शोभितायां महाधनैः
६५ रत्नैर्नानाविधैश्चैव चित्रितायां सुशोभनैः नानारत्नमये पीठे कल्पयित्वा यथाविधि ६६ कि
रीटेन ततः पश्चाद्वसिष्ठेन महात्मना ऋत्विग्भिर्भूषणैश्चैव समयोक्ष्यत राघवः ६७ छत्रं तस्य
च जग्राह शत्रुघ्नः पांडुरं शुभम् श्वेतं च वालव्यजनं सुग्रीवो वानरेश्वरः अपरं चंद्रसंकाशं
राक्षसेंद्रो विभीषणः ६८ मालां ज्वलंतीं वपुषा कांचनीं शतपुष्कराम् राघवाय ददौ वायुर्वा
सवेन सचोदितः ६९ सर्वरत्नसमायुक्तं मणिभिश्च विभूषितम् मुक्ताहारं नरेंद्राय ददौ शक्रप्र रा०म० ३३१
चोदितः ७० प्रजगुर्देवगंधर्वा ननृतुश्चाप्सरोगणाः अभिषेके तदर्हस्य तदा रामस्य धीमतः ७१ ३०१

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

भूमिः सस्यवती चैव फलवंतश्च पादपाः गंधवंति च पुष्पाणि बभूवू राघवोत्सवे ७२ सहस्रशतम
श्वानां धेनूनां च गवां तथा ददौ शतवृषान्पूर्वं द्विजेभ्यो मनुजर्षभः ७३ त्रिंशत्कोटिं हिरण्यस्य
ब्राह्मणेभ्यो ददौ पुनः नानाभरणवस्त्राणि महार्हाणि च राघवः ७४ अर्करश्मिप्रतीकाशां कांचनीं
मणिविग्रहाम् सुग्रीवाय स्रजं दिव्यां प्रायच्छन्मनुजाधिपः ७५ वैडूर्यमयचित्रे च चंद्ररश्मिवि
भूषिते वालिपुत्राय धृतिमानंगदायांगदे ददौ ७६ मणिप्रवरजुष्टं तं मुक्ताहारमनुत्तमम् सीता
यै प्रददौ रामश्चंद्ररश्मिसमप्रभम् ७७ अरजे वाससी दिव्ये शुभान्याभरणानि च अवेक्षमाणा
वैदेही प्रददौ वायुसूनवे ७८ अवमुच्यात्मनः कंठाद्धारं जनकनंदिनी अवैक्षत हरीन्सर्वान्भ
र्तारं च मुहुर्मुहुः ७९ तामिंगितज्ञः संप्रेक्ष्य बभाषे जनकात्मजाम् प्रदेहि सुभगे हारं यस्य तुष्टासि
भामिनि ८० तेजो धृतिर्यशो दाक्ष्यं सामर्थ्यं विनयो नयः पौरुषं विक्रमो बुद्धिर्यस्मिन्नेतानि नि
त्यदा ८१ ददौ सा वायुपुत्राय तं हारमसितेक्षणा ८१ हनूमांस्तेन हारेण शुशुभे वानरर्षभः चंद्रां
शुचयगौरेण श्वेताभ्रेण यथाचलः ८२ सर्ववानरवृद्धाश्च ये चान्ये वानरोत्तमाः वासोभिर्भूषणै

श्चैव यथार्हं प्रतिपूजिताः ८३ विभीषणोथ सुग्रीवो हनूमान्जांववांस्तथा सर्वे वानरमुख्याश्च रामे
णाक्लिष्टकर्मणा ८४ यथार्हं पूजिताः सर्वैः कामैरत्नैश्च पुष्कलैः प्रहृष्टमनसः सर्वे जग्मुरेव य
थागतम् ८५ ततो द्विविदमैंदाभ्यां नीलाय च परंतपः सर्वान्कामान्गुणान्गुणान्वीक्ष्य प्रददौ
वसुधाधिपः ८६ दृष्ट्वा सर्वे महात्मानः ततस्ते वानरर्षभाः विसृष्टाः पार्थिवेंद्रेण किष्किंधां समु
पागमन् ८७ सुग्रीवो वानरश्रेष्ठो किष्किंधां प्राविशत्पुरीम् ८८ विभीषणोपि धर्मात्मा सह तै
र्नैर्ऋतर्षभैः लब्ध्वा कुलधनं राजा लंकां प्रायान्महायशाः ८९ स राज्यमखिलं शासन्निहतारि
र्महायशाः राघवः परमोदारो रराज परया मुदा ९० उवाच लक्ष्मणं रामो धर्मज्ञं धर्मवत्सलः ९१
आतिष्ठ धर्मज्ञ मया सहेमां गां पूर्वराजाध्युषितां बलेन तुल्यं मया त्वं पितृभिर्धृता या त्वं यौवराज्ये धुर
मुद्वहस्व ९२ सर्वात्मना पर्यनुनीयमानो यदा न सौमित्रिरुपैति योगम् नियुज्यमानो भुवि यौवराज्ये
ततोभ्यषिंचद्भरतं महात्मा ९३ पौंडरीकाश्वमेधाभ्यां वाजिमेधेन चासकृत् अन्यैश्च विविधैर्य
ज्ञैरयजत्पार्थिवात्मजः ९४ राज्यं दश सहस्राणि प्राप्य वर्षाणि राघवः दशाश्वमेधानाजह्रे सद

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

ष्वान्भूरिदक्षिणान् ९५ आजानुलंबिबाहुः समहावक्षाः प्रतापवान् लक्ष्मणानुगो रामः प्रशशासपृ
थिवीमिमाम् ९६ राघवश्चापि धर्मात्मा प्राप्य राज्यमनुत्तमम् ईजे बहुविधैर्यज्ञैः ससुहृत्भ्रातृबा
धवः ९७ न पर्यदेवन्विधवा न च व्यालकृतं भयम् न व्याधिजं भयं चासीद्रामे राज्ये प्रशासति
९८ निर्दस्युरभवल्लोको नानर्थं कश्चिदस्पृशत् न च स्म वृद्धा बालानां प्रेतकार्याणि कुर्वते ९९
सर्वमुदितमेवासीत्सर्वो धर्मपरोभवत् राममेवानुपश्यंतो नाभ्यहिंसन्परस्परम् १०० आसन्व
र्षसहस्राणि तथा पुत्रसहस्रिणः निरामया विशोकाश्च रामे राज्यं प्रशासति १०१ नित्यमूलानि
त्यफलान्यासंस्तरवस्तत्र पुष्पिताः कालवर्षी च पर्जन्यः सुखस्पर्शश्च मारुतः १०२ स्वकर्मसुप्रव
र्तंते तुष्टाः स्वैरेव कर्मभिः आसन्प्रजा धर्मपरा रामे शासति नानृताः १०३ सर्वे लक्षणसंपन्नाः
सर्वे धर्मपरायणाः दशवर्षसहस्राणि रामो राज्यमकारयत् १०४ धर्म्यं यशस्यमायुष्यं राज्ञां च
विजयावहम् आदिकाव्यमिदं चार्षं पुरा वाल्मीकिना कृतम् १०५ यः शृणोति सदा लोके नरः
पापात्प्रमुच्यते पुत्रकामश्च पुत्रान्वै धनकामो धनानि च १०६ लभते मनुजे लोके श्रुत्वा रामा

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा० वा० पु० भिषेचनम् महीं विजयते राजा रिपूंश्चाप्यधितिष्ठति १०७ राघवेणायथा माता सुमित्रा लक्ष्मणेन
च भरतेन च कैकेयी जीवपुत्रास्तथा स्त्रियः १०८ श्रुत्वा रामायणमिदं दीर्घमायुश्च विंदति रामस्य
303 विजयं चेमं सर्वमक्लिष्टकर्मणः १०९ शृणोति य इदं काव्यं पुरा वाल्मीकिना कृतम् श्रद्दधानो
जितक्रोधो दुर्गाण्यतितरत्यसौ ११० समागम्य प्रवासान्ते रमन्ते सह बान्धवैः शृण्वंति य इदं काव्यं पुरा
वाल्मीकिना कृतम् १११ ते प्रार्थितान्वरान्सर्वान्प्राप्नुवंतीह राघवात् श्रवणेन सुराः सर्वे प्रीयंते सं
प्रशृण्वताम् ११२ विनायकाश्च शाम्यंति गृहे तिष्ठति यस्य वै विजयेत महीं राजा प्रवासी स्वस्तिमान्भवेत् ११३ स्त्रियो रजस्वलाः श्रुत्वा पुत्रान्सूयुरनुत्तमाम् ११४ पूजयंश्च पठंश्चैवमितिहासं
पुरातनम् सर्वपापैः प्रमुच्येत दीर्घमायुरवाप्नुयात् ११५ प्रणम्य शिरसा नित्यं श्रोतव्यं क्षत्रियैर्द्वि
जात् ऐश्वर्यं पुत्रलाभश्च भविष्यति न संशयः ११६ रामायणमिदं कृत्स्नं शृण्वतः पठतः सदा
प्रीयते सततं रामः स हि विष्णुः सनातनः आदिदेवो महाबाहुर्हरिर्नारायणः प्रभुः ११७ एवमेतत्पु रा०
रा वृत्तमाख्यानं भद्रमस्तु वः प्रव्याहरत विस्रब्धं बलं विष्णोः प्रवर्द्धताम् ११८ देवाश्च सर्वे तुष्य 303

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

त्तिग्रहणाच्छ्रवणात्तथा रामायणस्य श्रवणात्तुष्यंति पितरः सदा ११९ भक्त्या रामस्य ये चेमां
संहितामृषिणा कृतां ये लिखंतीह च नरास्तेषां वासस्त्रिविष्टपे १२० कुटुंबवृद्धिं धनधान्य
वृद्धिं स्त्रियश्च मुख्याः सुखमुत्तमं च श्रुत्वा शुभं काव्यमिदं महार्थं प्राप्नोति सर्वां भुवि चार्थसि
द्धिम् १२१ आयुष्यमारोग्यकरं यशस्यं सौभ्रात्रकं बुद्धिकरं शुभं च श्रोतव्यमेतन्नियमेन
सद्भिराख्यानमोजस्करमृद्धिकामैः ॥१२२॥ इति श्रीमद्युद्धकांडे सर्वजनपरिवृतस्य राजाधि
राजस्य श्रीरामभद्रस्य पट्टाभिषेकमुद्राख्यानं नाम एकत्रिंशाच्छततमः सर्गः ॥१३१॥ इति श्री
गोमतीतीरनैमिषारण्याश्रमे धर्मप्रतत्तुवाढगतमुनींद्रद्विजेंद्रवानरेंद्रदेवेंद्रगोपकेंद्रराक्षसें
द्रपरिवृतस्य जनककेकयेंद्रादि वसुधाधिपेंद्रपरिवृतस्य मुनिवृंदारकाकंदवंद्यमान कोरको
कारचरणयुगलस्य समुद्रात सन्मित्रसन्मंत्रिसहितस्य साकेतपुरवराधीश्वरस्य दीनानां दैन्यनि श्रा
हरणस्य उदीर्णवीर्योद्रावणवधार्थं देवैः प्रार्थितस्य रघुकुलतिलकसंभूतस्य श्रीसीताविशे
षकस्य लक्ष्मीपतेः साम्राज्यलक्ष्मीवतो राजाधिराजस्य लोकाभिरामस्य रामस्यानिकटोक्त

रा०वा०यु० यो:॥ श्रीरामात्मजयोरादिकवेः शिष्ययोः कुशलवयोराख्याने श्रीमद्वाल्मीकीये आदिकाव्ये

श्रीमद्रामायणे चतुर्विंशतिसहस्रिकायां संहितायां श्रीमद्युद्धकाण्डे पंचविंशोन्हि वर्तमानक

३०४ थाप्रसंगः समाप्तः॥ सीताराम सीताराम सीताराम सीताराम सीताराम सीताराम सीताराम सीता

रा०म०

३२६

३०४

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

ममशल्यमनुद्धृत्यबांधवानांमहाबल शत्रुसैन्यंप्रताप्यैकः कुंभकर्णक्वगच्छसि ११ इदानींत्व
हंनास्मियस्यमेदक्षिणोभुजः पतितोयंसमाश्रित्यनबिभेमिसुरासुरात् १२ कथमेवंविधो
वीरोदेवदानवदर्पहा कालाग्निप्रतिमोह्यद्यराघवेणरणेहतः १३ यस्यतेवज्रनिष्पेषोनकु
र्याद्व्यसनंसदा सकथंरामबाणार्तःप्रसुप्तोसिमहीतले १४ एतेदेवगणाःसार्द्धमृषिभिर्गग
नेस्थिताः निहतंत्वांरणेदृष्ट्वानिनदंतिप्रहर्षिताः १५ ध्रुवमद्यैवसंहृष्टालब्धलक्षाःप्लवंग
माः आरोक्ष्यंतीहदुर्गाणिलंकाद्वाराणिसर्वशः १६ राज्येननास्तिमेकार्यंकिंकरिष्यामिसी
तया कुंभकर्णविहीनस्यजीवितेनास्तिमेमतिः १७ यद्यहंभ्रातृहंतारंनहन्मियुधिराघवंननु
मेमरणंश्रेयोनचेदंव्यर्थजीवितम् १८ अद्यैवतंगमिष्यामिदेशंयत्रानुजोममनहिभ्रातॄ
न्समुत्सृज्यक्षणंजीवितुमुत्सहे १९ देवाहिमांहसिष्यंतिदृष्ट्वापूर्वापकारिणम् कथमिं
द्रंजयिष्यामिकुंभकर्णहतेत्वयि २० तदिदंमामनुप्राप्तंविभीषणवचःशुभम् यदज्ञानान्मया
तस्यनगृहीतंमहात्मनः २१ विभीषणवचोयावत्कुंभकर्णप्रहस्तयोः विनाशोयंसमुत्पन्नोमांव्री

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

२

रा० बा० यु० इयति दारुणाः २२ तस्यायं कर्मणः प्राप्तो विपाको मम शोकदः यन्मया धार्मिकः श्रीमा
१८० न्स निहतो विभीषणः २३ इति बहुविधमाकुलान्तरात्मा कृपणमतीव विलप्य कुंभकर्णो
न्यपतदथ दशाननो भृशार्तस्तमनु॥ जगमिंद्ररिपुं हतं विदित्वा ॥२४॥ इत्यार्षे रामायणे युद्धका
ण्डे षष्टितमः सर्गः ॥६०॥ एवं विलप्यमानस्य रावणस्य दुरात्मनः श्रुत्वा शोकाभितप्तस्य
त्रिशिरा वाक्यमब्रवीत् १ एवमेव महावीर्यो हतो नस्तात मध्यमः न तु सत्पुरुषा राजन्विल
पंति यथा भवान् २ नूनं त्रिभुवनस्यापि पर्याप्तस्त्वमसि प्रभो स कस्मात्प्राकृत इव शोचस्या
त्मानमीदृशम् ३ ब्रह्मदत्तास्ति ते शक्तिः कवचं सायकं धनुः सहस्रखरसंयुक्तो रथो मेघसम
स्वनः ४ त्वया सकृदशस्त्रेण विशस्ता देवदानवाः स सर्वायुधसंपन्नो राघवं शास्तुमर्हसि ५
कामं तिष्ठ महाराज निर्गमिष्याम्यहं रणे उद्धरिष्यामि ते शत्रून्गरुडः पन्नगानिव ६ शंबरो
देवराजेन नरको विष्णुना यथा तथाद्य शयितो रामो मया युधि निपातितः ७ श्रुत्वा त्रिशि
रसो वाक्यं रावणः कालचोदितः पुनर्जातमिवात्मानं मन्यते रावणस्तदा ८ श्रुत्वा त्रिशिरसो रा० म०
१८०

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

वेत्ते रूपं विद्रविष्यंति वानराः रामलक्ष्मणयोश्चापि हृदये प्रस्फुटिष्यतः १४ एवमुक्त्वा महातेजाः कुं
भकर्णो महाबलम् पुनर्जातमिवात्मानं मेने राक्षसपुंगवः १५ कुंभकर्णो बलान्नित्यौजा नंनतस्य पराक्र
मेवमभूत्समुद्दितो राजा प्राशांक स्वनिस्वनः १६ इत्येवमुक्तः संहृष्टो निर्जगाम महाबलः १७ राज्ञस्तु
वचनं श्रुत्वा कुंभकर्णः समुद्यतः आददे निशितं शूलं वेगाच्छत्रुनिबर्हणः १८ सर्वकालायसं दी
प्तं तप्तकांचनभूषणम् इंद्राशनिसमप्रख्यं वज्रप्रतिमगौरवम् १९ देवदानवगंधर्वयक्षकिंनर
सूदनम् रक्तमाल्यमहादामस्वतश्चोद्गतपावकम् २० आदाय विपुलं शूलं शत्रुशोणितरंजि
तम् कुंभकर्णो महातेजा रावणं वाक्यमब्रवीत् २१ गमिष्याम्यहमेकाकी तिष्ठत्विह बलं महत् अ
द्य तान्क्षुधितः क्रुद्धो भक्षयिष्यामि वानरान् २२ कुंभकर्णवचः श्रुत्वा रावणो वाक्यमब्रवीत्
सैन्यैः परिवृतो गच्छ शूलमुद्गरपाणिभिः २३ वानरा हि महात्मानः शीघ्राः सुव्यवसायिनः एकाकि
नं प्रमत्तं वा नयेयुर्दशनैः क्षयम् २४ तस्मात्परमदुर्धर्षैः सैन्यैः परिवृतो व्रज रक्षस्व रक्षसां पक्षं निसू सत्रूपक्षं
दय २५ अथासनात्समुत्पत्य स्रजं मणिकृतांतरां आबबंध महातेजाः कुंभकर्णस्य रावणः २६

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

नाकां देवांतकनरांतकौ त्रिशिराश्चातिकायश्च तेजस्वी बभूवुर्युद्धहर्षिताः ९ ततो हमहमित्येव गर्जंतो
नैर्ऋतर्षभाः रावणस्य सुता वीराः शक्रतुल्यपराक्रमाः १० अंतरिक्षगताः सर्वे सर्वे माया
विशारदाः सर्वे त्रिदशदर्पघ्नाः सर्वे समरदुर्मदाः ११ सर्वे सुबलसंपन्नाः सर्वे विस्तीर्णकीर्तयः
सर्वे समरमासाद्य न श्रूयंते स्म निर्जिताः १२ देवैरपि सगंधर्वैः सकिंनरमहोरगैः सर्वे स्त्रवि
दो वीराः सर्वे युद्धविशारदाः १ सर्वे प्रवरविज्ञानाः सर्वे लब्धवरास्तदा स तैस्तथा भास्क
रतुल्यदर्शनैः सुतैर्वृतः शत्रुबलप्रमर्दनैः रराज राजा मघवान्यथामरैर्वृतो महादान
वदर्पनाशनैः १५ स पुत्रान्संपरिष्वज्य भूषयित्वा च भूषणैः आशीर्भिश्च प्रशस्ताभिः प्रेष
यामास संयुगे १६ युद्धोन्मत्तं च मत्तं च भ्रातरौ चापि रावणः रक्षणार्थं कुमाराणां प्रेषयामा
स संयुगे १७ तेभिवाद्य महात्मानं रावणं रिपुरावणम् कृत्वा प्रदक्षिणं चैव महाकायाः प्र
तस्थिरे १८ सर्वौषधीभिर्गंधैश्च समालभ्य महाबलाः निर्जग्मुर्नैरृतश्रेष्ठाः षडेते यु
द्धकांक्षिणः १९ त्रिशिराश्चातिकायश्च देवांतकनरांतकौ महोदरमहापार्श्वौ निर्जग्मुः का

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

अ० रा० यु० त्वं चोदिताः २० ततः स ददर्श तं नागं नीलजीमूतसन्निभम् ऐरावतकुले जातमारुरोह म
१८१ होदरः २१ सर्वायुधसमायुक्तं नानाभिर्व्याप्य कं कृतम् स राजगजमास्थाय सवितेवास्तमूर्द्धनि
२२ हयोत्तमसमायुक्तं सर्वायुधसमाकुलम् आरुरोह रथश्रेष्ठं त्रिशिरा रावणात्मजः २३ त्रि
शिरा रथमास्थाय विरराज धनुर्धरः सविद्युदुल्कः सज्वालः सेन्द्रचाप इवाम्बुदः २४ त्रिभिः
किरीटैस्त्रिशिराः शुशुभे स्यन्दनोत्तमे हिमवानिव शैलेन्द्रस्त्रिभिः काञ्चनपर्वतैः २५ अतिका
योऽतितेजस्वी राक्षसेन्द्रसुतस्तदा आरुरोह रथश्रेष्ठं श्रेष्ठः सर्वधनुष्मताम् २६ सुचक्राक्षं सुसं
युक्तं सानुकर्षं सकूबरम् तूणीबाणासनैर्दीप्तं प्रासासिपरिघाकुलम् २७ स काञ्चनविचित्रे
ण किरीटेन विराजता भूषितोऽस्य वभौ मेरुः प्रभाभिरिव भासयन् २८ स रराज रथे तस्मिन् राजसू
नुर्महाबलः वृतो नैरृतशार्दूलैर्वज्रपाणिरिवामरैः २९ हयमुच्चैःश्रवःप्रख्यं श्वेतं कनकभू
षितम् मनोजवं महाकायमारुरोह नरान्तकः गृहीत्वा प्रासमुल्काभं विरराज नरान्तकः शक्तिमा
दाय तेजस्वी गुहः शिखिगतो यथा ३० देवान्तकः समादाय परिघं वज्रभूषितम् परिगृह्य जि राम० १८१

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रिंदोर्ष्णीवपुर्विष्णोर्विडिंवयन् ३२ महापार्श्वो महाकायो गदामादाय वीर्यवान् विराजगदापा
णिः कुवेर इव संयुगे ३३ प्रतस्थिरे महात्मानो वलैरप्रतिमैर्वृताः तातगजैश्च वतुरगैश्च रथैश्चाम्बु
दनिस्वनैः ३४ अनुजग्मुर्महाकाया राक्षसाः प्रवरायुधाः ते विरेजुर्महात्मानः कुमाराः सूर्यवर्च
सः ३५ किरीटिनः श्रिया जुष्टा महादीप्ता इवाम्बरे प्रगृहीता वभौ तेषां शस्त्राणामावलिः श्रिता
शारदाभ्रप्रतीकाशा हंसावलिरिवाम्बरे ३६ मरणं वापि निश्चित्य शत्रूणां वा पराजयम् इति कृ
त्वा मतिं वीरा निर्जग्मुः संयुगार्थिनः ३७ जगर्जुश्च विनेदुश्च चिक्षिपुश्चापि सायकान् जगृ
हुश्चापि ते वीरा निर्जग्मुर्युद्धदुर्मदाः ३८ क्ष्वेलितास्फोटनिनदैश्च चालेव वसुंधरा र
क्षसां सिंहनादैश्च विस्फोटितमिवाम्बरे ३९ ते ऽभिनिष्क्रम्य मुदिता राक्षसेन्द्रा महावलाः दद
शुर्वीनरानीकं समुद्यतशिलायुधम् ४० हरयो ऽपि महात्मानो ददृशुर्नैर्ऋतं वलम् हस्त्यश्व
रथसंवाधं किंकिणीशतनादितम् ४१ नीलजीमूतसंकाशं समुद्यतमहायुधम् दीप्तानलर
विप्रख्यैर्नैर्ऋतैः सर्वतो वृतम् ४२ तं दृष्ट्वा वलमायान्तं लब्धलक्षाः प्लवंगमाः समुद्यत

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० वा० यु० महाशैलाः सम्परोढुर्मुहुर्मुहुः ४३ अश्मवृष्टिमाताेर रक्षांसि प्रतिनर्दितवानरान् ४४ ततः समु
१८२ त्कृष्टवेगानि शिलाप्रक्षोभगणान्वानरयूथपानाम् अश्मवृष्टिमाणाः प्रहर्षमुत्तमं महाबला भीमतरं वि
नेदुः ४५ ते राक्षसबलं घोरं प्रविश्य हरियूथपाः विचेरुरुद्यतैः शैलैर्नागाः शिखरिणो यथा
४६ केचिदाकाशमाविश्य केचिदुर्व्यां प्लवंगमाः रक्षःसैन्येषु संक्रुद्धाः केचिद्द्रुमशिलायु
धाः ४७ द्रुमांश्च विपुलस्कन्धान् गृह्य वानरपुंगवाः तद्युद्धमभवद्घोरं रक्षोवानरसं
कुलम् ४८ ते पादपशिलाशैलैश्चक्रुर्वृष्टिमनूपमाम् बाणौघैर्वार्यमाणाश्च हरयो भी
मविक्रमाः ४९ सिंहनादान्विनेदुश्च रणे राक्षसवानराः शिलाभिश्चूर्णयामासुर्यातु
धानान्प्लवंगमाः ५० निजघ्नुः समरे क्रुद्धाः कवचाभरणावृतान् केचिद्रथगतान्वीरान्गा
जवाजिगतानपि ५१ निजघ्नुः सहसा युद्धे यातुधानान्प्लवंगमाः शैलशृंगान्वितांगास्ते
मुष्टिभिर्वान्तलोचनाः ५२ चेलुः पेतुश्च नेदुश्च तत्र राक्षसपुंगवाः राक्षसाश्च शरैस्तीक्ष्णै
र्विभिदुः कपिकुंजरान् ५३ शूलमुद्गरखड्गैश्च जघ्नुः प्रासैश्च शक्तिभिः अन्योन्यं पात राम० १८२

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

यामासुः परस्परजयैषिणः ५४ रिपुशोणितदिग्धांगास्तत्र वानरराक्षसाः ततः शैलैश्च खड्गैश्च
विस्रब्धैर्हरिराक्षसैः ५५ मुहूर्तेनावृता भूमिरभवच्छोणितोक्षिता विकीर्णैः पर्वताकारै रक्षो
भिररिमर्दनैः ५६ आसीद्वसुमती पूर्णा तदा युद्धमदान्वितैः आक्षिप्ताः क्षिप्यमाणाश्च भ
ग्नशैलैश्च वानराः ५७ पुनरंगैस्तदा चक्रुरासन्नायुद्धमद्भुतम् वानरान्वानरैरेव जघ्नुस्ते नै
र्ऋतर्षभाः ५८ राक्षसान् राक्षसैरेव जघ्नुस्ते हरियूथपाः आक्षिप्य च शिलास्तेषां निजघ्नू रा
क्षसा हरीन् ५९ तेषां चाच्छिद्य शस्त्राणि जघ्नू रक्षांसि वानराः निजघ्नुः शैलशस्त्रैश्च चि
च्छिदुश्च परस्परम् ६० सिंहनादान्विनेदुश्च रणे राक्षसवानराः छिन्नवर्मतनुत्राणा रा
क्षसा वानरैर्हताः ६१ रुधिरं सुस्रुवुस्तत्र रससारमिव द्रुमाः रथेन च रथं चापि वारणेना
पि वारणम् ६२ हयेन च हयं केचिन्निजघ्नुर्वानरा रणे प्रद्रुममानसः सर्वैश्चगृहीतमहाशिलाः
६३ हरयो राक्षसाञ्जघ्नुर्द्रुमैश्च बहुशाखिभिः तद्युद्धमभवद्घोरं रक्षोवानरसंकुलम् ६४ क्षुर
प्रैरर्धचन्द्रैश्च भल्लैश्च निशितैः शरैः राक्षसा वानरेन्द्राणां चिच्छिदुः पादपाञ्छिलाः ६५ वि

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

मारुततुल्यवेग ४

रा० वा० यु० कीर्णाः पर्वतशृङ्गैश्च द्रुमैश्छिन्नैश्च संयुगे हतैश्च कपिरक्षोभिर्दुर्गमा वसुधाभवत् ६६ ते
१८३ वानरा गर्वितहृष्टचेष्टाः संग्राममासाद्य भयं विमुच्य युद्धं समस्तं सह राक्षसैस्तैर्नानायुधैश्च
क्रुरदीनसत्त्वाः ६७ तस्मिन्प्रवृत्ते तुमुले विमर्दे प्रहृष्यमाणेषु वलीमुखेषु निपात्यमानेषु
च राक्षसेषु महर्षयो देवगणाश्च नेदुः ६८ ततो हयं मारुह्य शक्तिं निशितां प्रगृह्य नरान्तको
वानरराजसैन्यं महार्णवं मीन इवाविवेश ६९ स वानरान्सप्तशतानि वीरः प्रासेन दीप्तेन विनिर्बि
भेद एकः क्षणेनेन्द्ररिपुर्महात्मा जघान सैन्यं हरिपुंगवानाम् ७० ददृशुश्च महात्मानं
हयपृष्ठे प्रतिष्ठितम् चरंतं हरिसैन्येषु विद्याधरमहर्षयः ७१ स तस्य ददृशे मार्गो मांसशो
णितकर्दमः पतितैः पर्वताकारैर्वानरैरभिसंवृतः ७२ यावद्विक्रमितुं बुद्धिं चक्रुः प्ल
वगपुंगवाः तावदेतानतिक्रम्य निर्बिभेद नरान्तकः ७३ दहन्हरिसैन्यानि वनानीव वि
भावसुः ७४ यावदुत्पाटयामासुर्वृक्षाञ्छैलान्वनौकसः तावत्प्रासहताः पेतुर्वज्रकृत्ता
इवाचलाः ७५ ज्वलंतं प्रासमुद्यम्य संग्रामान्ते नरान्तकः दिक्षु सर्वासु बलवान् विचचा राम०
१८३

वि

रनरांतकः प्रभञ्जनसवर्त्तो युद्धे प्राद्रवत्कालेयथानिलः ७६ नशेकुर्द्रवितुं वीरा न स्थातुं स्पंदितुं
भयात् उत्पतंतं स्थितं यांतं सर्वान्विव्याध वीर्यवान् ७७ एकेनांतककल्पेन प्रासेनादित्यतेज
सा भग्नानि हरिसैन्यानि निपेतुर्धरणीतले ७८ वज्रनिष्पेषसदृशं प्रासस्याभिनिपातनम्
नशेकुर्वानराः सोढुं ते विनेदुर्महास्वनम् ७९ पततां हरिवीराणां रूपाणि प्रचकाशिरे वज्र
भिन्नाग्रकूटानां शैलानां पततामिव ८० ये तु पूर्वं महात्मानः कुंभकर्णेन पातिताः ते स्व
स्था वानरश्रेष्ठाः सुग्रीवमुपतस्थिरे ८१ प्रेक्षमाणाः सुग्रीवो ददर्श हरिवाहिनीम् नरांतकभ
यत्रस्तां विद्रवतीमितस्ततः ८२ विद्रुतां वाहिनीं दृष्ट्वा स ददर्श नरांतकं गृहीतप्रासमायांतं ह
यपृष्ठे प्रतिष्ठितम् ८३ दृष्ट्वोवाच महातेजाः सुग्रीवो वानराधिपः कुमारमंगदं वीरं श
क्रतुल्यपराक्रमम् ८४ गच्छैनं राक्षसं वीरं योसौ तुरगमास्थितः क्षोभयंतं हरिबलं क्षिप्रं प्रा
णैर्वियोजय ८५ स भर्तुर्वचनं श्रुत्वा निष्पपात ततोंगदः अनीकान्मेघसंकाशादंशुमा
निव वीर्यवान् ८६ शैलसंघातसंकाशो हरीणामुत्तमोंगदः राजांगदसन्नद्धः सधातुरिव पर्वतः

रा० वा० यु० ८७ निरायुधोमहातेजाः केवलंनखदंष्ट्रवान् नरांतकमभिक्रम्यवालिपुत्रोब्रवीद्वचः
१८४ ८८ तिष्ठ त्वं प्राकृतैरेभिर्हरिभिः किंकरिष्यसि अस्मिन्वज्रसमस्पर्शंप्रासंक्षिपममोरसि ८९
अंगदस्यवचःश्रुत्वाप्रचुक्रोधनरांतकः ९० संदश्यदशनैरोष्ठंविनिश्वस्यभुजंगवत् अभिग
म्यांगदंक्रुद्धोवालिपुत्रंनरांतकः ९१ सप्रासमाविध्यतदांगदायसमुज्वलंतंसहसोत्ससर्ज
सवालिपुत्रोरसिवज्रकल्पेबभूवभग्नोन्यपतच्चभूमौ ९२ तंप्रासमालोक्यतदाविभग्नं
सुपर्णकृत्तोरगभोगकल्पम् तलंसमुद्यम्यसवालिपुत्रस्तुरंगमस्याभिजघानमूर्द्ध्नि ९३ नि
मग्नपादःस्फुटिताक्षिताराेनिष्क्रांतजिह्वोचलसन्निकाशः सतस्यवाजीनिपपातभूमौतल
प्रहारेणविभिन्नमूर्धा ९४ नरांतकःक्रोधवशंजगामहतंतुरंगंपतितंसमीक्ष्यसमुष्टि
मुद्यम्यमहाप्रभावोजघानशीर्षेयुधिवालिपुत्रम् ९५ अथांगदोमुष्टिविशीर्णमूर्धा
सुस्रावतीव्रंरुधिरंभृशोष्णम् मुहुर्विजज्वालमुमोहचापिसंज्ञांसमासाद्यविसिस्मियेच
९६ अथांगदोवज्रसमानवेगंसंवर्त्यमुष्टिंगिरिशृंगकल्पम् निपातयामासतदामहात्मानरां राम० १८४

तकस्योरसि वालिपुत्रः ९७ स मुष्टिनिष्पिष्टविभग्नवक्षा ज्वालां वमन्शोणितदिग्धगात्रः
नरांतको भूमितले पपात यथाचलो वज्रनिपातभग्नः ९८ अथांतरिक्षे त्रिदशोत्तमानां
वनौकसां चापि महाप्रणादः बभूव तस्मिन्निहते ऽग्र्यवीर्ये नरांतके वालिसुतेन संख्ये ९९ अ
थांगदो राममनःप्रहर्षं सुदुष्करं तं कृतवान्हि विक्रमम् विसिस्मिये सोप्यथ भीमकर्मा
पुनश्च युद्धे स बभूव हर्षितः ॥ १०० ॥ इत्यार्षे रामायणे युद्धकाण्डे एकोनसप्ततितमः सर्गः ॥ ६९ ॥
नरांतकं हतं दृष्ट्वा चुक्रुशुर्नैर्ऋतर्षभाः देवांतकस्त्रिमूर्धा च पौलस्त्यश्च महोदरः १ आ
रूढो मेघसंकाशं वारणेन्द्रं महोदरः वालिपुत्रं महावीर्यमभिदुद्राव वेगवान् २ भ्रातृव्य
सं सनसंतप्तस्तदा देवांतको बली आदाय परिघं घोरमंगदं समभिद्रवत् ३ रथमादित्य
संकाशं युक्तं परमवाजिभिः आस्थाय त्रिशिरा वीरो वालिपुत्रमथाभ्ययात् ४ स त्रि
भिर्देवदर्पघ्नैर्राक्षसेन्द्रैरभिद्रुतः वृक्षमुत्पाटयामास महाविटपमंगदः ५ देवांतकाय तं
वीरश्चिक्षेप सहसांगदः महावृक्षं महाशाखं शक्रो दीप्तामिवाशनिम् ६ त्रिशिरास्तं प्रचि

शिलाभिर्निर्बिरोरजिह्मगैः घोरैर्हरिपतेः पुत्रं ललाटेभिजघान ह १९ ततोंगदं परिक्षिप्तं त्रिभि
र्नैर्ऋतपुंगवैः हनूमानपि विज्ञाय नीलश्चापि प्रतस्थतुः २० ततश्चिक्षेप शैलाग्रं नीलस्त्रिशिर
से तदा तद्रावणसुतो धीमान् बिभेद निशितैः शरैः २१ तद्बाणशतनिर्भिन्नं विदारितशिला
तलं सविस्फुलिंगं सज्वालं निपपात गिरेः शिरः २२ स विजृंभितमालक्ष्य हर्षाद्देवांतको बलीप
रिघेणाभिदुद्राव मारुतात्मजमाहवे २३ तमापतंतमुत्पत्य हनूमान्मारुतात्मजः आजघान
तदा मूर्ध्नि वज्रकल्पेन मुष्टिना २४ शिरसि प्रहरन्वीरस्तदा वायुसुतो बली नादेनाकंपयत्सर्वान्
राक्षसान्स महाबलः २५ स मुष्टिनिष्पिष्टविकीर्णमूर्धा निर्वांतदंताक्षिविलंबिजिह्वः देवांतको
राक्षसराजसूनुर्गतासुरुर्व्यां सहसा पपात २६ तस्मिन्हते राक्षसयोधमुख्ये महाबले संयति देवश
त्रौ क्रुद्धस्त्रिमूर्धा निशिताग्रमुग्रं ववर्ष नीलोरसि बाणवर्षम् २७ महोदरस्तु संक्रुद्धः कुंजरं पर्व
तोपमं भूयः समधिरुह्याशु मंदरं रश्मिवानिव २८ ततो बाणमयं वर्षं नीलस्योरस्यपातयत् गि
रौ वर्षं तडिच्चक्रचापवानिव तोयदः २९ ततः शरौघैरभिवर्ष्यमाणो विभिन्नगात्रः कपिसैन्य

रा०वा०यु० अंगदान्यंगुलीवेष्टान्वराण्याभरणानि च हारं च शशिसंकाशमामुमोच महात्मनः २७
१९८ दिव्यानि च सुगंधीनि माल्यदामानि राक्षसाः श्रोत्रे चासज्जयामास करणीयोश्चास्य कुंडले २८ कां
१६८ चनांगदकेयूरनिष्काभरणभूषितः कुंभकर्णो बृहत्कर्णः सुहुतोग्निरिवाबभौ २९ श्रोणीसू
त्रेण महता मेचकेन विराजता अमृतोत्पादने नद्धो भुजंगेनेव मंदरः ३० स कांचनं भारसहं निवा
तं विद्युदुत्प्रभं दीप्तमिवात्मभासा आवध्यमानः कवचं रराज संध्याभ्रसंवीत इवाद्रिराजः ३१ सर्वाभ
रणसर्वांगः शूलपाणिः स राक्षसः त्रिविक्रमकृतोत्साहो नारायण इवाबभौ ३२ भ्रातरं संपरिष्व
ज्य कृत्वा चापि प्रदक्षिणाम् प्रणम्य शिरसा तस्मै संप्रतस्थे महाबलः ३३ तमाशीर्भिः प्रशस्ताभिः प्रेषया
मास रावणः शंखदुंदुभिनिर्घोषैः सैन्यैश्चापि वरायुधैः ३४ तं गजैश्च तुरंगैश्च स्यंदनैश्चांबुदस्वनैः
अनुजग्मुर्महात्मानो रथिनो रथिनां वरम् ३५ सर्पैरुष्ट्रैः खरैरश्वैः सिंहद्विपमृगद्विजैः अनुजग्मुस्
तं घोरं कुंभकर्णं महाबलम् ३६ स पुष्पवर्षैरवकीर्यमाणो धृतातपत्रः शितशूलपाणिः मदो रा०यु०
त्कटः शोणितगंधमत्तो विनिर्ययौ दानवदेवशत्रुः ३७ पदातयश्च बहवो महानादा महाबलाः ष १९८
१६८

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

श्री

रा०वा०यु० पालः नीलो वमवापविरतः वच गौविवं भित्ततेन महावलेन ३० ततस्तु नीलः प्रतिलभ्य संज्ञः
१८६ शैलं समुत्पाट्य सवृक्षखंडम् ततः समुत्पत्य महोग्रवेगो महोदरं तेन जघान मूर्ध्नि ३१ ततः स शैला
भिनिपातभग्नो महोदरस्तेन महाद्विपेन विपोथितो भूमितले गतासुः पपात वज्राभिहतो यथाद्रिः
३२ पितृव्यं निहतं दृष्ट्वा त्रिशिराश्चापमाददे हनूमंतं च संक्रुद्धो विव्याध निशितैः शरैः ३३ स वा
युसूनुः कुपितश्चिक्षेप शिखरं गिरेः त्रिशिरास्तच्छरैस्तीक्ष्णैर्बिभेद बहुधा बली ३४ तद्व्यर्थं
शिखरं दृष्ट्वा द्रुमवर्षं तदा कपिः विससर्ज रणे तस्मिन् रावणस्य सुतं प्रति ३५ तमापतंतमाकाशे
द्रुमवर्षं प्रतापवान् त्रिशिरा निशितैर्बाणैश्चिच्छेद च ननाद च ३६ हनूमांस्तु समुत्पत्य हयांस्त्रिशि
रसस्तदा विददार नखैः क्रुद्धो गजेंद्रं मृगराडिव ३७ अथ शक्तिं समादाय कालरात्रिमिवांत
कः चिक्षेपानिलपुत्राय त्रिशिरा रावणात्मजः ३८ दिवः क्षिप्तामिवोल्कां तां शक्तिं क्षिप्तामसंग
ताम् गृहीत्वा हरिशार्दूलो वभंज च ननाद च ३९ तां दृष्ट्वा घोरसंकाशां शक्तिं भग्नां हनूमता प्रहृष्टा
वानरगणा विनेदुर्जलदा यथा ४० ततः खड्गं समुद्यम्य त्रिशिरा राक्षसोत्तमः निजघान च वक्ष राम० १८६

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

ड्रेन वानरेंद्रस्य वक्षसि ४१ खड्गप्रहाराभिहतो हनूमान्मारुतात्मजः आजघान त्रिमूर्धानं तलेनोरसि
वीर्यवान् ४२ ततस्तलाभिहतस्तेन स्रस्तहस्तांबरो भुवि निपपात महातेजाः त्रिशिरास्त्यक्तचेतनः ४३
स तस्य पततः खड्गं समाछिद्य महाकपिः ननाद गिरिसंकाशस्त्रासयन्सर्वनैरृतान् ४४ अमृष्य
माणस्तं घोषमुत्पपात निशाचरः उत्पत्य च हनूमंतं ताडयामास मुष्टिना ४५ तेन मुष्टिप्रहारेण संचु
कोप महाकपिः कुपितश्च निजग्राह किरीटे राक्षसर्षभम् ४६ स तस्य शीर्षाण्यसिना किरीटजु
ष्टानि सकुंडलानि क्रुद्धः प्रचिछेद सुतोऽनिलस्य त्वष्टुः सुतस्येव शिरांसि शक्रः ४७ तान्यायताक्षा
ण्यग्निसन्निभानि प्रदीप्तवैश्वानरलोचनानि पेतुः शिरांसींद्ररिपोर्धरण्यां ज्योतींषि मुक्तानि यथार्क
मार्गात् ४८ तस्मिन्हते देवरिपौ त्रिशीर्षे हनूमता शक्रपराक्रमेण नेदुः प्लवंगाः प्रचचाल भूमी रक्षांसि
यो दुद्रुविरे समंतात् ४९ हतं त्रिशिरसं दृष्ट्वा महोदरमथापि च हतौ प्रेक्ष्य दुराधर्षौ देवांतकनरांतकौ
५० चुकोप परमामर्षी महापार्श्वो निशाचरः जग्राहार्चिष्मतीं चापि गदां सर्वायसीं शुभाम् ५१
हेमपट्टपरिक्षिप्तां मांसशोणितलेपनाम् विराजमानां वपुषा शत्रुशोणिततर्पिताम् ५२ तेज

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०वा०यु० सातस्यदीप्तांरक्तमाल्यविभूषिताम ऐरावतमहापद्मसार्वभौमभयावहाम ५३ गदामादायसंक्रुद्धोम
१९८ हापार्श्वोनिशाचरः हरीन्समभिदुद्रावयुगान्ताग्निरिवज्वलन ५४ ततर्षभःसमुत्पत्यवानरोरावणात्म
जः महापार्श्वमुपागम्यतस्थौतस्याग्रतोवली ५५ तंपुरस्तात्स्थितंदृष्ट्वावानरंपर्वतोपमम आज
घानोरसिक्रुद्धोगदयावज्रकल्पया ५६ सतयाभिहतस्तेनगदयावानरर्षभः भिन्नवक्षाःसमाधू
तःसुस्रावरुधिरंबहु ५७ ससंप्राप्यचिरात्संज्ञामृषभोवानरर्षभः क्रुद्धोविस्फुरमाणोष्ठोमहापा
र्श्वमुदैक्षत ५८ सवेगवान्वेगवदभ्युपेत्यतंराक्षसंवानरयूथमुख्यः संवर्त्यमुष्टिंसहसाजघान
बाह्वन्तरेशैलनिकाशरूपः ५९ सकृत्तमूलःसहसेववृक्षःपपातभूमौक्षतजोक्षितांगः तांचास्य
घोरांयमदंडकल्पांगदांप्रगृह्याशुतदाननाद ६० मुहूर्तमासीत्सगतासुकल्पःप्रत्यागतात्मासह
सासुरारिः उत्पत्यसंध्याभ्रसमानवर्णस्तंवारिराजात्मजमाजघान ६१ समूर्छितोभूमितलेपपातमु
हूर्तमुत्पत्यपुनःससंज्ञः तामेवतस्याद्रिवराद्रिकल्पांगदांसमाविध्यजघानसंख्ये ६२ सातस्यरौद्रा
समुपेत्यदेहंहरिंदुस्सदेवाध्वरविप्रशत्रोः वभूव वक्षःक्षतजंचभूमौसुस्रावधात्वंभइवाद्रिराजः राम० १९८

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

६३ सोभिदुद्राववेगेन गदांतस्य महात्मनः तां गृहीत्वा गदां भीमामाविध्य च पुनः पुनः ६५ महापा
र्श्वे महानादो जघान रणमूर्द्धनि स च या गदया भग्नो विशीर्णदशनेश्वराः ६५ निपपात महापा
र्श्वो वज्राहत इवाचलः विशीर्णनयनो भूमौ गतसत्वो गतायुषि पतिते राक्षसे तस्मिन् विद्रुतं र
क्षसां बलम् ६६ तस्मिन्हते भ्रातरि रावणस्य तन्नैर्ऋतानां बलमर्णवाभम् त्यक्तायुधं केवलजी
वितार्थं दुद्राव भिन्नार्णववसन्निकाशम् ॥ ६७ ॥ इत्यार्षे रामायणे युद्धकांडे सप्ततितमः सर्गः ७०
स्वबलं निहतं दृष्ट्वा तुमुलं लोमहर्षणम् भ्रातृंश्च निहतान् दृष्ट्वा शक्रतुल्यपराक्रमान् १ पितृ
व्यौ चापि संप्रेक्ष्य समरे संनिषूदितौ युद्धोन्मत्तं च मत्तं च भ्रातरौ राक्षसोत्तमौ २ चुकोप च महा
तेजा ब्रह्मदत्तवरो युधि अतिकायोऽद्रिसंकाशो देवदानवदर्पहा ३ स भास्करसहस्रस्य संघा
तमिव भास्वरं रथमारुह्य शक्रारिरभिदुद्राव वानरान् ४ स विस्फार्य तदा चापं किरीटीमृष्टकुं
डलः नाम संश्रावयामास ननाद च महास्वनः ५ तेन सिंहप्रणादेन नामविश्रावणेन च ज्या
शब्देन च भीमेन त्रासयामास वानरान् ते दृष्ट्वा देहमाहात्म्यं कुंभकर्णोयमुत्थितः भयार्ता वानराः

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० वा० यु० सर्वेसंश्रयंतेपरस्परम् ७ तेतस्यरूपमालोक्ययथाविष्णोस्त्रिविक्रमे भयार्त्तावानरयूथास्तेविद्रवंतिततस्त
१८८ ततः ८ तेतिकायंसमासाद्यवानरामूढचेतसः शरण्यंशरणंजग्मुर्लक्ष्मणाग्रजमाहवे ९ ततोतिका
यंकाकुत्स्थोरथस्थंपर्वतोपमम् ददर्शधन्विनंदूराद्गर्जंतंकालमेघवत् १० सतंदृष्ट्वामहात्मानं
राघवस्तुसुविस्मितः वानरान्सांत्वयित्वाचविभीषणमुवाचह ११ कोसौपर्वतसंकाशोधनुष्मान्हरि
लोचनः युक्तेहयसहस्रेणविशालेस्यंदनेस्थितः १२ यएषनिशितैःशूलैःसुतीक्ष्णैःप्रासमुद्गरैः
अर्चिष्मद्भिर्वृतोभातिभूतैरिवमहेश्वरः १३ कालजिह्वाप्रकाशाभिर्यएषोतिविराजते आवृतोर
थशक्तीभिर्विद्युद्भिरिवतोयदः १४ धनूंषिचास्यसज्जानिहेमपृष्ठानिसर्वशः शोभयंतिरथश्रेष्ठंश
क्रचापमिवांबरम् १५ कएषरक्षःशार्दूलोरणभूमिंविराजयन् अभ्येतिरथिनांश्रेष्ठोरथेनादित्यतेज
सा १६ ध्वजशृंगप्रतिष्ठेनराहुणाभिविराजते सूर्यरश्मिसमैर्बाणैर्दिशोदशविराजयन् १७ त्रि
नतंमेघसंनादंहेमपृष्ठमलंकृतं शतक्रतुधनुःप्रख्यंधनुश्चास्यविराजते १८ सध्वजःसपताकश्चसा राम०
नुकर्षोमहारथः चतुःसादिसमायुक्तोमेघस्तनितनिस्वनः १९ विंशतिर्दशचाष्टौचतूणीयोस्यरथमा १८८

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

स्थिताः कार्मुकाणि च भीमानि ज्याश्च कांचनपिंगलाः २० द्वौ च खड्गौ च पार्श्वस्थौ प्रदीप्तौ पार्श्वशोभितौ च
तुर्हस्तत्सरुचितौ व्यक्तहस्तदशायतौ २१ रक्तकंठगुणो धीरो महापर्वतसन्निभः कालः कालमहाव
क्त्रो मेघस्थ इव भास्करः २२ कांचनांगदनद्धाभ्यां भुजाभ्यामेष शोभते शृंगाभ्यामिव तुंगाभ्यां हिमवान्पर्वतो
त्तमः २३ कुंडलाभ्यां तु यस्यैतद्भ्राति वक्त्रं शुभेक्षणं पुनर्वस्वंतरगतः परिपूर्णो निशाकरः २४ आचक्ष्व मे म
हाबाहो त्वमेतं राक्षसोत्तमम् यं दृष्ट्वा वानराः सर्वे भयार्त्ता विद्रुता दिशः २५ स एषो राजपुत्रो रामेणा
मिततेजसा आचचक्षे महातेजा राघवाय विभीषणः २६ दशग्रीवो महातेजा राजा वैश्रवणानुजः भी
मकर्मा महात्मा हि रावणो राक्षसेश्वरः २७ तस्यासीद्वीर्यवान्पुत्रो रावणप्रतिमो बले वृद्धसेवी श्रुतधरः
सर्वास्त्रविदुषां वरः २८ अश्वपृष्ठे रथे नागे खड्गे धनुषि कर्षणे भेदे सांत्वे च दाने च नये मंत्रे च संमतः २९
यस्य बाहुं समाश्रित्य लंका भवति निर्भया तनयं धान्यमालिन्या अतिकायमिमं विदुः ३० एतेनाराधितो
ब्रह्मा तपसा भावितात्मना अस्त्राणि चाप्यवाप्तानि रिपवश्च पराजिताः ३१ सुरासुरैरवध्यत्वं दत्तमेतेन स्व
यंभुवा एतच्च कवचं दिव्यं रथश्चैष भास्वरः ३२ एतेन शतशो देवा दानवाश्च पराजिताः रक्षितानि

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

चरश्चांसि सखाश्चापि निषूदिताः ३३ वज्रं विद्धं भिन्नं येन वालौरिंदस्य धीमतः पाशः सलिलराजस्य युद्धे प्र
तिहतस्तदा ३४ एषोऽतिकायो बलवान्राक्षसानामथर्षभः स रावणसुतो धीमान्देवदानवदर्पहा ३५
तदस्मिन्क्रियतां यत्नः क्षिप्रं पुरुषपुंगव पुरा वानरसैन्यानि क्षयं न प्रतिसायकैः ३६ ततोऽतिकायो बलवा
न् प्रविश्य हरिवाहिनीम् विस्फारयामास धनुर्ननाद च पुनः पुनः ३७ तं भीमवपुषं दृष्ट्वा रथस्थं रथि
नां वरम् अभिपेतुर्महात्मानो ये प्रधाना वनौकसः ३८ कुमुदो द्विविदो मैंदो नीलः शरभ एव च पादपैर्गिरि
शृंगैश्च युगपत्समभिद्रवन् ३९ तेषां वृक्षांश्च शैलांश्च शरैः कांचनभूषणैः अतिकायो महातेजाश्चिच्छे
दास्त्रविदां वरः ४० तांश्चैव सर्वान्स हरीन्शरैः सर्वायसैर्बली विव्याधाभिमुखे संख्ये भीमकायो विशारदः
४१ तेऽर्दिता बाणवर्षेण भिन्नगात्राः पराजिताः न शेकुरतिकायस्य प्रतिकर्तुं महाहवे ४२ तत्सैन्यं हरि
वीराणां त्रासयामास राक्षसः मृगयूथमिव क्रुद्धो हरिर्यौवनदर्पितः ४३ स राक्षसेंद्रो हरियूथमध्ये नायु
ध्यमानं निजघान कंचित् उपेत्य रामं स धनुः कलापी सगर्वितं वाक्यमिदं बभाषे ४४ रथे स्थितो
हं शरचापपाणिर्न प्राकृतं कंचन योधयामि यस्यास्ति शक्तिर्व्यवसाययुक्तो ददातु मे शीघ्रमिहाद्य युद्धं राम० १२९

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

४५ ततस्य वाक्यं ब्रुवतो निशम्य चुकोप सौमित्रिरमित्रहंता अमृष्यमाणश्च समुत्पपात जग्राह चापं च ततः
स्मयित्वा ४६ क्रुद्धः सौमित्रिरुत्पत्य तूणादाक्षिप्य सायकम् पुरस्तादतिकायस्य विचकर्ष महद्धनुः ४७
पूरयन्स महीं शैलानाकाशं सागरं दिशः ज्याशब्दो लक्ष्मणस्योग्रस्त्रासयन्रजनीचरान् ४८ सौमि
त्रेश्चापनिर्घोषं श्रुत्वा प्रतिभयं तदा विसिस्मिये महातेजा राक्षसेंद्रात्मजस्तदा ४९ तदातिकायः कुपितो
दृष्ट्वा लक्ष्मणमुत्थितम् आदाय निशितं बाणमिदं वचनमब्रवीत् ५० बालस्त्वमसि सौमित्रे विक्र
मेष्वविचक्षणः गच्छ किं कालसदृशं मां योधयितुमिच्छसि ५१ नहि मद्बाहुसृष्टानां बाणानां हिमवा
नपि सोढुमुत्सहते वेगमंतरिक्षमथो मही ५२ सुखप्रसुप्तं कालाग्निं विबोधयितुमिच्छसि न्यस्य चापं
निवर्तस्व मा प्राणान्जहि मद्गतः ५३ अथवा त्वं प्रतिस्तब्धो न निवर्तितुमिच्छसि तिष्ठ प्राणान्परित्यज्या
मिष्यसि यमक्षयम् ५४ पश्य मे निशितान्बाणानरिदर्पनिषूदनान् ईश्वरायुधसंकाशांस्तप्तकांच
नभूषणान् ५५ एष ते सर्पसंकाशो बाणः पास्यति शोणितम् मृगराज इव क्रुद्धो नागराजस्य शोणितम् ५६ रामा०
इत्येवमुक्त्वा संक्रुद्धः शरं धनुषि संदधे ५७ श्रुत्वातिकायस्य वचः सरोषं सगर्वितं संयति राजपुत्रः स संचुको २

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

 पातितस्तोक्ष्णैःशूरैश्चावाक्यंचततोमहाद्युतिम् ५८ नवाक्यमात्रेणभवान्प्रधानोनकत्थनात्सत्पुरुषाभ
९९० वंति मयिस्थितेधन्विनिबाणपाणौ विदर्शयस्वात्मबलंदुरात्मन् ५९ कर्मणासूचयात्मानंनविकत्थितुमर्हसि
पौरुषेणतुयोयुक्तःसतुशूरइतिस्मृतः ६० सर्वायुधसमायुक्तो धन्वीत्वंरथमास्थितः शरैर्वायदिवाप्य
स्त्रैर्दर्शयस्वपराक्रमम् ६१ ततःशिरस्तेनिशितैःपातयिष्याम्यहंशरैः मारुतःकालसंपक्वंवृन्तात्तालफ
लंयथा ६२ अद्यतेमामकाबाणास्तप्तकांचनभूषणाः पास्यंतिरुधिरंगात्राद्बाणशल्यांतरोत्थितम् ६३
बालोयमितिविज्ञायनावज्ञातुंत्वमर्हसि बालोवायदिवावृद्धोमृत्युंजानीहिसंयुगे ६४ बालेनविष्णुना
लोकास्त्रयः क्रांतास्त्रिविक्रमैः लक्ष्मणस्यवचःश्रुत्वाहेतुमत्परमार्थवत् ६५ अतिकायःप्रचुक्रोध
बाणंचोत्तममाददे ६५ ततोविद्याधराभूतादेवादैत्यामहर्षयः गुह्यकाश्चमहात्मानस्तद्युद्धंदद
शुस्तदा ६६ ततोतिकायःकुपितश्चापमारोप्यसायकं लक्ष्मणायप्रचिक्षेपसंक्षिपन्निवचांबरम् ६७
तमापतंतंनिशितंशरमाशीविषोपमम् अर्द्धचंद्रेणचिच्छेदलक्ष्मणःपरवीरहा ६८ तंनिकृत्तंशरंदृष्ट्वा
कृत्तभोगमिवोरगम् अतिकायोभृशंक्रुद्धःपंचबाणान्समाददे ६९ तान्शरान्संप्रचिक्षेपलक्ष्मणाय राम०

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

निशाचरः तानप्राप्तान् शितैर्वीरो चिच्छेद भरतानुजः ७० स तांश्छित्त्वा शरैस्तीक्ष्णैर्लक्ष्मणः परवीरहा
आददे निशितं बाणं ज्वलन्तमिव तेजसा ७१ तमादाय धनुःश्रेष्ठे योजयामास लक्ष्मणः विचकर्ष च वेगे
न विससर्ज च सायकम् ७२ पूर्णायतविसृष्टेन शरेणानतपर्वणा ललाटे राक्षसश्रेष्ठमाजघान च वी
र्यवान् ७३ स ललाटे शरो मग्नस्तस्य भीमस्य रक्षसः ददृशे शोणितेनाक्तः पन्नगेन्द्र इवाचले ७४ रा
क्षसः प्रचकम्पे च लक्ष्मणेषुप्रपीडितः रुद्रबाणाहतं भीमं यथा त्रिपुरगोपुरम् ७५ चिन्तयामास चाश्व
स्य विमृश्य च महाबलः साधु बाणनिपातेन श्लाघनीयोसि मे रिपुः ७६ विधायैवं विदार्यास्यं नियम्य
च भुजावुभौ स रथोपस्थमास्थाय रथेन प्रचचार ह ७७ एकं त्रीन् पञ्च सप्तेति सायकान् राक्षसेश्वरः आ
ददे संदधे चापि विचकर्षोत्ससर्ज च ७८ ते बाणाः कालसंकाशा राक्षसेन्द्रधनुश्च्युताः हेमपुंखा रवि
प्रख्याश्चक्रुर्दीप्तमिवाम्बरम् ७९ ततस्तान् राक्षसोत्सृष्टान् शरौघान् राघवानुजः असंभ्रान्तः प्रचि
च्छेद निशितैर्बहुभिः शरैः ८० तान् शरान् युधि संप्रेक्ष्य निकृत्तान् रावणात्मजः चुकोप त्रिदशेन्द्रारि
र्जग्राह निशितं शरम् ८१ स संधाय महातेजास्तं बाणं सहसोत्सृजत् तेन सौमित्रिमायान्तमाजघा

न्वपुरा स्सता भीमा भीमाक्षाः प्रासपाणयः ३८ रक्ताक्षास्सुमहाकाया नीलांजनचयोपमाः शूला
नुद्यम्य खड्गांश्च निशितांश्च परश्वधान् ३९ बहुव्यामांश्च परिघान् गदाश्च मुसलानि च तालस्कंधां
श्च विपुलान् क्षेपणीयान्दुरासदान् ४० अथ प्राप्य दुरादापदारुणां घोरदर्शनम् निष्पपात महातेजा
कुंभकर्णो महाबलः ४१ धनुःशतपरीणाहः स षट्शतसमुच्छ्रितः रौद्रः शकटचक्राक्षो म
हापर्वतसन्निभः ४२ सन्निपत्य च रक्षांसि दग्धशैलोपमो महान् कुंभकर्णो महावक्त्रः प्रह
सन्निदमब्रवीत् ४३ अद्य वानरमुख्यानां महायूथानि भागशः निर्दहिष्यामि संक्रुद्धः शलभा
निव पावकः ४४ नापराध्यंति मे कामं वानरा वनचारिणः जातिरस्मद्विधानां सा पुरोद्यानवि
भूषणम् ४५ पुररोधस्य मूलं तु राघवः सहलक्ष्मणः हते तस्मिन् हतं सर्वं तं वधिष्यामि तौ युधि ४६
एवं तस्य ब्रुवाणस्य कुंभकर्णस्य रक्षसः नादं चक्रुर्महाघोरं कंपयंत इवार्णवम् ४७ तस्यानि
ष्पततस्तूर्णं कुंभकर्णस्य धीमतः बभूवुर्घोररूपाणि निमित्तानि समंततः ४८ उल्काशनिमु
चो मेघा बभूवुर्गर्दभारुणाः ससागरवना चैव वसुधा समकंपत ४९ घोररूपाश्शिवा नेदुः स

रा० का० यु० नक्तंचरांतरे ८२ अतिकायेन सौमित्रिस्ताडितो वृषिवक्षसि सुस्राव रुधिरं तीव्रं मदं मत्त इव द्विपः ८३ स
२८१ चकार तरसात्मानं विशल्यं सहसा विभुः जग्राह च शरं तीक्ष्णमस्त्रेणापि समादधे ८४ आग्नेयेन तदा
स्त्रेण योजयामास सायकम् स जज्वाल तदा बाणो धनुष्यस्य महात्मनः ८५ अतिकायोपि तेजस्वी रौद्र
मस्त्रं समादधे तेन बाणं भुजंगाभं हेमपुंखमयोजयत् ८६ तदस्त्रं ज्वलितं घोरं लक्ष्मणः शरमाहितम्
अतिकायाय चिक्षेप कालदंडमिवांतकः ८७ आग्नेयास्त्राभिसंयुक्तं दृष्ट्वा बाणं निशाचरः उत्सस
र्ज तदा बाणं रौद्रं सूर्यास्त्रयोजितम् ८८ तावुभावंबरे बाणावन्योन्यमभिजघ्नतुः तेजसा संप्रदीप्ताग्नौ
क्रुद्धाविव भुजंगमौ ८९ निरर्द्धिबो भस्मकृतौ न भ्राजेते शरोत्तमौ ताउभौ दीप्यमानौ तु न भ्राजेते महाहवे
९० ततोतिकायः संक्रुद्धस्त्वाष्ट्रमैषीकमुत्सृजत् तच्चिच्छेद सौमित्रिरस्त्रेणैंद्रेण वीर्यवान् ९१ ऐषी
कं निहतं दृष्ट्वा कुपितो रावणात्मजः याम्येनास्त्रेण संक्रुद्धो योजयामास सायकम् ९२ ततस्तदस्त्रं चि
क्षेप लक्ष्मणाय निशाचरः वायव्येन तदस्त्रं तु निजघान स लक्ष्मणः ९३ अथैनं शरधाराभिर्धा
राभिरिव तोयदः अभ्यवर्षत संक्रुद्धो लक्ष्मणो रावणात्मजं ९४ तेतिकायं समासाद्य कवचे वज्रभूषिते राम०
२८१

तावन्योन्यं विनिर्द्ध्यपेन तु धरणीतले ५

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

षिते भग्नाग्रशल्याः सहसा पेतुर्बाणा महीतले ९५ तान्मोघानभिसंप्रेक्ष्य लक्ष्मणः परवीरहा ॥ अभ्यवर्ष
त बाणानां सहस्रेण महायशाः ९६ स वध्यमानो बाणौघैरतिकायो महाबलः ॥ अवध्यकवचः संख्ये रा
क्षसो नैव विव्यथे ९७ न शशाक रुजं कर्तुं युधि तस्य नरोत्तमः ॥ अथैनमभ्युपागम्य वायुर्वाक्यमवोचत
९८ ब्रह्मदत्तवरो ह्येष अवध्यकवचावृतः ॥ ब्राह्मेणास्त्रेण भिंध्येनमेष वध्यो हि नान्यथा ९९ ॥ अवध्य
एष ह्यन्येषामस्त्राणां कवची बली १०० स तस्य वायोर्वचनं निशम्य सौमित्रिरिंद्रप्रतिमानवीर्यः ॥ समा
ददे बाणममोघवेगं तद्ब्राह्ममस्त्रं सहसा नियोज्य १०१ तस्मिन्वरास्त्रे तु नियुज्यमाने सौमित्रिणा बाणव
रे शिताग्रे ॥ दिशः सहेंद्राग्न्यसहग्रहस्त्रैर्नभश्चकंपे च ररास चोर्वी १०२ तं ब्रह्मणोऽस्त्रेण नियुज्य चापे प्रा
रं सुपुंखं यमदूतकल्पम् ॥ सौमित्रिरिंद्रारिसुतस्य तस्य ससर्ज बाणं युधि वज्रकल्पम् १०३ तं लक्ष्म
णोत्सृष्टमविद्धवेगं समापतंतं ज्वलनप्रकाशम् ॥ सुवर्णवज्रोत्तमचित्रपुंखं तदातिकायः समरे द
दर्श १०४ तं प्रेक्षमाणः सहसातिकायो जघान बाणैर्निशितैरनेकैः ॥ स सायकस्तस्य सुपर्णवे

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०वा०यु० गस्त्वातिकायस्यजगामपार्श्वम् १०५ तमागतंप्रेक्ष्यतदातिकायोबाणांप्रदीप्तांतककालकल्पान्
९८२ जघानशाक्रस्त्रिशिरादाकुठारैः शूलैःशरैश्चाप्यविपन्नचेष्टः १०६ तान्यायुधान्यद्भुतविग्रहाणिमोघानि
कृत्वासशरेणाग्निदीप्तः प्रसह्यतस्यैवकिरीटजुष्टंतदातिकायस्यशिरोजहार १०७ तच्छिरःसशिरस्त्राणं
लक्ष्मणेनप्रमर्दितम् पपातसहसाभूमौशृंगंहिमवतोयथा १०८ तंभूमौपतितंदृष्ट्वाविक्षिप्तंवरभूष तं
णाम् बभूवुर्व्यथिताःसर्वेहतशेषानिशाचराः १०९ तेविषण्णमुखादीनाः प्रहारैर्जनितश्रमाः विनेदुरु
च्चैःसहसाबहवोविस्वरैःस्वरैः ११० ततस्तेत्वरितंयातानिरपेक्षानिशाचराः पुरीमभिमुखाभीताद्रुद्रुवंतो
नायकेहते १११ प्रहर्षयुक्ताबहवस्तुवानराःप्रफुल्लपद्मप्रतिमाननास्तदा अपूजयंलक्ष्मणमिष्टभा
गिनंहतेरिपौभीमबलेदुरासदे ॥११२॥ इत्यार्षेरामायणेयुद्धकांडेएकसप्ततिमःसर्गः ॥७१॥ अति
कायंहतंश्रुत्वालक्ष्मणेनमहात्मना उद्वेगमगमद्राजावचनंचेदमब्रवीत् १ धूम्राक्षःपरमामर्षी
सर्वशस्त्रभृतांवरः अकंपनःप्रहस्तश्चकुंभकर्णस्तथैवच २ एतेमहाबलावीराराक्षसायुद्धकांक्षि राम०
९८२

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

णाः जेतारः परसैन्यानां परैर्नित्यापराजिताः निहतास्ते महावीर्या रामेणाक्लिष्टकर्मणा ३ राक्षसाः सु
महाकाया नानाशस्त्रविशारदाः अन्ये च बहवः शूरा महात्मानो निपातिताः ४ प्रख्यातवैवीर्येण पुत्रेणेन्
द्रजिता मम यौ हितौ भ्रातरौ वीरौ वद्धौ दत्तवरैः शरैः ५ यन्नशक्यं सुरैः सर्वैरसुरैर्वा महाबलैः मोक्तुं तद्बंध
नं घोरं सर्वैः समुदितैरपि ६ तं न जाने प्रभावैर्वा मायया मोहनेन वा शरबंधाद्विमुक्तौ तौ भ्रातरौ राम
लक्ष्मणौ ७ ये योधा राक्षसाः शूरा निर्गता मम शासनात् ते सर्वे निहता युद्धे वानरैः सुमहाबलैः ८
तत्र पश्याम्यहं युद्धे योद्धारं संसल्लक्ष्मणाम् शासयेत्स बलं वीरं ससुग्रीवं विभीषणम् ९ अहो नु बल
वान् रामो महदस्त्रबलं च वै यस्य विक्रममासाद्य राक्षसा निधनं गताः १० तं मन्ये राघवं वीरं नाराय
णमनामयं यद्भयाद्धि पुरी लंका पिहितद्वारगोपुरा ११ अप्रमत्तैश्च सर्वाभिर्गुल्मै रक्ष्या पुरी त्वियम्
१२ अशोकवनिकायां च यत्र सीताभिरक्ष्यते निष्क्रामो वा प्रवेशो वा ज्ञातव्यः सर्वदेव नः १३ यत्र यत्र
भवेद्गुल्मस्तत्र तत्र पुनः पुनः सर्वतश्चापि तिष्ठध्वं सैन्यैः परिवृता बलैः १४ द्रष्टव्यं च बलं तेषां वान

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०बा०यु० रात्रौनिशाचराः प्रदोषेवार्द्धरात्रेवाप्रत्यूषेवापिसर्वशः १५ नावज्ञातेषुकर्तव्यावानरेषुकदाचन
१०३ द्विषतांबलमुद्युक्तमापतत्तंस्थितंयथा १६ ततस्तेराक्षसाःसर्वेश्रुत्वालंकाधिपस्यतत् वचनंसर्वमा
तिष्ठन्यथावत्तुमहाबलाः १७ तान्सर्वान्ससमादिश्यरावणोराक्षसाधिपः मन्युशल्यंवहन्दीनंप्र
विवेशनिवेशनम् १८ ततःससंदीपितकोपवह्निर्निशाचराणामधिपोन्मशार्तः तदेवपुत्रव्यसनंवि
चिंतयन्मुहुर्मुहुःर्निश्वसतिस्मघर्मम् ॥१९॥ इत्यार्षेरामायणेयुद्धकांडेद्विसप्ततितमःसर्गः॥७२॥ ततो
हतान्राक्षसपुंगवांस्तान्देवांतकादित्रिशिरोतिकायान् रक्षोगणास्तत्रहतावशेषास्तेरावणायत्व
रिताःशशंसुः १ ततोहतांस्तान्सहसानिशम्यराजामुमोहाश्रुपरिप्लुताक्षः पुत्रक्षयंभ्रातृवधंचघो
रंविचिंत्यराजासुचिरंप्रदध्यौ २ ततस्तुराजानमुदीक्ष्यदीनंशोकार्णवेसंपरिप्लुवानम् रथर्षभो
राक्षसराजसूनुस्तंइन्द्रजिद्वाक्यमिदंबभाषे ३ नतातमोहंप्रतिगंतुमर्हसियत्रेंद्रजिज्जीवतिराक्षसेंद्रः नैं राम०
द्रारिबाणाभिहतोस्तिकश्चित्प्राणान्समर्थःसमरेभिपातुम् पश्याद्यरामंसहलक्ष्मणेनमद्बाणनि १०३

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

भिन्नविकीर्णदेहम गतासुषं भूमितले शयानं शरैः शितैराचितसर्वगात्रम् ५ इमां प्रतिज्ञां शृणु शक्र शत्रोः
सुनिश्चितां पौरुषदैवयुक्ताम् अद्यैव रामं सह लक्ष्मणेन संतर्पयिष्यामि शरैरमोघैः ६ अद्येंद्र वैवस्वत
विष्णुरुद्रसाध्याश्च वैश्वानरश्चंद्रसूर्याः द्रक्ष्यंति मे विक्रमम प्रमेयं विष्णोरिवोग्रं बलियज्ञवाटे ७ स एव
मुक्त्वा त्रिदशेंद्रशत्रुरापृच्छ्य राजानमदीनसत्वः समारुरोहानिलतुल्यवेगं रथं खरश्रेष्ठसमाधियुक्तम्
८ समास्थाय महातेजा रथं हरिरथोपमम् जगाम सहसा तत्र यत्र युद्धमरिंदमः ९ तं प्रस्थितं महात्मानम
नुजग्मुर्महाबलाः संहर्षमाणा बहवो धनुःप्रवरपाणयः १० गजस्कंधगताः केचित्केचित्परमवाजि
भिः व्याघ्रवृश्चिकमार्जारखरोष्ट्रभुजंगमैः ११ वराहैः श्वापदैः सिंहैर्जंबुकैः पर्वतोपमैः काक
हंसमयूरैश्च राक्षसा भीमविक्रमाः १२ प्रासपट्टिसनिस्त्रिंशपरश्वधगदाधराः भुशुंडिमुद्गरयष्टि
शतघ्नीपरिघायुधाः १३ स शंखनिनदैः पूर्णैर्भेरीणां चापि निस्वनैः जगाम त्रिदशेंद्रारिर्महासै
न्येन वीर्यवान् १४ स शंखशशिवर्णेन छत्रेणारिसूदनः रराज प्रतिपूर्णेन नभश्चंद्रमसा यथा

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० वा० यु० था १५ वीज्यमानस्ततो वीरो हैमैर्हंसविभूषितैः चारुचामरमुख्यैश्च मुख्यैः सर्वधनुष्मताम् १६ ततस्त्विं
११४ द्रजितात्मं कार्मुकं प्रतिमतेजसा राजा प्रतिवीर्येणाद्यौरिवार्केण भावता १७ स संप्राप्य महातेजा युद्धभू
मिमरिंदमः स्थापयामास [illegible] रथं रक्षांसि रथं प्रतिसमंततः १८ ततस्तु हुतभोक्तारं हुतभुक्सदृशप्रभः
जुहुवे राक्षसश्रेष्ठो मंत्रवद्विधिवत्तदा १९ स हविर्लाजसत्कारैर्माल्यगंधपुरस्कृतैः जुहुवे पावकं दीप्तं
राक्षसेंद्रः प्रतापवान् २० शस्त्राणि शरपत्राणि समिधोथ विभीतकाः लोहितानि च वासांसि स्रुवं
कार्ष्णायसं तथा २१ स तत्राग्निं समास्तीर्य शरपत्रैः सतोमरैः छागस्य सर्वकृष्णस्य गलं जग्राह जी
वतः २२ सकृदेव समिद्धस्य विधूमस्य महार्चिषः बभूवुस्तानि लिंगानि विजयं योन्यदर्शयन् २३ प्र
दक्षिणावर्त्तशिखस्तप्तकांचनसंनिभः हविस्तत्प्रतिजग्राह पावकः स्वयमुत्थितः २४ सोस्त्रमा
माहारयामास ब्राह्ममस्त्रविशारदः धनुश्चात्मरथं चैव कवचं चाभ्यमंत्रयत् २५ तस्मिन्नाहूयमा
नेस्त्रे हूयमाने च पावके सार्कग्रहेंदुनक्षत्रं वितत्रास नभस्थलम् २६ स पावकं पावकदीप्ततेजा हु राम० ११४

श्यामहेंद्रप्रतिमप्रभावः सचापबाणासिरथाश्वसूतः रवैस्तईधेल्मानमचिंत्यवीर्यः २७ ततो हयरथाकीर्णं
पताकाध्वजशोभितम् निर्ययौ राक्षसबलं नर्दमानं युयुत्सया २८ ते शरैर्बहुभिश्चित्रैस्तीक्ष्णा
वेगैरलंकृतैः तोमरैरंकुशैश्चापि वानरान्जघ्नुराहवे २९ रावणिस्तु ततः क्रुद्धस्तान्समीक्ष्य नि
शाचरान् हृष्टा भवंतो युध्यंतु वानराणां जिघांसया ३० ततस्ते राक्षसाः सर्वे गर्जंतो जयकांक्षिणः
अभ्यवर्षन् ततो घोरान् वानरान्शरवृष्टिभिः ३१ स तु नालीकनाराचैर्गदाभिर्मुसलैरपि रक्षो
भिः संवृतः संख्ये वानरान्विचकर्त ह ३२ ते वध्यमानाः समरे वानराः पादपायुधाः अभ्यवर्षंत स
हिता रावणिं शैलपादपैः ३३ इंद्रजित्तु ततः क्रुद्धो महातेजा महाबलः वानराणां शरीराणि व्यधमद्रा
वणात्मजः ३४ शरेणैकेन च हरीन् नव पंच च सप्त च विभेद समरे क्रुद्धो राक्षसान्संप्रहर्षयन् ३५
स शरैः सूर्यसंकाशैः शातकुंभविभूषणैः वानरान्समरे वीरः प्रममाथ सुदुर्जयः ३६ ते भिन्नगात्राः
समरे वानराः शरपीडिताः पेतुर्मथितसंकल्पाः सुरैरिव महासुराः ३७ उत्तपंतमिवादित्यं घोरैर्बाण
गभस्तिभिः अभ्यधावंत संक्रुद्धाः समरे वानरर्षभाः ३८ ततस्तु वानराः सर्वे भिन्नदेहा विचेतसः

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०वा०यु० व्यथिताविद्रवंतिस्म रुधिरेणसमुक्षिताः ३९ रामस्यार्थे पराक्रम्य वानरास्त्यक्तजीविताः नर्दंतस्तेनिधनं तात्तु
१९५ समरे सशिलायुधाः ४० ते द्रुमैः पर्वताग्रैश्च शिलाभिश्च प्लवंगमाः अभ्यवर्षत समरे रावणिं समवस्थिताः
४१ तद्द्रुमाणां शिलानां च वर्षं प्राणहरं महत् व्यपोहत महातेजा रावणिः समितिंजयः ४२ ततः पाव
कसंकाशैः शरैराशीविषोपमैः वानराणामनीकानि बिभेद समरे प्रभुः ४३ अष्टादशशरैस्तीक्ष्णैः स
विध्वा गंधमादनं विव्याध नवभिश्चैव नलं दूरादवस्थितम् ४४ सप्तभिस्तु महावीर्यो मैंदं मर्मविदारणैः
पंचभिर्विशिखैश्चैव गजं विव्याध संयुगे ४५ जांबवंतं च दशभिर्नीलं त्रिंशद्भिरेव च सुग्रीवमृष
भं चैव सोंगदं द्विविदं तथा घोरैर्दत्तवरैस्तीक्ष्णैर्निष्प्राणान् करोत्तदा ४६ अन्यानपि तदा मुख्यान्वा
नरान्बहुभिः शरैः अर्दयामास संक्रुद्धः कालाग्निरिव मूर्छितः ४७ स शरैः सूर्यसंकाशैः सुमुक्तैः शीघ्र
गामिभिः वानराणामनीकानि निर्ममंथ महारणे ४८ आकुलां वानरीं सेनां शरजालेन पीडिताम्
हृष्टः स परया प्रीत्या ददर्श क्षतजोक्षिताम् ४९ पुनरेव महातेजा राक्षसेंद्रात्मजो बली ५० संसृज्य बा
णवर्षं च शस्त्रवर्षं च दारुणम् ममर्द वानरानीकमिंद्रजित्त्वरितो बली ५१ स्वसैन्यमुत्सृज्य समेत्य तूर्णं रा०म० १९५

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

ंभिमहाहवे वानरवाहिनीं ॥ वध्यमानः शरजालमुग्रं ववर्ष नीलो बुधरो यथांबु ५२ ते प्राक्जिह्वार्त्ता
विप्रीरा देहामायाहताविस्वरसुन्नदंतः रणोनिपेतुर्हि रयोद्धिकं स्यापयेंद्रवज्राभिहतानगेंद्राः ५३ ते
के वक्त्रं संददृशुः शिलाग्रान् बाणान् रणे वानरवाहिनी कुमायाविमूढं चतुरं द्रप्रांतुन चात्र तेरणे सममप्युप
प्रयन् ५४ ततः स रक्षोधिपतिर्महात्मा मर्वा द्विप्रो वाणगणैः शिताग्रैः प्रच्छादयामास रविप्रकाशैर्वि
दारयामास च वानरेंद्रान् ५५ सशूलनिस्त्रिंशपरश्वधानि व्याविद्धदीप्तानलसन्निभानि सविस्फुलिंगो
ज्वलपावकानि ववर्ष तीव्रं प्लवगेंद्रसैन्ये ५६ ततोऽज्वलनसंकाशैर्वीरो वानरयूथपाः ताडिताः
प्राक्जिह्वास्तैः प्रफुल्ला इव किंशुकाः ५७ तेऽन्योन्यमभिसर्पंतो नदंतो भैरवस्वनम् । ग्रस्तैस्त्रास्त्रैर्नि
र्भिन्नानि पेतुर्वानरर्षभाः ५८ उदीक्षमाणा गगनं केचिन्नेत्रेषु ताडिताः शस्त्रैर्विविशुरन्योन्यं पेतुश्च
जगतीतले ५९ हनूमंतं च सुग्रीवमंगदं गंधमादनं जांबवंतं सुषेणं च वेगदर्शिनमेव च ६० मैंदं च
द्विविदं नीलं गवाक्षं गवयं तथा केसरिं हरिलोमानं विद्युद्दंष्ट्रं च वानरम् ६१ सूर्याननं ज्योतिर्मुखं तथा
दधिमुखं हरिं पावकाक्षं नलं चैव कुमुदं चैव वानरम् ६२ प्रासैः शूलैः शितैर्बाणैरिंद्रजिन्मंत्रसंहितैः वि

रा०वा०यु० ज्वलनकवलैर्मुखैः संछन्नान्यपतन्यानि वंधुरश्च विहंगमाः ५० निष्पपात च गृध्रोऽस्य शूलाग्रे
११९ पथि गच्छतः प्रस्फुरन्नयनं चास्य सव्यो बाहुरकंपत ५१ निष्पपात तदा चोल्का ज्वलंती भी
१६९ मनिस्वना आदित्यो निष्प्रभश्चासीन्न प्रववौ सुखोऽनिलः ५२ अचिंतयन्महोत्पातानुत्थिता
न्रोमहर्षणान् निर्ययौ कुंभकर्णस्तु कृतांतबलचोदितः ५३ स लंघयित्वा प्राकारं पद्भ्यां पर्वत
सन्निभः ददर्शाभ्रघनप्रख्यं वानरानीकमद्भुतम् ५४ ते दृष्ट्वा वानरश्रेष्ठा राक्षसं पर्वतोपमं
वायुनुन्ना इव घना ययुः सर्वा दिशस्तदा ५५ तद्वानरानीकमतिप्रचंडं दिशो द्रवद्भिन्नमिवाभ्र
जालम् स कुंभकर्णः समवेक्ष्य हर्षान्ननाद भूयो घनवद्घनाभः ॥ ५६ ॥ ते तस्य घोरं निनदं निशा॥
म्य यथा निनादं दिवि वारिदस्य पेतुः प्लवंगा बहवो धरण्यां निकृत्तमूला इव सालवृक्षाः ॥ ५७ ॥
विपुलपरिघवान्स कुंभकर्णो रिपुनिधनाय विनिःसृतो महात्मा ॥ कपिगणभयमाददत्सुभीमः प्र
भुरिव किंकरदंडवान्युगांते ॥ ५८ ॥ इत्यार्षे रामायणे युद्धकाण्डे पंचषष्टितमः सर्गः ॥ ६५ ॥ स लंघ रा०म०
यित्वा प्राकारं गिरिकूटोपमो महान् निर्ययौ नगरात्तूर्णं कुंभकर्णो महाबलः १ स ननाद महा ११९
१६९

रा०वा०यु० माधहरिशार्दूलान्सर्वांस्तानाहृष्टसेश्वरः ६३ स वैगदाभिर्हरियूथमुख्यान्निर्भिद्य वाणैस्तपनीयपुंखैः
१९६ ववर्ष रामं प्रति वृष्टिजालैः सलक्ष्मणं भास्कररश्मिकल्पैः ६४ स वाणवर्षैरभिवर्षमाणो धारानिपा
तानिव तानचिंत्य समीक्षमाणः परमाद्भुतश्रीरामस्तदा लक्ष्मणमित्युवाच ६५ असौ पुनर्लक्ष्मण
राक्षसेंद्रो ब्रह्मास्त्रमाश्रित्य सुरेंद्रशत्रुः निपातयित्वा हरिसैन्यमुग्रमस्मान् शरैरर्दयति प्रसक्तम् ६६
स्वयंभुवा दत्तवरो महात्मा खमास्थितोंतर्हितभीमकायः कथं नु शक्यो युधि नष्टदेहो निहंतुमद्येंद्रजि
दुद्यतास्त्रः ६७ मन्ये स्वयंभूर्भगवानचिंत्यो यस्यैतदस्त्रप्रभवप्रभावम् वाणावपातं त्वमिहाद्य धीम
न्मया सह त्वं व्यग्रमनाः सहस्व ६८ प्रच्छादयत्येष हि राक्षसेंद्रः सर्वा दिशः सायकवृष्टिजालैः एतच्च सर्
वं पतितात्र्यशूरं न भ्राजते वानरराजसैन्यम् ६९ आवां तु दृष्ट्वा पतितौ विसंज्ञौ निवृत्तयुद्धौ हतहर्षरो
षौ ध्रुवं प्रवेक्ष्यत्यमरारिवासममुं समादाय परां च लक्ष्मीम् ७० ततस्तु ताविंद्रजिदस्त्रजालैर्बभूव
तुस्तत्र तदा विशस्तौ स चापि तौ तत्र विषादयित्वा ननाद हर्षात् युधि राक्षसेंद्रः ७१ ततस्तदा वानरराज
सैन्यं रामं च संख्ये सह लक्ष्मणेन विषादयित्वा सहसा विवेश पुरीं दशग्रीवभुजाभिगुप्ताम् ७२ संस्तूयमानः रा०म० १९६

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

मनुयातुधानैः पित्रे च सर्वं हृषितोभ्युवाच ॥ ७३ ॥ इत्यार्षे रामायणे युद्धकांडे त्रिसप्ततितमः सर्गः । ७३ ॥ तयोस्त
दा सादिते युद्धे ऽग्नेमुमोह सैन्यं हरियूथपानाम् सुग्रीवनीलांगदजांबवंतो न चापि किंचित्प्रतिपेदिरे ते १
ततो विषण्णं समवेक्ष्य सैन्यं विभीषणो बुद्धिमतां वरिष्ठः उवाच शाखामृगराजवीरानाश्वासयन्नप्रतिमै
र्वचोभिः २ मा भैष्ट नास्त्यत्र विषादकालो यदार्यपुत्रौ ह्यवशौ विषण्णौ स्वयंभुवो वाक्यमथोद्वहंतौ यत्सा
दिताविंद्रजिदस्त्रजालैः ३ तस्मै तु दत्तं परमास्त्रमेतत्स्वयंभुवा ब्राह्मममोघवीर्यम् तन्मानयंतौ युधिरा
जपुत्रौ निपातितौ कोत्र विषादकालः ४ ब्राह्ममस्त्रं तदा धीमान्मानयित्वा तु मारुतिः विभीषणवचः
श्रुत्वा हनूमानिदमब्रवीत् ५ एतस्मिन्निहते सैन्ये वानराणां तरस्विनाम् यो यो धारयते प्राणांस्तं तमाश्वा
सयावहे ६ ताउभौ युगपद्वीरौ हनूमद्राक्षसोत्तमौ उल्काहस्तौ तदा रात्रौ रणशीर्षे विचेरतुः ७ भि
न्नलांगूलहस्तोरुपादपार्श्वशिरोधरैः स्रवद्भिः क्षतजं गात्रैः प्रस्रवद्भिरिवाचलैः ८ पतितैः पर्वताकारै
र्वानरैरभिसंकुलाम् शस्त्रैश्च पतितैर्दीप्तैर्ददृशाते वसुंधराम् ९ सुग्रीवमंगदं नीलं शरभं गंधमादनम्
जांबवंतं सुषेणं च वेगदर्शिनमेव च १० मैंदं नलं ज्योतिमुखं द्विविदं पनसं तथा विभीषणो हनूमांश्च द

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०वा०यु० दृष्ट्वातौहतौनरर्षौ ११ सप्तषष्टिर्हताः कोट्यो वानराणांतरस्विनाम अन्हः पंचमशेषेणवल्लभेनस्वयंभु
१९७ वः १२ सागरौघनिभंभीमंदृष्ट्वाबाणार्दितंबलम मार्गतेजांबवंतंस्महनूमान्सविभीषणः १३ स्वभा
वजरयायुक्तंवृद्धंशरशतैश्चितम प्रजापतिसुतंवीरंशाम्यंतमिवपावकम १४ दृष्ट्वातमुपसंगम्य
पौलस्त्योवाक्यमब्रवीत कच्चिदार्यशरैस्तीक्ष्णैर्नप्राणाध्वंसितास्तव १५ विभीषणवचःश्रुत्वाजां
बवानृक्षपार्थिवः कृच्छ्रादभ्युद्गिरन्वाक्यमिदंवचनमब्रवीत १६ नैरृतेंद्रमहावीर्यस्वरेणत्वाभिल
क्षये पीड्यमानःशितैर्बाणैर्नत्वांपश्यामिचक्षुषा १७ अंजनासुप्रजायेनमातरिश्वाचनैरृत
हनूमान्वानरश्रेष्ठःप्राणान्धारयतेक्वचित १८ श्रुत्वाजांबवतोवाक्यमुवाचेदंविभीषणः राजपुत्रा
वतिक्रम्यकस्मात्पृच्छसिमारुतिम १९ नैवराजनिसुग्रीवेनांगदेनापिराघवे आर्यसंदर्शितःस्नेहो
यथावायुसुतेपरः २० विभीषणवचःश्रुत्वाजांबवान्वाक्यमब्रवीत शृणुनैरृतशार्दूलयस्मा
त्पृच्छामिमारुतिम २१ यस्मिन्जीवतिवीरेतुहतमप्यहतंबलम हनूमत्युज्झितप्राणेजीवंतोपिवयं
हताः २२ धरतेमारुतिस्तातमारुतप्रतिमोयदिवैश्वानरसमोवीर्येजीविताशाततोभवेत २३ राम० १९७

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

ततो वृद्धमुपागम्य नियमेनाभ्यवादयत् स ह्यजांववतः पादौ हनूमान्मारुतात्मजः २४ श्रुत्वा हनुमतो
वाक्यं तदा विव्यथितेंद्रियः पुनर्जातमिवात्मानं मन्यते स्म ऋक्षपुंगवः २५ ततोऽब्रवीन्महातेजा हनू
मंतं स जांववान् आगच्छ हरिशार्दूल वानरांस्त्रातुमर्हसि २६ नान्यो विक्रमपर्याप्तस्त्वमेषां परमः स
खा त्वत्पराक्रमकालोऽयं नान्यं पश्यामि कंचन २७ ऋक्षवानरवीराणामनीकानि प्रहर्षय विशल्यौ
कुरु चाप्येतौ सादितौ रामलक्ष्मणौ २८ गत्वा परममध्वानमुपर्युपरि सागरं हिमवंतं नगश्रेष्ठं हनूम
न्गंतुमर्हसि २९ ततः कांचनमत्युग्रमृषभं पर्वतोत्तमम् कैलासशिखरं चात्र द्रक्ष्यस्यरिनिषूदनः ३०
तयोः शिखरयोर्मध्ये प्रदीप्तमतुलप्रभम् सर्वौषधियुतं वीर द्रक्ष्यस्यौषधिपर्वतम् ३१ तस्य वानरशा
र्दूल चत्वारो मूर्ध्नि संभवाः द्रक्ष्यस्योषधयो दीप्ता दीपयंतीर्दिशो दश ३२ मृतसंजीवनीं चैव विश
ल्यकरणीमपि सवर्णकरणीं चापि संधानीं च महौषधिम् ३३ ताः सर्वा हनुमन्गृह्य क्षिप्रमागंतुमर्ह
सि आश्वास्य हरीन्प्राणैर्योज्य गंधवहात्मज ३४ श्रुत्वा जांववतो वाक्यं हनुमान्हरिपुंगवः आपूर्य
त वलोद्धर्षैस्तोयवेगैरिवार्णवः ३५ स पर्वततटाग्रस्थः पीडयन्पर्वतोत्तमं हनूमान्दृश्यते वीरो द्वितीय

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० वा० सु० १९८ यद्रवपर्वतः ३६ हरिपादविनिर्भिन्नोनिषसादसपर्वतः नशशाकतदात्मानंसोढुंभृशनिपीडितः ३७
तस्यपेतुर्नगाभूमौहरिवेगाच्चजज्ज्वलुः शृंगाणिचव्यशीर्यंतपीडितस्यहनूमता ३८ तस्मिन्संपीड्य
मानेतुभग्नद्रुमशिलातलेनशेकुर्वानराःस्थातुंघूर्णमानेनगोत्तमे ३९ सघूर्णितमहाद्वाराप्रभग्न
गृहगोपुरालंकात्रासाकुलारात्रौप्रनृत्तेवाभवत्तदा ४० पृथिवीधरसंकाशोनिपीड्यपृथिवीध
रंपृथिवींक्षोभयामाससार्णवांमारुतात्मजः ४१ पद्भ्यांतुशैलमापीड्यवडवामुखवन्मुखम् वि
वृत्योग्रंननादोच्चैस्त्रासयन्निवराक्षसान् ४२ तस्यनानद्यमानस्यश्रुत्वानिनदमुत्तमम् लंका
स्थाराक्षसास्तत्रनशेकुःस्पंदितुंभयात् ४३ नमस्कृत्वाथरामायमारुतिर्भीमविक्रमः राघवा
र्थेपरंकर्मसमीहतपरंतपः ४४ सपुच्छमुद्यम्यभुजंगकल्पंविनम्यपृष्ठंश्रवणेनिकुंच्य विवृत्य
वक्त्रंवडवामुखाभमापुप्लुवेव्योम्निसचंडवेगः ४५ सवृक्षषंडांस्तरसाजहारशैलान्शिलाःप्रा
कृतवानरांश्च बाहूरुवेगोद्धतसंप्रणुन्नास्तेक्षीणवेगाःसलिलेनिपेतुः ४६ सतौप्रसार्योरगभो
गकल्पौभुजौभुजंगारिनिकाशवीर्यः जगाममेरुंनगराजमग्र्यंदिशःप्रकर्षन्निववायुसूनुः रा० सु० १९८

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

४७ स सागरं घूर्णितवीचिमालं नेतत्पान्सशंभ्रामितसर्वसत्त्वम् सवीक्ष्यमाणः सहसा जगाम चक्रं
यथा विष्णुकराग्रमुक्तम् ४८ स पर्वतान्वृक्षगणान्सरांसि नदीस्तटाकानि पुरोत्तमानि स्फी
तांजनान्तानपि संप्रवीक्ष्य जगाम वेगात्पितृतुल्यवेगः ४९ आदित्यपथमाश्रित्य जगाम स ग
तश्रमः हनूमांस्त्वरितो वीरः पितृतुल्यपराक्रमः ५० जवेन महता युक्तो मारुतिर्मारुतो यथा ज
गाम हरिशार्दूलो दिशः शब्देन नादयन् ५१ स्मरन् जांबवतो वाक्यं मारुतिर्भीमविक्रमः ददर्श
सहसा गत्वा हिमवंतं महाकपिः ५२ नानाप्रस्रवणोपेतं नानाकंधरनिर्झरम् श्वेताभ्रचयसं
काशैः शिखरैश्चारुदर्शनम् ५३ शोभितं विविधैर्वृक्षैरगमत्पर्वतोत्तमम् ५४ स तं समासाद्य म
हानगेंद्रमतिप्रवृद्धोत्तमहेमशृंगम् ददर्श पुण्यानि महाश्रमाणि सुरर्षिसंघोत्तमसेवितानि ५५
स ब्रह्मकोशं रजतालयं च शक्रालयं रुद्रशरप्रमोक्षं हयाननं ब्रह्मशिरश्च दीप्तं ददर्श वैवस्व
तकिंकरांश्च ५६ वह्न्यालयं वैश्रवणालयं च सूर्यप्रभं सूर्यनिबंधनं च ब्रह्मासनं शंकरकार्मुकं
च ददर्श नाभिं च वसुंधरायाः ५७ कैलासमुग्रं हिमवच्छिलां च तं वै वृषं कांचनशैलमग्र्यम् ।

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

ए॰ वा॰ यु॰ प्रदीप्तसर्वौषधिसंप्रदीप्तं ददर्श सर्वौषधिपर्वतेंद्रम् ५८ स तं समीक्ष्यानलराशिदीप्तं विसिस्मि
११९ ये वासवदूतसूनुः आप्लुत्य तं चौषधिपर्वतेंद्रं तत्रौषधीनां विचयं चकार ५९ स योजनसहस्रा
णि समतीत्य महाकपिः दिव्यौषधिधरं शैलं व्यचरन्मारुतात्मजः ६० महौषध्यस्तु ताः सर्वास्त
स्मिन्पर्वतसत्तमे विज्ञायार्थिनमायांतं ततो जग्मुरदर्शनम् ६१ स ता महात्मा हनुमानपश्यन्
कोपरोषाच्च भृशं ननाद अमृष्यमाणोऽग्निनिकाशचक्षुर्महीधरेंद्रं तमुवाच वाक्यम् ६२ कि
मेतदेवं सुविनिश्चितं ते यद्राघवे नासि कृतानुकंपः पश्याद्य मद्बाहुबलाभिभूतो विकीर्णमात्मा
नमथो नगेंद्रः ६३ स तस्य शृंगं सनगं सनागं सकांचनं धातुसहस्रजुष्टम् विकीर्णकूटं ज्व
लिताग्रसानुं प्रगृह्य वेगात्सहसोन्ममंथ ६४ स तं समुत्पाट्य खमुत्पपात वित्रास्य लोकान्ससु
रासुरेंद्रान् संस्तूयमानः खचरैरनेकैर्जगाम वेगाद्गरुडोग्रवीर्यः ६५ स भास्कराध्वानमनु
प्रपन्नस्तं भास्कराभं शिखरं प्रगृह्य बभौ तदा भास्करसंनिकाशो रवेः समीपे प्रतिभास्कराभः ६६
स तेन शैलेन भृशं रराज शैलोपमो गंधवहात्मजस्तु सहस्रधारेण सपावकेन चक्रेण खे विष्णुरिवा राम॰ ११९

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

र्पितेन ६७ तं वानराः प्रेक्ष्य तदा विनेदुः स तानपि प्रेक्ष्य मुदा ननाद तेषां समुद्घुष्टरवं निशम्य लंकाल
याभीमतरं विनेदुः ६८ ततो महात्मा निपपात तस्मिं शैलोत्तमे वानरसैन्यमध्ये हर्युत्तमेभ्यः शिरसा
भिवाद्य विभीषणं तत्र च सस्वजे सः ६९ तावप्युभौ मानुषराजपुत्रौ तं गंधमाघ्राय महौषधीनाम्
बभूवतुस्तत्र तदा विशल्यावुत्तस्थुरन्ये च हरिप्रवीराः ७० सर्वे विशल्या विरुजः क्षणेन हरिप्रवीरा
। निहताश्च ये स्युः गंधेन तासां प्रवरौषधीनां सुप्ता निशांतेष्विव संप्रबुद्धाः ७१ यदाप्रभृति लंका
यां युध्यंते कपिराक्षसाः तदाप्रभृति मानार्थमाज्ञया रावणस्य च ७२ ये हन्यंते रणे तत्र राक्षसाः
कपिकुंजरैः हताहतास्तु क्षिप्यंते सर्व एव तु सागरे ७३ ततो हरिर्गंधवहात्मजस्तु तमोषधीशै
लमुदग्रवीर्यः निनाय वेगाद्धिमवंतमेव पुनश्च रामेण समाजगाम ॥७४॥ इत्यार्षे श्रीमद्रामायणे
युद्धकांडे चतुःसप्ततितमः सर्गः ॥७४॥ ततोऽब्रवीन्महातेजाः सुग्रीवो वानराधिपः १ अर्थ्यं विज्ञा
पयंश्चापि हनूमंतमिदं वचः यतो हतः कुंभकर्णः कुमाराश्च निषूदिताः नेदानीमुपनिर्हारं
रावणो दातुमर्हति २ ये ये महाबलाः संति लघवश्च प्लवंगमाः लंकामभ्युत्पतंत्वाशु गृह्यो

र्विषे न्हि वर्तमान कथास मा प्ताः
तु

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा० वा० सु० उल्काः प्लवगर्षभाः ३ ततोऽलंकृतप्रादिष्टैरौद्रैस्तस्मिन्निशामुखे लंकामभिमुखाः सोल्का जग्मुस्ते
२०० प्लवगर्षभाः ४ उल्काहस्तैर्हरिगणैः सर्वतः समभिद्रुताः आरक्षस्थाविरूपाक्षाः सहसा विप्रदुद्रु
वुः ५ गोपुराट्टप्रतोलीषु चर्यासु विविधासु च प्रासादेषु च सर्वत्र ससृजुस्ते हुताशनम् ६ तेषां गृहसह
स्राणि ददाह हुतभुक्तदा प्रासादाः पर्वताकाराः पतंति धरणीतले ७ अगरुर्दह्यते तत्र परं चैव
सुचंदनम् मौक्तिकामणयः स्निग्धा वज्रं चापि प्रवालकम् ८ क्षौमं च दह्यते तत्र कौशेयं चापि
शोभनम् आविकं विविधं चौर्णं कांचनं भांडमायुधम् ९ नानाविकृतसंस्थानं वाजिभांडपरि
च्छदं गजग्रैवेयकक्ष्याश्च रथभांडाश्च संस्कृताः १० तनुत्राणि च योधानां हस्त्यश्वानां च वर्म च ख
ड्गाः धनूंषि ज्यावाणास्तोमरांकुशशक्तयः ११ रोमजं वालजं चर्म व्याघ्रजं चांडजं बहु मुक्तामणिवि
चित्रांश्च प्रासादांश्च समंततः १२ विविधानस्त्रसंयोगानग्निर्दहति तत्र वै नानाविकृतसंस्थानां ददाह राम०
हुतभुक्तदा १३ आवासान्राक्षसानां च सर्वेषां गृहगृध्नुनाम् हेमचित्रतनुत्राणां स्रग्भांडोवरधा २००
रिणाम् १४ शीधुपानचलाक्षाणां मदविह्वलगामिनाम् कांतालंबितवस्त्राणां शत्रुसंजातमन्युनाम् १५

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

गदाशूलासिहस्तानां रक्षसां तां पिबत्तामपि शयनेषु महार्हेषु प्रसुप्तानां प्रियैः सह त्रस्तानां गच्छतां तूर्णं पुत्रा
नादाय सर्वतः १६ तेषां शतसहस्राणि तदा लंकानिवासिनाम् प्रदहत्पावकस्तत्र जज्वाल च पुनः पु
नः १७ सारवंति महार्हाणि गंभीरगुणवंति च हेमचंद्रार्द्धचंद्राणि चंद्रशालोन्नतानि च १८ रत्नचित्र
गवाक्षाणि साधिष्ठानानि सर्वशः मणिविद्रुमचित्राणि स्पृशंतीव च भास्करम् १९ क्रौंचबर्हिणवीणा
नां भूषणानां च निस्वनैः नादितान्यचलाभानि वेश्मान्यग्निर्ददाह सः २० ज्वलनेन परीतानि तोरणा
नि च काशिरे विद्युद्भिरिव नद्धानि मेघजालानि घर्मगे २१ ज्वलनेन परीतानि गृहाणि प्रचकाशिरे
दवाग्निदीप्तानि यथा शिखराणि महागिरेः २२ विमानेषु प्रसुप्ताश्च दह्यमाना वरांगनाः त्यक्ताभर
णाः सर्वा हाहेत्युच्चैर्विचुक्रुशुः २३ तत्र चाग्निपरीतानि निपेतुर्भवनान्यपि वज्रिवज्राहतानीव शिख
राणि महागिरेः २४ तानि निर्दह्यमानानि दूरतः प्रचकाशिरे हिमवच्छिखराणीव दह्यमानानि सर्वशः
२५ हर्म्याग्रैर्दह्यमानैश्च ज्वालाप्रज्वलितैरपि रात्रौ सा दृश्यते लंका पुष्पितैरिव किंशुकैः २६ हस्त्यध्य
क्षैर्गजैर्मुक्तैर्मुक्तैश्च तुरगैरपि बभूव लंका लोकांते भ्रांतग्राह इवार्णवः २७ अश्वं मुक्तं गजो दृष्ट्वा क

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

नादंसमुद्रमविनादयन् जनयन्निवनिर्घातान्विधमन्निवपर्वतान् २ तमवध्यंमघवतायमेन
वरुणेनवा प्रेक्ष्यभीमाक्षमायांतंवानराविप्रदुद्रुवुः ३ तान्वीरःप्रद्रुतान् दृष्ट्वावालिपुत्रोंगदो
ब्रवीत् नलंनीलंगवाक्षंचकुमुदंचमहाबलम् ४ आत्मानोप्यत्रविस्मृत्यवीर्याण्यभिजना
निच क्वगच्छथभयत्रस्ताःप्राकृताहरयोयथा ५ साधुसौम्यानिवर्तध्वंकिंप्राणान्परिरक्षथ
नालंयुद्धायवैरौद्रोमहतीयंविभीषिका ६ महतीमुत्थितामेतांराक्षसानांविभीषिकाम् वि
क्रमाद्विधमिष्यामोनिवर्तध्वंप्लवंगमाः ७ कृच्छ्रेणतेसमाश्वास्यसंगम्यचततस्ततः वृक्षाद्रिह
स्ताहरयोयुद्धायसंप्रतस्थिरे ८ तेनिवर्त्यतुसंरब्धाःकुंभकर्णंवनौकसः निजघ्नुःपरमक्रुद्धाः
समदाइवकुंजराः ९ प्रांशुभिर्गिरिशृंगैश्चशिलाभिश्चमहाबलाः पादपैःपुष्पिताग्रैश्चहन्य
मानोनबुध्यते १० तस्यगात्रेषुपतिताभिद्यंतेशतशःशिलाः पादपाःपुष्पिताग्राश्चभग्नाःपेतु
र्महीतले ११ सोपिसैन्यानिसंक्रुद्धोवानराणांमहौजसाम् ममंथपरमायत्तोवनान्यग्निरिवोत्थितः
१२ लोहितार्द्रास्तुहरयःशेरतेराक्षसाहताः निरस्ताःपतिताभूमौताम्रपुष्पाइवद्रुमाः १३ लंघ

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०वा०यु० चिन्द्रीत्तोपसर्पति भीतो भीतं गजं दृष्ट्वा क्वचिदश्वो निवर्तते २८ लंकायां दह्यमानायां शुशुभे च महोदधिः
२०१ छायासंसक्तसलिलो लोहितोदइवार्णवः २९ सा बभूव मुहूर्त्तेन हरिभिर्दीपिता पुरी लोकस्यास्य क्षये
घोरे प्रदीप्तेव वसुंधरा ३० नारीजनस्य धूमेन व्याप्तस्योच्चैर्विनेदुषः स्वनो ज्वलनदीप्तस्य शुश्रुवे शत
योजनम् ३१ प्रदग्धकायानपरान् राक्षसान्निर्गतान्बहिः सहसाभ्युत्पतंति स्म हरयोऽथ युयुत्सवः ३२
उद्घुष्टं वानराणां च राक्षसानां च निस्वनम् दिशो दश समुद्रं च पृथिवीं चान्वनादयत् ३३ विशल्यौ च म
हात्मानौ तावुभौ रामलक्ष्मणौ असंभ्रांतौ जगृहतुस्तदोभौ धनुषी वरे ३४ ततो विस्फारयानस्य रामस्य
धनुरुत्तमम् बभूव तुमुलः शब्दो राक्षसानां भयावहः ३५ अशोभत तदा रामो धनुर्विस्फारयन्महत् भ
गवानिव संक्रुद्धो भवो वेदमयं धनुः ३६ उद्घुष्टं वानराणां च राक्षसानां च निस्वनम् ज्याशब्दस्तावुभौ श
ब्दावतिरामस्य शुश्रुवे ३७ वानरोद्घुष्टघोषश्च राक्षसानां च निस्वनः ज्याशब्दश्चापि रामस्य त्रयं व्या सा
पदिशो दश ३८ तस्य कार्मुकनिर्मुक्तैः शरैस्तत्पुरगोपुरं कैलासशृङ्गप्रतिमं विकीर्णमपतद्भुवि ३९ राम०
ततो रामशरान्दृष्ट्वा विमानेषु गृहेषु च सन्नाहो राक्षसेन्द्राणां तुमुलः समपद्यत ४० तेषां सन्नह्यमानानां २०१

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

सिंहनादं च कुर्वताम् प्रावीशन् राक्षसेंद्राणां रौद्रीव समपद्यत ४१ आदिष्टा वानरेंद्रास्ते सुग्रीवेण महात्मना
आसन्नं द्वारमासाद्य युध्यध्वं च प्लवंगमाः ४२ यश्च वो वितथं कुर्यात्तत्र तत्राप्युपस्थितः स हंतव्योऽभिसंप्लु
त्य राजशासनदूषकः ४३ तेषु वानरमुख्येषु दीप्तोल्कोज्ज्वलपाणिषु स्थितेषु द्वारमाश्रित्य रावणं मन्युरा
विशत् ४४ तस्य जृंभितविक्षोभाद् व्यामिश्रा वै दिशो दश रूपवानिव रुद्रस्य मन्युर्गात्रेष्वदृश्यत ४५
स कुंभं च निकुंभं च कुंभकर्णात्मजावुभौ प्रेषयामास संक्रुद्धो राक्षसैर्बहुभिः सह ४६ यूपाक्षः शोणि
ताक्षश्च प्रजंघः कंपनस्तथा निर्ययुः कौंभकर्णिभ्यां सह रावणशासनात् ४७ शशास चैव तान् सर्वान्
राक्षसांस्तान् महाबलान् राक्षसा गच्छतात्रैव सिंहनादं च नादयन् ४८ ततस्तु चोदितास्तेन राक्षसा ज्व
लितायुधाः लंकाया निर्ययुर्वीराः प्रणादंतः पुनः पुनः ४९ रक्षसां भूषणस्थाभिर्भाभिः स्वाभिश्च स
र्वशः चक्रुस्ते सप्रभं व्योम हरयश्चाग्निभिः सह ५० तत्र ताराधिपस्याभा ताराणां च तथैव भा त
योराभरणस्थाभा ज्वलिता द्यामभासयन् ५१ चंद्राभा भूषणाभा च ग्रहाणां ज्वलिता च भा हरिराक्षस
सैन्यानि भ्राजयामास सर्वतः ५२ तत्र चार्द्धप्रदीप्तानां गृहाणां सागरः पुनः भाभिः संसक्तसलिलश्च

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०वा०यु० नोर्मिभिः प्रशुभ्रमेधिकम् ५३ पताकाध्वजसंछन्नमुत्तमाश्रितपरश्वधम् भीमाश्वरथमातंगनानापत्तिस
२०२ माकुलम् ५४ दीप्तशूलगदाखड्गप्रासतोमरकार्मुकम् ५५ तद्राक्षसबलं भीमं घोरविक्रमपौरुषम्
ददृशे ज्वलितप्रासं किंकिणीशतनादितम् ५६ हेमजालाचितभुजं व्यावेष्टितपरश्वधम् व्याघूर्णित
महाशस्त्रं बाणसंसक्तकार्मुकम् ५७ गंधमाल्यमधूत्सेकसंमोदितमहानिलं घोरं शूरजनाकीर्णं महां
बुधरनिस्वनम् ५८ तं दृष्ट्वा बलमायान्तं राक्षसानां दुरासदम् संचचालप्लवंगानां बलमुच्चैर्ननादच
५९ जवानोत्सुकस्त्वेष नलस्तद्बलं रक्षसां महत् अभ्ययात्प्रत्यरिबलं पतंगाइवपावकम् ६० तेषां भु
जपरामर्षव्याम्रष्टपरिघाशनि राक्षसानां बलं श्रेष्ठं भूयः परमशोभत ६१ ततोन्मत्ताइवोत्पेतुर्हरयो
यपयुत्सवः तरुशैलैरभिघ्नंतो मुष्टिभिश्चनिशाचरान् ६२ तथैवापततां तेषां हरीणां निशितैः शरैः शि
रांसि सहसाजह्रूराक्षसाभीमविक्रमाः ६३ दशनैर्हृतकर्णाश्च मुष्टिभिर्भिन्नमस्तकाः शिलाप्रहारभग्नांगा
वि चेरुस्तत्रराक्षसाः ६४ तथैवाप्यपरे तेषां कपीनामसिभिः शितैः प्रवीरानभितो जघ्नूराक्षसानोत्तर
स्विनाम् हरिवीरान्निजघ्नुस्ते घोररूपानिशाचराः ६५ घ्नंतमन्यं जघानान्यः पातयंतमपातयत् गर्हं राम० २०२

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

माणौ जगर्हान्योदशौ तमपोदशातो ॥६६॥ देहीत्यन्योददात्यन्यो ददामीत्यपरः पुनः ॥ किं त्वं के प्राप्य मे तिष्ठेति तत्रा
न्योन्यं वभाषिरे ॥६७॥ विप्रकीर्णं मितवस्त्रं च विमुक्तकवचायुधं समुद्यत महाप्रासं मुष्टिशूलासिकुंतलम ॥६८
प्रावर्तत महारौद्रं युद्धं वानररक्षसाम ॥६९॥ वानरान्दश सप्तेति राक्षसा जघ्नुराहवे राक्षसान्दश सप्तेति वानरा
स्त्वभ्यपातयत् ॥६९॥ वस्त्रेरा क्षसमाल्नेव्य वानराः पर्यवारयन ॥७०॥ इत्यार्षे श्रीमद्रामायणे युद्धकांडे पं
चसप्ततितमः सर्गः ॥७५॥ प्रवृत्ते संकुले तस्मिन्घोरे वीरजनक्षये अंगदः कंपनं वीरमाससाद रणोत्सु
कः १ अभ्याहृत्य सोंगदं कोपात्ताडयामास वेगितः गदया कंपनः पूर्वं स चचाल भृशाहतः २ स संज्ञां
प्राप्य तेजस्वी चिक्षेप शिखरं गिरेः अर्दितश्च प्रहारेण कंपनः पतितो भुवि ३ ततस्तु कंपनं दृष्ट्वा
शोणिताक्षो हतं रणे रथेनाभ्यपतत्क्षिप्रं तत्रांगदमभीतवत् ४ सोंगदं निशितैर्बाणैस्तदा विव्या
धवेगितः शरीरदारणैस्तीक्ष्णैः कालाग्निसमविग्रहैः ५ क्षुरक्षुरप्रनाराचैर्वत्सदंतैः शिलीमुखैः
कर्णिशल्यविपाठैश्च बहुभिर्निशितैः शरैः ६ अंगदः प्रतिविद्धांगो वालिपुत्रः प्रतापवान् धनुरु
ग्रं रथं बाणान्ममर्द तरसा बली ७ शोणिताक्षस्ततः क्षिप्रमसि चर्म समाददे उत्पपात दिवं क्रु

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० वा० यु० द्धो वेगवानविचारयन् ८ तं क्षिप्तं तरसा तस्माल्लघुपराक्रमः अंगदो वली करेणात्तस्य तं खड्गमाच्छिद्य चननाद
२०३ च ९ तस्यांसफलके खड्गं निचखानातोऽङ्गदः यज्ञोपवीतवच्चैनं चिच्छेद कपिकुंजरः १० तं प्रगृह्य म
हाखड्गं विनद्य च पुनः पुनः वालिपुत्रोऽभिदुद्राव रणशीर्षे परान्नरान् ११ आयसीं तु गदां गृह्य स वीरः कन
कांगदः शोणिताक्षः समाश्वस्तमेवानुपपात ह १२ प्रजंघस्तु महावीरो यूपाक्षसहितो वली गदया
भिययौ क्रुद्धो वालिपुत्रं महावलम् १३ तयोर्मध्ये कपिश्रेष्ठः शोणिताक्षप्रजंघयोः विशाखयोर्मध्य
गतः पूर्णचंद्र इवाभवत् १४ अंगदं परिरक्षंतौ मैंदो द्विविद एव च तस्य तस्थतुरभ्याशे परस्परदि
दृक्षया १५ अभिपेतुर्महावीर्याः प्रतियत्ता महावलाः राक्षसा वानरान्रोषादसिवाणगदाधराः १६
त्रयाणां वानरेंद्राणां त्रिभी राक्षसपुंगवैः संसक्तानां महद्युद्धमभवद्रोमहर्षणम् १७ तेतु वृक्षान्समा
दाय संप्रचिक्षिपुराहवे खड्गेन प्रतिचिच्छेद तान्प्रजंघो महावलः १८ रथानश्वान्द्रुमैः शैलैस्ते प्रचिक्षि
पुराहवे शरौघैः प्रतिचिच्छेद तान्यूपाक्षो महावलः १९ सृष्टान्द्विविदमैंदाभ्यां द्रुमानुत्पाट्य वीर्यवान्
वभंज गदया मध्ये शोणिताक्षः प्रतापवान् २० उद्यम्य विपुलं खड्गं परमर्मविदारणम् प्रजंघो वालिपु राम० २०३

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

त्रायअभिदुद्राववेगितः २१ तमभ्यापागतं दृष्ट्वा वानरेंद्रो महावलः आजघानाश्वकर्णेन द्रुमेणातिव
लस्तदा २२ वाहुं चास्य सनिस्त्रिंशमाजघान सुमुष्टिना वालिपुत्रस्य घातेन स पपात क्षितावसिः २३ तं दृ
ष्ट्वा पतितं भूमौ खड्गं मुसलसंनिभम् मुष्टिं संवर्तयामास वज्रकल्पं महावलः २४ स ललाटे महावीर्यमंग
दं वानरर्षभम् आजघान महातेजाः स मुहूर्त्तं चचाल ह २५ स संज्ञां प्राप्य तेजस्वी वालिपुत्रः प्रताप
वान् प्रजंघस्य शिरः कायात् पातयामास वीर्यवान् २६ स यूपाक्षोश्रुपूर्णाक्षः पितृव्ये निहते रणे आव
रुह्य रथात् क्षिप्रं क्षीणेषुः खड्गमाददे २७ तमापतंतं संप्रेक्ष्य यूपाक्षं द्विविदस्त्वरन् आजघानोरसि क्रु
द्धो जग्राह च वलवद्वली २८ गृहीतं भ्रातरं दृष्ट्वा शोणिताक्षो महावलः आजघान महातेजा वक्षसि
द्विविदं ततः २९ स तदाभिहतस्तेन चचाल च महावलः उद्यतां च पुनस्तस्य जहार द्विविदो गदाम् ३०
तौ शोणिताक्षयूपाक्षौ प्लवगाभ्यां तरस्विनौ चक्रतुः समरे तीव्रमाकर्षोत्पाटनं भृशम् ३१ द्विविदः
शोणिताक्षं तु विददार नखैर्मुखे निष्पिपेष स वीर्येण भूमावाविध्य वीर्यवान् ३२ यूपाक्षमभिसंक्रुद्धो
मैंदो वानरयूथपः पीडयामास वाहुभ्यां पपात स हतः क्षितौ ३३ हतप्रवीरा व्यथिता राक्षसेंद्रचमूस्तदा

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

ग्रा०वा०यु० २०४ जगामाभिमुखीमातुकुंभकर्णसुतोरणः ३४ आपतंतींबवेगेनकुंभस्तांसांत्वयच्चमूम् ३५ अथोत्कृष्टेम
हावीर्यैर्न्नेवधन्वन्नेः प्लवंगमैः ३५ निपातितंमहावीरांदृष्ट्वारक्षश्चमूंतदा कुंभःप्रचक्रेतेजस्वी
रणेकर्मसुदुष्करम् ३६ सधनुर्धन्विनांश्रेष्ठःप्रगृह्यसुसमाहितः मुमोचाशीविषप्रख्यान्शरा
न्देहविदारणान् ३७ तस्यतच्छुशुभेभूयःसशरंधनुरुत्तमम् विद्युदैरावतार्चिष्मद्द्वितीयेंद्र
धनुर्यथा ३८ आकर्णात्कृष्टमुक्तेनजघानाद्विविदंतदा तेनहाटकपुंखेनपत्रिणापत्रवा
ससा ३९ सहसाभिहतस्तेनविप्रमुक्तःपदस्फुरन् निपपाताद्रिकूटाभोविह्वलःप्लवगोत्तमः ४०
मैंदस्तुभ्रातरंदृष्ट्वाभग्नंतत्रमहाहवे अभिदुद्रावबेगेनप्रगृह्यविपुलांशिलाम् ४१ तांशिलां
तुप्रचिक्षेपराक्षसायमहाबलः बिभेदतांशिलांकुंभःप्रसन्नैःपंचभिःशरैः ४२ संधायचान्यं
सुमुखंशरमाशीविषोपमम् आजघानमहातेजावक्षसिद्विविदाग्रजम् ४३ सतुतेनप्रहा
रेणमैंदोवानरयूथपः मर्मण्यभिहतस्तेनपपातभुविमूर्च्छितः ४४ अंगदोमातुलौदृष्ट्वापा
तितौतुमहाहवे अभिदुद्रावबेगेनकुंभमुद्यतकार्मुकम् ४५ तमापतंतंविव्याधकुंभःपं एम० २०४

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

चभिरायसैः त्रिभिश्चान्यैः शितैर्वाणैर्मर्मातिगामिभिस्तोमरैः ४६ सोंगदो बहुभिर्वाणैः कुंभो विव्याध वीर्यवान्
अकुंठधारैर्विशिखैस्तीक्ष्णैः कनकभूषणैः ४७ अंगदः प्रतिविद्धांगो वालिपुत्रो न कंपते शिलापाद
पवर्षाणि तस्य मूर्ध्नि ववर्ष ह ४८ स प्रचिच्छेद तान्सर्वान्विभेद च पुनः शिलाः कुंभकर्णात्मजः श्रीमा
न्वालिपुत्रसमीरितान् ४९ आपतंतं च संप्रेक्ष्य कुंभो वानरयूथपम् भ्रुवोर्विव्याध वाणाभ्यामुल्का
भ्यामिव कुंजरम् ५० तस्य सुस्राव रुधिरं पिहिते चास्य लोचने अंगदः पाणिना नेत्रे पिधाय रुधिरोक्षिते
सालमासन्नमेकेन परिजग्राह पाणिना ५१ संपीड्योरसि सस्कंधं करेणाभिनिवेश्य च किंचिदभ्यव
नम्यैनमुन्ममाथ यथा गजः ५२ तमिंद्रकेतुप्रतिमं वृक्षं मंदरसन्निभम् समुत्सृजत्तं वेगेन पश्यतां स
र्वरक्षसाम् ५३ स चिच्छेद शितैर्वाणैः सप्तभिः कायभेदनैः अंगदो विव्यथे भीक्ष्णं ससाद च मुमोह
च ५४ अंगदं व्यथितं दृष्ट्वा सीदंतमिव सागरे दुरासदं हरिश्रेष्ठं रामायाथ निवेदयन् ५५ रामस्तु
व्यथितं श्रुत्वा वालिपुत्रं रणाजिरे व्यादिदेश हरिश्रेष्ठान्जांबवत्प्रमुखांस्ततः ५६ ते तु वानरशा
र्दूलाः श्रुत्वा रामस्य शासनम् अभिपेतुः सुसंक्रुद्धाः कुंभमुद्यतकार्मुकम् ५७ ततो द्रुमशिलाहस्ताः

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

कोपसंरक्तलोचनाः रक्षिष्यंतो ह्यभ्यपतन्नंगदं वानरर्षभाः ५८ जांबवांश्च सुषेणश्च वेगदर्शी च वानराः
कुंभकर्णात्मजं वीराः क्रुद्धाः समभिदुद्रुवुः ५९ समीक्ष्यापततस्तांस्तु राक्षसेंद्रो महाबलः आव
वार शरौघेण नगेनेव जलाशयम् ६० तस्य बाणचयं प्राप्य न शेकुरतिवर्तितुम् वानरेंद्रा महा
त्मानो वेलामिव महोदधिः ६१ तांस्तु दृष्ट्वा हरिगणान् छरवृष्टिभिरर्दितान् अंगदं पृष्ठतः कृ
त्वा भ्रातृजं प्लवगेश्वरः ६२ अभिदुद्राव वेगेन कुंभकर्णात्मजं रणे शैलसानुचरं नागं वेगवा
निव केसरी ६३ उत्पाट्य च महाशैलानश्वकर्णान्धवान्बहून् अन्यांश्च विविधान्वृक्षांश्चि
क्षेप च महाबलः ६४ तां छादयंतीमाकाशे नगवृष्टिं दुरासदाम् कुंभकर्णात्मजः शीघ्रं चिच्छे
द निशितैः शरैः ६५ अभिलक्ष्येण तीव्रेण कुंभेन निशितैः शरैः आर्दितास्ते द्रुमा रेजुर्यथा घोराः
शतघ्नयः ६६ द्रुमवर्षं तु तच्छिन्नं दृष्ट्वा कुंभेन वीर्यवान् वानराधिपतिः श्रीमान् महासत्वो न
विव्यथे ६७ निर्भिद्यमानः सहसा सहमानस्तु तान् शरान् कुंभस्य धनुराक्षिप्य बभंजेंद्रधनुःप्र
भम् ६८ अवप्लुत्य च ततः शीघ्रं कृत्वा कर्म सुदुष्करं अब्रवीत्कुपितं कुंभं भग्नशृंगमिव द्विपम् ६९ रा०
२०५

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

निकुंभाग्रजवीर्यं तेवाणवेगं तदद्भुतम सत्त्वतिष्ठत्वप्रभावश्चत्वत्तवरावणात्मजा ७० प्रह्लादब
लिवृत्रघ्नकुवेरवरुणोपम ० कस्त्वमनुजातोऽसिपितरंबलवत्तरम् ७१ त्वामेवैकंमहाबाहुं
शूलहस्तमरिंदमम त्रिदशानातिवर्त्तेतेजितेंद्रियमिवाधयः ७२ विक्रमस्वमहाबुद्धेकर्माणिममपश्य
तः ७३ वरदानात्पितृव्यस्तेसहतेदेवदानवान् कुंभकर्णस्तुवीर्येणसहतेचसुरासुरान् ७४ धनुर्वी
स्स दुर्जितात्तुल्यःप्रजायेत्ववाणैच त्वमद्यरक्षसांलोकेश्रेष्ठोऽसिवलवीर्यतः ७५ महाविमर्दंसमरेमयास
हत्वाद्भुतम श्मद्यभूतानिपश्यंतुशक्रशंवराविवारिव ७६ कृतप्रतिकृतंकर्मदर्शितंचास्त्रकौशलं पा
तितांहरिवीराश्चत्वयैतेभीमविक्रमाः ७७ उपालंभभयाच्चापिनासिवीर्यान्मयाहतः कृतकर्मपरिश्रां
तोविश्रांतःपश्यमेवलम् ७८ तेनसुग्रीववाक्येनसावमानेनमानितः ७१ अग्नेराज्याहुतस्येवतेज
स्तस्याभ्यवर्धत ७९ ततःकुंभस्तुसुग्रीवंबाहुभ्यांजगृहेतदा गजाविवाहितमदौनिश्वसंतौमुहुर्मुहुः
८० अन्योन्यगात्रग्रथितौकर्षंतावितरेतरम् सधूमांमुखवक्त्रोज्वालांविसृजंतौपरिश्रमात् ८१ तयोः
पादाभिघाताच्चनिमग्नाचाभवन्मही व्याघूर्णिततरंगश्चचुक्षुभेवरुणालयः ८२ ततःकुंभस्स

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०वा०यु० यंतः प्रधावंतो वानरानाचलोकयत् केचित्समुद्रपतिताः केचिद्गगनमाश्रिताः १४ वध्यमानास्तु
ते वीरा राक्षसेन बलीयसा सागरं येन वै तीर्णाः पथा तेनैव दुद्रुवुः १५ तेऽस्थलानि तथा निम्नं विवि
१८० शं विदुद्रुर्भयात् ऋक्षा वृक्षान्समारूढाः गोपुच्छास्त्वाश्रिता गुहाः १६ निपेतुः प्लवगाः केचि
त्केचिन्नैवावतस्थिरे केचिद्भूमौ निपतिताः केचित्सुप्ता मृता इव १७ तान्समीक्ष्यांगदो भ
ग्नान्वानरानिदमब्रवीत् अवतिष्ठत युद्ध्यामो निवर्तध्वं प्लवंगमाः १८ भग्नानां वो न पश्या
मि परिक्रम्य महीमिमाम् स्थानं सर्वे निवर्तध्वं किं प्राणान्परिरक्षथ १९ निरायुधानां द्रव
तामसंगगतिपौरुषम् दारा ह्युपहसिष्यंति स वै घातस्तु जीविनाम् २० कुलेषु जाताः सर्वेऽस्मि
न्विस्तीर्णेषु महत्सु च क्व गच्छथ भयत्रस्ताः प्राकृता हरयो यथा अनार्याः खलु यद्भीतास्त्यक्त्वा वी
र्यं प्रधावत २१ विकत्थनानि वो यानि तदा वै जनसंसदि तानि वः क्व नु यातानि सोदग्राणि म
हांति च २२ भीरुप्रवादाः श्रूयंते यस्तु जीवति धिक्कृतः मार्गः सत्पुरुषैर्जुष्टः सेव्यतां त्यज्यतां भयम्
२३ शयामहे वा निहताः पृथिव्यामल्पजीविताः दुष्प्रापं ब्रह्मलोकं वा प्राप्नुमो युधि सूदिताः २४ राम०

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

मुत्क्षिप्य सुग्रीवो लवणांभसि पातयामास वेगेन दर्शयन्नद्भुतं बलम् ८३ ततः कुंभनिपातेन जलराशिः
समुत्थितः विंध्यमंदरसंकाशो विससर्प समंततः ८४ ततः कुंभः समुत्पत्य सुग्रीवमभिपत्य च आजघा
नोरसि क्रुद्धो वज्रकल्पेन मुष्टिना ८५ तस्य चर्म च पुस्फोट संजज्ञे चापि शोणितम् स च मुष्टिर्महा
वेगः प्रतिजघ्नेस्थिमंडले ८६ तस्या वेगेन तत्रासीत्तेजः प्रज्वलितं मुहुः वज्रनिष्पेषसंजाता ज्वाला
मेरौ गिराविव ८७ स तत्राभिहतस्तेन सुग्रीवो वानरर्षभः मुष्टिं संवर्तयामास वज्रकल्पं महाबलः ८८
अर्चिःसहस्रविकचं रविमंडलसन्निभम् स मुष्टिं पातयामास कुंभस्योरसि वीर्यवान् ८९ स तु तेन
प्रहारेण विह्वलो भृशताडितः निपपात तदा कुंभो गतार्चिरिव पावकः ९० मुष्टिनाभिहतस्तेन नि
पपाताशु राक्षसः लोहितांग इवाकाशाद्दीप्तरश्मिर्यदृच्छया ९१ कुंभस्य पततो रूपं भग्नस्योरसि मु
ष्टिना बभौ रुद्राभिपन्नस्य यथा रूपं गवां पतेः ९२ तस्मिन्हते भीमपराक्रमेण प्लवंगमानामृषभेण
युद्धे महीसशैला सवना चचाल भयं च रक्षांस्यधिकं विवेश ॥९३॥ इत्यार्षे श्रीमद्रामायणे युद्धकांडे
षट्सप्ततितमः सर्गः ॥७६॥ निकुंभो भ्रातरं दृष्ट्वा सुग्रीवेण निपातितम् प्रदहन्निव कोपेन वानरेंद्रमु

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

पं

ततः स्रग्दामसंनद्धं दत्तपंचांगुलं शुभम् आददे परिघं वीरो नगेंद्रशिखरोपमम् २ हेमपट्टपरिक्षिप्तं
वज्रविद्रुमभूषितं यमदंडोपमं भीमं रक्षसां भयनाशनम् ३ तमाविध्य महातेजा शक्रध्वजसमौ-
जसम् विननाद विवृत्तास्यो निकुंभो भीमविक्रमः ४ उरोगतेन निष्केण भुजस्थैरंगदैरपि कुंडला-
भ्यां च मृष्टाभ्यां मालया च विचित्रया ५ निकुंभो भूषणैर्भाति तेन स्म परिघेण च यथेंद्रधनुषा ते
मेघः सविद्युत्स्तनयित्नुमान् ६ परिघाग्रेण पुस्फोट वातग्रंथिर्महात्मनः प्रजज्वाल सघोषश्च
विधूम इव पावकः ७ नगर्या विटपावत्या गंधर्वभवनोत्तमैः सह चैवामरावत्या सर्वैश्च भवनैः स-
ह ८ सतारागणनक्षत्रं सचंद्रं समहाग्रहम् निकुंभपरिघाघूर्णं भ्रमतीव नभःस्थलम् ९ दुरासदश्च प
संजज्ञे परिघाभरणप्रभः कपीनां स निकुंभाग्निर्युगांताग्निरिवोत्थितः १० राक्षसा वानराश्चापि न शे-
कुः स्पंदितुं भयात् हनूमांस्तु विवृत्योरस्तस्थौ प्रमुखतो बली ११ परिघोपमबाहुस्तु परिघं भास्क-
रप्रभम् बली बलवतस्तस्य पातयामास वक्षसि १२ स्थिरे तस्योरसि व्यूढे परिघः शतधा कृतः वि-
कीर्यमाणः सहसा उल्काशतमिवांबरे १३ स तु तेन प्रहारेण न चचाल महाकपिः परिघे

वे

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

घोषतस्समाधूतोयथाभूमिचलेचलः १४ सतथाभिहतस्तेनप्रहारेणनचचालमहाकपिः परिघेण समाधूतोयथाभूमिचलेचलः १४ सतथाभिहतस्तेनहनूमान्प्लवगोत्तमः मुष्टिंसंवर्तयामासब लेनातिमहाबलः १५ तमुद्यम्यमहातेजानिकुंभोरसिवीर्यवान् अभिचिक्षेपवेगेन वेगवान्वा युविक्रमः १६ ततःपुस्फोटचर्मास्यप्रसुस्रावचशोणितम् मुष्टिनातेनसंजज्ञेमेघेविद्युदि वोत्थिता १७ सतुतेनप्रहारेणनिकुंभोविचचालह स्वस्थश्चापिनिजग्राहहनूमंतंमहाबलं म १८ विचुक्रुशुस्तदासंख्येभीमंलंकानिवासिनः निकुंभेनोद्धृतंदृष्ट्वाहनूमंतंमहाबलम् १९ सतथाह्रियमाणोपिकुंभकर्णात्मजेनह आजघानानिलसुतोवज्रकल्पेनमुष्टि ना २० आत्मानंमोचयित्वाचक्षितावभ्युवपद्यत हनूमानुन्ममाथाशुनिकुंभंमारुता त्मजः २१ निक्षिप्यपरमायत्तोनिकुंभंनिष्पिपेषच उत्पत्यचास्यवेगेनपपातोरसिवीर्यवान् २२ परिगृह्यचबाहुभ्यांपरिवृत्यशिरोधराम् उत्पाटयामास शिरोभैरवंनदतोमहत् २३ अ थनिनदतिसादितेनिकुंभेपवनसुतेनरणेबभूवयुद्धम् दशरथसुतराक्षसेंद्रसून्वोर्भृशत

राक्षसेंद्रसून्वोर्महदंतरमागतो बयोः सुभीमम् २४ प्रपेतेतुजीवे निकुंभस्य दृष्ट्वाक्तिने दुःप्लवंगादिशः सस्वनुश्च
पफालेव चोर्वी विचालेवच द्यौर्विलने राक्षसानां भयं चाविवेश २५ इत्यार्षे रामायणे युद्धकांडे सप्तसप्त
तितमः सर्गः ॥७७॥ नवमाष्टहारः समाप्तः॥ [redacted] निकुंभं निहतं श्रु
त्वा कुंभं च विनिपातितं रावणः परमामर्षी प्रजज्वालानलोपथा १ नैऋतः क्रोधशोकाभ्यां
द्वाभ्यां तु परिमूर्छितः खरपुत्रं विशालाक्षं मकराक्षमचोदयत् २ गच्छ पुत्र मयाज्ञप्तो बलेनापि
समन्वितः राघवं लक्ष्मणं चैव जहि तौ सवनौकसौ ३ रावणस्य वचः श्रुत्वा शूरोमानीखरात्मजः
बाढमित्यब्रवीद्धृष्टो मकराक्षो निशाचरः ४ सोभिवाद्य दशग्रीवं कृत्वा चापि प्रदक्षिणम्
निर्जगाम गृहाच्छुभ्राद्रावणस्याज्ञया बली ५ समीपस्थं बलाध्यक्षं खरपुत्रोब्रवीदिदम् रथ
मानीयतां शीघ्रं सैन्यं चानीयतां त्वरात् ६ तस्य तद्वचनं श्रुत्वा बलाध्यक्षो निशाचरः स्यंदनं
च बलं चैव समीपं प्रत्यपादयत् ७ प्रदक्षिणं रथं कृत्वा समारुह्य निशाचरः सूतं संचोदयामास
शीघ्रं वै रथमावह ८ अथ तान्राक्षसान्सर्वान्मकराक्षोब्रवीदिदम् यूयं सर्वे प्रयुध्यध्वं पुरस्ता

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

रा०वा०यु० नामराक्षसाः ९ अहंराक्षसराजेनरावणेनमहात्मना आज्ञप्तःसमरेहंतुंतावुभौरामलक्ष्मणौ १०
२०८ अद्यरामंवधिष्यामिलक्ष्मणंचनिशाचराः शाखामृगंचसुग्रीवंवानरांश्चपरोत्तमैः ११ अ
द्यशूलनिपातैश्चवानराणांमहाचमूम् प्रदहिष्यामिसंप्राप्तःशुष्कंइन्धनमिवानलः १२ म
कराक्षवचःश्रुत्वाविनेदुस्तेनिशाचराः सर्वेनानायुधोपेताबलवंतःसमाहिताः १३ तेकाम
करूपिणःशूरादंष्ट्रिणःपिंगलेक्षणाःमातंगाइवनर्दंतोध्वस्तकेशाभयावहाः १४ परिवा
र्यमहाकायामहाकायंखरात्मजम् अभिजग्मुस्ततोहृष्टाश्चालयंतोवसुंधरां १५ तेशंखभेरीस
हस्राणामाहतानांसमंततः क्ष्वेलितास्फोटितानांचतत्रशब्दोमहानभूत् १६ प्रसव्यस्तुक
राक्षस्यप्रतोदःसारथेस्तदा पपातसहसाभूमौध्वजस्तस्यतुरक्षसः १७ तस्यतेरथयुक्ताश्चहया
विक्रमवर्जिताः चरणैराकुलैर्गत्वादीनाःसास्रमुखाययुः १८ प्रवातिपवनस्तस्मिन्सपांसुःख
रदारुणः निर्यातेतस्यरौद्रस्यमकराक्षस्यदुर्मतेः १९ तानिदृष्ट्वानिमित्तानिराक्षसावीर्यवत्तमाः राम०
अचिंत्यनिर्गताःसर्वेयत्रतौरामलक्ष्मणौ २० घनगजमहिषांगतुल्यवर्णाःसमरमुखेष्वसकृद्गदा २०८

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

सिभिन्नाः अहमहमिति युद्धकौशल्यात्ते रजनिचराः परिबभ्रमुर्नदंतः॥२१॥ इत्यार्षे रामायणे युद्धका
ण्डे अष्टसप्ततितमः सर्गः॥७८॥ निर्गतं मकराक्षं ते दृष्ट्वा वानरपुंगवाः आप्लुत्य सहसा सर्वे योद्धुकामा व्य
वस्थिताः १ ततः प्रवृत्तं सुमहत्तद्युद्धं रोमहर्षणम निशाचरैः प्लवंगानां देवानां दानवैरिव २ वृक्ष
शूलनिपातैश्च शिलापरिघपातनैः अन्योन्यं पातयंति स्म तदा कपिनिशाचराः ३ शक्तिखड्गगदा
कुंतैस्तोमरैश्च निशाचराः पट्टिसैर्भिंडिपालैश्च बाणपातैः समंततः ४ पाशमुद्गरदंडैश्च निर्घातै
श्चापरैः कदनं कपिसिंहानां चक्रुस्ते रजनीचराः ५ बाणौघैरर्दिताश्चापि खरपुत्रेण वानराः
संभ्रांतमनसः सर्वे दुद्रुवुर्भयपीडिताः ६ तान्दृष्ट्वा राक्षसाः सर्वे द्रवमाणान्वनौकसः नेदुस्ते सिं
हवद्दृष्टा राक्षसा जितकाशिनः ७ विद्रवत्सु तदा तेषु वानरेषु समंततः रामस्तान्वारयामास शर
वर्षेण राक्षसान् ८ वारितान्राक्षसान्दृष्ट्वा मकराक्षो निशाचरः कोपानलसमाविष्टो वच
नं चेदमब्रवीत् ९ तिष्ठ राम मया सार्द्धं द्वंद्वयुद्धं ददामि ते त्याजयिष्यामि ते प्राणान् धनुर्मुक्तैः शितैः
शरैः १० यत्तदा दंडकारण्ये पितरं हतवान्मम मदग्रतः स्वकर्मस्थं दृष्ट्वा रोषोऽभिवर्धते ११

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा० वा० यु० दह्यंते मे प्राणंगानि दुरात्मन्ममराघव यन्मयासि न दृष्टस्त्वं तस्मिन्कानने महावने १२ दिष्ट्यासि दर्श
२०९ नेराम मम त्वं प्राप्तवानिह कांक्षितोसि क्षुधार्त्तस्य सिंहस्येवेतरो मृगः १३ अद्य मद्बाणवेगेन प्रेतराड्विष
यं गतः ये त्वया निहताः शूराः सह तैश्च समेष्यसि १४ बहुनात्र किमुक्तेन शृणु राम वचो मम पश्यंतु
सकला लोकास्त्वां मां चैव रणाजिरे १५ अद्यैव गदया वा पि बाहुभ्यां वा रणाजिरे अभ्यस्तैरपि
न वा राम वर्त्ततां तेन वा युधि १६ मकराक्षवचः श्रुत्वा रामो दशरथात्मजः अब्रवीत्प्रहसन्वाक्यमु
त्तरोत्तरवादिनम् १७ कत्थसे किं वृथा रक्षो बहून्यसदृशानि तु न रणो शक्यते जेतुं विना युद्धेन वा
ग्बलात् १८ चतुर्दशसहस्राणि रक्षसां त्वत्पिता च यः त्रिशिरा दूषणश्चापि दंडके निहता मया १९
स्वाशितास्चापि मांसेन गृध्रगोमायुवायसाः भविष्यंत्यद्य वै पापा तीक्ष्णतुंडनखांकुशाः २० रु
धिरार्द्रमुखा हृष्टा रक्षपक्षांडजाश्वये रवेगता वसुधायां च भविष्यंति च सर्वतः २१ राघवेणैवमुक्त
स्तु मकराक्षो महाबलः बाणौघानमुचत्तस्मै राघवाय रणाजिरे २२ तांछरांछरवर्षेण रामश्छि
च्छेदनैकधा निपेतुर्भुवि विच्छिन्ना रुक्मपुंखाः सहस्रशः २३ तद्युद्धमभवत्तत्र समेत्यान्योन्यमोजसा राम० २०९

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

खरराक्षसपुत्रस्य सन्नोर्द्दशरथस्य च २४ जीमूतयोरिवाकाशे शब्दो ज्यातलयोरिव धनुर्मुक्तः स्वनोत्यन्तं श्रू
व यते चरणाजिरे २५ देवदानवगन्धर्वाः किन्नराश्च महोरगाः अन्तरिक्षगताः सर्वे दृष्टुकामास्तदद्भुतम् २६
विद्धमन्योन्यगात्रेषु द्विगुणं वर्द्धते बलम् कृतप्रतिकृतान्योन्यं कुरुतां तौ रणाजिरे २७ राममुक्तास्तु वा
णौघान् राक्षसस्त्वच्छिनद्रणे रक्षोमुक्तांस्तु रामो वै नैकधा प्राच्छिनच्छरैः २८ बाणौघविततास्सर्वा
दिशश्च विदिशस्तथा संछन्ना वसुधा द्यौश्च समन्तान्न प्रकाशते २९ ततः क्रुद्धो महाबाहुर्धनुश्चिच्छे
द रक्षसः रथ्याभिरथनाराचैः सूतं विव्याध राघवः ३० भित्त्वा रथं शरै रामो रथ्यादश्वान पातयत्
विरथो वसुधास्थः स मकराक्षो निशाचरः ३१ तत्तिष्ठद्वसुधां रक्षः शूलं जग्राह पाणिना त्रासनं सर्व
भूतानां युगान्ताग्निसमप्रभम् ३२ दुरवापं महच्छूलं रुद्रदत्तं भयंकरम् जाज्वल्यमानमाकाशे संहा
रास्त्रमिवापरम् यद्दृष्ट्वा देवताः सर्वा भयार्त्ता विद्रुता दिशः ३३ विभ्राम्य च महच्छूलं प्रज्वलन्तं निशाच ६
रः स क्रोधात्प्राहिणोत्तस्मै राघवाय महात्मने ३४ तमापतन्तं ज्वलितं खरपुत्रकराच्च्युतम् बाणैश्चतु
भिराकाशे शूलं चिच्छेद राघवः ३५ स छिन्नो नैकधा शूलो दिव्यहाटकमण्डितः व्यशीर्यत महोल्केव

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

 वरामबाणार्दितो भुवि ॥३६॥ तच्छूलं तेन निहतं दृष्ट्वा रामेणाक्लिष्टकर्मणा ॥ साधु साध्विति भूतानि व्याहरंतिन
 भोगताः ॥३७॥ तं दृष्ट्वा निहतं शूलं मकराक्षो निशाचरः ॥ मुष्टिमुद्यम्य काकुत्स्थं तिष्ठ तिष्ठेति चाब्रवीत् ॥३८
स तं दृष्ट्वा पतंतं तु प्रहस्य रघुनंदनः ॥ पावकास्त्रं ततो रामः संदधे तु शरासने ॥३९॥ तेनास्त्रेणाहतं रक्षः काकु
त्स्थेन तदा रणे ॥ संछिन्नहृदयं तत्र पपात च ममार च ॥४०॥ दृष्ट्वा ते राक्षसाः सर्वे मकराक्षस्य पातनम् ॥ लं
कामेव प्रधावंत रामबाणार्दितास्तदा ॥४१॥ दशरथनृपसूनुबाणवेगैरजनिचरं निहतं खरात्मजं
तम् ॥ ददृशुरथ च देवताः प्रहृष्टा गिरिमिव वज्रहतं यथा विकीर्णम् ॥४२॥ इत्यार्षे रामायणे युद्धका
ण्डे एकोनाशीतितमः सर्गः ॥ ७९ ॥ मकराक्षं हतं श्रुत्वा रावणः समितिंजयः ॥ रोषेणामहताविष्टो दंता
न्कटकटाप्य च १ कुपितस्तु तदा तत्र किं कार्यमिति चिंतयन् ॥ आदिदेश स संक्रुद्धो रणायेंद्रजितं
सुतम् २ जहि वीर महावीर्यौ भ्रातरौ रामलक्ष्मणौ ॥ अदृश्यो दृश्यमानो वा सर्वथा त्वं बलाधिकः ३
त्वमप्रतिमकर्माणमिंद्रं जयसि संयुगे ॥ किं पुनर्मानुषौ दृष्ट्वा न वधिष्यसि संयुगे ४ तथोक्तो राक्षसे
न्द्रेण प्रतिगृह्य पितुर्वचः ॥ यज्ञभूमौ स विधिवत्पावकं जुहुवेंद्रजित् ५ जुहुतश्चापि तत्राग्निं रक्तो

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

स्मीषधरास्त्रिपः आजग्मुस्तत्र संभ्रांताराक्षस्यो यत्र रावणिः ६ शस्त्राणि शरपत्राणि समिधोथविभीतकाः
लोहितानि च वासांसि स्रुवं कार्ष्णायसं तथा ७ सर्वतोग्निं समास्तीर्य शरपत्रैः सतोमरैः छागस्य सर्वकृ
ष्णस्य गलं जग्राह जीवतः ८ शरहोमसमिद्धस्य विधूमस्य महार्चिषः बभूवुस्तानि लिंगानि विजयं यान्य
दर्शयन् ९ प्रदक्षिणावर्त्तशिखस्तप्तहाटकसन्निभः हविस्तत्प्रतिजग्राह पावकः स्वयमुत्थितः १०
हुत्वाग्निं तर्पयित्वाथ देवदानवराक्षसान् आरुरोह रथश्रेष्ठमंतर्धानगतं शुभम् ११ स वाजिभि
श्चतुर्भिस्तु बाणैस्तु विविधैर्युतः आरोपितमहाचापः शुशुभे स्यंदनोत्तमः १२ जाज्वल्यमानो व
पुषा तपनीयपरिच्छदः मृगैश्चंद्रार्द्धचंद्रैश्च स रथः समलंकृतः १३ जांबूनदमहाकंबुर्दीप्तपावक
सन्निभः बभूवेंद्रजितः केतुर्वैडूर्यसमलंकृतः १४ तेन चादित्यकल्पेन ब्रह्मास्त्रेण च पालितः स ब
भूव दुराधर्षो रावणिः सुमहाबलः १५ सोभिनिर्याय नगरादिंद्रजित्समितिंजयः हुत्वाग्निं राक्षसैर्मं
त्रैरंतर्धानगतोब्रवीत् १६ अद्य हत्वा रणे यौ तौ मिथ्या प्रव्रजितौ वने जयं पित्रे प्रदास्यामि रावणाय
रणार्जितम् १७ अद्य निर्वानरामुर्वीं हत्वा रामं सलक्ष्मणम् करिष्ये परमां प्रीतिमित्युक्त्वांतरधी

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

अ्रवा प्रयामः कीर्त्तिर्वा निहत्वा शत्रुमाहवे निहता वीरलोकस्य भोक्ष्यामो वसु वानराः २५ न कुंभकर्णः
काकुत्स्थं दृष्ट्वा जीवन् गमिष्यति दीप्यमानमिवासाद्य पतंग इव पावकम् २६ पलायने
न चोद्दिष्टाः प्राणान् रक्ष्यामहे वयम् एकेन बहवो भग्ना यशो नाशो गमिष्यति २७ एवं ब्रुवा
णं तं शूरमंगदं कनकांगदम् द्रवमाणास्ततो वाक्यमूचुः शूरविगर्हितम् २८ कृतं नः कद
नं घोरं कुंभकर्णेन रक्षसा न स्थानकालो गच्छामो दयितं जीवितं हि नः २९ एतावदुक्त्वा
वचनं सर्वे ते भेजिरे दिशः भीमं भीमाक्षमायान्तं दृष्ट्वा वानरयूथपाः ३० द्रवमाणास्तु ते वीरा अं
गदेन वलीमुखाः सान्त्वनैश्चानुमानैश्च ततः सर्वे निवर्तिताः ३१ प्रहर्षमुपनीतास्तु वालिपुत्रे
ण धीमता आज्ञाप्रतीक्षास्तस्थुश्च सर्वे वानरयूथपाः ३२ ॥ इत्यार्षे रामायणे युद्धकाण्डे षट्
षष्टितमः सर्गः ॥ ६६ ॥ ते निवृत्ता महाकायाः श्रुत्वांगदवचस्तदा नैष्ठिकीं बुद्धिमास्थाय सर्वे संग्राम
कांक्षिणः १ समुदीरितवीर्यास्ते समारोपितविक्रमाः पर्यवस्थापिता वाक्यैरंगदेन वलीमु
खाः २ प्रयाताश्च गता हर्षं मरणे कृतनिश्चयाः चक्रुः सुतुमुलं युद्धं वानरास्त्यक्तजीविताः ३

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा॰वा॰यु॰ पत्त १८ शापपाताघसंक्रुद्धोदृश्यग्रीवेणाचोदितः तीक्ष्णकार्मुकनाराचैस्तीक्ष्णैस्त्विंद्ररिपुरणे १९
२९१ सदर्दशमहावीर्यौनागौत्रिशिरसाविव सृजंताविषुधाराभिर्वीरौवानरमध्यगौ २० इमौताविति
संचिंत्यसज्जंकृत्वाचकार्मुकम संततानेषुजालानिपर्जन्यइववृष्टिमान २१ सतुवैहायसंरथोयु
धितौरामलक्ष्मणौ अचक्षुर्विषयेतिष्ठन्विव्याधनिशितैःशरैः २२ तौतस्यशरवेगेन परीतौरामल
लक्ष्मणौ धनुषीसशरेकृत्वादिव्यमस्त्रंप्रचक्रतुः २३ प्रच्छादयंतौगगनंशरजालैर्महाबलौ तमस्त्रैः
सुरसंकाशौनैवपस्पृशतुःशरैः २४ सहिधूमांधकारंतुचक्रेप्रच्छादयन्नभ दिशश्चांतर्दधेश्रीमा
न्नीहारतमसावृताः २५ नैवज्यातलनिर्घोषोनचनेमिखुरस्वनः शुश्रुवेचरतस्तस्यनचरूपंप्रका
शते २६ घनांधकारेतिमिरेशिलावर्षमिवाद्भुतम सववर्षमहाबाहुर्नाराचशरवृष्टिभिः २७ सरा
मंसूर्यसंकाशैःशरैर्दत्तवरैर्भृशम विव्याधसमरेक्रुद्धःसर्वगात्रेषुरावणिः २८ तौहन्यमानौनाराचै
र्धाराभिरिवपर्वतौ हेमपुंखान्नरव्याघ्रौतिग्मान्मुमुचतुःशरान २९ अंतरिक्षेसमासाद्यरावणिं
कंकपत्रिणः निकृत्यपतगाभूमौपेतुस्तेशोणिताप्लुताः ३० अतिमात्रेशरौघेणदीप्यमानौनरोत्त राम॰
२९१

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

मो तानिषून्पततो मध्ये रने कैर्विचकर्त तु ३१ यतो हि ददृशाते तौ शरान्निपतितांश्छितान् ततस्तु तौ दा
शरथी सस्नातौ तेत्र मुत्तमम् ३२ एवमिमास्तु दिशः सर्वा रथेनातिरथः पतन् विव्याध तौ दाशरथी लघ्व
स्त्रैर्निशितैः शरैः ३३ तेनातिविद्धौ तौ वीरौ रुक्मपुंखैः सुसंहितैः बभूवतुर्दाशरथी पुष्पिताविव किंशु
कौ ३४ नास्य वेद गतिं कश्चिन्न च रूपं धनुः शरान् न चान्यद्विदितं किंचित्सूर्यस्येवाभ्रसंप्लवे ३५
तेन विद्धाश्च हरयो निहताश्च गतासवः बभूवुः शतशस्तत्र पतिता धरणीतले ३६ लक्ष्मणस्तु ततः क्रुद्धो
भ्रातरं वाक्यमब्रवीत् ब्राह्ममस्त्रं प्रयोक्ष्यामि वधार्थं सर्वरक्षसाम् ३७ अराक्षसमिमं लोकं करिष्या
मि महाबल तमुवाच ततो रामो लक्ष्मणं शुभलक्षणं नैकस्य हेतो रक्षांसि पृथिव्यां हन्तुमर्हसि ३८
अयुध्यमानं प्रच्छन्नं प्राञ्जलिं शरणागतम् पलायन्तं प्रमत्तं वा न हं तुं त्वमिहार्हसि ३९ अस्यैव तु वधे
यत्नं करिष्यावो महाभुज आदेक्ष्यावो महावेगानस्त्रानाशीविषोपमान् ४० तमेनं मायिनं क्षुद्र
मन्तर्हितरथं बलात् राक्षसं निहनिष्यन्ति दृष्ट्वा वानरयूथपाः ४१ यद्येष भूमिं विशते दिवं वा
रसातलं वापि नभस्तलं वा एवं विगूढोऽपि ममास्त्रदग्धः पतिष्यते भूमितले गतासुः ४२ इत्येवमुक्त्वा

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०वा०पु० वचनं महात्मा रघुप्रवीरः प्लवगर्षभैश्च तैः । अथापरो दुष्प्रसन्न प्रांसकर्मेरास्त्तदाम महात्मा त्वरितं निरीक्ष
२१२ ते ॥४३॥ इत्यार्षे श्रीमद्रामायणे युद्धकाण्डे प्रश्रीतितमः सर्गः ॥ ८० ॥ ग्रत्रगायत्रीयः ॥ विलापं तु मन्त्रयत्
स्य राघवस्य महात्मनः । संनिवृत्याहवात्तस्मात्प्रविवेश पुरीं ततः १ सोनुस्मृत्य वधं तेषां राक्षसानां
तरस्विनाम् क्रोधताम्रेक्षणः शूरो निर्जगामाथ रावणिः २ स पश्चिमेन द्वारेण निर्ययौ राक्षसैर्वृतः
इन्द्रजित्सुमहावीर्यः पौलस्त्यो देवकंटकः ३ इन्द्रजित्तु ततो दृष्ट्वा भ्रातरौ रामलक्ष्मणौ रणायाभ्यु
द्यतौ वीरौ मायां प्रादुष्करोत्ततः ४ इन्द्रजित्तु रथे स्थाप्य सीतां मायामयीं तदा बलेन महता [illegible]र्
वृत्य तस्या वधमरोचयत् ५ मोहनार्थं तु सर्वेषां बुद्धिं कृत्वा सुदुर्मतिः हंतुं सीतां व्यवसितो वानराभि
मुखो ययौ ६ तं दृष्ट्वा त्वभिनिर्यान्तं सर्वे ते काननौकसः उत्पेतुरभिसंक्रुद्धाः शिलाहस्ता युयुत्सवः ७
हनूमान्पुरतस्तेषां जगाम कपिकुंजरः प्रगृह्य सुमहच्छृंगं पर्वतस्य दुरासदम् ८ स ददर्श हतानन्दां सी
तामिन्द्रजितो रथे एकवेणीधरां दीनामुपवासकृशाननाम् ९ परिक्लिष्टैकवसनाममृजां राघवप्रि
याम् रजोमलाभ्यामालिप्तैः सर्वगात्रैर्वरस्त्रियम् १० तां निरीक्ष्य मुहूर्तं तु मैथिलीमध्यवस्य तत् बभू राम० २१२

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

वाचिरंदृष्ट्वाहितेनसाजनकात्मजा ११ तांदीनांमलवदिग्धांगींरथस्थांप्रेक्ष्यमैथिलीम् वाष्पपर्या
कुलनेत्रोहनूमान्व्यथितोभवत् १२ अब्रवीत्तांतुशोकार्त्तांनिरानंदांतपस्विनीम् दृष्ट्वारथस
स्थितांदीनांराक्षसेंद्रसुताश्रिताम् १३ किंसमर्थितमस्येतिचिंतयन्समहाकपिः सहतैर्वानरश्रेष्ठै
रभ्यधावत्तरावणिम् १४ तद्वानरबलंदृष्ट्वारावणिःक्रोधमूर्छितः कृत्वाविकोशंनिस्त्रिंशम्
र्द्धंसीतामकर्षयत् १५ तांस्त्रियंपश्यतांतेषांताडयामासराक्षसः क्रोशंतींरामरामेतिमाययायोजितांर
थे १६ गृहीतमूर्द्धजांदृष्ट्वाहनूमान्दैन्यमागतः दुःखजंवारिनेत्राभ्यामुत्सृजन्मारुतात्मजः १७ तां
दृष्ट्वाचारुसर्वांगींरामस्यमहिषींप्रियाम् अब्रवीत्परुषंवाक्यंक्रोधाद्रक्षोधिपात्मजम् १८ दुरात्म
न्नात्मनाशायकेशपक्षेपरामृशः ब्रह्मर्षीणांकुलेजातोराक्षसींयोनिमाश्रितः १९ धिक्त्वांपा
५५ पसमाचारंयस्यतेमतिरीदृशी नृशंसानार्यदुर्वृत्तक्षुद्रपापपराक्रम २० अनार्यस्येदृशंकर्मघृणा
तेनास्तिनिर्घृण च्युतागृहाच्चराज्याच्चरामहस्ताच्चमैथिली किंतवैषापराद्धाहियदेनांहंतुमिच्छसि
२१ सीतांहत्वातुनचिरंजीविष्यसिकथंचन वधार्हकर्मणानेनममहस्तगतोह्यसि २२ येचस्त्रीघा

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

रा०वा०यु० स्तिनां त्रेतोकात्मौकव द्वेष्व कुत्सिताः २२ जीवितमुत्सृज्य प्रेक्ष्य तान् श्रुतिजल्पसे २३ इति ब्रुवाणो हनुमान्
२९३ सायुधैर्हरिभिर्वृतः अभ्यधावत्सुसंक्रुद्धो राक्षसेंद्रसुतं प्रति २४ आपतंतं महावीर्यं तदनीकं वनौकसाम्
रक्षसां भीमकोपानामनीकेन न्यवारयत् २५ स तां बाणसहस्रेण विक्षोभ्य हरिवाहिनीं स हनूमंतं हरिश्रे
ष्ठमिंद्रजित्प्रत्युवाच ह २६ सुग्रीवस्त्वं च रामश्च यन्निमित्तमिहागताः तां वधिष्यामि वैदेहीमद्यैव तव
पश्यतः २७ इमां हत्वा ततो रामं लक्ष्मणं त्वां च वानर सुग्रीवं च हनिष्यामि तं चानार्यं विभीषणम्
२८ न हंतव्याः स्त्रियश्चेति यद् ब्रवीषि प्लवंगम पीडाकरममित्राणां यत्स्यात्कर्तव्यमेव तत् २९ ताद्द
काप्यावधं रामः किमर्थं कृतवानसि तदहं हन्मि रामस्य महिषीं जनकात्मजाम् ३० तमेवमुक्त्वा रुद
तीं सीतां मायामयीं तदा शितधारेण खड्गेन निजघानेंद्रजित्स्वयम् ३१ यज्ञोपवीतमार्गेण
छिन्ना तेन तपस्विनी सा पृथिव्यां पृथुश्रोणी पपात प्रियदर्शना तामिंद्रजित्स्त्रियं हत्वा हनूमंत
मुवाच ह ३३ मया रामस्य पश्येमां प्रियां शस्त्रनिषूदिताम् एषा विशस्ता वैदेही विफलो वः पराक्रमः
३४ ततः खड्गेन महता हत्वा तामिंद्रजित्स्वयम् हृष्टः स्वरथमास्थाय ननाद च महास्वनम् ३५ राम०
२९३

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri
Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

वानराः शुश्रुवुः शब्दम् दूरे विश्रवस्थिताः ॥ व्यादितास्यस्य नदतस्तद्दुर्गं संश्रितस्य च ॥२६॥ तथा तु सी
तां विनिहत्य सदुर्मतिः प्रहृष्टचेताः स बभूव रावणिः ॥ तं हृष्टरूपं समुदीक्ष्य वानरा विषण्णरूपाः समभिप्रदु
द्रुवुः ॥२७॥ इत्यार्षे श्रीमद्रामायणे युद्धकाण्डे एकाशीतितमः सर्गः ॥८१॥ श्रुत्वा तं भीमनिर्ह्रादं शक्राशनि
समस्वनम् वीक्षमाणा दिशः सर्वा दुद्रुवुर्वानरर्षभाः १ तानुवाच ततः सर्वान् हनूमान्मा
रुतात्मजः विषण्णवदनान्दीनान् त्रस्तान्विद्रवतः पृथक् २ कस्माद्विषण्णवदना विद्रवध्वं प्ल
वङ्गमाः त्यक्तयुद्धसमुत्साहाः शूरत्वं क्व नु वो गतम् ३ पृष्ठतोऽनुव्रजध्वं मामग्रतो यान्तमाहवे ए
वमुक्ताः सुसंक्रुद्धा वायुपुत्रेण धीमता शैलशृङ्गान्द्रुमांश्चैव जगृहुर्हृष्टमानसाः ४ अभिपे
तुश्च गर्जन्तो राक्षसान्वानरर्षभाः परिवार्य हनूमन्तमन्वयुश्च महाहवे ५ स तैर्वानरमुख्यैस्तु हनूमा
न्सर्वतो वृतः हुताशन इवार्चिष्मानदहच्छत्रुवाहिनीम् ६ स राक्षसानां कदनं चकार सुमहान्कपिः
वृतो वानरसैन्येन कालान्तकयमोपमः ७ स तु शोकेन चाविष्टः कोपेन महता कपिः हनूमान्राव
णिरथे महतीं पातयच्छिलाम् ८ तामापतन्तीं दृष्ट्वैव रथः सारथिना तदा विधेयाश्वसमायुक्तो

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

ए०वा०यु० विद्रामपर्वाहितः ९ तमिंद्रजितमप्राप्य परपस्येसमहतारथिम् विवेश धरणीं भित्वा सा शिला व्यर्थमु
२१४ द्यता १० पतितायां शिलायां तु व्यथिता रक्षसां चमूः निपतंत्या च शिलया राक्षसा मथिता भृशम्
११ तमभ्यधावं छतशोनदंतः काननौकसः ते द्रुमांश्च महाकायाः गिरिशृंगाणि चोद्यताः १२
क्षिपंतींद्रजितः सैन्ये वानरा भीमविक्रमाः वृक्षशैलमहावर्षं विसृजंतः प्लवंगमाः १३ शत्रूणां कद
नं चक्रुर्नेदुश्च विविधैः स्वनैः वानरैस्तैर्महाभीमैर्घोररूपा निशाचराः १४ वीर्यादभिहता वृक्षै
र्व्यचेष्टंत रणाश्रिता स्वसैन्यमभिवीक्ष्याथ वानरार्दितमिंद्रजित १५ परिगृह्यायुधं क्रुद्धः परान
भिमुखो ययौ स शरौघानवसृजन्स्वसैन्येनाभिसंवृतः १६ जघान कपिशार्दूलान्सुबहून्दृ
ष्टविक्रमः शूलैरशनिभिः खड्गैः पट्टिशैः कूटमुद्गरैः १७ ते चाप्यनुचरांस्तस्य वानरा जघ्नुराजसा
१८ सस्कंधविटपैः सालैः शिलाभिश्च महाबलः हनूमान्कदनं चक्रे रक्षसां भीमकर्मणाम् १९
स निवार्य परानीकमब्रवीत्तान्वनौकसः हनूमान्संनिवर्तध्वं न नः साध्यमिदं बलम् २० त्यक्त्वा एम०
प्राणान्विचेष्टंतो रामप्रियचिकीर्षवः यन्निमित्तं हि युध्यामो हता सा जनकात्मजा २१ इममर्थं हि २१४

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

विज्ञाप्य रामं सुग्रीवमेव च तौ यत्र तिष्ठतस्ते तत्करिष्यामहे वयम् २२ इत्युक्त्वा वानरश्रेष्ठो वान
रयन्सर्ववानरान् शनैः शनैरसंभ्रान्तः सबलः सन्यवर्तत २३ सतुप्रेक्ष्य हनूमंतं व्रजंतं यत्र राघवौ ॥ स
होतुकामो दुरात्मा गतश्चैत्यं निकुंभिलाम् २४ निकुंभिलामधिष्ठाय पावकं जुहुवेंद्रजित् ॥ यज्ञ
भूम्यां तु विधिवत्पावकस्तेन रक्षसा २५ हूयमानः प्रजज्वाल होमशोणितभुक् तदा ॥ सोर्चिःपिन
द्धो ददृशे होमशोणिततर्पितः संध्यागत इवादित्यः सुतीव्रोग्निः समुत्थितः ॥ २६ ॥ अथेंद्रजिद्राक्षस
भूतिहेतुर्जुहाव हव्यं विधिना विधानवित् दृष्ट्वा व्यतिष्ठंत च राक्षसास्ते महासमूहेषु नयानयज्ञाः
२७ ॥ इत्यार्षे श्रीमद्रामायणे युद्धकाण्डे द्व्यशीतितमः सर्गः ॥ ८२ ॥ राघवश्चापि विपुलं तं राक्षसव
नौकसाम् श्रुत्वा संग्रामनिर्घोषं जांबवंतमुवाच ह १ सौम्य नूनं हनुमता क्रियते कर्म दुष्करम्
श्रूयते हि यथा भीमः सुमहानायुधस्वनः २ तद्गच्छ कुरु साहाय्यं स्वबलेनाभिसंवृतः क्षिप्रमृक्ष
पते तस्य कपिश्रेष्ठस्य युध्यतः ३ ऋक्षराजस्तथेत्युक्त्वा स्वेनानीकेन संवृतः आगच्छत्पश्चिम
द्वारं हनूमान्यत्र वानरः ४ अथायांतं हनूमंतं ददर्शर्क्षपतिः पथि वानरैः कृतसंग्रामैः श्वसद्भि

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur

१०वा०पु० राभिसंवृतम् ५ दृष्ट्वा प्रपीडितं मां च वत्स दृष्टवलनमुद्यतम् नीलमेघनिभं भीमं सन्निवार्य प्रव
२१५ र्तिते ६ स तेन हरिसैन्येन सन्निकर्षं महायशाः शीघ्रमागम्य रामाय दुःखितो वाक्यमब्रवीत्
समरे युध्यमानानामस्माकं प्रेक्षतां पुरः जघान रुदतीं सीतामिन्द्रजिद्रावणात्मजः ८ इन्द्रजिता
तचित्तस्तां दृष्ट्वा विषण्णोऽहमरिंदम तदहं भवतो वृत्तं विज्ञापयितुमागतः ९ तस्य तद्वचनं श्रु
त्वा राघवः शोकमूर्छितः निपपात तदा भूमौ छिन्नमूल इव द्रुमः १० तं भूमौ देवसंकाशं प
तितं दृश्य राघवम् अभिपेतुः समुत्पत्य सर्वतः कपिसत्तमाः ११ असिंचन्सलिलैश्चैनं पद्मो
त्पलसुगन्धिभिः प्रदहन्तमसंहार्यं सहसाग्निमिवोत्थितम् १२ तं लक्ष्मणोऽथ बाहुभ्यां परि
ष्वज्य सुदुःखितः उवाच राममस्वस्थं वाक्यं हेत्वर्थसंयुतम् १३ शुभे वर्त्मनि तिष्ठन्तं त्वामार्य
विजितेन्द्रियम् अनर्थेभ्यो न शक्नोति त्रातुं धर्मो निरर्थकः १४ भूतानां स्थावराणां च जंगमा
नां च दर्शनम् यथास्ति न तथा धर्मस्तेन नास्तीति मे मतिः १५ यथैव स्थावरं व्यक्तं जंगमं रा०म०
च तथाविधम् नायमर्थस्तथा युक्तस्त्वद्विधो न विपद्यते १६ यद्यधर्मो भवेद्भूतो रावणो २१५

CC-0. In Public Domain. Digitized By Sarayu Foundation Trust and eGangotri

नरकं व्रजेत् भवांश्च धर्मसंयुक्तो नैव व्यसनमाप्नुयात् १७ तस्य च व्यसनाभावाद्व्यसनं च गते त्वयि
धर्मो भवत्यधर्मश्च परस्परविरोधिनौ १८ धर्मेणोपलभेद्धर्मम् अधर्मं चाप्यधर्मतः यद्यधर्मेण युज्ये
युर्येष्व धर्मः प्रतिष्ठितः १९ यदि धर्मेण युज्येरन्नाधर्मरुचयो जना धर्मेणाचरतां धर्मस्तत्स्यात्तेषां
फलं भवेत् २० यस्मादर्था विवर्द्धन्ते येष्वधर्मः प्रतिष्ठितः क्लिश्यन्ते धर्मशीलाश्च तस्मादेतौ निरर्थ
कौ २१ वध्यन्ते पापकर्माणो यद्यधर्मेण राघव वधकर्म हतो धर्मः स हतः कं वधिष्यति २२ अ
थवा विहितेनायं हन्यते हन्ति चापरम् विधिरालिप्यते तेन न स पापेन कर्मणा २३ अदृष्टप्रतिका
रेणाव्यक्तेनासता सता कथं शक्यं परं प्राप्तुं धर्मेणारिविकर्षण २४ यदि सत्स्यात्सतां मुख्य ना
सत्स्यात्तव किंचन त्वया यदीदृशं प्राप्तं तस्मात्सन्नोपपद्यते २५ अथवा दुर्बलः क्लीबो बलं ध
र्मोऽनुवर्त्तते दुर्बलो हृतमर्यादो न सेव्य इति मे मतिः २६ बलस्य यदि चेद्धर्मो गुणभूतः पराक्रमैः
धर्ममुत्सृज्य वर्त्तस्व यथा धर्मे तथा बले २७ अथ चेत्सत्यवचनं धर्मः किल परंतप अनृतस्त्व
य्यकरुणः किं न बद्धस्त्वया पिता २८ यदि धर्मो भवेद्भूत अधर्मो वा परंतप न स्म हत्वा मुनिं वज्री

Courtesy: Prof. Arnab Bhattacharya IIT Kanpur